This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1994 विषय महाभारत

नाव. राजधर्म (शान्तिपर्वणि) mss.

लेखक/लिपीकार विष्णुपंत दशपुत्र

पृष्ठ 148 काळ — पूर्ण/~~अपूर्ण~~

Checked 2017

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्मे इदं पुस्तकं

मे

नर

काम

तं म

त्रीत

वा

णि तेकु

यस्मिं त्रै गं धे य

लोकोयं १

मास्तजः॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न मः ॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ ॥ वैशंपायन उ० ॥
हतसुहृदांस्तेषां पांडुनंदनाः ॥ विदुरो धृतराष्ट्रश्च सर्वाश्च भरतस्त्रियः ॥ तत्र ते सुमहात्मानो न्यवसन् पांडुनंदनाः ॥ शौ
चं निर्वर्तयंतो मासमात्रं बहिःपुरात् ॥ कृतोदकं तु राजानं धर्मपुत्रं युधिष्ठिरं ॥ अभिजग्मुर्महात्मानः सिद्धा देवर्षिसत्तमाः
४ ॥ द्वैपायनो नारदश्च देवलश्च महानृषिः ॥ देवस्थानश्च कण्वश्च तेषां शिष्याश्च सत्तमाः ॥ अन्ये च वेदविद्वांसः कृतप्रज्ञा द्वि
जातयः ॥ गृहस्थाः स्नातकाः संतो ददृशुः कुरुसत्तमं ॥ तेभिगम्य महात्मानः पूजिताश्च यथाविधि ॥ आसनेषु महार्हेषु विविशु
स्ते महर्षयः ॥ प्रतिगृह्य ततः पूजां तत्कालसदृशीं तदा ॥ पर्युपासन् यथान्यायं परिवार्य युधिष्ठिरं ॥ पुण्ये भागीरथीतीरे शोक
व्याकुलचेतसं ॥ आश्वासयंतो राजानं विप्राः शतसहस्रशः ॥ नारदस्त्वब्रवीत् काले धर्मपुत्रं युधिष्ठिरं ॥ संभाष्य मुनिभिः सार्द्धं
कृष्णद्वैपायनादिभिः ॥ भवतो बाहुवीर्येण प्रसादान्माधवस्य च ॥ जितेयमवनी कृत्स्ना धर्मेण च युधिष्ठिर ॥ दिष्ट्या मुक्त
स्तु संग्रामादस्माल्लोकभयंकरात् ॥ क्षत्रधर्मरताश्चापि कच्चिन्मोदसि पांडव ॥ कच्चिच्च निहतामित्रः प्रीणासि सुहृदो नृप ॥
कच्चिच्छ्रियमिमां प्राप्य न त्वां शोकः प्रबाधते ॥ ॥ युधिष्ठिर उवाच ॥ ॥ विजितेयं मही कृत्स्ना कृष्णबाहुबलाश्रयात् ॥ ब्रा
ह्मणानां प्रसादेन भीमार्जुनबलेन च ॥ इदं तु मे महद्दुःखं वर्तते हृदि नित्यदा ॥ कृत्वा ज्ञातिक्षयमिमं महांतं लोभकारितं ॥ १

दर्प्पं४ ब्र.४ दुःखभागिनी २

सोभिमन्युर्द्रौपदेयाश्च घातयित्वा सुतान् प्रियान् ॥ जयोयमजयाकारो भगवन् प्रतिभाति मे ॥ किं नु वक्ष्यति वार्ष्णेयी वधूर्मे मधु
सूदन ॥ द्वारकावासिनी कृष्णमितः प्रतिगतं हरिं ॥ द्रौपदी हतपुत्रेयं कृपणा हतबांधवा ॥ अस्मत्प्रियहिते युक्ता भूयः पीड
यतीव मां ॥ इदमन्यच्च भगवान् यत्त्वां वक्ष्यामि नारद ॥ मंत्रसंवरणेनास्मि कुंत्या दुःखेन योजितः ॥ योसौ नागायुतबलो लो
के प्रतिरथो रणे ॥ सिंहखेलगतिर्धीमान् घृणी दाता यतव्रतः ॥ आश्रयो धार्तराष्ट्राणां मानी तीक्ष्णपराक्रमः ॥ अमर्षी
प्रा नित्यसंरंभी क्षेप्तास्माकं रणे रणे ॥ शीघ्रास्त्रश्चित्रयोधी च कृती चाद्भुतविक्रमः ॥ गूढोत्पन्नः सुतः कुंत्या भ्राता स्माकं च मा मसौकि ८५
तृजः ॥ अजानता मया भ्राता राज्यलुब्धेन घातितः ॥ तन्मे दहति गात्राणि तूलराशिमिवानलः ॥ नहि तं वेद पार्थोपि भ्रात
रं श्वेतवाहनः ॥ नाहं न भीमो न यमौ स त्वस्मान् वेद सुव्रतः ॥ गता किल पृथा तस्य सकाशमिति नः श्रुतं ॥ अस्माकं शमकामा
४ वि वै त्वं च पुत्रो ममेत्यथ ॥ पृथाया न कृतः कामस्तेन चापि महात्मना ॥ अतिपश्चादिदं मातर्यवोचदिति नः श्रुतं ॥ न हि शक्ष्या
शो म्यहं त्यक्तुं नृपं दुर्योधनं रणे ॥ अनार्यं च नृशंसं च कृतघ्नं च मे भवेत् ॥ युधिष्ठिरेण संधिं हि यदि कुर्यां मते तव ॥ भीतो रणे
श्वेतवाहादिति मां मन्यते जनः ॥ सोहं निर्जित्य समरे विजयं सह केशवं ॥ संधास्ये धर्मपुत्रेण पश्चादिति च सोब्रवीत् ॥
तमुवाच किल पृथा पुनः पृथुलवक्षसं ॥ चतुर्णामभयं देहि कामं युध्यस्व फाल्गुनं ॥ सोब्रवीन्मातरं धीमान्वेपमानो
सोयकमर्पितं कुंती कथयामास सूर्यजं ॥ पुत्रं सर्वगुणोपेतं मत्सकीर्णजिले पुरा ॥ मंजूषायां समाधाय गंगा
यसृतं पूत्र राधेयं चाप्यमन्यत ॥ स ज्येष्ठपुत्रः कुंत्या वै भ्राता स्माकं च मातृजः ॥ ६
लोकोयं

सोते सप्रकृत्ये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षद्यां१ नू१ स्व४ दि३

राजधर्म कृतांजलिः॥ पाण्डवान्विसत्यांश्चतुरो न हनिष्यामि ते सुतान्॥ पंचैव हि सुता देवि भविष्यंति तव ध्रुवं॥ सार्जुना वा हते कर्णे सकर्णा
२ वा हतेऽर्जुने॥ तं पुत्रगृद्धिनी भूयो माता पुत्रमथाब्रवीत्॥ भ्रातॄणां स्वस्ति कुर्वीथा येषां स्वस्ति चिकीर्षसि॥ एवमुक्त्वा किल
पृथा विसृज्योपययौ गृहान्॥ सोऽर्जुनेन हतो वीरो भ्राता भ्रात्रा सहोदरः॥ न चैव विवृतो मंत्रः पृथायास्तस्य वा विभो॥ अथ शू
रो महेष्वासः पार्थेनासौ निपातितः॥ अहं त्वज्ञासिषं पश्चात्स्वसोदर्यं द्विजोत्तम॥ पूर्वजं भ्रातरं कर्णं पृथाया वचनात्प्रभो॥
तेन मे दूयते तीव्रं हृदयं भ्रातृघातिनः॥ कर्णार्जुनसहायोऽहं जयेयमपि वासवं॥ सभायां क्लिश्यमानस्य धार्तराष्ट्रैर्दु
न६ रात्मभिः॥ सहसोत्पतितः क्रोधः कर्णं दृष्ट्वा प्रशाम्यति॥ यदा संश्य गिरो रूक्षाः शृणोमि कटुकोदयाः॥ सभायां गदतो द्यू ६६
ते दुर्योधनहितैषिणः॥ तदा नश्यति मे रोषः पादौ तस्य निरीक्ष्य ह॥ कुंत्या हि सदृशौ पादौ कर्णस्येति मतिर्मम॥ सादृश्य
हेतुमन्विच्छन्पृथायास्तस्य चैव ह॥ कारणं नाधिगच्छामि कथंचिदपि चिंतयन्॥ कथं नु तस्य संग्रामे पृथिवी चक्रमग्र
सत्॥ कथं तु शप्तो भ्राता मे तत्त्वं वक्तुमिहार्हसि॥ श्रोतुमिच्छामि भगवंस्त्वत्तः सर्वं यथातथं॥ भवान्हि सर्ववित् विद्वांल्लोके वे
द कृताकृतं॥ ॥शांतिपर्वणि राजधर्मे॥ ॥वैशंपायनः॥ ॥स एवमुक्तस्तु मुनिर्नारदो वदतां वरः॥ कथयामास तत्सर्वं
यथा शप्तः स सूतजः॥ ॥नारदः॥ ॥एवमेतन्महाबाहो यथा वदसि भारत॥ न कर्णार्जुनयोः किंचिदविषह्यं भवेद्रणे॥ २

न२

गुह्यमेतत्तु देवानां कथयिष्यामि ते नृप॥ तन्निबोध महाबाहो यथा वृत्तमिदं पुरा॥ क्षत्रं स्वर्गं कथं गच्छेच्छस्त्रपूतमिति प्रभो
घ२ संघर्षजननस्तस्मात्कन्यागर्भो विनिर्मितः॥ स बालस्तेजसा युक्तः सूतपुत्रत्वमागतः॥ चकारांगिरसां श्रेष्ठे धनुर्वेदं गु ग
रौ तदा॥ स बलं भीमसेनस्य फाल्गुनस्य च लाघवं॥ बुद्धिं च तव राजेंद्र यमयोर्विनयं तथा॥ सख्यं च वासुदेवेन बाल्ये
गांडीवधन्वनः॥ प्रजानामनुरागं च चिंतयानो व्यदह्यत॥ स सख्यमगमद्बाल्ये राज्ञा दुर्योधनेन वै॥ युष्माभिर्नित्यसंद्विष्टो
श्रा दैवाच्चापि स्वभावतः॥ विद्याधिकमथालक्ष्य धनुर्वेदे धनंजयं॥ द्रोणं रहस्युपागम्य कर्णो वचनमब्रवीत्॥ ब्रह्मास्त्रं वेत्तुमि
च्छामि सरहस्यनिवर्तनं॥ अर्जुनेन समं चाहं युध्येयमिति मे मतिः॥ समः शिष्येषु च स्नेहः पुत्रे चैव तव ध्रुवं॥ त्वत्प्रसादान्न
मां ब्रूयुरकृतास्त्रं विचक्षणाः॥ द्रोणस्तथोक्तः कर्णेन सापेक्षः फाल्गुनं प्रति॥ दौरात्म्यं चैव कर्णस्य विदित्वा तमुवाच ह॥ ब्रह्मा ल५
स्त्रं ब्राह्मणो विद्याद्यथावच्चरितव्रतः॥ क्षत्रियो वा तपस्वी यो नान्यो विद्यात्कथंचन॥ इत्युक्तोऽङ्गिरसां श्रेष्ठमामंत्र्य प्रतिपूज्य न्य४
च॥ जगाम सहसा रामं महेंद्रं पर्वतं प्रति॥ स तु राममुपागम्य शिरसाभिप्रणम्य च॥ ब्राह्मणो भार्गवोऽस्मीति गौरवेणाभ्य
गच्छत॥ रामस्तं प्रतिजग्राह पृष्ट्वा गोत्रादि सर्वशः॥ उष्यतां स्वागतं चेति प्रीतिमांश्चाभवद्भृशं॥ तत्र कर्णस्य वसतो महेंद्रे
स्वर्गसंनिभे॥ गंधर्वै राक्षसैर्यक्षैर्देवैश्चापि समागमः॥ स तत्रेष्वस्त्रमकरोद्भृगुश्रेष्ठाद्यथाविधि॥ प्रियश्चाभवदत्यर्थं दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म

३

वन्नान वरक्षसां॥ स कदाचित्समुद्रांते विचरन्नाश्रमांतिके॥ एकः खड्गधनुष्पाणिः परिचक्राम सूतजः॥ सोऽग्निहोत्रप्रसक्तस्य
कस्यचिद्ब्रह्मवादिनां॥ जघानाज्ञानतः पार्थ होमधेनुं यदृच्छया॥ तदज्ञानकृतं मत्वा ब्राह्मणाय न्यवेदयत्॥ कर्णः प्रसाद
यंश्चैवैनमिदमित्यब्रवीद्वचः॥ अबुद्धिपूर्वं भगवन्धेनुरेषा हता तव॥ मया तत्र प्रसादं मे कुरुष्वेति ततः पुनः॥ तत्स विप्रोऽब्रवीत्क्रु
द्धो वाचा निर्भर्त्सयन्निव॥ दुराचार वधार्हस्त्वं फलं प्राप्नुहि दुर्मते॥ येन विस्पर्द्धसे नित्यं यदर्थं घटसेऽनिशं॥ युध्यतस्तेन ते पा
प भूमिश्चक्रं ग्रसिष्यति॥ ततश्चक्रे महीग्रस्ते मूर्द्धानं ते विचेतसः॥ पातयिष्यति विक्रम्य शत्रुर्गच्छ नराधम॥ यथेयं गौर्हता
मूढ प्रमत्तेन त्वया मम॥ प्रमत्तस्य तथा चान्यः शिरस्ते पातयिष्यति॥ ततः प्रसादयामास कर्णस्तं द्विजसत्तमं॥ गोभिर्धनै
श्च रत्नैश्च स चैवैनं पुनरब्रवीत्॥ नेदं मद्व्याहृतं कुर्यात्सर्वलोकोऽपि केवलं॥ गच्छ वा तिष्ठ वा यद्वा कार्यं ते तत्समाचर॥ इत्युक्तो न५
ब्राह्मणेनाथ कर्णो दैन्यादधोमुखः॥ राममभ्यागमद्भीतस्तदेव मनसा स्मरन्॥ ॥ शांतिपर्वणि राजधर्मे॥ ॥ नारदः॥ ॥ क
र्णस्य बाहुवीर्येण प्रणयेन दमेन च॥ तुतोष भृगुशार्दूलो गुरुशुश्रूषया तथा॥ तस्मै स विधिवत्कृत्स्नं ब्रह्मास्त्रं सनिवर्तनं॥ प्रोवा
चाखिलमव्यग्रं तपस्वी सुतपस्विने॥ विदितास्त्रस्ततः कर्णो रममाणोऽऽश्रमे भृगोः॥ चकार वै धनुर्वेदे यत्नमद्भुतविक्रमः॥
ततः कदाचिद्रामस्तु चरन्नाश्रममंतिकात्॥ कर्णेन सहितो धीमानुपवासेन कर्शितः॥ सुष्वाप जामदग्न्यस्तु विस्रंभो ३

त्संमा॰ र्द्र वज्रमयो॰ द

त्यंतसौहृदः॥ कर्णस्योत्संग आधाय शिरः क्लिन्नमना गुरुः॥ अथ कृमिः श्लेष्ममेदोमांसशोणितभोजनः॥ दारुणो दारुणस्पर्शः मे
कर्णस्याभ्याशमागतः॥ स तस्योरुमथासाद्य बिभेद रुधिराशनः॥ न चैनमशकत्क्षेप्तुं हंतुं वापि गुरोर्भयात्॥ संदृश्यमानस्तु
तथा कृमिणा तेन भारत॥ गुरोः प्रबोधनाशंकी तमुपेक्षत सूतजः॥ कर्णस्तु वेदनां धैर्यादसह्यां विनिगृह्य तां॥ अकंपयन्नव्य प२
त थयन्धारयामास भार्गवं॥ यदास्य रुधिरेणांगं परिस्पृष्टं भृगूद्वहः॥ ततोऽबुध्यत तेजस्वी संतप्तश्चेदमब्रवीत्॥ अहो
ऽस्म्यशुचितां प्राप्तः किमिदं क्रियते त्वया॥ कथयस्व भयं त्यक्त्वा याथातथ्यमिदं मम॥ तस्य कर्णस्तदाचष्ट कृमिणा परिभक्ष
णं॥ ददर्श रामस्तं चापि कृमिं शूकरसंनिभं॥ अष्टपादं तीक्ष्णदंष्ट्रं सूचीभिरिव संवृतं॥ रोमभिः सन्निरुद्धांगमलर्कं द्ल
नाम नामतः॥ स दृष्टमात्रो रामेण कृमिः प्राणानवासृजत्॥ तस्मिन्नेवासृक्क्लिन्ने तदद्भुतमिवाभवत्॥ ततोंतरिक्षे
ददृशे विश्वरूपः करालवत्॥ राक्षसो लोहितग्रीवः कृष्णांगो मेघवाहनः॥ स रामं प्रांजलिर्भूत्वा बभाषे पूर्णमानसः॥ स्व
स्ति ते भृगुशार्दूल गमिष्येऽहं यथागतं॥ मोक्षितो नरकादस्माद्भवता मुनिसत्तम॥ तं दंतं वास्तु नंदे तांछियं मे भवता कृतं॥
तमुवाच महाबाहुर्जामदग्न्यः प्रतापवान्॥ कस्त्वं कस्माच्च नरकं प्रतिपन्नो ब्रवीहि तत्॥ सोऽब्रवीदहमासं प्राग्दंशो नाम
महासुरः॥ पुरा देवयुगे तात भृगोस्तुल्यवया इव॥ सोऽहं भृगोः सुदयितां भार्यामपहरं बलात्॥ महर्षेरभिशापेन कृमिभू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
५

तो पतं भुवि॥ अब्रवीच्च स मां क्रोधात्तव पूर्वपितामहः॥ मूत्रश्लेष्माशनः पापनिरयं प्रतिपत्स्यते॥ शापस्यांतो भवेद्ब्रह्मन्नित्यहं त
माथाब्रुवन्॥ भविता भार्गवाद्रामादिति मामब्रवीद्भृगुः॥ सोहमेतां गतिं प्राप्तो यथा न कुशलं तथा॥ त्वया साधो समाग
म्य विमुक्तः पापयोनितः॥ एवमुक्त्वा नमस्कृत्य ययौ रामं महासुरः॥ रामः कर्णं च सक्रोधमिदं वचनमब्रवीत्॥ अति दुः
खमिदं मूढ न जातु ब्राह्मणः सहेत्॥ क्षत्रियस्येव ते धैर्यं कामया सत्यमुच्यतां॥ तमुवाच ततः कर्णः शापाद्भीतः प्रसादय
न्॥ ब्राह्मणक्षत्रियाज्जातं सूतं मां विद्धि भार्गव॥ राधेयः कर्ण इति मां प्रवदंति जना भुवि॥ प्रसादं कुरु मे ब्रह्मन्नस्त्रलुब्ध
स्य भार्गव॥ पिता गुरुर्न संदेहो वेदविद्याप्रदः प्रभुः॥ अतो भार्गव इत्युक्तं मया गोत्रं तवांतिके॥ तमुवाच भृगुश्रेष्ठः सरोषः प्रद
हन्निव॥ भूमौ निपतितं दीनं वेपमानं कृतांजलिं॥ यस्मान्मिथ्योपचीर्णोहमस्त्रलोभादिह त्वया॥ तस्मादिहं न ते मूढ ब्र देतन्न
ह्मास्त्रं प्रतिभास्यति॥ अन्यत्र वधकालात्ते सदृशेन समेयुष॥ अब्राह्मणे न हि ब्रह्म ध्रुवं तिष्ठेत्कदाचन॥ गच्छेदानीं न तेस्था
नमनृतस्येह विद्यते॥ न त्वया सदृशो युद्धे भविता क्षत्रियो भुवि॥ एवमुक्तः स रामेण न्यायेनोपजगाम ह॥ दुर्योधनमुपा
गम्य कृतास्त्रोस्मीति चाब्रवीत्॥ ॥शांतिपर्वणि राजधर्मे॥ ॥नारदः॥ ॥कर्णस्तु समवाप्यैवमस्त्रं भार्गवनंदनात्॥
दुर्योधनेन सहितो मुमुदे भरतर्षभ॥ ततः कदाचिद्राजानः समाजग्मुः स्वयंवरे॥ कलिंगविषये राजन्राज्ञश्चित्रां ५

श्रीमद्राजपुरं नाम नगरं तत्र भारत॥१

च१
गदस्य ह॥ राजानः शतशस्तत्र कन्यार्थे समुपागमन्॥ श्रुत्वा दुर्योधनस्तत्र समेतान्सर्वपार्थिवान्॥ रथेन कांचनांगेन क
र्णेन सहितो ययौ॥ ततः स्वयंवरे तस्मिन्संप्रवृत्ते महोत्सवे॥ समाजग्मुर्नृपतयः कन्यार्थे नृपसत्तम॥ शिशुपालो जरासं
धो भीमको वक्रएव च॥ कपोतरोमा नीलश्च रुक्मी च दृढविक्रमः॥ शृगालश्च महाराज स्त्रीराज्याधिपतिश्च यः॥ अ
शोकः शतधन्वा च भोजो वीरश्च नामतः॥ एते चान्ये च बहवो दक्षिणां पथमाश्रिताः॥ म्लेच्छाचार्याश्च राजानः प्राच्योदीच्या
स्तथैव च॥ कांचनांगदिनः सर्वे शुद्धजांबूनदप्रभाः॥ सर्वे भासुरदेहाश्च व्याघ्रा इव बलोत्कटाः॥ ततः समुपविष्टेषु तेषु
राजसु भारत॥ विवेश रंगं सा कन्या धात्रीवर्षवरान्विता॥ ततः संश्राव्यमाणेषु राज्ञां नामसु भारत॥ अत्यक्रामद्धार्तरा
ष्ट्रं सा कन्या वरवर्णिनी॥ दुर्योधनस्तु कौरव्यो नामर्षयत लंघनं॥ प्रत्यषेधत्तां कन्यामसत्कृत्य नराधिपान्॥ स वीर्य
मदमत्तत्वाद्भीष्मद्रोणावुपाश्रितः॥ रथमारोप्य तां कन्यामाजुहाव नराधिपान्॥ तमन्वयाद्रथी खड्गी बद्धगोधांगुलि
त्रवान्॥ कर्णः शस्त्रभृतां श्रेष्ठः पृष्ठतः पुरुषर्षभ॥ ततो विमर्दः सुमहान्राज्ञामासीद्युयुत्सतां॥ संनह्यतां तनुत्राणि
रथान्योजयतामपि॥ तेभ्यधावंत संक्रुद्धाः कर्णदुर्योधनावुभौ॥ शरवर्षाणि मुंचंतो मेघाः पर्वतयोरिव॥ कर्णस्तेषा
मापततामेकैकेन क्षुरेण ह॥ धनूंषि सशरावापान्पातयामास भूतले॥ ततो विधनुषः कांश्चित्कांश्चिदुद्यतकार्मुका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्मं॰
श्री
५

न्॥ कांपिल्ये हि हतैवापाञ्चशक्तिगदास्त्रया॥ लाघवाद्याकुलीकृत्य कर्णप्रहतांवरः॥ हतस्तांश्च भयिष्ठान् वर्जितयेन चा
धिपान्॥ ते स्वयंवाहयंतो श्चान्यान्हियाही विवादिनः॥ वपेयुस्तेन पंहिता राज्ञानो भग्नमानसाः॥ दुर्योधनस्तु कर्णेन पाल्यमा
नोभ्ययात्तदा॥ हृष्टः कन्यामुपादाय नगरं नागसाह्वयं॥ ॥इति श्रीशांतिपर्वणि राजधर्मे॥ ॥नारदः॥ ॥आविष्कृतबलं सर्वं
र्णस्य त्वा राजा समागधः॥ आह्वयद्वैरथेनाजौ जरासंधो महीपतिः॥ तयोः समभवद्युद्धं दिव्यास्त्रविदुषोर्द्वयोः॥ युधिनाना
प्रहरणैरन्योन्यमभिवर्षतोः॥ क्षीणबाणौ विधनुषौ भग्नखड्गौ महीपतिः॥ बहुभिः समसज्जेतामुभावपि बलान्वितौ॥ बा गतो ५
हुकंटकयुद्धेन तस्य कर्णोथ युध्यतः॥ विभेद संधिं देहस्य जरया श्लेषितस्य हि॥ सविकारं शरीरस्य दृष्ट्वा नृपतिरात्मनः॥ प्री
तोस्मीत्यब्रवीत्कर्णं वैरमुत्सृज्य दूरतः॥ प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ॥ अंगेषु नरशार्दूल स राजासीत्सपालजित्॥ ततन ६
वैपां ५ पालयामास रम्पांच कर्णः परबलार्दनः॥ दुर्योधनस्यानुमते तवापि विदितं तथा॥ एवं शास्त्रप्रतापेन प्रथितः सोभवत्क्षितौ॥ न ५
त्वद्धितार्थं सुरेंद्रेण भिक्षितो वर्मकुंडले॥ स दिव्ये सहजे प्रादात्कुंडले परमार्चिते॥ सहजं कवचं चापि मोहितो देवमायया॥ विमु
क्तः कुंडलाभ्यां च सहजेन च वर्मणा॥ निहतो विजयेनाजौ वासुदेवस्य पश्यतः॥ ब्राह्मणस्याभिशापेन रामस्य च महात्मनः॥ कुं
त्याश्च वरदानेन मायया च शतक्रतोः॥ भीष्मावमानात्संख्यायां रथस्यार्धकीर्तनात्॥ शल्यात्तेजोवधाच्चापि वासुदेवन
येन च॥ रुद्रस्य देवराजस्य यमस्य वरुणस्य च॥ कुबेरद्रोणयोश्चैव कृपस्य च महात्मनः॥ अस्त्राणि दिव्यान्यादाय युधि ५
श्रा२

गांडीवधन्वना॥ हतो वैकर्तनः कर्णो दिवाकरसमद्युतिः॥ एवं शप्तस्तव भ्राता बहुभिश्चापि वंचितः॥ न शोच्यः पुरुषव्याघ्र युद्धे
न निधनं गतः॥ ॥शांतौ राजधर्मे॥ ॥वैशंपायनः॥ ॥एतावदुक्त्वा देवर्षिर्विरराम स नारदः॥ युधिष्ठिरस्तु राजर्षिर्दध्यौ शोकप
न रिप्लुतः॥ तं दीनमनसं वीरं शोकोपहतमातुरं॥ निःश्वसंतं यथा नागं पर्यश्रुनयनं तथा॥ कुंती शोकपरीतांगी दुःखोपहतचेतना॥
अब्रवीन्मधुरालापा काले वचनमर्थवत्॥ युधिष्ठिर महाबाहो नैनं शोचितुमर्हसि॥ जहि शोकं महाबाहो शृणु चेदं वचो
मम॥ याचितः स मया पूर्वं भ्रातृत्वं ज्ञापयितुं तव॥ भास्करेण च देवेन पित्रा धर्मभृतां वर॥ यद्वाच्यं हितकामेन सुहृदा हितमि
च्छता॥ तथा दिवाकरेणोक्तः स्वप्नांते मम चाग्रतः॥ न चैनमशकद्भानुरहं स्नेहकारणैः॥ पुरा प्रत्यनुनेतुं नौ नेवाप्येकतां तुं वा गंतुं ६
स्योद्धर तया॥ तथा कालपरीतस्स वैरस्योद्धरणे रतः॥ प्रतीपकारी युष्माकमिति चोपेक्षितो मया॥ इत्युक्तो धर्मराजस्तु मात्रा बाष्पाकुले
णे ६ क्षणः॥ उवाच वाक्यं धर्मात्मा शोकव्याकुलितेंद्रियः॥ भवत्या गूढमंत्रत्वात्पीडितोस्मीत्युवाच तां॥ शशाप च महातेजाः सर्वलोके
षु योषितः॥ न गुह्यं धारयिष्यंतीत्येवं दुःखसमन्वितः॥ स राजा पुत्रपौत्राणां संबंधिसुहृदां तथा॥ स्मरन्नुद्विग्नमनसो बभू
वोद्विग्नचेतनः॥ ततः शोकपरीतात्मा सधूम इव पावकः॥ निर्वेदमगमद्धीमान्राजा संतापपीडितः॥ ॥शांतौ राजधर्मे॥ ॥वै
शंपायनः॥ ॥युधिष्ठिरस्तु धर्मात्मा शोकव्याकुललोचनः॥ शुशोच दुःखसंतप्तः स्मृत्वा कर्णं महारथं॥ आविष्टो दुःखशोका
भ्यां निश्वसंश्च पुनःपुनः॥ दृष्ट्वार्जुनमुवाचेदं वचनं शोककर्षितः॥ ॥युधिष्ठिरः॥ ॥यद्भैक्ष्यमाचरिष्याम वृष्ण्यंधकपुरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रान्

विभ्रासोवन २

राजधर्म॰ वयं॥ ज्ञातीन्निपुत्रुषी कृत्वा न मां प्राशस्यामि दुर्मतिं॥ अमित्रा नः समृद्धार्थाः कृतार्थाः कुरवः किल॥ आत्मानमात्मना हत्वा किं ध-

र्मफलमाप्नुमः॥ धिगस्तु क्षत्रमाचारं धिगस्तु बलपौरुषं॥ धिगमर्षं येनेमामापदं प्रापिता वयं॥ साधु क्षमा दमः शौ-

६ चं वैराग्यं चाथ मत्सरं॥ अहिंसा सत्यवचनं नित्यानि वनचारिणां॥ वयं तु लोभमोहाभ्यां दंभं मानं च संश्रिताः॥ इमामवस्थां

संप्राप्ता राज्यलब्धाबुभुक्षया॥ त्रैलोक्यस्यापि राज्येन नस्मान्कश्चित्प्रहर्षयेत्॥ बांधवान्निहतान्दृष्ट्वा पृथिव्यां विजयैषि-

णः॥ ते वयं पृथिवीहेतोरवध्यान्पृथिवीसमान्॥ संपरित्यज्य जीवामो हीनार्था हतबांधवाः॥ आमिषे गृध्यमानानामशु-

भं वै शुनामिव॥ आमिषे चैव नो लाभो नामिषस्य विवर्जनं॥ न पृथिव्या सकलया न सुवर्णस्य राशिभिः॥ न गवाश्वेन स-

र्वेण ते त्याज्या य इमे हताः॥ काममन्युपरीतास्ते क्रोधहर्षसमन्विताः॥ मृत्युयानं समारुह्य गता वैवस्वतक्षयं॥ बहु कल्या-

णमिच्छंति ईहंते पितरः सुतान्॥ तपसा ब्रह्मचर्येण वंदनेन तितिक्षया॥ उपवासैस्तथेज्याभिर्व्रतकौतुकमंगलैः॥ ल-

भंते मातरो गर्भान्मासान्दश च बिभ्रति॥ यदि स्वस्ति प्रजायंते जाता जीवंति वा यदि॥ संभाविता जातबलास्ते दद्युर्यदि नः

सुखं॥ इह चामुत्र चैवेति कृपणाः फलहेतवः॥ तासामयं समुद्योगो निवृत्तः केवलोऽफलः॥ यदासां निहताः पुत्रा युवानो

देवताभ्य मृष्टकुंडलाः॥ अभुक्त्वा पार्थिवान्भोगानृणान्यनपहाय च॥ पितृभ्यो देवताभ्यश्च गता वैवस्वतक्षयं॥ यदैषामंब पितरौ जा-

बलरूपे॰ तकामावुभावपि॥ संजातधनरत्नेषु तदैव निहता नृपाः॥ संयुक्ताः काममन्युभ्यां क्रोधहर्षसमंजसाः॥ न ते जयफले ६

पानि कृत्याबंधितावयं ॥२

किंचिद्भोक्तारो जातु कर्हिचित्॥ पंचालानां कुरूणां च हता एव हि ये हताः॥ न चेत्सर्वो न यं लोकः पश्येत्त्वेनैव कर्म-

णा॥ वयमेवास्य लोकस्य विनाशे कारणं स्मृताः॥ धृतराष्ट्रस्य पुत्रे तु प्रत्यसर्वं प्रतिपश्यंति॥ सदैव निकृतिप्रज्ञो

द्वेष्टा मायोपजीविनः॥ मिथ्याविनीतः सततमस्मास्वपैनेकारिषु॥ न च कामा वयं ते च न चास्माभिर्न तैर्जितं॥ न तैर्भु- महामतिं६

क्तेयमवनी न नार्यो गीतवादितं॥ नामात्यसुहृदो वाक्यं न च श्रुतवतां श्रुतं॥ न रत्नानि परार्ध्यानि न क्ष्मा न द्रविणाग-

मः॥ अस्मद्द्वेषेण संतप्तः सुखं न स्मेह विंदति॥ ऋद्धिमस्मासु तां दृष्ट्वा विवर्णो हरिणः कृशः॥ धृतराष्ट्रस्य नृपतेः वैदु

सौबलेन निवेदितः॥ तं पिता पुत्रगृध्नुत्वादनुमेनेऽनपेक्षितं॥ अनपेक्ष्यैव पितरं गांगेयं विदुरं तथा॥ असंशयं धृत- विदुरं६

राष्ट्रो यथैवाहं तथा गतः॥ अनियम्याशुचिं लुब्धं काम पुत्रं वशानुगं॥ यशसा पतितो दीप्तो घातयित्वा सहोदरान्॥ म

इमौ हि वृद्धौ शोकाग्नौ प्रक्षिप्य स सुयोधनः॥ अस्मत्प्रद्वेषसंयुक्तः पापबुद्धिः सदैव हि॥ को हि बंधुः कुलीनस्य यथा

युत्सवा २ ब्रूयात्सुहृज्जने॥ यथायमवदद्वाक्यं युयुत्सुर्दृष्टिसंनिधौ॥ आत्मनो हि वयं दोषाद्विनष्टाः शाश्वतीः समाः॥ प्रदहंतो

दिशः सर्वा भास्करा इव तेजसा॥ सोऽस्माकं वैरपुरुषो दुर्मतिः प्रग्रहं गतः॥ दुर्योधनकृते ह्येतत्कुलं नो विनिपातितं॥

अवध्यानां वधं कृत्वा लोके प्राप्स्याम वाच्यतां॥ कुलस्यास्यांतकरणं दुर्मतिं पापपूरुषं॥ राजा राष्ट्रेश्वरं कृत्वा धृतराष्ट्रो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म

८ यशो भवति ॥ हताः शूराः कृतं पापं विषयः स्वो विनाशितः ॥ हत्वा नो विगतो मन्युः शोको मां रुन्धयत्ययं ॥ धनंजय कृतं पा
पं कल्याणेनोपहन्यते ॥ ख्यापनेनानुतापेन दानेन तपसापि च ॥ निवृत्त्या तीर्थगमनाच्छ्रुतिस्मृतिजपेन च ॥ त्यागवां
श्च पुनः पापं नालं कर्तुमिति श्रुतिः ॥ त्यागवाञ्जन्ममरणे नाप्नोतीति श्रुतिर्यदा ॥ प्राप्तवर्त्मा कृतमतिर्ब्रह्म संपद्यते त
दा ॥ स धनंजय निर्द्वन्द्वो मुनिर्ज्ञानसमन्वितः ॥ वनमामंत्र्य वः सर्वान्गमिष्यामि परंतप ॥ न हि कृत्स्नतमो धर्मः शक्यः
स्ट प्राप्तुमिति श्रुतिः ॥ परिग्रहवता तन्मे प्रत्यक्षमरिसूदन ॥ मया निसृष्टं पापं हि परिग्रहमभीप्सता ॥ जन्मक्षयनिमित्तं च प्रा
प्तुं शक्यमिति श्रुतिः ॥ स परिग्रहमुत्सृज्य कृत्स्नं राज्यं तथैव च ॥ गमिष्यामि विनिर्मुक्तो विशोको निर्ममः क्वचित् ॥ प्र
शाधि त्वमिमामुर्वीं क्षेम्यां निहतकंटकां ॥ न ममार्थो हि राज्येन भोगैर्वा कुरुनंदन ॥ एतावदुक्त्वा वचनं कुरुराजो युधिष्ठि
रः ॥ उपारमं ततः पार्थः कनीयान्समभाषत ॥ ॥ शांतिपर्वणि राजधर्मे ॥ ॥ वैशंपायनः ॥ ॥ अथार्जुन उवाचेदमधि
दृढपरिग्रहे क्षिप्त इवाक्षमी ॥ अभिनीततरं वाक्यं दृढवादपराक्रमः ॥ दर्शयन्नैंद्रियात्मानमुग्रमुग्रपराक्रमः ॥ स्मयमानो महा
तेजाः सृक्किणी परिसंलिहन् ॥ ॥ अर्जुनः ॥ ॥ अहो दुःखमहो कृच्छ्रमहो वैक्लव्यमुत्तमं ॥ यत्कृत्वामानुषं कर्म त्यजे ८
थाः श्रियमुत्तमां ॥ शत्रून्हत्वा महीं लब्ध्वा स्वधर्मेणोपपादितां ॥ एवंविधं कथं सर्वं त्यजेथा बुद्धिलाघवात् ॥ क्लीब
धर्मे

स्य हि कुतो राज्यं दीर्घसूत्रस्य वा पुनः ॥ किमर्थं च महीपालानवधीः क्रोधमूर्छितः ॥ यो ह्याजिजीविषेद्भैक्ष्यं धर्मेणाने
व कस्यचित् ॥ स मार्गं भोक्तुमर्हेत हतस्वस्तिरकिंचनः ॥ सर्वलोके श्रुतिख्यातो न पुत्रपशुसंहितः ॥ कपालीं नृप पापि
ष्ठां वृत्तिमास्थाय जीवितः ॥ संत्यज्य राज्यमृद्धं ते लोकोऽयं किं वदिष्यति ॥ सर्वारंभान्समुत्सृज्य हतस्वस्तिरकिंचनः ॥ कस्मा
दाशंससे भैक्ष्यं कर्तुं प्राकृतवत्प्रभो ॥ अस्मिन्राजकुले जातो हत्वा कृत्स्नां वसुंधरां ॥ धर्मार्थविहीनो हित्वा वनं मौढ्यात्स
तिष्ठसे ॥ यदीमानि हवींषीह विमथिष्यंत्यसाधवः ॥ भवता विप्रहीनानि प्राप्तं त्वामेव किल्बिषं ॥ आकिंचन्यं मुनीनां च इ
न ति वै नहुषोऽब्रवीत् ॥ कृत्वा नृशंसं ह्यधने धिगस्त्वधनतामिह ॥ अश्वस्तनमृषीणां हि विद्यते वेद तद्भवान् ॥ यत्विमं धर्म
मित्याहुर्धनादेष प्रवर्तते ॥ धर्मं संहरते तस्य धनं हरति यस्य सः ॥ ह्रियमाणे धने राजन्वयं कस्य क्षमेमहि ॥ अभिशं
प्र स्तं वत्पश्यंति दरिद्रं पार्श्वतः स्थितं ॥ दारिद्र्यं पातकं लोके कस्तच्छंसितुमर्हति ॥ पतितः शोच्यते राजन्निर्धनश्चापि शोच्य
ते ॥ विशेषं नाधिगच्छामि पतितस्याधनस्य च ॥ अर्थेभ्यो हि विवृद्धेभ्यः संभृतेभ्यस्ततस्ततः ॥ क्रियाः सर्वाः प्रवर्तंते समुद्रेभ्य
इवापगाः ॥ अर्थाद्धर्मश्च कामश्च स्वर्गश्चैव नराधिप ॥ प्राणयात्रा हि लोकस्य विना ह्यर्थं न सिध्यति ॥ अर्थेन हि विहीन
स्य पुरुषस्याल्पमेधसः ॥ व्युच्छिद्यंते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बांधवाः ॥ य
स्यार्थाः स पुमांल्लोके यस्यार्थाः स च पंडितः ॥ अधनेनार्थकामेन नार्थः शक्यो विधीसितुं ॥ अर्थैरर्था निबाध्यंते गजैरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

८

वमहाराजः॥ धर्मः कामश्च स्वर्गश्च हर्षः क्रोधः श्रुतं दमः॥ अर्थादेतानि सर्वाणि प्रवर्तंते नराधिप॥ धनात्कुलं प्रभवति धनाद्ध
र्मः प्रवर्तते॥ नाधनस्यास्त्ययं लोको न परः पुरुषोत्तम॥ नाधनो धर्मकृत्यानि यथावदनुतिष्ठति॥ धनाद्धि धर्मः स्रवति शैला
द्गिरिनदी यथा॥ यः कृशाश्वः कृशगवः कृशभृत्यः कृशातिथिः॥ स वै राजन्कृशो नाम न शरीरकृशः कृशः॥ अवेक्ष्य
स्व यथान्यायं पश्य देवासुरं यथा॥ राजन्किमन्यज्ज्ञातीनां वधादृध्यंति देवताः॥ न चेद्धर्तव्यमन्यस्य कथं तद्धर्ममाचरे
त्॥ एतावानेव वेदेषु निश्चयः कविभिः कृतः॥ अध्येतव्या त्रयी नित्यं भवितव्यं विपश्चिता॥ सर्वथा धनमाहार्यं यष्टव्यं चापि
यत्नतः॥ यागान्देवैरवाप्तानि स्थानानि दिवि सर्वशः॥ इति देवा व्यवसिता वेदवादाश्च शाश्वताः॥ अधीयंते ध्यापयंति प
यद्व्या दततेह जंते याजयंत्यपि॥ कृत्स्नं तदेव च श्रेयो यदप्याददन्यतेन्यतः॥ न पश्यामि न पकृतं धनं किंचित्क्वचिद्वयं॥ एवमेव च राजा
नो जयंति पृथिवीमिमां॥ जित्वा ममत्वं ब्रुवते पुत्रा इव पितुर्धनं॥ राजर्षयो जितस्वर्गा धर्मो येषां निगद्यते॥ यथैव पूर्णादु
दधेः स्यंदत्यापो दिशो दश॥ एवं राजकुलाद्वित्तं पृथिवीं प्रतितिष्ठति॥ आसीदियं दिलीपस्य नृगस्य नहुषस्य च॥ अंबरीष
स्य मांधातुः पृथिवी सा त्वयि स्थिता॥ स त्वं द्रव्यमयो यज्ञः संप्राप्तः सर्वदक्षिणः॥ स चेन्न यजसे राजन्प्राप्स्यसे राजकि
ल्बिषं॥ येषां राजाश्वमेधेन यजते दक्षिणावता॥ उपेत्य तस्यावभृथं पूतास्ते भवंति ते॥ विश्वरूपो महादेवः सर्वमेधे म
हामखे॥ जुहाव सर्वभूतानि तथैवात्मानमात्मना॥ शाश्वतोयं भूतिपथो नास्यांतमनुशुश्रुम॥ महान्दाशरथः पंथा ८

हिम०ः३ मां२ ब४२

मा राजन्कापथं गमः॥ ॥इति शांतिपर्वणि राजधर्मे॥ ॥युधिष्ठिरः॥ ॥मुहूर्तं तावदेकाग्रो मनःश्रोत्रेंतरात्मनि॥
धारयन्नपि तं श्रुत्वा रोचेत वचनं मम॥ साधुगम्यमहं मार्गं न जातु त्वत्कृते पुनः॥ गच्छेयं तद्गमिष्यामि हित्वा ग्राम्यसु
न्यतः१३ खान्युत॥ क्षेम्यश्चैकाकिना गम्यः पंथाः कोस्तीति पृच्छ तां॥ अथवा नेच्छसि द्रष्टुमपृच्छन्नपि मे शृणु॥ हित्वा ग्राम्य
रा१४ सुखाचारं तप्यमानो महत्तपः॥ अरण्ये फलमूलाशी चरिष्यामि मृगैः सह॥ जुहृानोग्निं यथाकालमुभौ कालावुप ला४
स्पृशन्॥ कृशः परिमिताहारश्चर्मचीरजटाधरः॥ शीतवातातपसहः क्षुत्पिपासाश्रमक्षमः॥ तपसा विधिदृष्टेन
शरीरमुपशोषयन्॥ मनःकर्णसुखा नित्यं शृण्वन्नुच्चावचा गिरः॥ मुदितानामरण्ये वनवैतां मृगपक्षिणां॥ आ ६
न् जिघ्रन्पेशलान्गंधान्फुल्लानां वृक्षवीरुधां॥ नानारूपान्वने पश्यन्रमणीयान्वनौकसः॥ वानप्रस्थजनस्यापि
दर्शनं कुलवासिनः॥ नाप्रियाण्याचरिष्यामि किं पुनर्ग्राम्यवासिनां॥ एकांतशीली लौच्यं च नरः पक्वापक्वेन वर्तयन्॥ ये
कृ३ पितॄन्देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन्॥ एवमारण्यशास्त्राणामुग्रमुग्रतरं विधिं॥ सेवमानः प्रतीक्षिष्ये दे
हस्यास्य समापनं॥ अथवैकोहमेकैकमेकैकं मपि चाश्रमं॥ रूक्षशैक्ष्यं मुनिर्मुंडः क्षपयिष्ये कलेवरं॥ पांसुभिः
समवध्वस्तः शून्यागारप्रतिश्रयः॥ वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः॥ न शोचन्न प्रहृष्यंश्च तुल्यनिं
मेकाहमेकैकस्मिन्वनस्पतौ॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

व९ न   न्य ५ स्वल्पं ६

टी १ दान्तः संन्यस्तु तिः ॥ निराशी निर्ममो भूत्वा निर्द्वंद्वो निष्परिग्रहः ॥ आत्मारामः प्रसन्नात्मा जडांधबधिराकृतिः ॥ न कुर्वाणः
१ वि २ परैः कांश्चित्संविदं जातु केनचित् ॥ जंगमाजंगमान्सर्वान्विहिंसंश्चतुर्विधान् ॥ प्रजाः सर्वाः स्वधर्मस्थाः समः प्राणभृतः
प्रति ॥ न चाप्यवहसन्कंचिन्न कुर्वन्भ्रुकुटीं क्वचित् ॥ प्रसन्नवदनो नित्यं सर्वेंद्रियसुसंयतः ॥ अपृच्छन्कस्यचिन्मार्गं
व्रजन्नेव तु केनचित् ॥ न देशं न दिशं कांचिद्गन्तुमिच्छन्विशेषतः ॥ गमने निरपेक्षश्च पश्चान्नावलोकयन् ॥ ऋजुः प्र
व ५ णिहितो गच्छन्त्रसस्थावरवर्जकः ॥ स्वभावस्तु व्रजत्यग्रे प्रभवंत्यशनानि पि ॥ द्वंद्वानि च विरुद्धानि सर्वाण्यप्यविचिंत
ल्यं ६ यन् ॥ अल्पं वा स्वादु भोज्यं वा पूर्वालाभेन जातुचित् ॥ अन्येष्वपि चरं ल्लाभमलाभे सप्त पूरयन् ॥ विधूमे न्यस्तमुस अन्यै
ले व्यंगारे भुक्तवज्जने ॥ अतीते पात्रसंचारे काले विगतभिक्षुके ॥ एककालं चरन्भैक्ष्यं त्रीन्नथ द्वे च पंच वा ॥ स्नेहा रपि चरं
पाशान्विमुच्याहं चरिष्यामि महीमिमां ॥ अलाभे सति वा लाभे समदर्शी महातपाः ॥ न जिजीविषुवत्किंचिन्न मुमूर्षुवदा
चरन् ॥ जीवितं मरणं चैव नाभिनंदन्न च द्विषन् ॥ वास्यैकं तक्षतो बाहुं चंदनेनैकमुक्षतः ॥ नाकल्याणं न कल्याणं चिंत
यन्नुभयोस्तयोः ॥ याः काश्चिज्जीवता शक्याः कर्तुमभ्युदयक्रियाः ॥ सर्वास्ताः समभित्यज्य निमेषादिव्यवस्थिताः ॥ तेषु १
नित्यमशक्तश्च त्यक्तसर्वेंद्रियक्रियः ॥ सुपरित्यक्तसंकल्पः सुविमुक्तात्मकल्मषः ॥ विमुक्तः सर्वसंगेभ्यो व्यतीतः
सु १

नुरा॥ म २   स्त्रायं   ति २

सर्ववागुरुः ॥ न वशे कस्यचित्तिष्ठन्सधर्मा मातरिश्वनः ॥ वीतरागश्चरन्नेवं तुष्टिं प्राप्स्यामि शाश्वतीं ॥ तृष्णया पि
महत्पापं सैस्तानादृश्मि कापतः ॥ कुशलाकुशलान्येके कृत्वा कर्मणि मानवाः ॥ कार्यकारणसंश्लिष्टं स्वजनं नाम
बिभ्रति ॥ आयुषोंते प्रहायेदं क्षीणप्रायं कलेवरं ॥ प्रतिगृह्णाति तत्पापं कर्तुः कर्मफलं हि तत् ॥ एवं संसारचक्रेऽस्मि
न्व्याविद्धे रथचक्रवत् ॥ समेति भूतग्रामोऽयं भूतग्रामेण कार्यवित् ॥ जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतं ॥
अपारमिव चास्वस्थं संसारं त्यजतः सुखं ॥ दिवः पतत्सु देवेषु स्थानेभ्यश्च महर्षिषु ॥ को हि नाम भवेनार्थी भवेत्कार नाम
णतत्त्ववित् ॥ कृत्वा हि विविधं कर्म तत्तद्विविधलक्षणं ॥ पार्थिवैर्नृपतिः स्वल्पैः कारणैरेव बध्यते ॥ तस्मात्प्रज्ञा
म मृतमिदं चिरान्मां पर्युपस्थितं ॥ तत्प्राप्य प्रार्थये स्थानमव्ययं शाश्वतं ध्रुवं ॥ एतया सततं वृत्त्या चरन्नेवं प्रकारया ॥ यं ज्ञा
जन्ममृत्युजराव्याधिवेदनाभिरुपद्रुतं ॥ देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः ॥ ॥ शांतिपर्वणि राजधर्मे ॥ श्वतं ७
॥ ॥ भीम उवाच ॥ ॥ श्रोत्रियस्येव ते राजन्मंदकस्याविपश्चितः ॥ अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥ आलस्ये
कृतचित्तस्य राजधर्मान्नसूयतः ॥ विनाशो धार्तराष्ट्राणां किं फलं भरतर्षभ ॥ क्षमानुकंपा कारुण्यमानृशंस्यं न विद्य कंपार
ते ॥ क्षात्रमाचरतो मार्गमपि बंधोस्त्वदंतरे ॥ यदीमां भवतो बुद्धिं विद्याम वयमीदृशीं ॥ शास्त्रं नैव ग्रहीष्यामो न
ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
१०
मही

वधिष्याम अकिंचन॥ भैक्ष्यमेवाचरिष्यामः शरीरस्य विमोचनात्॥ नचेदं दामुपंयुद्धमनविष्यन्महीक्षितौ॥ प्राण
स्यान्नमिदं सर्वमिति वै कवयो विदुः॥ स्थावरं जंगमं चैव सर्वं प्राणस्य भोजनं॥ आददानस्य चेद्राज्यं ये केचित्परिपं
थिनः॥ हंतव्यास्त इति प्राज्ञाः क्षत्रधर्मविदो विदुः॥ ते सदोषा हतास्माभिः राज्यस्य परिपंथिनः॥ तान्हत्वा भुंक्ष्व धर्मे
ण युधिष्ठिरमिमां॥ यथा हि पुरुषः खात्वा कूपमप्राप्य चोदकं॥ पंकदिग्धो निवर्तेत कर्मेदं नस्तथोपमं॥ यथारुह्य
महावृक्षमपहृत्य ततो मधु॥ अप्राप्य निधनं गच्छेत्कर्मैतन्नस्तथोपमं॥ यथा च क्षुधितो लब्ध्वान्नं भुंजीत यदृच्छया॥
कामी वा कामिनीं लब्ध्वा कर्मैतन्नस्तथोपमं॥ यथा महांतमध्वानमाशया पुरुषः पतन्॥ स निराशो निवर्तेत कर्मैतन्न
स्तथोपमं॥ यथा शत्रून्घातयित्वा पुरुषः कुरुपोत्तमं॥ आत्मानं घातयेत्पश्चात्कर्मैतन्नस्तथोपमं॥ वयमेवात्र गर्ह्या
हि यद्वयं मंदचेतसं॥ त्वां राजन्ननुगच्छामः ज्येष्ठोयमिति भारत॥ वयं हि बाहुबलिनः कृतविद्या मनस्विनः॥ क्लीबस्य
वाक्ये तिष्ठामो यथैवाशक्तयस्तथा॥ अगतीकगतानस्मान्नष्टार्थानर्थसिद्धये॥ कथं वै नानुपश्येयुर्जनाः पश्यत
यादृशं॥ आपत्काले हि संन्यासः कर्तव्य इति शिष्यते॥ जरयाभिपरीतेन शत्रुभिर्व्यंसितेन च॥ तस्मादिह कृतप्रज्ञास्त्या
गं न परिचक्षते॥ धर्मव्यतिक्रमं सूक्ष्मं मन्यंते सूक्ष्मदर्शिनः॥ कथं तस्मात्समुत्पन्नस्तन्निष्ठस्तदुपाश्रयाः॥ तदेवं ११
चै

न
निंदां भाषेयुः धाता तत्र न गच्छति॥ श्रिया विहीनैरधनैर्नास्तिकैः संप्रकीर्तितं॥ वेदवादस्य विज्ञानं सत्याभासमिवा
वृतं॥ शक्यं तु मौनमास्थाय बिभ्रतात्मानमात्मना॥ धर्मच्छद्म समास्थाय च्यवितुं न तु जीवितुं॥ शक्यं पुनररण्ये सु
खमेकेन जीवितुं॥ अबिभ्रता पुत्रपौत्रान्देवर्षीनतिथीन्पितॄन्॥ नेमे मृगाः स्वर्गजितो न वराहा न पक्षिणः॥ अ
थान्येन प्रकारेण पुण्यमाहुर्न तज्जनाः॥ यदि संन्यासतः सिद्धिं राजन्कश्चिदवाप्नुयात्॥ पर्वताश्च द्रुमाश्चैव क्षिप्रं सि
द्धिमवाप्नुयुः॥ एते हि नित्यसंन्यासा दृश्यंते निरुपद्रवाः॥ अपरिग्रहवंतश्च सततं चात्मचारिणः॥ अथ चेदात्मभाग्ये
षु नान्येषां सिद्धिमश्नुते॥ तस्मात्कर्मैव कर्तव्यं नास्ति सिद्धिरकर्मणः॥ उदकाः सृष्टयश्चैव जंतवः सिद्धिमाप्नुयुः॥ औद
एषामात्मैव भर्तव्यो नान्यः कश्चन विद्यते॥ अवेक्षस्व यथा स्वैः स्वैः कर्मभिर्व्यापृतं जगत्॥ तस्मात्कर्मैव कर्तव्यं नास्ति
सिद्धिरकर्मणः॥ ॥ इति शांतिपर्वणि राजधर्मे॥ ॥ अर्जुनः॥ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं॥ तापसैः म
सह संवादं शक्रस्य भरतर्षभ॥ केचिद्गृहान्परित्यज्य वनमभ्यागमन्द्विजाः॥ अजातश्मश्रवो मंदाः कुले जाताः
प्रवव्रजुः॥ धर्मोयमिति मन्वानाः समृद्धा ब्रह्मचारिणः॥ त्यक्त्वा पितॄन्मातरं च तानिंद्रो न्वकृपायत॥ तानाबभाषे भग
वानिंद्रः पक्षी भूत्वा हिरण्मयः॥ सुदुष्करं मनुष्यैश्च यत्कृतं विघसाशिभिः॥ पुण्यं च बत कर्मैषां प्रशस्तं चैव जीवितं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धार्थी स्तैति मुख्यो शास्त्रधर्मपरायणाः ।। ।। ऋषय ऊचुः ।। ।। अहो बतायं शकुनिर्विघसाशीन् प्रशंसति । अ
स्मान्नूनमयं शास्ति वयं हि विघसाशिनः ।। ।। शकुनिरुवाच ।। ।। नाहं युष्मान्प्रशंसामि पंकदिग्धान्रजस्वलान् ।
उच्छिष्टभोजनो मंदानन्ये वै विघसाशिनः ।। ।। ऋषय ऊचुः ।। ।। इदं श्रेयः परमिति वयमेवाभ्युपास्महे ।। शकुने ब्रूहि यच्छ्रेयो
भृशं वै श्रद्दधामते ।। ।। शकुनिरुवाच ।। ।। यदि मां नाभिशंकध्वं विभज्यात्मानमात्मनि ।। ततोहं वः प्रवक्ष्यामि यथा तथ्य
मिदं वचः ।। ।। ऋषय ऊचुः ।। ।। श्रृणुमस्ते वचस्तात पंथानो विदितास्तव ।। नियोगे चैव धर्मात्मन्स्थातुमिच्छामि शाधि नः ।। मि
शकुनिरुवाच ।। ।। चतुष्पदां गौः प्रवरा लोहानां कांचनं वरं ।। शब्दानां प्रवरो मंत्रो द्विपदां ब्राह्मणो वरः ।। मंत्रोयं जातकर्मादि नः
ब्राह्मणस्य विधीयते ।। जीवतो यो यथाकालं श्मशाननिधनादिति ।। कर्माणि वैदिकान्यस्य स्वर्गपंथाकृदुत्तमः ।। कथं सर्वा
णि मंत्रसिद्धानि चक्रिरे ।। आम्नाय दृढवादीनि तथा सिद्धिरिहेष्यते ।। मासार्द्धमासा ऋतव आदित्यशशितारकं ।। ईहंते
सर्वभूतानि तदिदं कर्मसंज्ञितं ।। सिद्धिक्षेत्रमिदं पुण्यमयमेवाश्रयो महान् ।। अथ चेत्कर्म निंदंतो मनुष्याः कापथं गताः ।। मू
ढानामर्थहीनानां तेषामेनस्तु विद्यते ।। देववंशान्पितृवंशान्ब्रह्मवंशांश्च शाश्वतान् ।। संत्यज्य मूढा वर्तंते ततो यांत्यश्रु
तीपथं ।। एतद्वोस्तु तपो युक्तं ददानीत्यृषिचोदितं ।। तस्मात्तदध्यवस्थानं तपस्वितप उच्यते ।। देववंशान्पितृवंशान्ब्रह्मवंशां ११

धृं

श्च शाश्वतान् ।। संविभज्य गुरोश्चर्यां तद्वै दुष्करमुच्यते ।। देवा वै दुष्करं कृत्वा विभूतिं परमां गताः ।। तस्माद्गार्हस्थ्यमुद्वोढुं दुष्क
रं प्रब्रवीमि वः ।। तपः श्रेष्ठं प्रजानां वै मूलमेतन्न संशयः ।। कुटुंबविधिनानेन यस्मिन्सर्वं प्रतिष्ठितं ।। एतद्धि दुस्तपो विप्रा द्वंद्वा
तीता विमत्सराः ।। तस्माद्वृतं मध्यमं च लोकेषु तप उच्यते ।। दुराधर्षं पदं चैव गच्छंति विघसाशिनः ।। सायंप्रातर्विभज्यान्नं स्व
कुटुंबे यथाविधि ।। दत्वातिथिभ्यो देवेभ्यः पितृभ्यः स्वजनस्य च ।। अवशिष्टानि येऽश्नंति तानाहुर्विघसाशिनः ।। तस्मात्स्वधर्ममा
स्थाय सुव्रताः सत्यवादिनः ।। लोकस्य गुरवो भूत्वा ते भवंत्यनुपस्कृताः ।। त्रिदिवं प्राप्य शक्रस्य स्वर्गलोके विमत्सराः ।। वसंति
शाश्वतीर्वर्षा जना दुष्करकारिणः ।। ।। अर्जुनः ।। ।। ततस्ते तद्वचः श्रुत्वा तस्य धर्मार्थसंहितं ।। उत्सृज्य नास्तिगतां गा
र्हस्थ्यं समुपाश्रिताः ।। तस्मात्त्वमपि धर्मज्ञ धैर्यमालंब्य शाश्वतं ।। प्रशाधि पृथिवीं कृत्स्नां हतामित्रां नराधिप ।। ।। इति शांति
पर्वणि राजधर्मे ।। ।। वैशंपायनः ।। अर्जुनस्य वचः श्रुत्वा नकुलो वाक्यमब्रवीत् ।। राजानमभिसंप्रेक्ष्य सर्वधर्मविदां वरः ।। अ
नुरुध्य महाप्राज्ञो भ्रातुश्चित्तमरिंदमः ।। व्यूढोरस्को महाबाहुस्ताम्रास्यो मितभाषिता ।। ।। नकुल उवाच ।। ।। विशाखयूपे
देवानां सर्वेषामग्नयश्चिताः ।। तस्माद्विद्धि महाराज देवाः कर्मपथे स्थिताः ।। अनास्तिकानास्तिकानां प्राणदाः पितरश्च ये ।। ते
पि कर्मैव कुर्वंति विधिं संप्रेक्ष्य पार्थिव ।। वेदवादापविद्धांश्च तान्विद्धि भृशनास्तिकान् ।। नहि वेदोक्तमुत्सृज्य विप्रः सर्वेषु
कर्मसु ।। देवयानेन नाकस्य पृष्ठमाप्नोति भारत ।। अत्याश्रमानयं सर्वानित्याहुर्वेदनिश्चयाः ।। ब्राह्मणाः श्रुतिसंपन्नाः त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्निबोध जनाधिप॥ विज्ञानि कर्मलब्धानि क्रतुमुख्येषु वा सृजन्॥ कृत्वा त्यागी महाराजः सर्वैत्यागः स्मृतो नरः॥ अनपेक्ष्य सुः
खादानं तथैवोर्ध्वं शतिष्ठितः॥ आत्मत्यागी महाराज सत्यागी तामसो मतः॥ अनिकेतः परितपन्वृक्षमूलाश्रयो मुनिः॥
अपाचकः सदा योगी सत्यागी पार्थ भिक्षुकः॥ क्रोधहर्षावनादृत्य पैशुन्यं च विशांपते॥ विप्रो वेदानधीते यः स त्यागी
पार्थ भिक्षुकः॥ आश्रमीस्तुलया सर्वान्धृतानाहुर्मनीषिणः॥ एकतस्ते त्रयो राजन्गृहस्थाश्रम एकतः॥ समीक्ष्यतु २
लया पार्थ कामं स्वर्गं च भारत॥ अयं पन्था महर्षीणामियं लोकविदां गतिः॥ इति यः कुरुते भावं स त्यागी भरतर्षभ
॥ न यः परित्यज्य गृहान्वनमेति विमूढवत्॥ यदा कामान्समीक्षेत धर्मवैतंसिको नरः॥ अथैनं मृत्युपाशेन कंठे बध्ना
ति मृत्युराट्॥ अभिमानकृतं कर्म नैतत्फलवदुच्यते॥ त्यागयुक्तं महाराज सर्वमेव महाफलं॥ शमो दमस्तथा धैर्यं स
त्यं शौचमथार्जवं॥ यज्ञो धृतिश्च धर्मश्च नित्यमार्षो विधिः स्मृतः॥ पितृदेवातिथिकृते समारंभोत्र शस्यते॥ अत्रैव हि म
हाराज त्रिवर्गः केवलं फलं॥ एतस्मिन्वर्तमानस्य विधावप्रतिषेधिते॥ त्यागिनः प्रसृतस्येह नोच्छित्तिर्विद्यते क्वचित्॥ असृजत्वि
द्धि प्रजा राजन्प्रजापतिरकल्मषः॥ मां यक्ष्यंतीति शांतात्मा यज्ञैर्विविधदक्षिणैः॥ वीरुधश्चैव वृक्षांश्च यज्ञार्थं च महौष
धी॥ पशूंश्चैव तथा मेध्यान्यज्ञार्थानि हवींषि च॥ गृहस्थाश्रमिणस्तच्च यज्ञकर्मविरोधिकं॥ तस्माद्गार्हस्थ्यमेवेह दु
ष्करं दुर्लभं तथा॥ तत्संप्राप्य गृहस्थो पि पशुधान्यसमन्विताः॥ न यजंते महाराज शाश्वतं तेषु किल्बिषं॥ स्वाध्याययज्ञा ऋ १२

षयो ज्ञानयज्ञास्तथापरे॥ अथापरे महायज्ञान्मनसैव वितन्वते॥ एवं दानसमाधानं मार्गमातिष्ठतो नृप॥ द्विजातेर्ब्रह्मभू
तस्य स्पृहयंति दिवौकसः॥ स रत्नानि विचित्राणि संहृतानि ततस्ततः॥ मखेष्वनभिसंत्यज्य नास्तिक्यमभिजल्पसि॥ कु ज
टुंबमास्थिते त्यागं न पश्यामि नराधिप॥ राजसूयाश्वमेधेषु सर्वमेधेषु वा पुनः॥ ये चान्ये क्रतवस्तात ब्राह्मणैरभिपूजि
ताः॥ तैर्यजस्व महीपाल शक्रो देवपतिर्यथा॥ राज्ञः प्रमाददोषेण दस्युभिः परिमुष्यतां॥ अशरण्यः प्रजानां यः स राजा क
लिरुच्यते॥ अश्वान्गाश्चैव दासीश्च करेणूश्च स्वलंकृताः॥ ग्रामान्जनपदांश्चैव क्षेत्राणि च गृहाणि च॥ अप्रदाय द्विजा
तिभ्यो मात्सर्याविष्टचेतसः॥ वयं ते राजकलयो भविष्याम विशांपते॥ अदातारोऽशरण्याश्च राजकिल्बिषभागिनः॥ दुः
खानामेव भोक्तारो न दुःखानां कदाचन॥ अनिष्ट्वा च महायज्ञैरकृत्वा च पितृस्वधां॥ तीर्थेष्वनभिसंगम्य प्रव्रजिष्यसि चे
दथ॥ छिन्नाभ्रमिव गंतासि विलयं मारुतेरितः॥ लोकयोरुभयोर्भ्रष्टो ह्यंतराले व्यवस्थितः॥ अंतर्बहिश्च यत्किंचिन्म
नोव्यासंगकारकं॥ परित्यज्य भवेत्त्यागी न हित्वा प्रतितिष्ठति॥ एतस्मिन्वर्तमानस्य विधौ विप्रनिषेविते॥ ब्राह्मणस्य
महाराज नोच्छित्तिर्विद्यते क्वचित्॥ निहत्य शत्रूंस्तरसा समृद्धान्शक्रो यथा दैत्यबलानि संख्ये॥ कः पार्थ शोचेन्निरतः स्व
धर्मे पूर्वैः स्मृते पार्थिव शिष्टजुष्टे॥ क्षात्रेण धर्मेण पराक्रमेण जित्वा महीं मंत्रविद्भ्यः प्रदाय॥ नाकस्य पृष्ठेसि नरेंद्र गंता
न शोचितव्यं भवताद्य पार्थ॥ ॥ शांतिपर्वणि राजधर्मे॥ ॥सहदेव उवाच॥ ॥ न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत ॥ शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा ॥ बाह्यद्रव्यविमुक्तस्य शारीरेषु च गृध्यतः ॥ यो धर्मो यत्सुखं वास्य द्वि
षतां तत्तथास्तु नः ॥ शारीरं द्रव्यमुत्सृज्य पृथिवीमनुशासतः ॥ यो धर्मो यत्सुखं वास्य सुहृदां तत्तथास्तु नः ॥ द्व्यक्षरस्तु
भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतं ॥ ममेति च भवेन्मृत्युर्न ममेति च शाश्वतं ॥ ब्रह्ममृत्यू तु तौ राजन्नात्मन्येव समाश्रितौ ॥
अदृश्यमानौ भूतानि योधयेतामसंशयं ॥ अविनाशोस्य सत्वस्य नियतो यदि भारत ॥ हत्वा शरीरं भूतानां न हिंसां प्रति ना
पत्स्यसे ॥ तथापि च सहोत्पत्तिः सत्वस्य प्रलयस्तथा ॥ नष्टे शरीरे नष्टं स्याद्वृथा चास्यात्क्रियापथः ॥ तस्मादेकांतमुत्सृ
ज्य पूर्वैः पूर्वतरैश्च यः ॥ पंथा निषेवितः सद्भिः स निषेव्यो विजानता ॥ लब्ध्वापि पृथिवीं कृत्स्नां सहस्थावरजंगमां ॥
न भुंक्ते यो नृपः सम्यक् निष्फलं तस्य जीवितं ॥ अथवा वसतो राजन् वने वन्येन जीवितः ॥ द्रव्येषु यस्य ममता मृत्योरा
स्ये स वर्तते ॥ बाह्यांतरे च भूतानां स्वभावं पश्य भारत ॥ ये तु पश्यंति तद्भावं मुच्यंते महतो भयात् ॥ भवान्पिता भवान्माता
भवान्भ्राता भवान्गुरुः ॥ दुःखप्रलापानार्तस्य तस्मान्मे क्षंतुमर्हसि ॥ तथ्यं वा यदि वातथ्यं यन्मयैतत्प्रभाषितं ॥ त
द्विद्धि पृथिवीपाल भक्त्या भरतसत्तम ॥ ॥ शांतिपर्वणि राजधर्मे ॥ ॥ वैशंपायनः ॥ ॥ अव्याहरति कौंतेये ध
र्मराजे युधिष्ठिरे ॥ भ्रातॄणां ब्रुवतां तांस्तान्विविधान्वेदनिश्चयान् ॥ महाभिजनसंपन्ना श्रीमत्यायतलोचना ॥ १३

अभ्यभाषत राजेंद्र द्रौपदी योषितां वरा ॥ आसीनमृषभं राज्ञां भ्रातृभिः परिवारितं ॥ सिंहशार्दूलसदृशैर्वारणैरिव यू
थपं ॥ अभिमानवती नित्यं विशेषेण युधिष्ठिरे ॥ लालिता सततं राज्ञा धर्मज्ञा धर्मदर्शिनी ॥ आमंत्र्य विपुलश्रोणी
साम्ना परमवल्गुना ॥ भर्तारमभिसंप्रेक्ष्य ततो वचनमब्रवीत् ॥ ॥ द्रौपद्युवाच ॥ ॥ इमे ते भ्रातरः पार्थ शुष्यंति
स्तोककाइव ॥ वावाश्यमाना तिष्ठंति न चैनानभिनंदसे ॥ नंदयैतान्महाराज मत्तानिव महाद्विपान् ॥ उपपन्नेन
वाक्येन सततं दुःखभागिनः ॥ कथं द्वैतवने राजन् पूर्वमुक्त्वा तथा वचः ॥ भ्रातॄनेतान्स्म सहितान् शीतवाततपार्दितान् ॥
वयं दुर्योधनं हत्वा मृधे भोक्ष्याम मेदिनीं ॥ संपूर्णां सर्वकामानामाहवे विजयैषिणः ॥ विरथांश्च रथान्कृत्वा निहत्य
च महागजान् ॥ संस्तीर्य च रथैर्भूमिं ससादिभिररिंदमाः ॥ यजतां विविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः ॥ वनवासकृ
प तं दुःखं भविष्यति सुखाय नः ॥ इत्येतानेवमुक्त्वा त्वं स्वयं धर्मभृतां वर ॥ कस्मादद्य पुनर्वीर विनिहंसि मनांसि नः ॥ न
क्लीबो वसुधां भुंक्ते न क्लीबो धनमश्नुते ॥ न क्लीबस्य गृहे पुत्रा मत्स्याः पंक इवासते ॥ नादंडः क्षत्रियो भाति नादंडो
भूतिमश्नुते ॥ नादंडस्य प्रजा राज्ञः सुखमेधंति भारत ॥ मित्रता सर्वभूतेषु दानमध्ययनं तपः ॥ ब्राह्मणस्यैष धर्मः
स्यान्न राज्ञो नृपसत्तम ॥ असतां प्रतिषेधश्च सतां च परिपालनं ॥ एष राज्ञां परो धर्मः समरे चापलायनं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्क्षमा च क्रोधश्च दानादाने भयाभये ॥ निग्रहानुग्रहौ चोभौ स वै धर्मविदुच्यते ॥ न श्रुतेन न दानेन सांत्वेन न
तेज्यया ॥ त्वयेयं पृथिवी लब्धा न संकोचेन वा पुनः ॥ यत्तद्बलममित्राणां तथा वीरसमुद्यतं ॥ हस्त्यश्वरथसंपन्नं त्रि
भिरंगैरनुत्तमं ॥ रक्षितं द्रोणकर्णाभ्यामश्वत्थाम्ना कृपेण च ॥ तत्त्वया निहतं वीर तस्माद्भुंक्ष्व वसुंधरां ॥ जंबूद्वीपो म
हाराज नानाजनपदायुतः ॥ त्वया पुरुषशार्दूल दंडेन मृदितः प्रभो ॥ जंबूद्वीपेन सदृशः क्रौंचद्वीपो नराधिप ॥ अ
परेण महामेरोर्दंडेन मृदितस्त्वया ॥ क्रौंचद्वीपेन सदृशः शाकद्वीपो नराधिप ॥ पूर्वेण तु महामेरोर्दंडेन मृदितस्त्व
या ॥ उत्तरेण महामेरोः शाकद्वीपेन संमितः ॥ भद्राश्वः पुरुषव्याघ्र दंडेन मृदितस्त्वया ॥ यतान्यप्रतिमानित्यं कृत्वा
कर्माणि भारत ॥ न प्रीयसे महाराज पूज्यमानो द्विजातिभिः ॥ स त्वं भ्रातॄनिमान्दृष्ट्वा प्रतिनंदस्व भारत ॥ ऋषभानि
व संपन्नान्गजेंद्रानूर्जितानिव ॥ अमरप्रतिमाः सर्वे शत्रुसाहाः परंतपाः ॥ एकोपि हि सुखायैषां मम स्यादिति मे मतिः
॥ किं पुनः पुरुषव्याघ्र पतयो मे नरर्षभाः ॥ समस्तानींद्रियाणीव शरीरस्य विचेष्टने ॥ अनृतं नाब्रवीच्छ्वश्रूः सर्वज्ञा सर्वद
र्शिनी ॥ युधिष्ठिरस्त्वां पांचालि सुखे धास्यत्यनुत्तमे ॥ हत्वा राजसहस्राणि बहून्याशुपराक्रमी ॥ तद्व्यर्थं संप्रपश्यामि
मोहात्तव जनाधिप ॥ येषामुन्मत्तको ज्येष्ठः सर्वे तस्योपचारिणः ॥ तवोन्मादान्महाराज सोन्मादाः सर्वपांडवाः ॥ यदि हि १४

स्युरनुन्मत्ता भ्रातरस्ते नराधिप ॥ बध्वा त्वां नास्तिकैः सार्धं प्रशासेयुर्वसुंधरां ॥ कुरुते मूढ एवं हि यः श्रेयो नाधिग
च्छति ॥ धूपैरंजनयोगैश्च नस्तःकर्मभिरेव च ॥ भेषजैः स चिकित्स्यः स्याद्य उन्मार्गेण गच्छति ॥ सा हि सर्वाधमा लोके
स्त्रीणां भरतसत्तम ॥ तथा विनाकृता पुत्रैर्याहमिच्छामि जीवितुं ॥ एतेषां यतमानानां न मेद्य वचनं मृषा ॥ त्वं तु सर्वां
महीं त्यक्त्वा कुरुषे स्वयमापदं ॥ यथास्तां संमतौ राज्ञां पृथिव्यां राजसत्तम ॥ मांधाता चांबरीषश्च तथा राजन्विराज
से ॥ प्रशाधि पृथिवीं देवीं प्रजा धर्मेण पालयन् ॥ सपर्वतवनद्वीपां मा राजन्विमना भव ॥ यजस्व विविधैर्यज्ञैर्जुह्व
दग्नीन्प्रयच्छ च ॥ पुराणि भोगान्वासांसि द्विजातिभ्यो नृपोत्तम ॥ ॥ शांतिपर्वणि राजधर्मे ॥ ॥ वैशंपायनः ॥ ॥
याज्ञसेन्या वचः श्रुत्वा पुनरेवार्जुनोऽब्रवीत् ॥ अनुमान्य महाबाहुं ज्येष्ठं भ्रातरमच्युतं ॥ ॥ अर्जुनः ॥ ॥ दंडः शा
स्ति प्रजाः सर्वा दंड एवाभिरक्षति ॥ दंडः सुप्तेषु जागर्ति दंडं धर्मं विदुर्बुधाः ॥ धर्मं संरक्षते दंडस्तथैवार्थं नराधि
प ॥ कामं संरक्षते दंडस्त्रिवर्गो दंड उच्यते ॥ दंडेन रक्ष्यते धान्यं धनं दंडेन रक्ष्यते ॥ एवं विद्वन्नुपादत्स्व भावं पश्य
स्व लौकिकं ॥ राजदंडभयादेके पापाः पापं न कुर्वते ॥ यमदंडभयादेके परलोकभयादपि ॥ परस्परभयादेके पा
पाः पापं न कुर्वते ॥ एवं सांसिद्धिके लोके सर्वं दंडे प्रतिष्ठितं ॥ दंडस्यैव भयादेके न खादंति परस्परं ॥ अंधे तमसि म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जैरेवं यदि दंडो न पालयेत्॥ असंमोहाय मर्त्यानां अर्थसंरक्षणाय च॥ मर्यादा स्थापिता लोके दंडसंज्ञा विशांपते॥ यत्र श्या
मो लोहिताक्षो दंडश्चरति सुव्रतः॥ प्रजास्तत्र न मुह्यंते नेता चेत्साधु पश्यति॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः॥
दंडस्यैव भयादेते मनुष्या वर्त्मनि स्थिताः॥ नाभीतो यजते राजन्नाभीतो दातुमिच्छति॥ नाभीतः पुरुषः कश्चित्समये स्थातुमि
च्छति॥ नाछित्त्वा परममर्माणि नाकृत्वा कर्म दारुणं॥ नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियं॥ निघ्नता कीर्तिरस्तीह न
वित्तं न पुनः प्रजाः॥ इंद्रो वृत्रवधेनैव महेंद्रः समपद्यत॥ य एव देवा हंतारस्तांल्लोकोर्चयते भृशं॥ हंता रुद्रस्तथा स्कंदः शक्रो
ग्निर्वरुणो यमः॥ हंता कालस्तथा मृत्युर्वायुर्वैश्रवणो रविः॥ वसवो मरुतः साध्या विश्वेदेवाश्च भारत॥ एतान्देवान्नमस्यं
ति प्रतापप्रणता जनाः॥ न ब्रह्माणं न धातारं न पूषाणं कथंचन॥ मध्यस्थान्सर्वभूतेषु दांतान्शमपरायणान्॥ य
जंते मानवाः केचित्प्रशांतान्सर्वकर्मसु॥ न हि पश्यामि जीवंतं लोके कंचिदहिंसया॥ सत्वैः सत्वा हि जीवंति दुर्बलैर्ब
लवत्तराः॥ नकुलो मूषिकानत्ति बिडालो नकुलं तथा॥ बिडालमत्ति श्वा राजन्श्वानं व्यालमृगस्तथा॥ तानत्ति पुरुषः
सर्वान्पश्य कालो यथागतः॥ प्राणस्यान्नमिदं सर्वं जंगमं स्थावरं च यत्॥ विधानं देवविहितं तत्र विद्वान्न मुह्यति॥ य
था सृष्टोसि राजेंद्र तथा भवितुमर्हसि॥ विनीतक्रोधहर्षा हि मंदा वनमुपाश्रिताः॥ विविधं च न कुर्वंति तापसा प्राणया १५

पनं॥ उदके बहवः प्राणाः पृथिव्यां पर्वतेषु च॥ न च कश्चिन्न तान्हंति किमन्यत्प्राणयापनात्॥ सूक्ष्मयोनीनि भूतानि तर्क
गम्यानि कानिचित्॥ पक्ष्मणोपि निपातेन येषां स्यात्स्कंधपर्ययः॥ ग्रामान्निष्क्रम्य मुनयो विनीतक्रोधमत्सराः॥ वने कु
टुंबधर्मिणो दृश्यंते परिमोहिताः॥ भूमिं भित्त्वौषधीः छित्त्वा वृक्षादीनंडजान्पशून्॥ मनुष्यास्तन्वते यज्ञांस्ते स्वर्गं प्राप्नु
वंति च॥ दंडनीत्या प्रणीता हि सर्वे सिध्यंत्युपक्रमाः॥ कौंतेय सर्वभूतानां तत्र मे नास्ति संशयः॥ दंडश्चेन्न भवेल्लोके वि
नश्येयुरिमाः प्रजाः॥ जले मत्स्यानिवाभक्ष्यन्दुर्बला बलवत्तराः॥ सत्यं चेदं ब्रह्मणा पूर्वमुक्तं दंडः प्रजा रक्षति साधुनी
तः॥ पश्याग्नयश्च शमतिष्ठमभीताः संतर्जिता दंडभयाज्ज्वलंति॥ अदंड्यं तमसेव दंडस्यान्न प्रज्ञायेत किंचन॥ दंडश्चेन्न भ
वेल्लोके विभजसाध्वसाधुनो॥ ये तु संभिन्नमर्यादा नास्तिका वेदनिंदकाः॥ ते पि भोगाय कल्पंते दंडेनाशु निपीडिताः॥
सर्वो दंडजितो लोको दुर्लभो हि शुचिर्जनः॥ दंडस्य हि भयाद्भीतो भोगायैव प्रवर्तते॥ चातुर्वर्ण्यप्रमोदाय सुनीतनयना
य च॥ दंडो विधात्रा विहितो धर्मार्थौ भुवि रक्षितुं॥ यदि दंडान्न बिभ्येयुर्वयांसि श्वापदानि च॥ अद्युः पशून्मनुष्यांश्च
यज्ञार्थानि हवींषि च॥ न ब्रह्मचार्यधीयीत कल्याणी गौर्न दुह्यते॥ न कन्योद्वहनं गच्छेद्यदि दंडो न पालयेत्॥ विष्वग्लो
पः प्रवर्तेत भिद्येरन्सर्वसेतवः॥ ममत्वं न विजानीयुर्यदि दंडो न पालयेत्॥ न संवत्सरसत्राणि तिष्ठेयुरकुतोभयाः॥ विधिवद्दक्षि
णावंति यदि दंडो न पालयेत्॥ चरेयुर्नाश्रमे धर्मं यथोक्तं विधिमाश्रिताः॥ न विद्यां प्राप्नुयात्कश्चिद्यदि दंडो न पालयेत्॥ न चो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ट्रानबलीवर्दीनाम्श्वाश्वतरगार्दभाः॥ युक्तावहेयुर्यानानि यदि दंडो न पालयेत्॥ नप्रेष्यावचनं कुर्युर्न्नोरीवा जातु कस्यचित्
तिष्टेत्पितमतीधर्मे यदि दंडो न पालयेत्॥ दंडेस्थिताः प्रजाः सर्वाः दंडं धर्मं विदुर्बुधाः॥ दंडोस्वर्गो मनुष्याणां लोकोयं च प्र
तिष्ठितः॥ नतत्र कूटं पापं वा वंचनावापि दृश्यते॥ यत्र दंडः सुविहितश्चरतेरिपुबाधनः॥ हविश्वापिलिहेद्धृष्टो दंडश्चेन्नो
द्यतो भवेत्॥ हरेत्काकः पुरोडाशं यदि दंडो न पालयेत्॥ यदिदं धर्मतो राज्यं विहितं यद्यधर्मतः॥ कार्यस्तत्र नशोको वै भुंक्ष्व
भोगान् यजस्व च॥ सुखेन धर्मं श्रीमंतश्चरंति शुचिवाससः॥ संवसंतः प्रियैर्दारैर्भुंजानाश्चान्नमुत्तमं॥ अर्थे सर्वे स
मारंभाः समायत्ता न संशयः॥ स च दंडे समायत्तः पश्य दंडस्य गौरवं॥ लोकयात्रार्थमेवेह धर्मप्रवचनं कृतं॥ अहिंसा
साधुहिंसेति श्रेयान्धर्मपरिग्रहः॥ नात्यंतं गुणवान्कश्चिन्न चाप्यत्यंतनिर्गुणः॥ उभयं सर्वकार्येषु दृश्यते साध्वसाधु
षु॥ पशूनां वृषणं छित्वा ततो भिंदंति मस्तकं॥ वहंति बहवो भारं बध्नंति दमयंति च॥ एवं पर्याकुले लोके वितथैर्जर्जरी
कृते॥ तैस्तैर्न्यायैर्महाराज पुराणं धर्ममाचर॥ यज देहि प्रजा रक्ष धर्मं समनुपालय॥ अमित्राञ्जहि कौंतेय मि
त्राणि परिपालय॥ मा च ते निघ्नतः शत्रून्मन्युर्भवतु पार्थिव॥ न तत्र किल्बिषं किंचित्कर्तुर्भवति भारत॥ आततायी तु यो
हन्यादाततायिनमागतं॥ न तेन भ्रूणहा स स्यान्मन्युस्तं मन्युमर्छति॥ अवध्यः सर्वभूतानामंतरात्मा न संशयः॥ अ १६

वध्ये चात्मनि कथं वध्यो भवति कस्यचित्॥ यथा हि पुरुषः शालां पुनः संप्रविशेन्नवां॥ एवं जीवः शरीराणि तानि तानि प्रप
द्यते॥ देहान्पुराणानुत्सृज्य नवान्संप्रतिपद्यते॥ एवं मृत्युमुखं प्राहुर्ये जनास्तत्वदर्शिनः॥ ॥ इति श्रीशां० राजधर्मे॥
॥ ॥ वैशंपायन उवाच॥ ॥ अर्जुनस्य वचः श्रुत्वा भीमसेनोत्यमर्षणः॥ धैर्यमास्थाय तेजस्वी ज्येष्ठं भ्रातरमब्रवी
त्॥ राजन्विदितधर्मोसि न तेस्त्यविदितं क्वचित्॥ उपशिक्षामते वृत्तिं सदैव न च शक्नुमः॥ न वक्ष्यामि न वक्ष्यामीत्ये
वं मनसि मे स्थितं॥ अतिदुःखात्तु वक्ष्यामि तन्निबोध जनाधिप॥ भवतः संप्रमोहेन सर्वं संशयितं कृतं॥ विक्लव
त्वं च संप्राप्तमबलत्वं तथैव च॥ कथं राजा लोकस्य सर्वशास्त्रविशारदः॥ मोहमापद्यते दैन्याद्यथा कापुरु
षस्तथा॥ आगतिश्च गतिश्चैव लोकस्य विदिता तव॥ आयत्यां च तदात्वे च न तेस्त्यविदितं प्रभो॥ एवं कृते महारा
ज राज्यं प्रति जनाधिप॥ हेतुमत्र प्रवक्ष्यामि तदिहैकमनाः शृणु॥ द्विविधो जायते व्याधिः शारीरो मानसस्त
था॥ परस्परं तयोर्जन्म निर्द्वंद्वं नोपलभ्यते॥ शारीराज्जायते व्याधिर्मानसो नात्र संशयः॥ मानसाज्जायते व्याधिः
शारीर इति निश्चयः॥ शारीरं मानसं दुःखं योतीतमनुशोचति॥ दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते॥ शीतोष्णे चै
व वायुश्च त्रयः शारीरजा गुणाः॥ तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणं॥ तेषामन्यतमोत्सेके विधानमुपदि स्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

१८ श्यते ॥ उष्णेन बाध्यते शीतं शीतेनोष्णं प्रशाम्यते ॥ सत्वं रजस्तमश्चैव मानसाः स्युस्त्रयो गुणाः ॥ येषां गुणानां
साम्यं यत्तदाहुः स्वस्थलक्षणं ॥ तेषामन्यतमोत्सेके विधानमुपदिश्यते ॥ हर्षेण बाध्यते शोको हर्षः शोकेन बाध्य
ते ॥ कश्चित्सुखे वर्तमानो दुःखस्य स्मर्तुमिच्छति ॥ कश्चिद्दुःखे वर्तमानः सुखस्य स्मर्तुमिच्छति ॥ स त्वं दुःखी दुःख
स्य सुखानां च सुखस्य वा ॥ स्मर्तुमिर्हसि कौरव्य पदीह बलत्तरं ॥ अथवा ते स्वभावोयं येन पार्थिव कृष्यसे ॥ दृष्ट्वा
सभागतां कृष्णामेकवस्त्रां रजस्वलां ॥ मिषतां पांडुपुत्राणां न तत्संस्मर्तुमर्हसि ॥ प्रव्राजनं च नगरादजिनै
श्च विवासनं ॥ महारण्यनिवासश्च न तस्य स्मर्तुमर्हसि ॥ जयसुरात्परिक्लेशं चित्रसेनेन चाहवं ॥ सैंधवाच्च
यां परिक्लेशं कथं विस्मृतवानसि ॥ पुनरज्ञातचर्यां कीचकेन यदा वधं ॥ द्रौपद्या राजपुत्र्याश्च तलेयं विस्मृतोसि
सि ॥ यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिंदम ॥ मनसैकेन योद्धव्यं तत्ते युद्धमुपस्थितं ॥ यत्र नास्ति शरैः का
र्यं न मित्रैर्न च बंधुभिः ॥ आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितं ॥ तस्मिन्ननिर्जिते युद्धे प्राणान्यदि विमोक्ष्य
से ॥ अन्यं देहं समास्थाय ततस्तैरपि योत्स्यते ॥ तस्मादद्यैव गंतव्यं युध्यस्व भरतर्षभ ॥ परमव्यक्तरूपस्य व्य
क्तं त्यक्त्वा स्वकर्मभिः ॥ तस्मिन्ननिर्जिते युद्धे कामवस्थां गमिष्यसि ॥ एतज्जित्वा महाबाहो कृतकृत्यो भविष्य १८

ति ॥ एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिं ॥ पितृपैतामहे वृत्ते शाधि राज्यं यथोचितं ॥ दिष्ट्या दुर्योधनः पा
पो निहतः सानुगो युधि ॥ द्रौपद्याः केशपाशस्य दिष्ट्या त्वं पदवीं गतः ॥ यजस्व वाजिमेधेन विधिवद्दक्षिणावता ॥
वयं ते किंकराः पार्थ वासुदेवश्च वीर्यवान् ॥ ॥ इतो राजधर्मो ॥ ॥ युधिष्ठिरः ॥ ॥ असंतोषः प्रमादश्च मदो रागोऽप्र
शांतता ॥ बलं मोहोभिमानश्चाप्युद्वेगश्चैव सर्वशः ॥ येभिः पाप्मभिराविष्टो राज्यं त्वमभिकांक्षसि ॥ निरामिषो वि
निर्मुक्तः प्रशांतः स सुखी भव ॥ य इमामखिलां भूमिं शिष्यादेको महीपतिः ॥ तस्याप्युदरमेकं वै किमिदं त्वं प्रशंस
सि ॥ नाह्नापूरयितुं शक्यं न मासैर्भरतर्षभ ॥ अपूर्यां पूरयन्निच्छामायुषापि न शक्नुयात् ॥ यथेद्धः प्रज्वलत्यग्नि
रसमिद्धः प्रशाम्यति ॥ अल्पाहारतया त्वग्निं शमयोदरमुत्थितं ॥ आत्मोदरकृते प्राज्ञः करोति विघसं बहु ॥ ज
योदरं पृथिव्यां ते श्रेयो निर्जितया जितं ॥ मानुषान्कामभोगांस्त्वमैश्वर्यं च प्रशंससि ॥ अभोगिनो बलाश्चैव या
न्ति स्थानमनुत्तमं ॥ योगक्षेमश्च राज्यस्य धर्माधर्मौ त्वयि स्थितौ ॥ मुच्यस्व महतो भारात्त्यागमेवाभिसंश्रय ॥ ए
कोदरकृते व्याघ्रः करोति विघसं बहु ॥ तमन्ये पुपजीवंति मंदा लोभवशा मृगाः ॥ विषयान्प्रतिसंहृत्य संन्यासं कुरु
ते यदि ॥ न च तुष्यंति राजानः पश्य बुध्यंतरं यथा ॥ पत्रशाकाहारैरश्मकुट्टैर्दंतोलूखलिकैस्तथा ॥ अप्सु भक्षैर्वायुभक्षै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चैतेरयं नरको जितः॥ यस्येमां पृथिवीं कृत्स्नां प्रशासेदखिलां नृप। तुल्याश्मकांचनो यश्च स कृतार्थो न पार्थिवः॥
संकल्पेषु निरारंभो निराशो निर्ममो भुवि॥ अस्माकं स्थानमातिष्ठन्निहतापुत्र मत्ययं॥ निराशिषि मिषा न शोचंति शोचं सिलं
किमाभिषं॥ पतिस्याभि यस्तर्व मयावादासमो भ्रमसे॥ पंथानौ पितृयानश्च देवयानश्च विश्रुतौ॥ ईजानाः पितृयानेन देवया
नेन मोक्षिणः॥ तपसा ब्रह्मचर्येण स्वाध्यायेन महर्षयः॥ विमुच्य देहान्वै भांति मृत्योरविषयं गताः॥ आमिषं बंधनं लोके क
पा र्मेहोक्तं तथामिषं॥ ताभ्यां विमुक्तः पापाभ्यां पदमाप्नोति तत्परं। अपि गाथामिमां गीतां जनकेन वदंत्युत॥ निर्द्वंद्वेन विमुक्तेन मो
क्षं समनुपश्यतः॥ अनंतं वत मे वित्तं यस्य मे नास्ति किंचन॥ मिथिलायां प्रदीप्तायां न मे दह्यति किंचन॥ प्रज्ञाप्रासादमारुह्य
नशोच्याञ्शोचते जनान्॥ जगतिस्थानिवाद्रिस्थो मंदबुद्धीनवेक्षते॥ पश्यति पश्यति यः पश्यन्स चक्षुष्मान्स बुद्धिमान्॥ अ
ज्ञातानां च विज्ञानात्संबोधाद्बुद्धिरुच्यते॥ यस्तु वाचं विजानाति बहुमानमियात्स वै॥ ब्रह्मभावप्रसूतानां वैद्यानां भावितात्म
नां॥ यदा भूतपृथग्भावमेकस्थमनुपश्यति। तत एव च विस्तारं ब्रह्म संपद्यते तदा॥ ते जनास्तां गतिं यांति नाविद्वांसोऽल्पचे
तसः॥ नाबुद्धयो नातपसः सर्वं बुद्धौ प्रतिष्ठितं॥ ॥इति शांतौ राजधर्मे॥ ॥ वैशंपायनः॥ ॥तूष्णींभूते तु राजानं पुनरेवार्जुनो
ब्रवीत्॥ संतप्तो दुःखशोकाभ्यां राज्ञो वाक्शल्यपीडितः॥ ॥अर्जुनः॥ ॥कथयंति पुरा वृत्तमितिहासमिमं जनाः॥ विदेह १८
राज्ञः संवादं भार्यया सह भारत॥ उत्सृज्य राज्यं भिक्षार्थं कृतबुद्धिं नरेश्वरं॥ विदेहराजमहिषी दुःखिता प्रत्यभाषत॥

धनान्यपत्यं दारांश्च रत्नानि विविधानि च। पंथानं पावकं हित्वा जनको मौढ्यमास्थितः॥ तं ददर्श प्रिया भार्या भैक्ष्यवृ
त्तिमकिंचनं॥ धानामुष्टिमुपासीनं निरीहं वीतमत्सरं॥ तमुवाच समागम्य भर्तारमकुतोभयं॥ क्रुद्धा मनस्विनी भार्या वि
विक्ते हेतुमद्वचः॥ कथमुत्सृज्य राज्यं स्वं धनधान्यसमाश्रितं॥ कापालीं वृत्तिमास्थाय धानामुष्टिर्वने तव॥ प्रतिज्ञा ते
न्यथा राजन्विचेष्टा चान्यथा तव॥ यद्राज्यं महदुत्सृज्य स्वल्पे तुष्यसि पार्थिव॥ नैतेनातिथयो राजन्देवर्षिपितरस्तथा
यंतु मे घास्तेयपरिश्रमः॥ देवतातिथिभिश्चैव पितृभिश्चैव पार्थिव॥ सर्वैरेतैः परित्यक्तः परिव्रजसि निष्क्रियः॥ यास्त्वं विद्या
वृद्धानां ब्राह्मणानां सहस्रशः॥ भर्ता भूत्वा च लोकानां सोष्यं ये भृतिमिच्छसि॥ श्रियं हित्वा प्रदीप्तां त्वं श्ववत्संप्रति वीक्षसे॥ अपु
त्रा जननी तेद्य कौशल्या चापतिस्त्वया॥ अभी च धर्मकामास्त्वां क्षत्रियाः पर्युपासते॥ त्वदाशामभिकांक्षंतः कृपणाः फलंतुका॥ हे
तांश्च त्वं विफलान्कुर्वन्कांल्लोकान्नु गमिष्यसि॥ राजन्संशयिते मोक्षे परतंत्रेषु देहिषु॥ नैव ते स्ति परो लोको नापरः पापकर्म
णः॥ धर्मान्दारान्परित्यज्य यस्त्वमिच्छसि जीवितुं॥ स्रजो गंधानलंकारान्वस्त्राणि विविधानि च॥ किमर्थमभिसंत्यज्य
परिव्रजसि निष्क्रियः॥ निपानं सर्वभूतानां भूत्वा त्वं पावनं महत्॥ आढ्यो वनस्पतिर्भूत्वा सोद्यान्यान्पर्युपाससे॥ खादंति ह
स्तिनं न्यासे क्रव्यादा बहवोप्युत॥ बहवः कृमयश्चैव किं पुनस्त्वामनर्थकं॥ य इमां कुंडिकां भिंद्यात्त्रिविष्टब्धं च ते हरेत्॥
वासश्चापि हरेत्तस्मिन्कथं ते मानसं भवेत्॥ यस्त्वयं सर्वमुत्सृज्य धानामुष्टिरनुग्रहः॥ यदा नेन समं सर्वं किमिदं मम च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

१९

सीदंते।। धाना मुष्टिरिहार्थश्चेत्स तिष्ठाते विनंक्ष्यति।। काचाहंतकोमिलेकश्चेते मप्यनुग्रहः।। प्रशाधि पृथिवीं राजंस्तत्रैते नुग्रहो
भवेत्।। प्रसादेशापनं यानं वासांस्याप्नन्नानिच।। श्रियाविहीने स्सक्तमि वैरकिंचनैः।। सौरिकैः कैः संभ्रतांनर्थान्यद्यः त्यजति किं
नृतत्।। योस्यंत प्रतिमृह्णीयाद्यश्च दद्यात्सदेवहि।। तयोस्त्वंमंतरं विद्धि श्रेयांस्ताम्यां क उच्यते।। सदैव याचमानेषु तथा दंभा
न्वितेषु च।। एतेषु दक्षिणा दत्ता वनाग्निरिव दुर्हुतं।। जातवेदा यथा राजन्नादग्ध्वैवोपशाम्यति।। सदैव याचमानोपि तथाशाम्य
तिवै द्विजः।। सतां वै ददतो न्नं च लोके स्मिन्प्रकृते ध्रुवं।। न चेद्राजा भवेद्दाता कुतः स्युर्मोक्षकांक्षिणः।। अन्नाद्गृहस्थालोके
तप स्मिन्भिक्षवस्तत एव तु।। अन्नात्प्राणः प्रभवति अन्नदः प्राणदो भवेत्।। गृहस्थेभ्यो विनिर्वृत्ता गृहस्थानेव संश्रिताः।। प्रभवं
च प्रतिष्ठां च दांता निंदंत आसते।। त्यागान्न भिक्षुकं विद्यान्न मौंड्यान्न च पावकं।। ऋजुस्तु योर्थं त्यजति तं सुखं विद्धि भिक्षुकं।। अ
सक्तः सक्तवद्गच्छन्निःसंगो मुक्तबंधनः।। समः शत्रौ च मित्रे च स वै मुक्तो महीपते।। परिव्रजंति दानार्थं मुंडाः काषायवा
ससः।। सिता बहुविधैः पाशैः संचिन्वंतो वृथामिषं।। त्रयीं च नाम वार्तां च त्यक्त्वा पुत्रांस्त्यजंति ये।। त्रिविष्टपं च वासश्च प्रतिगृ
ह्णंत्यबुद्धयः।। अनिकषाये काषायमीहार्थमिति विद्धितं।। धर्मध्वजानां मुंडानां वृत्त्यर्थमिति मे मतिः।। काषायैरजिनै
श्चीरैर्नग्नान्मुंडाञ्जटाधरान्।। बिभ्रत्साधून्महाराज जयलोकाञ्जितेंद्रियः।। अनग्न्याधेयानि गुर्वर्थं क्रतून्सहृत्दक्षि
णान्।। ददात्याहरहः कुर्यात्को न्यो धर्मरतस्ततः।। ।।अर्जुनः।। ।।तत्वज्ञो जनको राजा लोके स्मिन्निति गीयते।। सोप्यासी १९

न्मोहसंपन्नो मा मोहवशमन्वगाः।। एवं धर्ममनुक्रांतं सदा दानतपःपरैः।। आनृशंस्यगुणैर्युक्तैः कामक्रोधविवर्जितैः।।
प्रजानां पालने युक्तैर्दानमुत्तममास्थितैः।। इष्टांल्लोकानवाप्स्यामो गुरुवृद्धोपसेविनः।। देवतातिथिभूतानां निर्वपंतो य
थाविधिः।। स्थानमिष्टमवाप्स्यामो ब्रह्मण्याः सत्यवादिनः।। इति शांतौ राजधर्मे।। ।।युधिष्ठिर उवाच।। ।। वेदाहं तात शा
स्त्राणि अपराणि पराणि च।। उभयं वेदवचनं कुरु कर्म त्यजेति च।। आकुलानि च शास्त्राणि हेतुभिश्चिंतितानि च।। निश्च
यश्चैव यो मंत्रे वेदाहं तं यथाविधि।। त्वं तु केवलमस्त्रज्ञो वीरव्रतमनुष्ठितः।। शास्त्रार्थं तत्त्वतो गंतुमसमर्थः कथंचन।।
शास्त्रार्थतत्त्वदर्शी यो धर्मनिश्चयकोविदः।। तेनाप्येवं न वाच्योहं यदि धर्मं प्रपश्यसि।। भ्रातृसौहृदमास्थाय यदुक्तं वच
नं त्वया।। न्याय्यं युक्तं च कौंतेय प्रीतोहं तेन तेर्जुन।। युद्धधर्मेषु सर्वेषु क्रियायां नैपुणेषु च।। न त्वया सदृशः कश्चित्त्रिषु
लोकेषु विद्यते।। धर्मसूक्ष्मं ततः नं नावक्यं तत्र च दुरुत्तरं त्वया।। धनंजय ममे बुद्धिमभिशंसितुमर्हसि।। युद्धशास्त्रविदेव त्वं
न वृद्धाः सेवितास्त्वया।। संक्षिप्तो विस्तरविदां नैतेषां वेत्सि निश्चयं।। तपस्त्यागो विधिरिति निश्चयस्तेषु धीमतां।। परं परं
ज्याय एषां नैःश्रेयसी मतिस्तव।। यस्त्वेतन्मन्यसे पार्थ न ज्यायोस्ति धनादिति।। अत्र ते वर्तयिष्यामि यथा नैतत्प्रधानतः।।
तपःस्वाध्यायशीला हि दृश्यंते धार्मिका जनाः।। ऋषयस्तपसा युक्ता येषां लोकाः सनातनाः।। अजातश्मश्रवो धीरास्त
थान्ये वनवासिनः।। अनन्ये बहवश्चैव स्वाध्यायेन दिवं गताः।। उत्तरेण तु पंथानमार्या विषयनिग्रहात्।। बुद्धिमंतमसङ्गं का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म
२०

स्मात्प्रव्रतां गताः॥ दक्षिणेन तु पंथानं यं ज्ञात्वा संतं प्रवक्ष्यते॥ ये ते क्रियावतां लोका ये श्मशाना निषेविरे॥ अनिर्देश्या गतिः
सा तु यो प्रपश्यंति मोक्षिणः॥ तस्माद्योगप्रधानेन ऽः सत्तु दुःखं प्रवेदितुं॥ अनुसृत्य तु शास्त्राणि कवयः समुपास्थिताः॥ अपी
ह स्यादपीह स्यात्सारासार दिदृक्षया॥ वेदवादानतिक्रम्य शास्त्राण्यारण्यकानि च॥ विपाट्य कदलीस्कंधं सारं ददृशिरे
न ते॥ अथैकांतव्युदासेन शरीरे पांचभौतिके॥ इच्छाद्वेषसमायुक्तमात्मानं प्राहुरिंगितैः॥ अग्राह्यं चक्षुषा सूक्ष्मं अनि
र्देश्यं च तद्गिरा॥ कर्महेतुपुरस्कारं भूतेषु परिवर्तते॥ कल्याणगोचरं कृत्वा मनस्तृष्णां निगृह्य च॥ कर्मसंततिमुत्सृ
ज्य स्यान्निरालंबनः सुखं॥ अस्मिन्नेवं सूक्ष्मगम्ये च मार्गे सद्भिर्निषेविते॥ कथमर्थमनर्थाढ्यं अर्जुन त्वं प्रशंससि॥ पूर्वशा न
स्त्रविदो ह्येवं जनाः पश्यंति भारत॥ क्रियासु निरता नित्यं दाने यज्ञे च कर्मणि॥ भवंति सुदुरात्मानो हेतुमंतोपि पंडिताः॥
दृढपूर्वस्मृता मूढा नैतदस्तीति वादिनः॥ अमृतस्यावमंतारो वक्तारो जनसंसदि॥ चरंति वसुधां कृत्स्नां वावदूका
बहुश्रुताः॥ पार्थ यान्न विजानीमः कस्तान्ज्ञातुमिहार्हसि॥ एवं प्राज्ञान्सतश्चापि महतः शास्त्रवित्तमान्॥ तपसा म त
हदोमाति बुध्या वै विंदते महत्॥ त्यागेन सुखमाप्नोति सदा कौंतेय तत्वविन्॥ ॥शांतौ राजधर्मे॥ ॥वैशंपायनः॥ ॥
अस्मिन्वाक्यांतरे वक्ता देवस्थानो महातपाः॥ अभिनीततरं वाक्यमित्युवाच युधिष्ठिरं॥ यद्वचः फाल्गुनेनोक्तं न ज्यायो
स्ति धनादिति॥ अत्र ते वर्तयिष्यामि तदेकाग्रमनाः शृणु॥ अजातशत्रो धर्मेण कृत्स्ना ते वसुधा जिता॥ तां जित्वा न वृथा २०

स्था
राजन्परित्यक्तुमिहार्हसि॥ चतुष्पदां हि निःश्रेणी कर्मण्येषा प्रतिष्ठिता॥ तां क्रमेणा महाबाहो यथावज्जय पार्थि
व॥ तस्मात्पार्थ महायज्ञैः यजस्व बहुदक्षिणैः॥ स्वाध्याययज्ञा ऋषयो ज्ञानयज्ञास्तथापरे॥ कर्मनिष्ठांश्च बुध्येथा
स्तपोनिष्ठांश्च भारत॥ वैखानसानां कौंतेय वचनं श्रूयते यथा॥ ईहते धनहेतोर्यस्तस्यानीहा गरीयसी॥ भूयांदो
षो हि वर्द्धेत यस्तं धर्ममुपाश्रयेत्॥ कृच्छ्राच्च द्रव्यसंहारं कुर्वंति विधिकारणात्॥ आत्मानं तृषितो बुध्या स्वं हत्यां ण
न बुध्यते॥ अनर्हते यद्ददाति न ददाति यदर्हते॥ अर्हानर्हापरिज्ञानाद्दानधर्मोपि दुष्करः॥ यज्ञाय सृष्टानि ध
नानि धात्रा यज्ञे दिष्टः पुरुषो रक्षिता च॥ तस्मात्सर्वं यज्ञ एवोपयोज्यं धनं ततोनंतर एव कामः॥ यज्ञैरिंद्रो विविधै
रन्नवद्भिर्देवान्सर्वानभ्ययाद्भूरितेजाः॥ तेनेंद्रत्वं प्राप्य विभ्राजते सौ तस्मात्सर्वं यज्ञ एवोपयोज्यं॥ महादेवः सर्वय
ज्ञे महात्मा हुत्वात्मानं देवदेवो बभूव॥ विश्वाल्लोकान्व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान्कृत्तिवासाः॥ आवि
क्षितः पार्थिवो ऽस्य महात्मा शक्रं द्वाशाके यो ऽजयद्देवराजं॥ यज्ञे यस्य श्रीः स्वयं संनिविष्टा यस्मिन्भांडं कांचनं सर्वमासी
त्॥ हरिश्चंद्रः पार्थिवेंद्रः श्रुतस्ते यज्ञैरिष्ट्वा पुण्यभाग्वीतशोकः॥ ऋध्या शक्रं योजयन्मानुषः संस्तस्मात्सर्वं यज्ञ एवोप
योज्यं॥ ॥शांतौ राजधर्मे॥ ॥देवस्थान उवाच॥ ॥अत्रैवोदाहरंतीममितिहासं पुरातनं॥ इंद्रेण समये पृष्टे यदु
वाच बृहस्पतिः॥ संतोषो वै स्वर्गतमः संतोषः परमं सुखं॥ तुष्टेर्न किंचित्परतः सा सम्यक्प्रतितिष्ठति॥ यदा संह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रते कामान्कूर्मोंगानीव सर्वशः ॥ तथात्मज्योतिरात्मैव स्वात्मन्येव प्रसीदति ॥ यदा चायं यदा चास्मान्न बिभ्यति ॥ का
मद्वेषौ च त्यजेत्तदात्मानं प्रपश्यति ॥ यदासौ सर्वभूतानां न कुह्यति न कांक्षति ॥ कर्मणा मनसा वाचा ब्रह्म संप
द्यते तदा ॥ एवं कौंतेय भूतानि तत्तत्कर्मतथा तथा ॥ तदात्मना प्रपश्यंति तस्माद्बुध्यस्व भारत ॥ अन्ये साम प्रशं
संति व्यायाममपरे जनाः ॥ नैकं न चापरे किंचिदुभयं च तथापरे ॥ युद्धमेके प्रशंसंति संन्यासमपरे जनाः ॥ दान
मेके प्रशंसंति केचिदेव प्रतिग्रहं ॥ केचित्सर्वं परित्यज्य तूष्णीं ध्यायंत आसते ॥ एके चैव प्रशंसंति प्रजानां परिपा
लनं ॥ हत्वा छित्वा च भित्वा च केचिदेकांतशालिनः ॥ एतत्सर्वं समालोक्य बुधानामेष निश्चयः ॥ अद्रोहेणैव भूता
नां यो धर्मः स सतां मतः ॥ अद्रोहः सत्यवचनं संविभागो दया दमः ॥ प्रजानां स्वेषु दारेषु मार्दवं ह्रीरचापलं ॥ एवं धर्मं
प्रधानेष्टं मनुः स्वायंभुवोब्रवीत् ॥ तस्मादेतत्प्रयत्नेन कौंतेय परिपालय ॥ यो हि राज्ये स्थितः शश्वद्वशी शीतु
ल्यप्रियाप्रियः ॥ क्षत्रियो यज्ञशिष्टाशी राजशास्त्रार्थतत्ववित् ॥ असाधुनिग्रहरतः साधूनां प्रग्रहे रतः ॥ धर्मे
वर्त्मनि संस्थाप्य प्रजा वर्तेत धर्मवित् ॥ पुत्रसंक्रामितश्रीश्च वने वन्येन वर्त्तयन् ॥ विधिना श्रावणेनैव कुर्यात्काम
मतंद्रितः ॥ य एवं वर्त्तते राजा राजधर्मविनिश्चितः ॥ तस्यायं च परश्चैव लोकः स्यात्सफलोदयः ॥ निर्वाणं हि सुदुष्प्रा
प्यं बहुविघ्नं च मे मतं ॥ एवं धर्ममनुप्राप्ताः सत्यदानतपःपराः ॥ आनृशंस्यगुणैर्युक्ताः कामक्रोधविवर्जिताः ॥ २१

प्रजानां पालने युक्ता धर्ममुत्तममास्थिताः ॥ गोब्राह्मणार्थे युध्यंतः प्राप्ता गतिमनुत्तमां ॥ एवं रुद्राः सवसवः
स्तथादित्याः परंतप ॥ साध्या राजर्षिसंघाश्च धर्ममेतं समाश्रिताः ॥ अप्रमत्तास्ततः स्वर्गं प्राप्ताः पुण्यैः स्वक
र्मभिः ॥ ॥ इति शांतौ राजधर्मे ॥ ॥ वैशंपायनः ॥ ॥ अस्मिन्वाक्यांतरे वाक्यं पुनरेवार्जुनोब्रवीत् ॥ विवि
ग्नमनसं ज्येष्ठमिदं भ्रातरमच्युतं ॥ क्षत्रधर्मेण धर्मज्ञ प्राप्य राज्यं सुदुर्लभं ॥ जित्वा चारीन्नरश्रेष्ठ तप्यं
ते किं त्वया भृशं ॥ क्षत्रियाणां महाराज संग्रामे निधनं मतं ॥ विशिष्टं बहुभिर्यज्ञैः क्षत्रधर्मविधिः स्मृतः ॥ ब्राह्म
णानां तपस्त्यागः एष धर्मविधिः स्मृतः ॥ क्षत्रियाणां हि निधनं संग्रामे नियतं प्रभो ॥ क्षत्रधर्मो महारौद्रः शस्त्र
नित्य इति स्मृतः ॥ वधश्च भरतश्रेष्ठ काले शस्त्रेण संयुगे ॥ ब्राह्मणस्यापि चेद्राजन् क्षत्रधर्मेण वर्त्तत ॥ प्रशस्तं जी
वितं लोके क्षत्रं हि ब्रह्मसंभवं ॥ न त्यागो न पुनर्यज्ञो न तपो मनुजेश्वर ॥ क्षत्रियस्य विधीयंते न परस्वोपजीवि
नं ॥ स भवान्सर्वधर्मज्ञो धर्मात्मा भरतर्षभ ॥ राजा मनस्वी निपुणो लोके दृष्टपरापरः ॥ त्यक्त्वा संतापजं शोकं
दंशितो भव कर्मणि ॥ क्षत्रियस्य विशेषेण हृदयं वज्रसंहितं ॥ जित्वारीन् क्षत्रधर्मेण प्राप्य राज्यमकंटकं ॥ वि
जितात्मा मनुष्येंद्र यज्ञदानपरो भव ॥ इंद्रो वै ब्रह्मणः पुत्रः क्षत्रियः कर्मणाभवत् ॥ ज्ञातीनां पापवृत्तीनां जघान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवतिर्नव॥ तथास्य कर्म पूज्यं च प्रशस्यं च विशांपते॥ तेन वेंद्रस्य मापेदे देवानामिति नः श्रुतं॥ स त्वं यज्ञैर्महारा
ज यजस्व बहुदक्षिणैः॥ यथैवेंद्रो मनुष्येंद्र चिराय विगतज्वरः॥ मा त्वमेवं गतेके चित्तुक्ष त्रिर्षभ शोचिथाः॥ ग
तास्ते क्षत्रधर्मेण शस्त्रपूताः परां गतिं॥ भवितव्यं तथा तच्च यद्वृत्तं भरतर्षभ॥ दिष्टं हि राजशार्दूल न शक्यम
तिवर्तितुं॥ ॥ शांतौ राजधर्मे॥ ॥ वैशंपायनः॥ ॥ एवमुक्तस्तु कौंतेयो गुडाकेशेन पांडव॥ नोवाच किंचित्कौ
रव्य ततो द्वैपायनोब्रवीत्॥ ॥ व्यास उवाच॥ ॥ बीभत्सोर्वचनं सम्यक् सत्यमेतद्युधिष्ठिर॥ शास्त्रदृष्टः प
रो धर्मः स्मृतो गार्हस्थ्य आश्रमः॥ स्वधर्मं चर धर्मज्ञ यथाशक्ति यथाविधि॥ न हि गार्हस्थ्यमुत्सृज्य तवारण्यं वि
धीयते॥ गृहस्थं हि सदा देवाः पितरो ऋषयस्तथा॥ भृत्याश्चैवोपजीवंति तान्भजस्व महीपते॥ वयांसि प
शवश्चैव भूतानि च जनाधिप॥ गृहस्थैरेव धार्यंते तस्माच्छ्रेष्ठो गृहाश्रमी॥ सो यं चतुर्णामेतेषामाश्रमाणां
दुराचरः॥ तं चराद्य विधिं पार्थ दुश्चरं दुर्बलेंद्रियैः॥ वेदज्ञानं च ते कृत्स्नं तपश्चरितं महत्॥ पितृपैतामहं रा
ज्यं धुर्यवद्वोढुमर्हसि॥ तपो यज्ञः क्षमा विद्या भैक्ष्यमिंद्रियसंयमः॥ ध्यानमेकांतशीलित्वं तुष्टिर्ज्ञानं च श
क्तितः॥ ब्राह्मणानां महाराज चेष्टासां सिद्धिकाभवत्॥ क्षत्रियाणां तु वक्ष्यामि तवापि विदितं पुनः॥ यज्ञो २२

विद्या समुत्थानमसंतोषः श्रियं प्रति॥ दंडधारणमुग्रत्वं प्रजानां परिपालनं॥ वेदज्ञानं तथा कृत्स्नं तपः सुच
रितं तथा॥ द्रविणोपार्जनं भूरि पात्रे च प्रतिपादनं॥ एतानि राज्ञां कर्माणि सुकृतानि विशांपते॥ इमं लोकम
ती मुं चैव साधयंति नः श्रुतं॥ एषां ज्यायस्तु कौंतेय दंडधारणमुच्यते॥ बलं हि क्षत्रिये नित्यं बले दंडः समाहितः॥ ए
ताश्चेष्टाः क्षत्रियाणां राजन् संसिद्धिकारिका॥ अपि गाथामिमां चापि बृहस्पतिरगायत॥ भूमिरेतौ निगिर
ति सर्पो बिलशयानिव॥ राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनं॥ सुद्युम्नश्चापि राजर्षिः श्रूयते दंडधार
र णात्॥ प्राप्तवान्परमां सिद्धिं दक्षः प्राचेतसो यथा॥ ॥ युधिष्ठिर उवाच॥ भगवन्कर्मणा केन सुद्युम्नो वसुधाधिपः॥ संसिद्धिं परमां प्राप्तः श्रोतुमिच्छामि तं नृपं॥ ॥ व्यास उवाच॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरा
तनं॥ शंखश्च लिखितश्चास्तां भ्रातरौ संशितव्रतौ॥ तयोरावसथावास्तां रमणीयौ पृथक्पृथक्॥ नित्य
पुष्पफलैर्वृक्षैरुपेतौ बहुधामनु॥ ततः कदाचिल्लिखितः शंखस्याश्रममागमत्॥ यदृच्छयाथ शंखोपि नि
ष्क्रांतोभवदाश्रमात्॥ सोभिगम्याश्रमं भ्रातुः शंखस्य लिखितस्तथा॥ फलानि शातयामास सम्यक्परिण
तान्युत॥ तान्युपादाय विश्रब्धो भक्षयामास स द्विजः॥ तस्मिंश्च भक्षयत्येव शंखोप्याश्रममागमत्॥ भक्षयं
तं च तं दृष्ट्वा शंखो भ्रातरमब्रवीत्॥ कुतः फलान्यवाप्तानि हेतुना केन खादसि॥ सोब्रवीद्भ्रातरं ज्येष्ठमुपस्पृश्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म
इत
२३

भिवाद्य चा॥ एवम्गृहीतानि मयेति प्रहसन्निव॥ तमब्रवीत्तदा शंखस्तीव्ररोषसमन्वितः॥ स्तेयं त्वया कृतमि
दं फलान्याददता स्वयं॥ गच्छ राजानमासाद्य स्वकर्म कथयस्व वै॥ अदत्तादानमेवं हि कृतं पार्थिवसत्तम॥ तेन
स्व मां त्वं विदित्वाथ धर्ममनुपालय॥ शीघ्रं धारय चौरस्य मम दंडं नराधिप॥ इत्युक्तस्तस्य वचनात्सुद्युम्नं स नराधि
पं॥ अभ्यगच्छन्महाबाहो लिखितः शंसितव्रतः॥ सुद्युम्नस्त्वंतपालेभ्यः श्रुत्वा लिखितमागतं॥ अभ्यगच्छत्सहामा
त्यः पद्भ्यामेव जनेश्वरः॥ तमब्रवीत्समागम्य स राजा धर्मवित्तमं॥ किमागमनमाचक्ष्व भगवन्कृतमेव तत्॥ ए
वमुक्तः स विप्रर्षिः सुद्युम्नमिदमब्रवीत्॥ प्रतिश्रुत्य करिष्येति श्रुत्वा तत्कर्तुमर्हसि॥ अनिसृष्टानि गुरुणा फलानि
मनुजर्षभ॥ भक्षितानि मया राजन्स्त्वं मां शाधि माचिरं॥ ॥सुद्युम्न उवाच॥ ॥प्रमाणं चेन्मतो राजा भवतो
दंडधारणे॥ अनुज्ञायामपि तथा हेतुः स्याद्ब्राह्मणर्षभ॥ स भवानभ्यनुज्ञातः शुचिकर्मा महाव्रतः॥ ब्रूहि कामान
तोन्यांस्त्वं करिष्यामि हि ते वचः॥ ॥व्यास उवाच॥ ॥संछंद्यमानो ब्रह्मर्षिः पार्थिवेन महात्मना॥ नान्यं स वरयामा
स तस्माद्दंडाद्दते वरं॥ ततस्स पृथिवीपालो लिखितस्य महात्मनः॥ करौ प्रच्छेदयामास धृतदंडो जगाम सः॥ स गत्वा
भ्रातरं शंखमार्त्तरूपोब्रवीदिदं॥ धृतदंडस्य दुर्बुद्धेर्भगवन्क्षंतुमर्हसि॥ ॥शंख उवाच॥ ॥न कुप्ये तव धर्मज्ञ न च २३

दूषयसे मम॥ धर्मस्तु ते व्यतिक्रांतस्ततस्ते निष्कृतिः कृता॥ स गत्वा बाहुदां शीघ्रं तर्पयस्व यथाविधि॥ देवानृषीन्पितॄंश्चै
व मा चाधर्मे मनः कृथाः॥ ॥व्यास उवाच॥ ॥ततस्तद्वचनं श्रुत्वा शंखस्य लिखितस्तदा॥ अवगाह्यापगां पुण्यामुदका
र्थं प्रचक्रमे॥ प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ॥ ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ॥ ततस्तमब्रवीच्छं
खस्तपसेदं कृतं मया॥ विशंका माच ते त्वत्र दैवमत्र विधीयते॥ ॥लिखित उवाच॥ ॥किं नु नाहं त्वया पूतः पूर्वमेव
महाद्युते॥ पश्य ते तपसो वीर्यमीदृशं द्विजसत्तम॥ ॥शंख उवाच॥ ॥एवमेतन्मया कार्यं नाहं दंडधरस्तव॥ स
च पूतो नरपतिस्त्वं चापि पितृभिः सह॥ ॥व्यास उवाच॥ ॥स राजा पांडवश्रेष्ठ याचैतेनैव कर्मणा॥ प्राप्तवान्परमां
२ सिद्धिं दक्षः प्राचेतसो यथा॥ एष धर्मः क्षत्रियाणां प्रजानां परिपालनं॥ उत्पथोन्यो महाराज मा स्म शोके मनः कृथाः॥
भ्रातुरस्य हितं वाक्यं शृणु धर्मज्ञ तां वर॥ दंड एव हि राजेंद्र क्षत्रधर्मो न मुंडनं॥ ॥इति शांतौ राजधर्मे॥ ॥वैशंपा
यन उवाच॥ ॥पुनरेव महर्षिस्तं कृष्णद्वैपायनोब्रवीत्॥ अजातशत्रुं कौंतेयमिदं वचनमर्थवित्॥ अरण्ये वसता
तात भ्रातृणां ते मनस्विनां॥ मनोरथा महाराज ये तत्रासन्युधिष्ठिर॥ तानिमे भरतश्रेष्ठ प्राप्नुवंतु महारथाः॥ प्रशा
धि पृथिवीं पार्थ ययातिरिव नाहुषः॥ अरण्ये दुःखवसतिरनुभूता तपस्विभिः॥ दुःखस्यांते नरव्याघ्राः सुखान्यनु
भवंतु वै॥ धर्ममर्थं च कामं च भ्रातृभिः सह भारत॥ अनुभूय ततः पश्चात्प्रस्थातासि विशांपते॥ अतिथीनां पितॄणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चदेवतानां च भारत ॥ आनृण्यं गच्छ कौंतेय ततः सर्वं करिष्यसि ॥ सर्वमेधाश्वमेधाभ्यां यजस्व कुरुनंदन ॥ ततः पश्चान्म
हाराज गमिष्यसि परां गतिं ॥ भ्रातृंश्च सर्वान्क्रतुभिः संयोज्य बहुदक्षिणैः ॥ संप्राप्तः कीर्तिमतुलां पांडवेयो भविष्य
सि ॥ विद्मते पुरुषव्याघ्र वचनं कुरुसत्तम ॥ शृणु चैवं यथा कुर्वन्न धर्माच्च्यवते नृप ॥ आदानं स्वविजयं निग्रहं
च युधिष्ठिर ॥ समानधर्मकुशलाः स्थापयंति नरेश्वरं ॥ देशकालप्रतीक्षी यो दस्यून्मर्षयते नृप ॥ शास्त्रजां बुद्धि
मास्थाय युज्यते नैनसा स सह ॥ आदाय बलिषड्भागं यो राष्ट्रं नाभिरक्षति ॥ प्रतिगृह्णाति तत्पापं चतुर्थांशेन भूमिपः ॥
निबोध च यथा तिष्ठन्न धर्माच्च्यवते नृपः ॥ निग्रहाद्धर्मशास्त्राणामनुरुध्यन्नपेतभीः ॥ कामक्रोधवनादृत्य पि
वत्समदर्शनः ॥ शास्त्रजां बुद्धिमास्थाय नैनसा सोनुयुज्यते ॥ दैवेनाभ्याहतो राजा कर्मकाले महाद्युते ॥ न साधय
ति यत्कर्म न तदाहुरतिक्रमं ॥ तरसा बुद्धिपूर्वं वा निग्रहा एव शात्रवः ॥ पापैः सह न संदध्याद्राष्ट्रं पुण्यं च कारयेत् ॥ शू
राश्चार्याश्च सत्कार्या विद्वांसश्च युधिष्ठिर ॥ गोमिनो धनिनश्चैव परिपाल्या विशेषतः ॥ व्यवहारेषु धर्मेषु योक्त
व्याश्च बहुश्रुताः ॥ गुणयुक्तेपि नैकस्मिन्विश्वसेत विचक्षणः ॥ अरक्षिता दुर्विनीतो मानी स्तब्धोभ्यसूयकः ॥ एनसा
युज्यते राजा दुर्दांत इति चोच्यते ॥ ये रक्ष्यमाणा हीयंते दैवेनाभ्याहता नृप ॥ तस्करैश्चापि हन्यंते सर्वं तद्राजकिल्बिषं ॥
सुमंत्रिते सुनीते च सर्वतश्चोपपादिते ॥ पौरुषे कर्मणि कृते नास्त्यधर्मो युधिष्ठिर ॥ पहन्यंते समारंभाः सिध्यंत्यपि च वि

कर्मतः ॥ कृते पुरुषकारे तु नैनः स्पृशति पार्थिवं ॥ अत्र ते राजशार्दूल वर्तयिष्ये कथामिमां ॥ यद्वृत्तं पूर्वराजर्षेर्हयग्रीव
स्य पांडव ॥ शत्रून्हत्वा हतस्याजौ शूरस्याक्लिष्टकर्मणः ॥ असहायस्य संग्रामे निर्जितस्य युधिष्ठिर ॥ यत्कर्म वै निग्र
हे शात्रवाणां योगश्चाग्र्यः पालने शात्रवं ॥ कृत्वा कर्म प्राप्य कीर्तिं स युध्वा वाजिग्रीवो मोदते स्वर्गलोके ॥ संत्यक्तात्मा
समरेष्वाततायी शस्त्रैश्छिन्नो दस्युभिर्वध्यमानः ॥ अश्वग्रीवः कर्मशीलो महात्मा संसिद्धात्मा मोदते स्वर्गलोके ॥
धनुर्यूपो रशनाज्या शरस्रुक्स्रुवः खड्गो रुधिरं यत्र चाज्यं ॥ रथो वेदिः कामजो युद्धमग्निश्चातुर्होत्रं चतुरो वाजमुख्याः
॥ हुत्वा तस्मिन्यज्ञवह्नावथारीन्पापान्मुक्तो राजसिंहस्तरस्वी ॥ प्राणान्हुत्वा चावभृथे रणे स वाजिग्रीवो मोदते स्वर्ग
लोके ॥ दैवीं सिद्धिं मानुषीं दंडनीतिं योगन्यासैः पालयित्वा महीं च ॥ तस्माद्राजा धर्मशीलो महात्मा वाजिग्रीवो मोदते
स्वर्गलोके ॥ ४ ॥ राष्ट्रं रक्षन्बुद्धिपूर्वं नयेन संयुक्तात्मा यज्ञशीलो महात्मा ॥ सर्वांल्लोकान्व्याप्य कीर्त्या मनस्वी
वाजिग्रीवो मोदते स्वर्गलोके ॥ दैवीं सिद्धिं मानुषीं दंडनीतिं योगन्यासैः पालयित्वा महीं च ॥ तस्माद्राजा धर्मशीलो म
हात्मा वाजिग्रीवो मोदते स्वर्गलोके ॥ विद्वांस्त्यागी श्रद्दधानः कृतज्ञस्त्यक्त्वा लोकं मानुषं कर्म कृत्वा ॥ मेधाविनां विदुषां
संमतानां तनुत्यजां लोकमाक्रम्य राजा ॥ सम्यग्वेदान्प्राप्य शास्त्राण्यधीत्य सम्यग्राष्ट्रं पालयित्वा महात्मा ॥ चातुर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

२५

र्यं स्थाप यित्वा स्व धर्मे विजित्य वीवो मोदते स्वर्गलोके ॥ निर्जित्य संग्रामान् पालयित्वा प्रजाश्च सोमं पीत्वा तर्पयित्वा द्विजा
श्च ॥ युक्त्या दंडं धारयित्वा प्रजानां युद्धे क्षीणो मोदते स्वर्गलोके ॥ वृत्तं यस्य श्लाघनीयं मनुष्याः संतो विद्वांसश्चार्हय
न्त्यर्हणीयं ॥ स्वर्गं जित्वा वीरलोकानवाप्य सिद्धिं प्राप्तः पुण्यकीर्तिर्महात्मा ॥ ॥ इति श्री शांती राजधर्मे ॥ ॥ वैशंपा
यन उवाच ॥ ॥ द्वैपायनवचः श्रुत्वा कुपिते धनंजये ॥ व्यासमामंत्र्य कौंतेयः प्रत्युवाच युधिष्ठिरः ॥ ॥ युधिष्ठिर उवाच ॥
॥ ॥ न पार्थिवमिदं राज्यं न भोगाश्च पृथग्विधाः ॥ प्रीणयंति मनो मेद्य शोको मां रुंधयत्ययं ॥ श्रुत्वा वीरविहीनानां पुत्रा
णां च योषितां ॥ परिदेवयमानानां शांतिं नोपलभामहे ॥ इत्युक्तः प्रत्युवाचेदं व्यासो योगविदां वरः ॥ युधिष्ठिरं महाप्रा
ज्ञं धर्मज्ञो वेदपारगः ॥ ॥ व्यास उवाच ॥ ॥ न कर्मणा लभ्यते चिंतया वा नाप्यस्ति दाता पुरुषस्य कस्यचित् ॥ पर्यायि
योगाद्विहितं विधात्रा कालेन सर्वं लभते मनुष्याः ॥ न बुद्धिशास्त्राध्ययनेन शक्यं प्राप्तुं विशेषं मनुजैरकाले ॥ मूर्खोपि
चाप्नोति कदाचिदर्थान्कालो हि कार्यं प्रति निर्विशेषः ॥ नाभूतिकाले षु फलं ददाति शिल्पानि मंत्राश्च तथौषधानि ॥ ता
न्येव काले न समाहितानि सिध्यंति वर्द्धंति च भूमि काले ॥ कालेन शीघ्राः प्रवहंति वाताः कालेन वृष्टिर्जलदानुपैति ॥ का
लेन पद्मोत्पलवज्जलं च कालेन पुष्यंति वनेषु वृक्षाः ॥ कालेन कृष्णाश्च सिताश्च रात्र्यः कालेन चंद्रः परिपूर्णबिंबः ॥ २५

नाकालतः पुष्पफलं द्रुमाणां नाकालवेगाः सरितो वहंति ॥ नाकालमत्ताः खगपन्नगाश्च मृगद्विपाः शैलमहामृगाश्च
॥ नाकालतः स्त्रीषु भवंति गर्भा नायांत्यकाले शिशिरोष्णवर्षाः ॥ नाकालतो म्रियते जायते वा नाकालतो व्याहरते च बा
लः ॥ नाकालतो यौवनमभ्युपैति नाकालतो रोहति बीजमुप्तं ॥ नाकालतो भानुरुपैति योगं नाकालतोस्तं गिरिमभ्यु
पैति ॥ नाकालतो हीयते वर्द्धते च चंद्रः समुद्रश्च महोर्मिमाली ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ गीतं राज्ञा सेनजि
ता दुःखार्तेन युधिष्ठिर ॥ सर्वानेव पर्यायो मर्त्यान्स्पृशति दुस्तरः ॥ कालेन परिपक्वा हि म्रियंते सर्वपार्थिवाः ॥ घ्नंति चा
न्यान्नरा राजंस्तानप्यन्ये तथा नराः ॥ संज्ञैषा लौकिकी राजन्न हिनस्ति न हन्यते ॥ हंतीति मन्यते कश्चिन्न हंतीत्यपि चाप
रः ॥ स्वभावतस्तु नियतौ भूतानां प्रभवाप्ययौ ॥ नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ॥ अहो दुःखमिति ध्यायन्दुःखस्यापचि
तिं चरेत् ॥ स किं शोचसि मूढः सन् शोच्यान्किमनुशोचसि ॥ पश्य दुःखेषु दुःखानि भयेषु च भयान्यपि ॥ आत्मापि चायं न
मम सर्वा वा पृथिवी मम ॥ यथा मम तथान्येषामिति पश्यन्न मुह्यति ॥ शोकस्थानसहस्राणि हर्षस्थानशतानि च ॥ दिव
से दिवसे मूढमाविशंति न पंडितं ॥ एवमेतानि कालेन प्रियद्वेष्याणि भागशः ॥ जीवेषु परिवर्तंते दुःखानि च सुखानि च ॥
दुःखमेवास्ति न सुखं तस्मात्तदुपलभ्यते ॥ तृष्णार्तिप्रभवं दुःखं दुःखार्तिप्रभवं सुखं ॥ सुखस्यानंतरं दुःखं दुःखस्यानं
तरं सुखं ॥ यन्निमित्तं भवेच्छोकस्तापो वा दुःखमूर्छितं ॥ आयासो वापि यन्मूलस्तदेकांगमपि त्यजेत् ॥ सुखं वा यदि वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःखं प्रियं वा यदि वाप्रियं।। प्राप्तकालमुपासीत हृदयेनापराजितः।। ईषदप्यंगदाराणां पुत्राणां वा चराप्रियं।। ततो ज्ञास्य
सि कः कस्य केन वा कस्मिन्नेव वा।। ये च मूढतमा लोके ये च बुद्धेः परंगताः।। त एव सुखमेधंते मध्यमः क्लिश्यते जनः।। इत्यब्र
वीन्महाप्राज्ञो युधिष्ठिर स सेनजित्।। येन दुःखे न योद्युक्तो न जातु स सुखी भवेत्।। दुःखानां हि क्षयो नास्ति जायते ह्यपरा
परं।। सुखं च दुःखं च भवाभवौ च लाभालाभौ मरणं जीवितं च।। पर्यायशः सर्वमिह स्पृशंति तस्माद्धीरो नैव तुष्येन्न शोच
येत्।। दीक्षां राज्ञः संयुगे युद्धमाहुर्योगं राष्ट्रे दंडनीत्यां च सम्यक्।। वित्तत्यागं दक्षिणानां च यज्ञे सम्यग्दानं पावनानां
विजिघालो।। रक्षन्राष्ट्रं बुद्धिपूर्वं नयेन संत्यक्तात्मा यज्ञशीलो महात्मा।। सर्वान्लोकान्धर्मदृष्ट्या चरंश्चाप्यूर्ध्वं देहा
न्मोदते स्वर्गलोके।। जित्वा संग्रामान्पालयित्वा च राष्ट्रं सोमं पीत्वा वर्द्धयित्वा प्रजाश्च।। युक्त्या दंडं धारयित्वा प्रजानां यु
द्धे क्षीणो मोदते देवलोके।। सम्यग्वेदान्प्राप्य शास्त्राण्यधीत्य सम्यग्राष्ट्रं पालयित्वा च राजा।। चातुर्वर्ण्यं स्थापयित्वा स्व
धर्मे पूतात्मा वै मोदते स्वर्गलोके।। यस्य वृत्तं नमस्यंति स्वर्गस्थस्यापि मानवाः।। पौरजानपदामात्याः स राजा राजस
त्तमः।। ।। शांते राजधर्मे।। ।। वैशंपायन उवाच।। ।। अस्मिन्नेव प्रकरणे धनंजयमुदारधीः।। अभिनीततरं वाक्यं
मित्युवाच युधिष्ठिरः।। यदेतन्मन्यसे पार्थ न ज्यायोऽस्ति धनादिति।। न स्वर्गो न सुखं न श्रीर्निर्धनस्येति तन्न तथा।। स्वाध्या २६

यधर्मसंपन्ना दृश्यंते बहवो जनाः।। तपोरताश्च मुनयो येषां लोकाः सनातनाः।। ऋषीणां समयं शश्वद्ये रक्षंति धनंज
य।। आश्रिताः सर्वधर्मज्ञास्तान्देवा ब्राह्मणान्विदुः।। स्वाध्यायनिष्ठा मुनयो ज्ञाननिष्ठास्तथा परे।। बुध्येथाः सततं चा
पि कर्मनिष्ठान्धनंजय।। ज्ञाननिष्ठेषु कार्याणि प्रतिष्ठाप्यानि पांडव।। वैखानसानां वचनं यथा नो विदितं प्रभो।। अजा
श्च पृश्नयश्चैव सिकताश्चैव भारत।। अरुणाः केतवश्चैव स्वाध्यायेन दिवं गताः।। अवाप्यैतानि कर्माणि वेदोक्तानि धनंज
य।। दानमध्ययनं यज्ञो निग्रहश्चैव दुष्करः।। दक्षिणेन तु पंथानमर्यम्णो ये दिवं गताः।। एतानि क्रियवतां लोकानुक्तवान्पुर
३ पूर्वमहं तव।। उत्तरेण तु पंथानं नियमाद्यं प्रपश्यति।। एते योगवतां लोका भांति पार्थ सनातनाः।। तत्रोत्तरां गतिं पार्थ प्रशंसं
ति पुराविदः।। संतोषः स्वर्गगमनं संतोषः परमं सुखं।। तुष्टेर्न किंचित्परतः सा सम्यक्प्रतितिष्ठति।। विनीतक्रोधहर्षस्य
सततं विद्धि सत्तमा।। अत्राप्युदाहरंतीमा गाथा गीता ययातिना।। यदाभिः प्रत्याहरते कामान्कूर्मोऽङ्गानीव सर्वशः।। यदा चा
यं न बिभेति यदा चास्मान्न बिभ्यति।। यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा।। यदा भावं न कुरुते सर्वभूतेषु पापकं।। क
र्मणा मनसा वाचा ब्रह्म संपद्यते तदा।। विनीतमानमोहस्य बहुसंगविवर्जितः।। तथात्मज्योतिषः साधोर्निर्वाणमुपपद्य
ते।। इदं तु शृणु मे पार्थ ब्रुवतः संयतेंद्रियः।। धर्ममन्ये वृत्तमन्ये धनमीहंति चापरे।। धनहेतोर्य ईहेत तस्यानीहा गरीयसी।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्मे॥ भया त्रुद्दोषोस्ति वित्तस्य यस्य धर्मस्तदाश्रयः॥ प्रत्यक्षमनुपश्याम त्वमपि द्रष्टुमर्हसि॥ वर्जनं वर्जनीयानां ईहमानो
२७ नदुष्करं॥ ये वित्तमनुपश्यंते सम्यक्तेषु सुदुर्लभं॥ दुह्यतश्चेतिततस्माहुः प्रतिकूलं यथातथं॥ यस्तु संभिन्नवृत्तः स्याद्वीत
शोकभयो नरः॥ अन्ये नस्तषितो दुह्य रञ्जरूपाहत्यां न बुध्यते॥ दुःखान्यददतो स्तत्यानि संदस्युभयादिव॥ दुर्लभं च धनं प्रा
प्य भृशं दत्वानुतप्यते॥ अधनः कस्य किंवा च्यो विमुक्तः सर्वतः सुखी॥ देवस्वमुपादहैव न धनेन सुखी भवेत्॥ अत्र गाथां
यज्ञगीतां कीर्तयंति पुराविदः॥ त्रयीमपाश्रितं लोके यज्ञसंस्तनकारिकां॥ यज्ञानि सृष्टानि धनानि धात्रा पत्नीयस्तष्टः
पुरुषो रक्षिता च॥ तस्मात्सर्वं यज्ञ एवोपयोज्यं धनं न कामाय हितं प्रशस्तं॥ यतस्वार्थं च कौंतेय धनं धनवतां वरः॥ धाता
ददाति मर्त्येभ्यो यज्ञार्थमिति विद्धि तत्॥ तस्माद्बुध्यंति पुरुषा न हि तत्कस्य चिद्ध्रुवं॥ श्रद्दधानस्तु तल्लोके ददाश्चैव यजेति
च॥ लब्धस्य त्यागमित्याहुर्न भोगं न च संचयं॥ तस्य किं संचयेनार्थः कार्ये ज्यायसि तिष्ठसि॥ ये स्वधर्माद्दियेतेभ्यः प
यच्छंत्यल्पबुद्धयः॥ शतं वर्षाणि ते प्रेत्य पुरीषं भुंजते जनाः॥ अनर्हते यद्ददाति न ददाति यदर्हते॥ अर्हानर्हापरिज्ञाना
द्दानधर्मोपि दुष्करः॥ लब्धानांद्व्यजातानां बोद्धव्यौ द्वावतिक्रमौ॥ अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं॥ ॥इति शांतौ
राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥अभिमन्यौ हते बाले द्रौपद्यास्तनयेषु च॥ धृष्टद्युम्ने विराटे च द्रुपदे च महीप २७

मुं
तौ॥ वसुषेणे च धर्मज्ञे धृष्टकेतुश्च पार्थिवे॥ तथान्येषु नरेंद्रेषु नानादेश्येषु संयुगे॥ न विंचति मां शोको ज्ञातिघाति
नमातुरं॥ राज्यकामुकमत्युग्रं स्ववंशोच्छेदकारकं॥ यस्यांके क्रीडमानेन मया वै परिवर्तितं॥ स मया राज्यलु
ब्धेन गांगेयो युधि पातितः॥ यदा ह्येनं विघूर्णन्तमपश्यं पार्थसायकैः॥ कंपमानं यथा वज्रैः प्रेक्षमाणं शिखंडिना
॥ जीर्णं सिंहमिवारण्ये नरसिंहं पितामहं॥ कीर्यमाणं शरैर्दीप्तैर्दृष्ट्वा मे व्यथितं मनः॥ प्राङ्मुखं सीदमानं च रथेर
रथारुजं॥ घूर्णमानं यथा शैलं तदा मे कश्मलोऽभवत्॥ यस्य बाणधनुष्पाणि र्योधयामास भार्गवं॥ बहून्यहानि
कौरव्यः कुरुक्षेत्रे महामृधे॥ समेतं पार्थिवं क्षत्रं वाराणस्यां नदीसुतः॥ कन्यार्थमाह्वयद्वीरो रथेनैकेन संयुगे॥ ये
न चोग्रायुधो राजा चक्रवर्ती दुरासदः॥ दग्धः शस्त्रप्रतापेन स मया युधि पातितः॥ स्वयं मृत्युं रक्षमाणः पांचाल्याय
शिखंडिनं॥ न बाणैः पातयामास सोऽर्जुनेन निपातितः॥ यदैनं पतितं भूमावपश्यं रुधिरोक्षितं॥ तदैवाविशदत्यु
ग्रो ज्वरो मां मुनिसत्तम॥ येन संवर्द्धिता बाला येन स्म परिरक्षिताः॥ स मया राज्यलुब्धेन पापेन गुरुघातिना॥ अ
ल्पकालस्य राज्यस्य कृते मूढेन घातितः॥ आचार्यश्च महेष्वासः सर्वपार्थिवपूजितः॥ अभिगम्य रणे मिथ्या पापे
नोक्तः सुतं प्रति॥ तन्मे दहति गात्राणि यन्मां गुरुरभाषत॥ सत्यमाख्याहि राजंस्त्वं यदि मा वजिमत्सुतः॥ सत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मामर्षयं विप्रो मयेतस्परिपृष्टवान्॥ कुंजरं चानृतं कृत्वा मिथ्योपचरितं मया॥ सुदृष्टो राजलुब्धेन पापेन गुरुघा
तिना॥ सत्यं कंचुकमुन्मुच्य सममया गुरुराहवे॥ अश्वत्थामा हत इति मयोक्तः कुंजरे हते॥ कंतुल्लोकं गमिष्यामि
कृत्वा कर्मसुदुष्करं॥ अद्यापि वयं च यत्कर्ण समरे ष्व पालायनं॥ ज्येष्ठ भ्रातरमत्युग्रं को मत्तः पापकृत्तमः॥ अभि
मन्युं च यद्बालं जातं सिंहमिवाद्रिषु॥ प्रावेशयमहं लुब्धो वाहिनीं द्रोणपालितां॥ तदाप्रभृति वीभत्सुं न शक्नो
मि निरीक्षितुं॥ कृष्णं च पुंडरीकाक्षं किल्बिषी ब्रह्महा यथा॥ द्रौपदी चापि दुःखार्त्ता पंचपुत्र विनाकृता॥ शोचामि पृ
थिवीं हीनां पंचभिः पर्वतैरिव॥ सोहमागस्करः पापः पृथिवीनाशकारकः॥ आसीन एवमेवेदं शोषयिष्ये कले
वरं॥ प्रायोपविष्टं जानिध्वमधमां गुरुघातिनं॥ जातिष्वन्यास्वपि यथा न भवेयं कुलांतकृत्॥ न भोक्ष्ये पाचषा
नीयमुपभोक्ष्ये कदाचन॥ शोषइष्ये प्रियान्प्राणां निहस्तो हं तपोधन॥ यथेष्टं गम्यतां काममनुजाने प्रसाद
त॥ सर्वै मामनुजानीत त्यक्ष्यामीदं कलेवरं॥ ॥वैश॥ ॥ तमेववादिनं पार्थं बंधुशोकेन विह्वलं॥ मैवमित्य
ब्रवीद्व्यासो निगृह्य मुनिसत्तमः॥ ॥व्यास उवाच॥ ॥अतिवेलं महाराज न शोकं कर्तुमर्हसि॥ पुनरुक्तं च
वक्ष्यामि दिष्टमेतदिति प्रभो॥ संयोगा विप्रयोगांता जातानां प्राणिनां ध्रुवं॥ बुद्बुदा इव तोयेषु भवंति न भवंति ३२८

च॥ सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः॥ संयोगा विप्रयोगांताः मरणांतं हि जीवितं॥ सुखं दुःखांतमाल
स्यं दाक्ष्यं दुःखं सुखोदयं॥ भूतिर्ह्रीः श्रीर्धृतिः कीर्त्तिः कीर्तिर्दक्षे वसंती नालसे॥ नालं सुखाय सुहृदो ना
लं दुःखाय शत्रवः॥ न च प्रज्ञालमर्थेभ्यो न सुखानामलं धनं॥ यथा सृष्टोसि कौंतेय धात्रा कर्मसु
तुरु॥ अत एव हि सिद्धिस्ते नेतस्त्वं कर्मणां नृप॥ शांतो राजधर्मे॥ ॥वैशंपायन॥ ॥ज्ञातिशोकाभि
तप्तस्य प्राणानभ्युत्सिसृक्षतः॥ ज्येष्ठस्य पांडुपुत्रस्य व्यासः शोकमपानुदत्॥ ॥व्यास उवाच॥ ॥अत्राप्यु
दाहरंतीममितिहासं पुरातनं॥ अश्मगीतं नरव्याघ्र तं निबोध युधिष्ठिर॥ अश्मानं ब्राह्मणं प्राज्ञं वैदेहो
जनको नृपः॥ संशयं परिपप्रच्छ दुःखशोकसमन्वितः॥ ॥जनक उवाच॥ ॥आगमे यदि वापाये ज्ञातिनो
द्रविणस्य वा॥ नरेण प्रतिपत्तव्यं कल्याणं कथमिच्छता॥ ॥अश्मोवाच॥ ॥उत्पन्नमिममात्मानं नरस्या
नंततः ततः॥ तानि तान्यभिवर्त्तंते दुःखानि च सुखानि च॥ तेषामन्यतरापत्तौ यद्यदेवोपपद्यते॥ तदस्तं चेत
नामस्य हरत्यभ्रमिवानलः॥ अहं जातोस्मि सिद्धोस्मि नास्मि केवलमानुषः॥ इत्येभिर्हेतुभिस्तस्य त्रिभि
श्चित्तं प्रसिच्यते॥ संप्रसिक्तं मनो भोगान् विसृज्य पितृसंचितान्॥ परिक्षीणाः परस्वानामादाने साधु मन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सो॥ तमतिक्रांतमर्यादमाददानमसांप्रतं॥ प्रतिषेधंति राजानो लुब्धामरामिवेषिभिः॥ येच विंशतिवर्षा वै त्रिंशद्वर्षाश्च मा
नवाः॥ परेण ते वर्षशतात् भविष्यंति पार्थिव॥ तेषां परमदुःखानां बुध्या भैषज्यमाचरेत्॥ एवमेतानि दुःखानि तानि तानीह मान
वं॥ विविधान्युपवर्तंते तथा संस्पर्शजान्युत॥ जरामृत्यू हि भूतानां खादितारौ वृकाविव॥ बलिनां दुर्बलानां च ह्रस्वानां महता
मपि॥ न कश्चिज्जात्वतिक्रामेज्जरामृत्यू हि मानवः॥ अपि सागरपर्यंतां विजित्येमां वसुधरां॥ सुखं वा यदि वा दुःखं भूतानां पर्युप
स्थितं॥ प्राप्तव्यमवशैः सर्वं परिहारो न विद्यते॥ पूर्वे वयसि मध्ये वा पुत्तनेवान नाधिप॥ अवर्जनीयास्ते ह्यर्था वै कांक्षितापेततोन्यथा
॥ अप्रियैः सह संयोगो विप्रयोगश्च सुप्रियैः॥ अर्थानर्थौ सुखं दुःखं विधानमनुवर्तते॥ प्रादुर्भावश्च भूतानां देहन्यासस्तथैव च॥
प्राप्तिर्व्यायामयोगश्च सर्वमेतत्प्रतिष्ठितं॥ गंधवर्णरसस्पर्शा निवर्तंते स्वभावजाः॥ तथैव सुखदुःखानि विविधान्यनुवर्तते॥ आ
सनं शयनं यानमभ्युत्थानान्नभोजने॥ नियतं सर्वभूतानां कालेनैव भवत्युत॥ वैद्याश्चाप्यातुराः संति बलवंतश्च दुर्बलाः॥ श्रीमंत
श्चापरे षंढा विचित्रः कालपर्ययः॥ कुले जन्म तथैश्वर्यमारोग्यं रूपमेव च॥ सौभाग्यं सुतभोगाश्च भवितव्येन लभ्यते॥ संति पु
स त्राः सुबहवो दरिद्राणामनिच्छतां॥ नास्ति पुत्रः समृद्धानां विचित्रं विधिचेष्टितं॥ व्याधिरग्निर्जलं शस्त्रं बुभुक्षा श्वापदं विषं॥ र
ज्वरश्च मरणं जंतोरुच्चाच्च पतनं तथा॥ निर्माणे यस्य यद्दिष्टं तेन गच्छति सेतुना॥ दृश्यते नाभ्यतिक्रामन्नतिक्रांतो न वा पुनः॥
अतिक्रांते वाप्यतिक्रामन्न नियोग्यो यथा पुनः॥ दृश्यते हि युवैवेह विनश्यन्वसुमान्नरः॥ दरिद्रश्च परिक्लिष्टः शतवर्षो जराधि ३०

८९
तः॥ अकिंचनाश्च दृश्यंते पुरुषाश्चिरजीविनः॥ समृद्धे च कुले जाता विनश्यंति पतंगवत्॥ प्रायेण श्रीमतां लोके भोक्तुं
शक्तिर्न विद्यते॥ जीर्यंत्यपि हि काष्ठानि दरिद्राणां हि सर्वशः॥ अहमेतत्करोमीति मन्यते कालचोदितः॥ यद्यदिष्टमसंतोषा
दुरात्मा पापमाचरेत्॥ मृगपक्षाः स्त्रियः पानं प्रसंगा निंदिता बुधैः॥ दृश्यंते बहवश्चात्र सुप्रयुक्ता बहुश्रुताः॥ इति कालेन
सर्वार्थानीप्सितानीप्सितानि ह॥ स्पृशंति सर्वभूतानि निमित्तं नोपलभ्यते॥ वायुमाकाशमग्निं च चंद्रादित्यावहःक्षपे॥ ज्यो
तींषि सरितः शैलान् कः करोति बिभर्ति च॥ शीतमुष्णं तथा वर्षं कालेन परिवर्तते॥ एवमेतन्मनुष्याणां सुखदुःखे नरर्षभ॥ नौष
धानि न शास्त्राणि न होमा न पुनर्जपाः॥ त्रायंते मृत्युनोपेतं जरया वापि मानवं॥ यथा काष्ठं च काष्ठं च समेयातां महोदधौ॥
समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥ ये चैव पुरुषाः स्त्रीभिर्गीतवाद्यैरुपस्थिताः॥ ये चानाथाः परान्नादाः कालस्तेषां समक्रि
यः॥ मातृपितृसहस्राणि पुत्रदारशतानि च॥ संसारेष्वनुभूतानि कस्य ते कस्य वा वयं॥ नैवास्य कश्चिद्भविता नायं भवति
कस्यचित्॥ पथि संगतमेवेदं दारबंधुसुहृज्जनैः॥ क्वासे क्व च गमिष्यामि को न्वहं किमिहागतः॥ कस्मात्किमनुशोचेय
मित्येवं स्थापयेन्मनः॥ अनित्ये प्रियसंवासे संसारे चक्रवद्गतौ॥ पथि संगतमेवैतद्भ्राता माता पिता सखा॥ न दृष्टपूर्वं प्रत्य
क्षं परलोकं विदुर्बुधाः॥ आगमांस्त्वनतिक्रम्य श्रद्धातव्यं बुभूषता॥ कुर्वीत पितृदैवत्यं धर्माणि च समाचरेत्॥ यजेद्विद्वान् च
विधिवत्त्रिवर्गं चाप्युपाचरेत्॥ संनिमज्जेज्जगदिदं गंभीरे कालसागरे॥ जरामृत्युमहाग्राहे न कश्चिदवबुध्यते॥ आयुर्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमघीयानाः केवलंसप्तपश्चिमहाः ॥ दृश्यंते बहवो वै याव्याधिभिः समभिप्लुताः ॥ तेपिबंति कषायांश्च सर्पींषि विविधानि च
॥ नमृत्युमतिवर्तंते वेलामिव महोदधिः ॥ रसायनविदश्चैव सुप्रयुक्तरसायनाः ॥ दृश्यंते जरयाभग्ना नागा नागैरिवो
त्तमैः ॥ तथैव तपसोपेताः स्वाध्यायाभ्यसने रताः ॥ दातारो यज्ञशीलाश्च न तरंति जरांतिके ॥ न ह्यहानि निवर्तंते न मासान
पुनः समाः ॥ जातानां सर्वभूतानां न पक्षा न पुनः क्षपाः ॥ सोयं विपुलमध्वानं कालेन ध्रुवमध्रुवः ॥ नरो वशः समभ्येति
सर्वभूतनिषेवितं ॥ देहो वा जीवतोभ्येति जीवो वाभ्येति देहतः ॥ पथि संगतमेवेतद्दारैरन्यैश्च बंधुभिः ॥ नायमत्यंतसंवा
सो लभ्यते जातु केनचित् ॥ अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥ क्व नु तेद्य पिता राजन् क्व नु तेद्य पितामहाः ॥ नते
पश्यसि तानद्य न त्वां पश्यंति तेनघ ॥ न ह्येव पुरुषो द्रष्टा स्वर्गस्य नरकस्य वा ॥ आगमस्तु सतां चक्षुर्नृपते तमिहाचर ॥ च
रितं ब्रह्मचर्यं हि प्रजायेत यजेत च ॥ पितृदेवमनुष्याणां मानृण्यादनसूयकः ॥ स यज्ञशीलः प्रजने निविष्टः प्राग्ब्रह्मचा
री प्रविविक्तचक्षुः ॥ आराधयेत्स्वर्गमिमं च लोकं परं च मुक्त्वा हृदयव्यलीकं ॥ सम्यग्घि धर्मं चरतो नृपस्य द्रव्याणि चाप्याह
रतो यथावत् ॥ प्रवृत्तधर्मस्य यशोभिवर्धते सर्वेषु लोकेषु चराचरेषु ॥ इत्येवमाज्ञाय विदेहराजो वाक्यं समग्रं परि
पूर्णहेतु ॥ अश्मानमामंत्र्य विशुद्धबुद्धिर्ययौ गृहं स्वं प्रति शांतशोकः ॥ तथा त्वमप्यच्युत मुंच शोकमुत्तिष्ठ शक्रोपम हर्ष
मेहि ॥ क्षात्रेण धर्मेण मही जिता ते तां भुंक्ष्व कुंतीसुत मावमंस्थाः ॥ ॥ शांतौ राजधर्मे ॥ ॥ वैशंपायन ॥ ॥ अव्या २०

हरति कौंतेये धर्मराजे युधिष्ठिरे ॥ गुडाकेशो हृषीकेशमभ्यभाषत पांडवः ॥ ॥ अर्जुन उवाच ॥ ॥ शोकदावानलज्वल
शोककूपप्रपूरकः ॥ शोकवल्लीकुठारो यः शोकनाशनकीर्तनः ॥ इति शोकाभिसंतप्तो धर्मराजो युधिष्ठिरः ॥ एवं शोकार्ण
वमग्नस्तमाश्वासय माधव ॥ सर्वे स्म ते संशयिताः पुनरेव जनार्दन ॥ अस्य शोकं महाबाहो प्रणाशयितुमर्हसि ॥ ॥
वैशंपायन ॥ ॥ एवमुक्तस्तु गोविंदो विजयेन महात्मना ॥ पर्यवर्तत राजानं पुंडरीकेक्षणोच्युतः ॥ अनतिक्रमणीयो हि
धर्मराजस्य केशवः ॥ बाल्यात्प्रभृति गोविंदः प्रीत्या चाभ्यधिकोर्जुनात् ॥ परिगृह्य महाबाहुर्भुजं चंदनरूषितं ॥ शैलस्तंभ
निभं शौरिरुवाचाभिनिनादयन् ॥ शुशुभे वदनं तस्य सुदंष्ट्रं चारुलोचनं ॥ व्याकोपमिव विस्पष्टं पद्मं सूर्योदयोदिते ॥ ॥
वासुदेव उवाच ॥ ॥ मा कृथाः पुरुषव्याघ्र त्वं शोकं गात्रशोषणं ॥ न हि ते सुलभा भूयो ये हतास्मिन् रणाजिरे ॥ स्वप्नलब्धा
यथा लाभा वितथाः प्रतिबोधने ॥ एवं ते क्षत्रिया राजन् ये व्यतीता रणाजिरे ॥ सर्वे ह्यभिमुखाः शूरा विगता रणशोभि
नः ॥ नैषां कश्चित्पृष्ठतो वा पलायन्वापि पातितः ॥ सर्वे सत्यक्त्वात्मनः प्राणान्युद्ध्वा वीरा महाहवे ॥ शस्त्रपूता दिवं प्राप्ता न तान् शो
चितुमर्हसि ॥ क्षत्रधर्मरताः शूरा वेदवेदांगपारगाः ॥ प्राप्ता वीरगतिं पुण्यां न तान् शोचितुमर्हसि ॥ मृतान्महानुभावांस्त्वं श्रु
त्वैव पृथिवीक्षितः ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ सृंजयं पुत्रशोकार्तं यथायं नारदोब्रवीत् ॥ सुखदुःखैरहं त्वं च
प्रजाः सर्वाश्च सृंजय ॥ अविमुक्ता मरिष्यामस्तत्र का परिदेवना ॥ महाभाग्यं पुराणां राज्ञां कीर्त्यमानं मया शृणु ॥ गच्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वधानेनत्यक्ते तनो दुःखं प्रहास्यसि ॥ मरुतामहानुभावांस्त्वं शक्रस्तेव पृथिवीपतीन् ॥ श्रेयसामानं प्रसंताप शृणु विस्तरशस्त्व मे ॥ क्रू
नग्रहाभिशमनमायुर्वर्द्धनमुत्तमं ॥ भाग्यमापांक्षितिभुजामुपादायमनोहरं ॥ आविक्षितं मरुत्तं च मृतं संजय शुश्रुम ॥
यस्य सेंद्राः सवरुणा बृहस्पतिपुरोगमाः ॥ देवा विश्वसृजो राज्ञो यज्ञमीयुर्महात्मनः ॥ पस्पर्द्धे यात्र यश्चक्रे देवराजं पुरंदरं ॥ श
क्रप्रियैषी यं विद्वान्प्रत्याचष्टे बृहस्पतिः ॥ संवर्तो याजयामास यं पीडार्थे बृहस्पतेः ॥ यस्मिन्प्रशासति महीं नृपतौ राजसत्तम
तमः ॥ अकृष्टपच्या पृथिवी विबभौ सम्यमालिनी ॥ आविक्षितस्य वै सत्रे विश्वेदेवाः सभासदः ॥ मरुतः परिवेष्टारः साध्याश्चा
सन्महात्मनः ॥ मरुद्गणा मरुत्तस्य यत्सोमं पिबत्त तत् ॥ देवान्मनुष्यान्गंधर्वान्यत्यरिच्यत दक्षिणाः ॥ स चेन्ममार संजय च
तुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ सुहोत्रं वैतिथिं नाम्ना तं संजय शुश्रुम ॥ यस्मै हिरण्यं ववृषे
मघवान्परिवत्सरं ॥ सत्यनामा वसुमती यं प्राप्यासीन्नराधिपं ॥ हिरण्यमवहन्नद्यस्तस्मिन्जनपदेश्वरे ॥ कूर्मान्कर्कटकान्न
रा क्रान्मकरान्शिंशुमारकान् ॥ नदीषु पातयामास मघवाल्लोकपूजितः ॥ हिरण्यान्पतितान्दृष्ट्वा मकरान्मत्स्यकच्छपान् ॥
सहस्रशोथ शतशोस्ततोस्मयत वैतिथिः ॥ तद्धिरण्यमपर्यंतमावृतं कुरुजांगले ॥ ईजानो वितते यज्ञे दक्षिणार्थमकालय
त् ॥ स चेन्ममार संजय चतुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ अदक्षिणमयज्वानं वैत्यसे शाम्यमा ३१
शुचाः ॥ २ ॥ अंगं बृहद्रथं चैव मृतं संजय शुश्रुम ॥ यः सहस्रं सहस्राणां श्वेतानश्वानवासृजत् ॥ सहस्रं च सहस्राणां कन्या

हेमपरिष्कृताः ॥ ईजानो वितते यज्ञे दक्षिणामत्यकालयत् ॥ यः सहस्रं सहस्राणां गजानामिति यमिनां ॥ ईजानो वितते यज्ञे दक्षि
णामत्यकालयत् ॥ शतं शतसहस्राणां वृषाणां हेममालिनां ॥ गवां सहस्रानुचरं दक्षिणां समकालयत् ॥ अंगस्य यज
मानस्य तदा विष्णुपदे गिरौ ॥ अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ यस्य राजेंद्र यज्ञेषु शतसंख्येषु वै पुरा ॥ देवान्
गंधर्वमनुष्यांश्च नत्यरिच्यंति दक्षिणाः ॥ न जातो जनिता नान्यः पुमान्यः संप्रदास्यति ॥ यदंगः प्रददौ वित्तं सोमसंस्थासु स
त्रा प्तसु ॥ स चेन्ममार संजय चतुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥ ३ ॥ शिबिमौशीनरं चैव मृतं संज
य शुश्रुम ॥ य इमां पृथिवीं कृत्स्नां चर्मवत्समवेष्टयत् ॥ महता रथघोषेण पृथिवीमनुनादयन् ॥ एकच्छत्रां महीं चक्रे जै
त्रेणैकरथेन यः ॥ यावदद्य गवाश्वं स्यादारण्यैः पशुभिः सह ॥ तावतीः प्रददौ गाः स शिबिरौशीनरोध्वरे ॥ नयोद्धारं धु
र्यं तस्य कंचिन्मेने प्रजापतिः ॥ न भूतं न भविष्यं च सर्वराजसु भारत ॥ अन्यत्रौशीनराच्छैब्याद्राजर्षेरिंद्रविक्रमात् ॥ अ
दक्षिणमयज्वानं मा पुत्रमनुतप्यथाः ॥ ४ ॥ भरतं चैव दौष्यंतिं मृतं संजय शुश्रुम ॥ शाकुंतलं महात्मानं भूरिद्रवि
णतेजसं ॥ योबध्वा त्रिंशतं वाश्वान्देवेभ्यो यमुनामनु ॥ सरस्वतीं विंशतिं च गंगामनु चतुर्दश ॥ अश्वमेधसहस्रेण रा
जसूयशतेन च ॥ इष्टवान्स महातेजा दौष्यंतिर्भरतस्तदा ॥ भरतस्य महत्कर्म दृष्ट्वा राजसु पार्थिवाः ॥ खं मर्त्य इव बाहुभ्या
न्नानुगंतुमशक्नुवन् ॥ परं सहस्राद्भरतो बध्वा हयान्वेदीं विततयच ॥ सहस्रं मत्तमातंगाना कण्वाय भरतो ददौ ॥ स चेन्मम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्त्वं सृंजय चतुर्भद्रितरस्त्वया॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः॥ ५॥ रामं दाशरथिं चैव मृतं सृंजय शुश्रुम॥ योन्वकंपत
वै नित्यं प्रजाः पुत्रानिवौरसान्॥ विधवा यस्य विषये नानाथाः काश्चनाभवन्॥ सदैवासीत्पितृसमो रामो राज्यं यदन्वशात्॥
कालवर्षी च पर्जन्यः सस्यानि रसवंति च॥ नित्यं सुभिक्षमेवासीद्रामे राज्यं प्रशासति॥ प्राणिनो नाप्सु मज्जंति नान्यथा पा
वको दहत्॥ रुजो भयं न तत्रासीद्रामे राज्यं प्रशासति॥ आसन्वर्षसहस्राण्यस्तथा वर्षसहस्रिकाः॥ अरोगाः सर्वसिद्धार्था आ
मे राज्यं प्रशासति॥ नान्योन्येन विवादोऽभूत्स्त्रीणामपि कुतो नृणां॥ धर्मनित्याः प्रजाश्चासन्रामे राज्यं प्रशासति॥ संतुष्टाः स
र्वसिद्धार्थाः निर्भयाः स्वैरचारिणः॥ नराः सत्यव्रताश्चासन्रामे राज्यं प्रशासति॥ नित्यपुष्पफलाश्चैव पादपा निरुपद्रवाः॥
सर्वद्रोणदुघा गावो रामे राज्यं प्रशासति॥ स चतुर्दश वर्षाणि वने प्रोष्य महातपाः॥ दशाश्वमेधाञ्जारुथ्यानाजहार निरर्ग
लान्॥ युवा श्यामो लोहिताक्षो मातंग इव यूथपः॥ आजानुबाहुः सुमुखः सिंहस्कंधो महाभुजः॥ दश वर्षसहस्राणि दश वर्ष
शतानि च॥ अयोध्याधिपतिर्भूत्वा रामो राज्यमकारयत्॥ स चेन्ममार सृंजय चतुर्भद्रितरस्त्वया॥ पुत्रात्पुण्यतरश्चैव मा पुत्र
मनुतप्यथाः॥ ६॥ भगीरथं च राजानं मृतं सृंजय शुश्रुम॥ यस्येंद्रो वितते यज्ञे सोमं पीत्वा मदोत्कटः॥ असुराणां सहस्राणि
बहूनि सुरसत्तमः॥ अजयद्बाहुवीर्येण भगवान्पाकशासनः॥ यः सहस्रं सहस्राणां कन्या हेमविभूषिताः॥ ईजानो वि
तते यज्ञे दक्षिणामत्यकालयत्॥ सर्वा रथगताः कन्या रथाः सर्वे चतुर्युजः॥ रथे रथे शतं नागाः पद्मिनो हेममालिनः॥ सहस्रम ३२

श्वा रथे रथे हस्तिनः पृष्ठतोऽन्वयुः॥ गवां सहस्रमश्वे श्वे सहस्रं चाप्यजाविकं॥ उपह्वरे निवसतो यस्यांके निषसाद ह॥ गं
गा भागीरथी तस्मादुर्वशी ह्यभवत्सुता॥ भूरिदक्षिणमिक्ष्वाकुं यजमानं भगीरथं॥ त्रिलोकपथगा गंगा दुहितृत्वमुपे
युषी॥ स चेन्ममार सृंजय चतुर्भद्रितरस्त्वया॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः॥ ७॥ दिलीपं च महात्मानं मृतं
सृंजय शुश्रुम॥ यस्य कर्माणि भूरीणि कथयंति द्विजातयः॥ य इमां वसुसंपूर्णां वसुधां वसुधाधिपः॥ ददौ तस्मिन्महायज्ञे
ब्राह्मणेभ्यः समाहितः॥ यस्येह यजमानस्य यज्ञे यज्ञे पुरोहितः॥ सहस्रं वारणान्हैमान्दक्षिणामत्यकालयत्॥ यस्य
दे यज्ञे महानासीद्यूपः श्रीमान्हिरण्मयः॥ तं देवाः कर्म कुर्वाणाः शक्रज्येष्ठा उपाश्रयन्॥ चषाले यस्य सौवर्णे त
स्मिन्यूपे हिरण्मये॥ ननृतुर्देवगंधर्वाः षट्सहस्राणि सप्तधा॥ अवादयत्तत्र वीणां मध्ये विश्वावसुः स्वयं॥ सर्वभू
यं तान्यमन्यंत मम वादयतीत्ययं॥ एतद्राज्ञो दिलीपस्य राजानो नानुचक्रिरे॥ यस्येभा हेमसंछन्नाः पथि मत्ताः स्म शे
रते॥ राजानं शतधन्वानं दिलीपं सत्यवादिनं॥ ये पश्यन्सुमहात्मानं तेऽपि स्वर्गजितो नराः॥ त्रयः शब्दा न जीर्यंते दि
लीपस्य निवेशने॥ स्वाध्यायघोषो ज्याघोषो दीयतामिति चैव हि॥ स चेन्ममार सृंजय चतुर्भद्रितरस्त्वया॥ पु
त्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः॥ ८॥ मांधातारं यौवनाश्वं मृतं सृंजय शुश्रुम॥ यं देवा मरुतो गर्भं पितुः पा
र्श्वादपाहरन्॥ संवृद्धो युवनाश्वस्य जठरे यो महात्मनः॥ पृषदाज्योद्भवः श्रीमांस्त्रिषु लोकेषु विजयी नृपः॥ यं दृष्ट्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितुरुत्संगेशयानं देवरूपिणं ॥ अन्योन्यमब्रुवन्देवाः किमयं धानयिष्यतीति ॥ मामेवायं धास्यतीति ततमिंद्रो ह्यु
पपद्यत ॥ मांधातेति ततस्तस्य नाम चक्रे शतक्रतुः ॥ ततस्तु पयसो धारां पुष्टिहेतोर्महात्मनः ॥ तस्यास्ये यौवनाश्व
स्य पाणिरिंद्रस्य चास्रवत् ॥ तं पिबन्पाणिमिंद्रस्य शतमह्ना व्यवर्द्धत ॥ स आसीद्द्वादशसमो द्वादशाहेन पार्थि
वः ॥ तमियं पृथिवी सर्वा एकाह्ना प्रत्यपद्यत ॥ धर्मात्मानं महात्मानं शूरमिंद्रसमं युधि ॥ यस्याजगवं नृपतिं च मनुं
तमसितांगयं ॥ अंगं बृहद्रथं चैव मांधाता समरेजयत् ॥ यौवनाश्वो यदांगारं समरे प्रत्ययुध्यत ॥ विस्फारैर्धनु
षो देवा गोरवेनाजिमेनिरे ॥ यतः सूर्य उदेति स्म यत्र च प्रतितिष्ठति ॥ सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्य
ते ॥ अश्वमेधशतेनेष्ट्वा राजसूयशतेन च ॥ अददद्रोहितान्मत्स्यान्ब्राह्मणेभ्यो विशांपते ॥ हैरण्यान्योजनोत्से
धानायतान्दशयोजनं ॥ अतिरिक्तं द्विजातिभ्यो व्यभजन्नितरे जनाः ॥ स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया ॥
पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥९॥ ययातिं नाहुषं चैव मृतं सृंजय शुश्रुम ॥ य इमां पृथिवीं कृत्स्नां
विजित्य सहसागरां ॥ शम्यापातेन्याभ्यतीयावेदीभिश्चित्रयन्महीं ॥ ईजानः क्रतुभिः पुण्यैः पर्यगच्छद्वसुंधरां ॥
इष्ट्वा क्रतुसहस्रेण वाजपेयशतानि च ॥ तर्पयामास देवेंद्रं त्रिभिः कांचनपर्वतैः ॥ व्यूढे देवासुरे युद्धे हत्वा दैतेय ३३

दानवान् ॥ व्यभजत्पृथिवीं कृत्स्नां ययातिर्नहुषात्मजः ॥ अंते तु पुत्रान्निक्षिप्य यदुद्रुह्युपुरोगमान् ॥ पूरुं रा
ज्येभिषिच्याथ सदारः प्राविशद्वनं ॥ स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप
यथाः ॥१०॥ अंबरीषं च नाभागिं मृतं शुश्रुम सृंजय ॥ यं प्रजा वव्रिरे पुण्यं गोप्तारं नृपसत्तमं ॥ यः सहस्रं सह
स्राणां राज्ञामयुतयाजिनां ॥ ईजानो वितते यज्ञे ब्राह्मणेभ्यः सुसंहितः ॥ नैतत्पूर्वजनाश्चक्रुर्न करिष्यंति चा
परे ॥ इत्यंबरीषं नाभागिमन्वमोदंत दक्षिणां ॥ शतं राजसहस्राणि शतं राजशतानि च ॥ सर्वे श्वमेधैरीजान
स्ते त्वयुर्दक्षिणायनं ॥ स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥११॥
शशबिंदुं चैत्ररथं मृतं सृंजय शुश्रुम ॥ यस्य भार्यासहस्राणां शतमासीन्महात्मनः ॥ सहस्रं तु सहस्राणां य
स्यासन्शाशबिंदवाः ॥ हिरण्यकवचाः सर्वे सर्वे चोत्तमधन्विनः ॥ शतं कन्या राजपुत्रमेकैकं पृष्ठतोऽन्वयुः ॥ कन्यां
कन्यां शतं नागा नागं नागं शतं रथाः ॥ रथे रथे शतं चाश्वा कुलजा हेममालिनः ॥ अश्वे अश्वे शतं गावो गवां तद्वद
जाविकं ॥ एतद्धनमपर्यंतमश्वमेधे महामखे ॥ शशबिंदुर्महाराज ब्राह्मणेभ्यः समर्पयत् ॥ स चेन्ममार
सृंजय चतुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥१२॥ गयं चामूर्तरयसं मृतं सृंजय शुश्रु
म ॥ यः स वर्षशतं राजा हुतशिष्टाशनोऽभवत् ॥ यस्मै वह्निर्वरं प्रादात्ततो वव्रे वरं गयः ॥ ददतो मे क्षयं वित्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैश्चद्धा चव्हतितां ॥ मनो मे रमतां सत्ये त्वत्प्रसादाद् हुताशन ॥ लेभे च कामांस्तान्सर्वान्पावकादिति नः श्रुतं ॥ दर्श
च पौर्णमासे च चातुर्मास्ये पुनः पुनः ॥ अजयद्वयमेधेन सहस्रपरिवत्सरान् ॥ शतं वर्षसहस्राणि शतमश्वतरा
णि च ॥ उशीरयोगाय येशरात्सहस्रं परिवत्सरान् ॥ तर्पयामास सोमेन देवान्वित्तैर्विद्विजान् ॥ पितॄन्स्वधाभिः
कामैश्च स्त्रियास्तिर्भरतर्षभ ॥ सौवर्णां पृथिवीं कृत्वा दशव्यामप्रदिरायतां ॥ दक्षिणामददाद्राजा वाजिमेधम
हामखेषु ॥ यावंतः सिकता राजन् गंगायामभरतर्षभ ॥ तावतीरेव गाः शशादामन्तेन सोपगाः ॥ स चेन्ममार सृंज
य चतुर्भद्रितरस्त्वया ॥ पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ॥१३॥ रंतिदेवं च सांकृत्यं मृतं सृंजय शुश्रुम ॥
सम्यगाराध्य यः शक्राद्वरं लेभे महायशाः ॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि ॥ श्रद्धा च नो मा व्यगमन्
मा च याचिस्म कंचन ॥ उपातिष्ठंत पशवः स्वयं तं शंसितव्रतं ॥ ग्राम्यारण्या महात्मानं रंतिदेवं यशस्विनं ॥ म
ता हानदी चर्मराशेरुत्क्लेदात्सुस्रुवे यतः ॥ ततश्चर्मण्वतीत्येवं विख्याता सा महानदी ॥ ब्राह्मणेभ्यो ददौ निष्का
न्सदसि प्रतते नृप ॥ तुभ्यं तुभ्यं निष्कमिति यदा क्रोशंति वै द्विजाः ॥ सहस्रं तुभ्यमित्युक्त्वा ब्राह्मणाः स्म
प्रपद्यते ॥ अन्वाहार्योपकरणं द्रव्योपकरणं च यत् ॥ घटाः पात्र्यः कटाहानि स्थाल्यश्च पिठराणि च ॥ ना ३५

नासीत्किंचिदसौवर्णं रंतिदेवस्य धीमतः ॥ सांकृते रंतिदेवस्य यां रात्रिमवसन्गृहे ॥ आलभ्यंत शतं गावः सह
स्राणि च विंशतिः ॥ तत्र स्म सूदाः क्रोशंति सुमृष्टमणिकुंडलाः ॥ सूपं भूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा ॥
स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ॥१४॥ सगरं च महात्मानं मृ
तं सृंजय शुश्रुम ॥ इक्ष्वाकुं पुरुषव्याघ्रमतिमानुषविक्रमं ॥ षष्टिं पुत्रसहस्राणि यं यांतमनुजग्मिरे ॥ नक्षत्ररा
जं वर्षांते व्यभ्रे ज्योतिर्गणा इव ॥ एकच्छत्रा मही यस्य प्रतापादभवत्पुरा ॥ यो श्वमेधसहस्रेण तर्पयामास देवताः ॥ यः प्रादात्का
एं नकस्थंभं प्रासादं सर्वकांचनं ॥ पूर्णं पद्मदलाक्षीणां स्त्रीणां शयनसंकुलं ॥ द्विजातिभ्योनुरूपेभ्यः कामांश्च विविधान्बहून् ॥
यस्यादेशेन तद्वित्तं व्यभजंत द्विजातयः ॥ खानयामास यः कोपात्पृथिवीं सागरांकितां ॥ यस्य नाम्ना समुद्रश्च सागरत्वमु
पागतः ॥ स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया ॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ॥१५॥ राजानं च पृथुं वैन्यं मृतं
सृंजय शुश्रुम ॥ यमभ्यषिंचन्संभूय महारण्ये महर्षयः ॥ प्रथयिष्यति वै लोकान्पृथुरित्येव शब्दितः ॥ क्षतान्नो वै त्रायतीति
स तिं स्मात्स क्षत्रियः स्मृतः ॥ पृथुं वैन्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन् ॥ ततो राजेति नामास्य अनुरागादजायत ॥ अकृ
ष्टपच्या पृथिवी पुटके पुटके मधु ॥ सर्वा द्रोणदुघा गावो वैन्यस्यासन्प्रशासतः ॥ अरोगाः सर्वसिद्धार्था मनुष्या अकुतोभयाः
॥ यथाभिकाममवसन्क्षेत्रेषु च गृहेषु च ॥ आपस्तस्तंभिरे यस्य समुद्रमभियास्यतः ॥ सरितश्चानुदीर्यंत ध्वजसंगं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्च नाभवत्॥ हैरण्यांस्त्रिनल्वोत्सेधान् पर्वतानेकविंशतिं॥ ब्राह्मणेभ्यो ददौ राजा यो ऽश्वमेधे महामखे॥ स चेन्ममार सृं
जय चतुर्भद्रतरस्त्वया॥ पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः॥ ६॥ किं वै तूष्णीं ध्यायसे सृंजय त्वं न मे राजन्वाचमिमां
शृणोषि॥ न चेन्मोघं विप्रलब्धं मयेदं पथ्यं मुमूर्षोरिव सम्यगुक्तं॥ ॥सृंजय उवाच॥ ॥शृणोमि ते नारद वाचमेतां वि
चित्रार्थां स्रजमिव पुण्यगंधां॥ राजर्षीणां पुण्यकृतां महात्मनां कीर्त्या युक्तां शोकनिर्णाशनार्थीं॥ न ते मोघं विप्र
लप्तं महर्षे दृष्ट्वैवाहं नारद त्वां विशोकः॥ शुश्रूषे ते वचनं ब्रह्मवादिन्न ते तृप्याम्यमृतस्येव पानात्॥ अमोघदर्शिन्
मम चेत्प्रसादं संतापदग्धस्य विभो प्रकुर्याः॥ सुतस्य संजीवनमद्य मे स्यात्तव प्रसादात्सुतसंगमश्च॥ ॥नारद उ
वाच॥ ॥यस्ते पुत्रो गमितो ऽयं विजातः स्वर्णष्ठीवी यमदात्पर्वतस्ते॥ पुनस्ते तं पुत्रमहं ददामि हिरण्यनाभं वर्षसहस्रि
णं च॥ ॥इति श्रीमहाभारते राजधर्मे षोडशराजोपाख्याने॥ ॥युधिष्ठिर उवाच॥ ॥स कथं कांचनष्ठीवी सृंजयस्य सु
तो ऽभवत्॥ पर्वतेन किमर्थं च दत्तस्तेन ममार च॥ यदा वर्षसहस्रायुस्तदा भवति मानवः॥ कथमप्राप्तकौमारः संज
यस्य सुतो मृतः॥ उताहो नाममात्रं वै सुवर्णष्ठीविनो ऽभवत्॥ कथं वा कांचनष्ठीवीत्येतदिच्छामि वेदितुं॥ ॥वासुदे
व उवाच॥ ॥अत्र ते वर्तयिष्यामि यथा वृत्तं जनेश्वर॥ नारदः पर्वतश्चैव महर्षी लोकसंमतौ॥ मातुलो भागिनेय
श्च देवलोकादिहागतौ॥ विहर्तुकामौ संप्रीत्या मानुषेषु पुरा विभो॥ हविःपवित्रभोज्येन देवभोज्येन चैव ह॥ ३५

मातुलो नारदस्तत्र भागिनेयश्च पर्वतः॥ तावुभौ तपसोपेताववनीतलचारिणौ॥ भुंजानौ मानुषान्भोगान्यथाव
त्पर्यधावतां॥ प्रीतिमंतौ मुदा युक्तौ समयं चैव चक्रतुः॥ यो भवेद्धृदि संकल्पः शुभो वा यदि वाशुभः॥ अन्योन्यस्य स
आख्येयो मृषा शापो ऽन्यथा भवेत्॥ तौ तथेति प्रतिज्ञाय महर्षी लोकसंमतौ॥ सृंजयं श्वैत्यमभ्येत्य राजानमिदमूच
तुः॥ आवां भवति वत्स्यावः कंचित्कालं हिताय ते॥ यथावत्पृथिवीपाल आवयोः प्रगुणी भव॥ तथेति कृत्वा राजा नौ सत्कृ
त्योपचचार ह॥ ततः कदाचित्तौ राजा महात्मानौ तपोधनौ॥ अब्रवीत्परमप्रीतः सुतेयं वरवर्णिनी॥ एकैव मम कन्यैषा युवां
परिचरिष्यति॥ दर्शनीयानवद्यांगी शीलवृत्तसमाहिता॥ सुकुमारी कुमारी च पद्मकिंजल्कसंनिभा॥ परमं सौ
म्य मित्युक्तौ ताभ्यां राजा शशास तां॥ कन्ये विप्रावुपचर पितृवद्देववच्च ह॥ सा कन्या तु तथेत्युक्त्वा पितरं धर्मचारिणी॥
यथानिदेशं राज्ञस्तौ सत्कृत्योपचचार ह॥ तस्यास्तेनोपचारेण रूपेणाप्रतिमेन च॥ नारदं हृच्छयस्तूर्णं सहसैवान्वप
द्यत॥ ववृधे हि ततस्तस्य हृदि कामो महात्मनः॥ यथा शुक्लस्य पक्षस्य प्रवृत्तौ चंद्रमाः शनैः॥ न च तं भागिनेयाय पर्व
ताय महात्मने॥ शशंस मन्मथं तीव्रं व्रीडमानः स्वधर्मवित्॥ तपसा चेंगितेनाथ पर्वतो ऽबुबोध तं॥ कामार्तं नारदं क्रु
द्धः शशापैनं ततो भृशं॥ कृत्वा समयमव्यग्रो भवान्वै सहितो मया॥ यो भवेद्धृदि संकल्पः शुभो वा यदि वाशुभः॥
अन्योन्यस्य स आख्येय इति तद्वै मृषा कृतं॥ भवता वचनं ब्रह्मंस्तस्मादेतद्वदाम्यहं॥ न हि कामं प्रवर्तंतं भवानाचष्ट मे
म

पुरा॥ सुकुमार्य्यभिसुकुमार्य्यांच तस्मान्मैतत्सुमास्यहं॥ ब्रह्मचारी गुरुस्थस्मात्तपस्वी नियतव्रतः॥ आकाशीनियमभ्रंशश्मा
वाभ्यां यः कृतो मिथः॥ शाप्येतस्मां सुसंक्रुद्धो भवंतं तेन्मि बोधमे॥ सुकुमारी वतेभार्या भविष्यति न संशयः॥ वानरं चै
व ते कन्या विवाहात्प्रभृति प्रभो॥ संद्रक्ष्यते नराश्चान्ये स्वरूपेण विनाकृतं॥ स तद्वाक्यं तु विज्ञाय नारदः पर्वतं तदा॥
अशापत्तमपि क्रोधाद्भागिनेयं स्वमातुलः॥ तपसा ब्रह्मचर्येण सत्येन च तपेन च॥ युक्तोपि धर्मनित्यश्च नवै स्वर्ग
मवाप्स्यसि॥ तौ तु शप्त्वा सुसंक्रुद्धौ परस्परममर्षितौ॥ प्रतिजग्मतुरन्योन्यं क्रुद्धाविव गजोत्तमौ॥ पर्वतः पृथिवीं कृत्स्नां
विचचार महीमतिः॥ पूज्यमानो यथान्यायं तेजसा स्वेन भारत॥ अथ तामलभत्कन्यां नारदः संजयात्मजां॥ धर्मेण
विप्रप्रवरः सुकुमारीमनिंदितां॥ सा तु कन्या यथाशापं नारदं तं ददर्श ह॥ पाणिग्रहणमंत्राणां नियोगादेव नारदं॥
सुकुमारी च देवर्षिं वानरप्रतिमाननं॥ नैवावमन्यत तदा प्रीतिमत्येव चाभवत्॥ उपतस्थे च भर्त्तारं न चान्यं मनसा
प्यगात्॥ देवं मुनिं वा यक्षं वा पतित्वे पतिवत्सला॥ ततः कदाचिद्भगवान् पर्वतोनुचचार ह॥ वनं विरहितं किंचित्तत्रा
पश्यत्स नारदं॥ ततोभिवाद्य प्रोवाच नारदं पर्वतस्तदा॥ भवान्प्रसादं कुरुतां स्वर्गादेशाय मे प्रभो॥ तमुवाच
ततो दृष्ट्वा पर्वतं नारदस्तदा॥ कृतांजलिमुपासीनं दीनं दीनतरः स्वयं॥ त्वयाहं प्रथमं शप्तो वानरस्त्वं भविष्यसि॥
इत्युक्तेन मया पश्चाच्छप्तस्त्वमसि मत्सरात्॥ अद्यप्रभृति वै वासं स्वर्गे नावाप्स्यसीति ह॥ तव नैतद्धि सदृशं पुत्र ३६

स्थाने हि मे सदा तव॥ निवर्तयेतां तौ शापावन्योन्येन ततो मुनी॥ श्रीसमृद्धं ततो दृष्ट्वा नारदं देवदर्शनं॥ सुकुमा
री प्रदुद्राव परपत्यभिशंकया॥ तां पर्वतस्ततो दृष्ट्वा प्रद्रवंतीमनिंदितां॥ अब्रवीत्तव भर्त्तारं नात्र कार्या विचारणा॥
ग ऋषिः परमधर्मात्मा नारदो भगवान्प्रभुः॥ तवैवाभेद्यहृदयो मा ते भूदत्र संशयः॥ सानुनीता बहुविधं पर्वतेन महात्म
ना॥ शापदोषं च तं भर्त्तुः श्रुत्वा स्वां प्रकृतिं गता॥ पर्वतोथ ययौ स्वर्गं नारदोभ्यागमद्गृहान्॥ ॥कृष्ण उवाच॥ ॥
प्रत्यक्षकर्त्ता सर्वस्य नारदो भगवानृषिः॥ एष वक्ष्यति ते पृष्टो यथावृत्तं नरोत्तम॥ ॥इति श्रीशांतौ राजधर्मे॥ ॥वै
शंपायनः॥ ॥ततो राजा पांडुसुतो नारदं प्रत्यभाषत॥ ॥युधिष्ठिरः॥ ॥भगवन्श्रोतुमिच्छामि सुवर्णष्ठीवि
संभवं॥ एवमुक्तस्तु स मुनिर्धर्मराजेन नारदः॥ आचचक्षे यथावृत्तं सुवर्णष्ठीविनं प्रति॥ ॥नारद उवाच॥ ॥एवमे
तन्महाबाहो यथायं केशवोब्रवीत्॥ कार्यस्यास्य तु यच्छेषं तत्ते वक्ष्यामि पृच्छतः॥ अहं च पर्वतश्चैव स्वस्रीयो मे महा
मुनिः॥ वस्तुकामावभिगतौ सृंजयं जयतां वरं॥ तत्रावां पूजितौ तेन विधिदृष्टेन कर्मणा॥ सर्वकामैः सुविहितौ
निवसावोस्य वेश्मनि॥ व्यतिक्रांतासु वर्षासु समये गमनस्य च॥ पर्वतो मामुवाचेदं काले वचनमर्थवत्॥ आवा
मस्य नरेंद्रस्य गृहे परमपूजितौ॥ उषितौ समयेब्रह्मन् श्चिंत्यतामस्य सांप्रतं॥ ततो हमब्रुवं राजन्पर्वतं शुभद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्शिनं॥ सर्वमेतत्त्वयि विप्रो भाविनैयोपपद्यते॥ वरेणच्छंदितो राजा लभतां यद्यदिच्छति॥ आवयोस्तपसा सिद्धिं प्राप्नो
तु यदि मन्यसे॥ ततआहूय राजानं स्रृंजयं जयतां वरं॥ पर्वतो मम तद्वाक्यमुवाच कुरुपुंगव॥ प्रीतौ स्वो नृप सत्कारैर्भव
दार्जवसंमतैः॥ आवाभ्यामभ्यनुज्ञातो वरं नृवर चिंतय॥ देवानामविहिंसायां न भवेन्मानुषक्षयं॥ तद्गृहाण महारा
ज पूज्यार्हौ नौ मतो मम॥ ॥संजयः॥ ॥प्रीतौ भवंतौ यदि मे कृतमेतावता मम॥ एष एव महान्लाभो निर्वृत्तो मे
महाफलः॥ तमेव वादिनं भूयः पर्वतः प्रत्यभाषत॥ वृणीष्व राजन्संकल्पं यत्ते हृदि चिरस्थितं॥ ॥संजयः॥ ॥
अभीप्सामि सुतं वीरं वीर्यवंतं दृढव्रतं॥ आयुष्मंतं महाभागं देवराजसमद्युतिं॥ ॥पर्वत उवाच॥ ॥भविष्यत्येष
ते कामो न चायुष्मान्भविष्यति॥ देवराजाभिभूत्यर्थं संकल्पो ह्येष ते हृदि॥ ख्यातः सुवर्णष्ठीवीति पुत्रस्ते संभविष्य
ति॥ रक्ष्यश्च देवराजात्स देवराजसमद्युतिः॥ तच्छ्रुत्वा स्रृंजयो वाक्यं पर्वतस्य महात्मनः॥ प्रसादयामास तदा नैत
देवं भवेदिति॥ आयुष्मान्मे भवेत्पुत्रो भवतस्तपसा मुने॥ न च तं पर्वतः किंचिदुवाचेंद्र्यपेक्षया॥ तमहं नृपतिं
दीनमब्रुवं पुनरेव तु॥ स्मर्तव्योहं महाराज दर्शयिष्यामि ते स्मृतं॥ अहं ते दयितं पुत्रं प्रेतराजवशं गतं॥ पुनर्दास्या
स्यामि तद्रूपमा शुचः पृथिवीपते॥ एवमुक्त्वा तु नृपतिं प्रयातौ स्वो यथेप्सितं॥ स्रृंजयश्च यथाकामे प्रविवेश २८

स्वमंदिरं॥ संजयस्याथ राजर्षेः कस्मिंश्चित्कालपर्यये॥ जज्ञे पुत्रो महावीर्यस्तेजसा प्रज्वलन्निव॥ ववृधे स यथा
नाम कालं सरसीव महोत्पलं॥ बभूव कांचनष्ठीवी यथार्थं तस्य तत्॥ तदद्भुततमं लोके पप्रथे कुरुसत्तम॥ बुबुधे
तच्च देवेंद्रो वरदानं महर्षिणा॥ ततस्त्वभिभवाद्भीतो बृहस्पतिमते स्थितः॥ कुमारस्यांतरप्रेक्षी बभूव बलवृत्रहा॥
चोदयामास वज्रं वै दिव्यास्त्रं मूर्तिमत्स्थितं॥ व्याघ्रो भूत्वा जहीमं त्वं राजपुत्रमिति प्रभो॥ विवृद्धः किल वीर्येण
मामेषोभिभविष्यति॥ स्रृंजयस्य सुतं वज्र यथैनं पर्वतो ददौ॥ एवमुक्तस्तु शक्रेण वज्रः परपुरंजयः॥ कुमारस्यां
तरप्रेक्षी नित्यमेवान्वपद्यत॥ संजयोपि सुतं प्राप्य देवराजसमद्युतिं॥ तुष्टः सांतःपुरो राजा वननित्योबभूव ह॥ ततो
भागीरथीतीरे कदाचिन्निर्जने वने॥ धात्रीद्वितीयो बालः स क्रीडार्थं पर्यधावत॥ पंचवर्षकदेशीयो बालो नागे
द्रविक्रमः॥ सहसोत्पतितं व्याघ्रमाससाद महाबलं॥ स बालस्तेन निष्पिष्टो वेपमानो नृपात्मजः॥ व्यसुः पपा
त मेदिन्यां ततो धात्री विचुक्रुशे॥ हत्वा तु राजपुत्रं स तत्रैवांतरधीयत॥ शार्दूलो देवराजस्य माययांतर्हितस्तदा॥
धात्र्यास्तु निनदं श्रुत्वा रुदत्याः परमार्तवत्॥ अभ्यधावत तं देशं स्वयमेव महीपतिः॥ स ददर्श शयानं तं गतासुं पी
तशोणितं॥ कुमारं विगतानंदं निशाकरमिव च्युतं॥ स तमुत्संगमारोप्य परिपीडितलक्षणं॥ पुत्रं रुधिरसंसि
क्तं पर्यदेवयदातुरः॥ ततस्ता मातरस्तस्य रुदंत्यः शोककर्षिताः॥ अभ्यधावंत तं देशं यत्र राजा स स्रृंजयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्तु राजा सस्मार मामेव तपतां वरः ॥ ततोहं चिंतितस्तेन ह्यागतवांस्तस्य दर्शनं ॥ समर्पिता निवासाश्च निश्वासि
तः शोककालसः ॥ यानि तेषु दुर्वीरेण कथितानि महीपते ॥ संजीवितश्चापि पुनर्वसिष्ठानुमते तदा ॥ भवितव्यं
यथा तच्च न तच्छक्यमतोन्यथा ॥ अतऊर्ध्वं कुमारस्स स्वर्णष्ठीवी महायशाः ॥ चित्तं प्रसादयामास पितुः मातुश्च वी
र्यवान् ॥ कारयामास राज्यं च पितरि स्वर्गते नृप ॥ वर्षाणां शतमेकं च सहस्रं भीमविक्रमः ॥ तत इष्ट्वा महायज्ञै
र्बहुभिर्भूरिदक्षिणैः ॥ तर्पयामास देवांश्च पितृंश्चैव महाद्युतिः ॥ उत्पाद्य च बहून्पुत्रान्कुलसंतानकारिणः ॥
कालेन महता राजन्कालधर्ममुपेयिवान् ॥ स त्वं राजेंद्र संजातं शोकमेतं निवर्तय ॥ यथा त्वां केशवः प्राह व्यास
श्च सुमहातपाः ॥ पितृपैतामहं राज्यमास्थाय धुरमुद्वह ॥ इष्ट्वा यज्ञैर्महापुण्यैरिष्टांल्लोकानवाप्स्यसि ॥ ॥ शांती
राजधर्मे ॥ ॥ वैशंपायन उ० ॥ ॥ तूष्णींभूते तु राजानं शोचमानं युधिष्ठिरं ॥ तपस्वी धर्मतत्त्वज्ञः कृष्णद्वैपायनोब्रवी
त् ॥ प्रजानां पालनं धर्मो राज्ञो राजीवलोचन ॥ धर्मः प्रमाणं लोकस्य नित्यं धर्मानुवर्तनं ॥ अनुतिष्ठस्व तद्राजन्पि
तृपैतामहं पदं ॥ ब्राह्मणेषु तपो धर्मस्स नित्यो वेदनिश्चितः ॥ तत्प्रमाणं ब्राह्मणानां शाश्वतं भरतर्षभ ॥ तस्य धर्म
स्य कृत्स्नस्य क्षत्रियः परिरक्षिता ॥ यः स्म यं प्रतिहंति स्म शासनं विषये रतः ॥ स बाहुभ्यां विनिग्राह्यो लोकयात्रावि
घातकः ॥ प्रमाणमप्रमाणं यः कुर्यान्मोहवशं गतः ॥ भृत्यो वा यदि वा पुत्रस्तपस्वी वापि कश्चन ॥ पापान्सर्वैरुपायैस्ता

न्नियच्छेत् घातयीत वा ॥ अतोन्यथा वर्तमानो राजा प्राप्नोति किल्बिषं ॥ धर्मं विनाश्यमानं हि यो न रक्षेत्स धर्महा ॥ ते त्व
या धर्महंतारो निहताः सपदानुगाः ॥ स्वधर्मे वर्तमानस्त्वं किं नु शोचसि पांडव ॥ राजा हि हन्याद्दद्याच्च प्रजा रक्षेच्च
धर्मतः ॥ ॥ युधिष्ठिरः ॥ ॥ न ते शंकेः वचनं यद्ब्रवीषि तपोधन ॥ अपरोक्षो हि ते धर्मस्सर्वधर्मविदां वर ॥ मया त्वव
ध्या बहवो घातिता राज्यकारणात् ॥ तान्यकर्माणि मे राजन्दहंति च पचंति च ॥ ॥ व्यास उवाच ॥ ॥ ईश्वरो वा भवेत्क
र्ता पुरुषो वापि भारत ॥ हतो वा वर्तते लोके कर्मजं वा फलं स्मृतं ॥ ईश्वरेण नियुक्ता हि साध्वसाधु च भारत ॥ कुर्वंति
पुरुषाः कर्मफलमीश्वरगामि तत् ॥ यथा हि पुरुषश्छिंद्याद्वृक्षं परशुना वने ॥ कर्तुरेव भवेत्पापं परशोर्न कथंचन ॥
अथवा तदुपादानात्प्राप्नुयात्कर्मणः फलं ॥ दंडशस्त्रकृतं पापं पुरुषे तन्न विद्यते ॥ न चैतदिष्टं कौंतेय यदन्येन कृतं फलं ॥
प्राप्नुयाद्यदि तस्माद्वा ईश्वरे तन्निबोधय ॥ अथापि पुरुषः कर्ता कर्मणोः शुभपापयोः ॥ न परो विद्यते तस्माद्देवमे
तच्छुभं कृतं ॥ न हि कश्चित्क्वचिद्राजन्दिष्टं प्रतिनिवर्तते ॥ एवमप्यशुभं कर्म न भूतं न भविष्यति ॥ अथाभिपत्तिर्लो
कस्य कर्तव्या शुभपापयोः ॥ अभिपन्नतमं लोके राज्ञामुद्यतदंडनं ॥ तथापि लोके कर्माणि समावर्तंति भारत ॥ शु
भाशुभफलं चापि प्राप्नुवंतीति मे मतिं ॥ एवमप्यशुभं कर्म कर्मणस्तत्फलात्मकं ॥ त्यज त्वं राजशार्दूल मा चैव शोके मनः
कृथाः ॥ स्वधर्मे वर्तमानस्य सापवादेपि भारत ॥ एवमात्मपरित्यागस्तव राजन्न शोभनः ॥ विहितानि हि कौंतेय प्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यश्चित्तानि कर्माणि॥ शरीरं यांस्तानि कुर्याद्देशाद्शरीरः पराभवेत्॥ तदाजरजीवमानस्त्वं प्रायश्चित्तं चरिष्यसि॥ प्रायश्चि
त्तमकृत्वा तु प्रेत्य तप्तासि भारत॥ ॥इति शांति पर्वणि॥ ॥युधिष्ठिर उवाच॥ ॥हताः पुत्राश्च पौत्राश्च भ्रातरः पितरस्त
था॥ श्वशुरा गुरवश्चैव मातुलाश्च पितामहाः॥ क्षत्रियाश्च महात्मानः संबंधिसुहृदस्तथा॥ वयस्या भागिनेयाश्च ज्ञातय
श्च पितामह॥ बहवश्च मनुष्येंद्रा नानादेशसमागताः॥ घातिता राज्यलुब्धेन मयैकेन पितामह॥ तांस्तादृशान् हं हत्वा
धर्मनित्यान् महीक्षितः॥ असकृत्सोमपान् वीरान् किं प्राप्स्यामि तपोधन॥ दह्यामि निश्शमद्यापि चिंतयानः पुनः पुनः॥ हीनां
पार्थिवसिंहैस्तैः श्रीमद्भिः पृथिवीमिमां॥ दृष्ट्वा ज्ञातिवधं घोरं हतांश्च शतशः परान्॥ कोटिशश्च नरानन्यान् परितप्ये पि
तामह॥ का नु तासां वरस्त्रीणामवस्थाद्य भविष्यति॥ विहीनानां स्वतनयैः पतिभिर्भ्रातृभिस्तथा॥ अस्मानंतकरान् घो
रान् पांडवान् वृष्णिसंहितान्॥ आक्रोशंत्यः कृशा दीनाः प्रपतिष्यंति भूतले॥ अपश्यंत्यः पितॄन् भ्रातॄन् पतीन् पुत्रांश्च
योषितः॥ त्यक्त्वा प्राणान् प्रियान् सर्वा गमिष्यंति यमक्षयं॥ वत्सलत्वाद्द्विजश्रेष्ठ तत्र मे नास्ति संशयः॥ व्यक्तं सौक्ष्म्या
द्धर्मस्य प्राप्स्यामः स्त्रीवधं त्वयं॥ ते वयं सुहृदो हत्वा कृत्वा पापमनंतकं॥ नरके निपतिष्यामो ह्यधश्शिरस एव च॥
शरीराणि विमोक्ष्यामस्तपसोग्रेण कर्मणा॥ आश्रमाणां विशेषं त्वं मामचक्ष्व पितामह॥ ॥वैशंपायनः॥ ॥युधि
ष्ठिरस्य तद्वाक्यं श्रुत्वा द्वैपायनस्तदा॥ निरीक्ष्य निपुणं बुद्ध्या ऋषिः प्रोवाच पांडवं॥ ॥व्यास उवाच॥ ॥मा विषादं कृ ३०

था राजन् क्षत्रधर्ममनुस्मर॥ स्वधर्मेण हता ह्येते क्षत्रियाः क्षत्रियर्षभ॥ कांक्षमाणाः श्रियं कृत्स्नां पृथिव्यां सुमहत्यशः॥ कृतां
तविधिसंयुक्ताः कालेन निधनं गताः॥ न त्वं हंता न भीमोयं नार्जुनो न यमावपि॥ कालः पर्यायधर्मेण प्राणानादत्त देहि
नां॥ न तस्य माता पिता वापि तस्यानुग्राह्योस्ति कश्चन॥ कर्मसाक्षी प्रजानां यस्तेन कालेन संहृताः॥ हेतुमात्रमिदं तस्य विहितं
भरतर्षभ॥ यद्धंति भूतैर्भूतानि तदस्मै रूपमैश्वरं॥ कर्मसूत्रात्मकं विद्धि साक्षिणं शुभपापयोः॥ सुखदुःखगुणोदर्कं का
लं कालफलप्रदं॥ तेषामपि महाबाहो कर्माणि परिचिंतय॥ विनाशहेतुकानि त्वं यैस्ते कालवशं गताः॥ आत्मनश्च विजानी
हि यतव्रतसुशीलतां॥ यदा त्वमीदृशो कर्मविधिना क्रम्यकारितः॥ त्वष्ट्रेव विहितं यंत्रं यथा चेष्टयितुर्वशे॥ कर्मणा काल
युक्तेन तथेदं भ्राम्यते जगत्॥ पुरुषस्य हि दृष्ट्वा समुत्पत्तिमनिमित्ततः॥ यदृच्छया विनाशं च शोकहर्षावनर्थकौ॥ व्यली
कमपि यत्त्वत्र चित्तवैतंसिकं तव॥ तदर्थमिष्यते राजन् प्रायश्चित्तं तदाचर॥ इदं तु श्रूयते पार्थ युद्धे देवासुरे पुरा॥ असुरा
भ्रातरो ज्येष्ठा देवाश्चापि यवीयसः॥ तेषामपि श्रीनिमित्तं महानासीत्समुच्छ्रयः॥ युद्धं वर्षसहस्राणि द्वात्रिंशदभवत्कि
ल॥ एकार्णवां महीं कृत्वा रुधिरेण परिप्लुतां॥ जघ्नुर्दैत्यांस्तथा देवास्त्रिदिवं चापि लेभिरे॥ अथैव पृथिवीं लब्ध्वा ब्राह्मणा वे
दपारगाः॥ संश्रिता दानवानां स्म सहायार्थे दर्पमोहिताः॥ शालावृका इति ख्यातास्त्रिषु लोकेषु भारत॥ अष्टाशीतिसहस्रा
णि ते चापि विबुधैर्हताः॥ धर्मव्युच्छित्तिमिच्छंतो ये धर्मस्य प्रवर्तकाः॥ हतव्यास्ते दुरात्मानो देवैर्दैत्या इवोल्बणाः॥ एकं हत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदिकुलेशिष्टानांस्यादनामयं ॥ कुलंहत्वाथराष्ट्रंवानतद्वृत्तोपघातकं ॥ अधर्मरूपोधर्मोहिकश्चिदस्तिनराधिप ॥ धर्मश्चा-
धर्मरूपोस्तितच्चज्ञेयंविपश्चिता ॥ तस्मात्संस्तंभयात्मानंश्रुतवानसिपांडव ॥ देवैःपूर्वगतंमार्गमनुयातोसिभारत ॥ नहीदृ-
शागमिष्यंतिनरकंभरतर्षभ ॥ भ्रातॄनाश्वासयैतांस्त्वंसुहृदश्चपरंतप ॥ योहिपापसमारंभेकार्येतद्भावभावितः ॥ कुर्वन्न-
पितथैवस्यात्कृत्वाचनिरपत्रपः ॥ तस्मिंस्तत्कलुषंसर्वंसमाप्तमितिशब्दितं ॥ प्रायश्चित्तंनतस्यास्तिह्रासोवापापकर्मणः ॥
त्वंतुशुक्लाभिजातीयःपरदोषेणकारितः ॥ अनिच्छमानःकर्मेदंकृत्वाचपरितप्यसे ॥ अश्वमेधोमहायज्ञःप्रायश्चित्तमुदा-
हृतं ॥ तमाहरमहाराजविपाप्मैवंभविष्यसि ॥ मरुद्भिःसहजित्वारीन्मघवान्पाकशासनः ॥ एकैकंक्रतुमाहृत्यशतकृत्वः
शतक्रतुः ॥ धूतपाप्माजितस्वर्गोलोकान्प्राप्यसुखोदयान् ॥ मरुद्गणवृतःशक्रःशुशुभेभासयन्दिशः ॥ स्वर्गलोकेम-
हीयंतमप्सरोभिःशचीपतिः ॥ ऋषयःपर्युपासंतेदेवाश्चविबुधेश्वरं ॥ सेयंत्वामनुसंप्राप्ताविक्रमेणवसुंधरा ॥ निर्जिता-
श्चमहीपालाविक्रमेणत्वयानघ ॥ तेषांपुराणिराष्ट्राणिगत्वाराजन्सुहृद्वृतः ॥ भ्रातॄन्पुत्रांश्चपौत्रांश्चस्वेस्वेराज्येभिषेचय ॥
कामाज्ञयोहिस्त्रीवर्गःशोकमेवंप्रहास्यति ॥ एवमाश्वासनंकृत्वासर्वराष्ट्रेषुभारत ॥ यजस्ववाजिमेधेनयथेंद्रोविजयी
पुरा ॥ अशोच्यास्तेमहात्मानःक्षत्रियाःक्षत्रियर्षभ ॥ स्वधर्मनिर्गतानाशंहतांतबलेभ्योहितं ॥ अवाप्तःक्षत्रधर्मस्तेरा-
ज्यंप्राप्तमकंटकं ॥ स्वधर्मंकौंतेयश्रेयान्यःप्रेत्यभारत ॥ ॥ इतिश्रीशांतौराजधर्मे ॥ ॥ युधिष्ठिरः ॥ ॥ कानिकृत्वेहकर्मा- ४०

चन

णिप्रायश्चित्तीयतेनरः ॥ किंकृत्वाचेहमुच्येततन्मेब्रूहिपितामह ॥ ॥ व्यासः ॥ ॥ अकुर्वन्विहितंकर्मप्रतिषिद्धानि
चाचरन् ॥ प्रायश्चित्तीयतेह्येवंनरोमिथ्यानुवर्त्तयन् ॥ सूर्येणाभ्युदितोयश्चब्रह्मचारीभवत्युत ॥ तथास्तमयितेनि-
र्मुक्तःकुनखीश्यावदंत्यपि ॥ परिवित्तिःपरिवेत्ताब्रह्मघ्नोयश्चकुत्सकः ॥ दिधिषूपतिस्तथायःस्यादग्रेदिधिषुरेवच ॥ अवकीर्णी
सवेधश्चद्विजातिवधकस्तथा ॥ अनतीर्थेब्राह्मणस्यागतीर्थेचाप्रतिपादकः ॥ ग्रामघातीचकौंतेयमांसस्यपरिविक्रयी ॥ गुरु-
स्त्रीवधकोपश्चपूर्वःपूर्वश्चगर्हितः ॥ पर्यायश्रुतमालंभीगृहदाहस्यदायकः ॥ अनृतेचोपवर्त्तांश्चप्रतिरोद्धागुरोश्चयः ॥
पश्चाग्नीनपविद्धेततथैवब्रह्मविक्रयी ॥ एतान्येनांसिसर्वाणिव्युत्क्रांतसमयश्चयः ॥ अकार्याणितुवक्ष्यामियानितानि
निबोधमे ॥ लोकवेदविरुद्धानितान्येकाग्रमनाःशृणु ॥ स्वधर्मस्यपरित्यागःपरधर्मस्यचक्रिया ॥ अयाज्ययाजनंचैवतथा-
भक्ष्यस्यभक्षणं ॥ शरणागतसंत्यागोभृत्यस्याभरणंतथा ॥ रसानांविक्रयश्चैवतिर्यग्योनिवधस्तथा ॥ आधानादी-
निकर्माणिशक्तिमान्नकरोतियः ॥ अप्रयच्छंश्चसर्वाणिनित्यदेयानिभारत ॥ दक्षिणानामदानंचब्राह्मणस्याभिमर्षणं ॥
सर्वाण्येतानिकार्याणिप्राहुर्धर्मविदोजनाः ॥ पित्राविवदतेपुत्रोयश्चस्याद्गुरुतल्पगः ॥ अप्रजायन्नधर्मेणभवत्येको धार्मि
नरः ॥ उक्तान्येतानिकर्माणिविस्तरेणेतरेणच ॥ यानिकुर्वन्नकुर्वंश्चप्रायश्चित्तीयतेनरः ॥ एतान्येवतुकर्माणिक्रियमा-
णानिमानवाः ॥ येषुयेषुनिमित्तेषुनलिप्यंतेचतान्शृणु ॥ प्रगृह्यशस्त्रमायांतमपिवेदांतगंरणे ॥ जिघांसंतंजिघांसीया-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतेन ब्रह्महा भवेत्॥ अपि चाप्यत्र कौंतेय मंत्रो वेदेषु पठ्यते॥ वेदप्रमाणविहितं धर्मं च प्रब्रवीमि ते॥ अपेतं ब्राह्मणं वृत्ता
द्यो हन्यादाततायिनं॥ न तेन ब्रह्महा स स्यान्मन्युस्तन्मन्युमृच्छति॥ प्राणात्यये तथाज्ञानादाचरन्मदिरामपि॥ आदेशितो
धर्मपरैः पुनःसंस्कारमर्हति॥ एतत्ते सर्वमाख्यातं कौंतेयाभक्ष्यभक्षणं॥ प्रायश्चित्तविधानेन सर्वमेतेन शुध्यति॥ गुरुत
ल्पं हि गुर्वर्थे न दूषयति मानवं॥ उद्दालकः श्वेतकेतुं जनयामास शिष्यतः॥ स्तेयं कुर्वंस्तु गुर्वर्थमापत्सु न निबध्यते॥ ब
हुशः कामकारेण न चेद्यः संप्रवर्तते॥ अन्यत्र ब्राह्मणस्वेभ्य आददानो न दुष्यति॥ स्वयमप्राशिता यश्च न स पापेन लिप्य
ते॥ प्राणत्राणेऽनृतं वाच्यमात्मनो वा परस्य च॥ गुर्वर्थे स्त्रीषु चैवं स्याद्विवाहकरणेषु च॥ नावर्तते व्रतं स्वप्ने शुक्रमोक्षे
कथंचन॥ आज्यहोमः समिद्धेऽग्नौ प्रायश्चित्तं विधीयते॥ पारिविस्यं तु पतिते नास्ति प्रव्रजिते तथा॥ भिक्षिते पारदार्यं च त
द्धर्मस्य न दूषणं॥ वृथा पशुसमालंभं नैव कुर्यान्न कारयेत्॥ अनुग्रहः पशूनां हि संस्कारो विधिचोदितः॥ अनर्हे ब्राह्मणे द
त्तमज्ञानात्तं न दूषकं॥ सत्काराणां तथातीर्थे नित्यं वा प्रतिपादनं॥ स्त्रियस्तथापचारिण्यो निष्कृतिः स्याददूषिका॥ अपि सा
पूयते तेन न च भर्ता प्रदुष्यति॥ तत्त्वं ज्ञात्वा तु सोमस्य विक्रयः स्याददोषवान्॥ असमर्थस्य भृत्यस्य विसर्गः स्याददोष
वान्॥ वनदाहो गवामर्थे क्रियमाणो न दूषकः॥ उक्तान्येतानि कर्माणि यानि कुर्वन्न दुष्यति॥ प्रायश्चित्तानि वक्ष्यामि विस्तरे
णैव भारत॥ ॥इति शांते राजधर्मे॥ ॥व्यास उवाच॥ ॥तपसा कर्मणा चैव प्रदानेन च भारत॥ पुनाति पापं पुरुषः पु ४१

पा
शा

नश्चेन्न प्रवर्तयेत्॥ एककालं च भुंजीत चरन्भैक्ष्यं स्वकर्म कृत्॥ कपालपाणिः खट्वांगी ब्रह्मचारी सदोत्थितः॥ अनसूयुर्ध
रःशायी कर्म लोके प्रकाशयन्॥ पूर्णैर्द्वादशभिर्वर्षैर्ब्रह्महा विप्रमुच्यते॥ लक्ष्यः शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः॥
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः॥ जपन्नन्यतमं वेदं योजनानां शतं व्रजेत्॥ सर्वस्वं वा वेदविदे ब्राह्मणायोपपा पा
दयेत्॥ धनं वा जीवनायालं गृहं वा सपरिच्छदं॥ मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च॥ षड्भिर्वर्षैः कृच्छ्रभोजी ब्रह्महा
पूयते नरः॥ मासे मासे समश्नंस्तु त्रिभिर्वर्षैः प्रमुच्यते॥ संवत्सरेण मासाशी पूयते नात्र संशयः॥ तथैवोपवसन्राजन्
स्वल्पेनापि प्रमुच्यते॥ क्रतुना चाश्वमेधेन पूयते नात्र संशयः॥ ये चास्यावभृथे स्नातास्ते केचिदेवंविधा नराः॥ ते सर्वे धूतपा
प्मानो भवंतीति परा श्रुतिः॥ ब्राह्मणार्थे हतो युद्धे मुच्यते ब्रह्महत्यया॥ गवां शतसहस्रं तु पात्रेभ्यः प्रतिपादयन्॥ ब्रह्महा
विमुच्येत सर्वपापेभ्य एव च॥ कपिलानां सहस्राणि यो दद्यात्पंचविंशतिं॥ दोग्ध्रीणां सर्वपापेभ्यः सर्वेभ्यो विप्रमुच्यते॥ गो
सहस्रं सवत्सानां दोग्ध्रीणां प्राणसंशये॥ साधुभ्यो वै दरिद्रेभ्यो दत्वा मुच्येत किल्बिषात्॥ शतं वै यस्तु कांबोजान्ब्राह्मणे
भ्यः प्रयच्छति॥ नियतेभ्यो महीपाल सर्वपापैः प्रमुच्यते॥ मनोरथं तु यो दद्यादेकस्मै यद्विभारत॥ न कीर्तयेत दत्वा यः स
र्वपापैः प्रमुच्यते॥ सुरापानं सकृत्कृत्वा योऽग्निवर्णां सुरां पिबेत्॥ स पावयत्यथात्मानमिह लोके परत्र च॥ मनुप्रतापं प्र
तपन्नज्वलनं वा समाविशन्॥ महाप्रस्थानमातिष्ठन्मुच्यते सर्वकिल्बिषैः॥ बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समितिं ब्रह्मणो गच्छेदिति वै ब्रह्मणः श्रुतिः॥ भूमिप्रदानं कुर्याद्वा सुरापी ब्राह्मणः सः॥ पुनर्नच पिबेद्राजन् संस्कृतः स च
शुध्यति॥ गुरुतल्पी शिलां तप्तामायसीमधिसंश्रितेत्॥ अपकर्त्यात्मनः शेफं प्रव्रजेदूर्ध्वदर्शनः॥ शरीरस्य विमो
क्षेण मुच्यते कर्मणोऽशुभात्॥ कर्मभ्यो विप्रमुच्यते यतः संवत्सरं स्त्रियः॥ महाव्रतं चरेद्यस्तु दद्यात्सर्वस्वमेव च॥ गुर्व
अ र्थे वा हतो युद्धे स मुच्येत्कर्मणोऽशुभात्॥ अनृते चोपकर्ता च प्रतिरोद्धा गुरोस्तथा॥ उपहृत्य प्रियं तस्मै तस्मात्पापात्प्रमुच्यते॥
अवकीर्णी निमित्तं तु ब्रह्महत्याव्रतं चरेत्॥ खरचर्मवासाः षण्मासं तथा मुच्येत किल्बिषात्॥ परदारापहारी तु परस्या
पहरन्वसु॥ संवत्सरं व्रतीभूत्वा तथा मुच्येत किल्बिषात्॥ धनं तु यस्यापहरेत्तस्मै दद्यात्समं वसु॥ विविधेनाभ्युपायेन त
था मुच्येत किल्बिषात्॥ कृच्छ्राद्द्वादशरात्रेण संयतात्मा व्रते स्थितः॥ परिवेत्ता भवेत्स्नातः परिवित्तिश्च भामतः॥ निर्वेश्य तु पुनः
स्तेन सदा तान यतापितृ॥ न तु स्त्रिया धर्मवेद्देषो न तु सा तेन लिप्यते॥ भोजनं ह्यंतवारे तु दद्याच्चातुर्मास्ये विधीयते॥ स्त्रिय
स्तेन प्रशुध्यंत इति धर्मविदो विदुः॥ स्त्रियस्त्वाशंकिताः पापैर्नोपगम्या विजानता॥ भजसा ता विशुध्यंते भस्मना भाज
नं यथा॥ पादोच्छिष्टं कांस्यं वा गवाघ्रातमथापि वा॥ विदूषोच्छिष्टमथवा विशुद्ध्येद्दशभिस्तु तत्॥ चतुष्पात्सकलो धर्मो ब्रा
ह्मणस्य विधीयते॥ पादावकृष्टो राजन्ये तथा धर्मो विधीयते॥ तथा वैश्ये च शूद्रे च पादः पादो विधीयते॥ विद्यादेवंविधेनै
षां गुरुलाघवनिश्चयं॥ तिर्यग्योनिवधं कृत्वा द्रुमांश्छित्त्वेतरान्बहून्॥ त्रिरात्रं वायुभक्षः स्यात्कर्म विप्रथयेन्नरःभगम्या

गमने राजन्प्रायश्चित्तं विधीयते॥ आर्द्रवस्त्रे पाषणमासात्त्रिविहीनं भस्मशायिना॥ एष एव तु सर्वेषामकार्याणां वि
धिर्भवेत्॥ ब्राह्मणोक्तेन विधिना हष्टांता गमहेतुभिः॥ सावित्रीमप्यधीयत शुचौ देशे मिताशनः॥ अहिंस्रो मंदकोऽज
स्रो मुच्यते सर्वकिल्बिषैः॥ अहस्सु सततं तिष्ठेदभ्याकाशं निशास्वपेत्॥ त्रिरह्नस्त्रिर्निशायां च सवासा जलमाविशेत्॥
स्त्रीशूद्रपतितांश्चापि नाभिभाषेद्व्रतान्वितः॥ पापान्यज्ञानतः कृत्वा मुच्येतैवं विधो द्विजः॥ शुभाशुभं फलं प्रेत्य लभते भूत
साक्षिकं॥ अतिरिच्येत यो यत्र तत्कर्ता लभते फलं॥ तस्माद्दानेन तपसा कर्मणा च शुभं फलं॥ वर्द्धयेदशुभं कृत्वा यथा
स्यादतिरेकवान्॥ कुर्याच्छुभानि कर्माणि निवर्तेत पापकर्मणः॥ दद्याच्चित्तं च वित्तानि तथा मुच्येत किल्बिषात्॥ अनुरूपं हि
पापस्य प्रायश्चित्तमुदाहृतं॥ महापातकवर्ज्यं च प्रायश्चित्तं विधीयते॥ भक्ष्याभक्ष्येषु चान्येषु वाच्यावाच्ये तथैव च॥ अज्ञा
नज्ञानयो राजन्विहितान्यनुराजते॥ जानता तु कृतं पापं गुरु सर्वं भवत्युत॥ अज्ञानात्स्खलिते दोषे प्रायश्चित्तं विधीयते॥
शक्यते विधिना पापं यथोक्तेन व्यपोहितुं॥ आस्तिके श्रद्दधाने च विधिरेष विधीयते॥ नास्तिकाश्रद्दधानेषु पुरुषेषु क
दाचन॥ दंभद्वेषप्रधानेषु विधिरेष न दृश्यते॥ शिष्टाचारश्च शिष्टश्च धर्मो धर्मभृतां वर॥ सेवितव्यो नरव्याघ्र प्रेत्य
र्थ चेह सुखमिच्छता॥ स राजन्मोक्ष्यसे पापात्तेन पूर्वेण हेतुना॥ प्राणानां वाधने नैषामथवा नृपकर्मणा॥ अथवा ते घृणा राजन्
प्रायश्चित्तं चरिष्यसि॥ मा त्वेवानार्यजुष्टेन कर्मणा निधनं गमः॥ ॥वैशंपायन उवाच॥ ॥एवमुक्तो भगवता धर्मराजो युधि

स्थिरः ॥ चिंतयित्वा मुहूर्तेन प्रत्युवाच तपोधनं ॥ ॥इति शांतौ राजधर्मे ॥ ॥युधिष्ठिर उवाच ॥ ॥किमभक्ष्यं चाप्यभक्ष्यं च किंच दे
यं प्रशस्यते ॥ किंच पात्रमपात्रं वा तन्मे ब्रूहि पितामह ॥ ॥व्यास उवाच ॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ सिद्धानां
चैव संवादं मनोश्चैव प्रजापतेः ॥ ऋषयस्तु व्रतपराः समागम्य पुरा विभुं ॥ धर्मं पप्रच्छुरासीनमादिकालं प्रजापतिं ॥ कथ
मन्नं कथं दानं दानमध्ययनं तपः ॥ कार्याकार्यं च यत्सर्वं शंस वै त्वं प्रजापते ॥ तैरेवमुक्तो भगवान् मनुः स्वायंभुवोऽब्रवी
त् ॥ शुश्रूषध्वं यथावृत्तं धर्मं व्याससमासतः ॥ अनादेशे जपो होममुपवासस्तथैव च ॥ आत्मज्ञानं पुण्यनद्यो यत्र प्राया
श्च तत्पराः ॥ अनादिष्टं तथैतानि पुण्यानि धरणीभृतः ॥ सुवर्णप्राशनमपि रत्नादिस्नानमेव च ॥ देवस्थानाभिगमनमा
ज्यप्राशनमेव च ॥ एतानि मेध्यं पुरुषं कुर्वंत्याशु न संशयः ॥ न गर्वेण भवेत्प्राज्ञः कदाचिदपि मानवः ॥ दीर्घमायुरथेच्छं
न्हि त्रिरात्रं चोष्णपो भवेत् ॥ अदत्तस्यानुपादानं दानमध्ययनं तपः ॥ अहिंसा सत्यमक्रोध इज्या धर्मस्य लक्षणं ॥ स ए
व धर्मः सोऽधर्मो देशकाले प्रतिष्ठितः ॥ अज्ञानमनृतं हिंसा धर्मो ह्यावस्थिकः स्मृतः ॥ द्विविधौ चाप्युभावेतौ धर्माधर्मौ वि
जानता ॥ अप्रवृत्तिः प्रवृत्तिश्च द्वैविध्यं लोकवेदयोः ॥ अप्रवृत्तेरमर्त्यत्वं मर्त्यत्वं कर्मणः फलं ॥ अशुभस्याशुभं विंद्यात्शु
भस्य शुभमेव च ॥ एतयोश्चोभयोः स्यातां शुभाशुभं तथा तथा ॥ दैवं च दैवयुक्तं च प्राणाश्च प्रलयस्तथा ॥ अपेक्षापूर्व
करणादशुभानां फलं शुभं ॥ ऊर्ध्वं भवति संदेहादिह दृष्टार्थमेव च ॥ अपेक्षापूर्वकरणात्प्रायश्चित्तं विधीयते ॥ क्रोध

मोहकृते चैव दृष्टांतागमहेतुभिः ॥ शरीराणामुपक्लेशो मनसश्च प्रियाप्रिये ॥ तत्रौषधैश्च मंत्रैश्च प्रायश्चित्तैश्च शाम्यते ॥
उपवासमेकरात्रं तु दंडोत्सर्गे नराधिपः ॥ विशुध्येदात्मशुध्यर्थं त्रिरात्रं तु पुरोहितः ॥ क्षयं शोकं प्रकुर्वाणो न म्रियेत यदा
नरः ॥ शस्त्रादिभिरुपाविष्टस्त्रिरात्रं तत्र निर्दिशेत् ॥ जातिश्रेण्यधिवासानां कुलधर्मांश्च सर्वतः ॥ वर्जयंति च ये धर्मं
तेषां धर्मो न विद्यते ॥ दश वा वेदशास्त्रज्ञास्त्रयो वा वेदपाठकाः ॥ यद्ब्रूयुः कार्य उत्पन्ने स धर्मो धर्मनिश्चये ॥ अनड्वान्मृ
त्तिका चैव तथा क्षुद्रपिपीलिकाः ॥ श्लेष्मातकस्तथा विप्रैरभक्ष्यं विषमेव च ॥ अभक्ष्या ब्राह्मणैर्मत्स्याः शल्कैर्ये वै विवर्जि
ताः ॥ चतुष्पात्कच्छपादन्यो मंडूका जलजाश्च ये ॥ भासा हंसाः सुपर्णाश्च चक्रवाकाः प्लवा बकाः ॥ काको मद्गुश्च गृध्रश्च
श्येनोलूकस्तथैव च ॥ क्रव्यादि दंष्ट्रिणः सर्वे चतुष्पात्पक्षिणश्च ये ॥ येषां चोभयतो दंताश्चतुर्दंताश्च सर्वशः ॥ एडक
श्वखरोष्ट्राणां सूतिकानां गवामपि ॥ मानुषीणां मृगीणां च न पिबेद्ब्राह्मणः पयः ॥ प्रेतान्नं सूतिकान्नं च यच्च किंचिदनिर्दशं ॥
अभोज्यं चाप्यपेयं च धेनोर्दुग्धमनिर्दशं ॥ राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं ॥ आयुः सुवर्णकारान्नमवीरायाश्च योषि
तः ॥ विष्ठा वार्धुषिकस्यान्नं गणिकान्नमथेंद्रियं ॥ मृष्यंति ये चोपपतिं स्त्रीजितानां च सर्वशः ॥ दीक्षितस्य कदर्यस्य क्रतुवि
क्रयिकस्य च ॥ तक्षणश्चर्मकर्तुश्च पुंश्चल्या रजकस्य च ॥ चिकित्सकस्य यच्चान्नमभोज्यं रक्षिणस्तथा ॥ गणग्रामाभिश
स्तानां रंगस्त्रीजीविनां तथा ॥ परिवित्तिकानां पुंसां च वंदिद्यूतविदां तथा ॥ वामहस्ताहृतं चान्नं शुष्कं पर्युषितं च यत् ॥ सुरानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतमुष्ट्रिष्ठमथो च्यंशे षितंच यत्॥ पिष्टस्यचेक्षुशाकानां विकाराः पयसस्तथा॥ सक्तुधानाकरंभाणां नोपभोज्याश्चिर
स्थिताः॥ पायसं कृसरं मांसमपूपाश्च वृथा कृताः॥ अपेयाश्चाप्यभक्ष्याश्च ब्राह्मणैर्गृहमेधिभिः॥ देवानृषीन्मनुष्यां
श्च पितॄन्गृह्याश्च देवताः॥ पूजयित्वा ततः पश्चाद्गृहस्थो भोक्तुमर्हति॥ यथा प्रव्रजितो भिक्षुस्तथैव स्वगृहे वसेत॥ एवंवृ
न त्तः प्रियैर्दारैः संवसन्धर्ममाप्नुयात्॥ न दद्याद्यशसे दानं न भयान्नोपकारिणे॥ न नृत्यगीतशीलेषु हासकेषु च धार्मिकः॥ न
मत्ते चैवोन्मत्ते न स्तेने न चकुत्सके॥ न वाग्विहीने विवर्णे वा नांगहीने न वामने॥ न दुर्जने दौष्कुले वा व्रतैर्यो वा न संस्कृतः॥ अश्रो
त्रियमृते दानं ब्राह्मणे ब्रह्मवर्जिते॥ असम्यक्चैव यद्दत्तमसम्यक्च प्रतिग्रहः॥ उभयं स्याद्दनर्थाय दातुर्दातुश्च वै॥ यथा ना
खदिरमालंब्य शिलां वाप्यर्णवं तरन्॥ मज्जेत मज्जेत तद्दाता यद्वत्प्रतीच्छकः॥ काष्ठैरार्द्रैर्यथा वह्निरुपस्तीर्णो न दीप्यते॥
तपःस्वाध्यायचारित्रैरेवं हीनः प्रतिग्रही॥ कपाले यद्वदापः स्युः श्वदृतौ च यथा पयः॥ आश्रयस्थानदोषेण वृत्तहीने तथा
श्रुतं॥ निर्मंत्रो निर्व्रतो यः स्यादशास्त्रज्ञोऽनसूयकः॥ अनुक्रोशात्प्रदातव्यं कुलेष्वंतिकेष्वपि॥ न वै देयमनुक्रोशाद्दीना ब
नामुरिपोष्वपि॥ आप्ताचरितइत्येव धर्मइत्येव वा पुनः॥ निष्कारणं स्मृतं दत्तं ब्राह्मणे वेदवर्जिते॥ अवेदपात्रदोषेण न चास्य
च विचारणा॥ यथा दारुमयो हस्ती यथा चर्ममयो मृगः॥ ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः॥ यथा षंढोऽफलः स्त्री
षु यथा गौर्गवि चाफला॥ शकुनिर्वाप्यपक्षः स्यान्निर्मंत्रो ब्राह्मणस्तथा॥ ग्रामधान्यं यथा शून्यं यथा कूपश्च निर्जलः॥ य ४४

थाहुतमनग्नौ च तथैव स्याच्चिरा हुतौ॥ देवतानां पितॄणां च हव्यकव्यविनाशकः॥ शत्रुरर्थहरो मूर्खो नलोकान्प्राप्तुमर्हति॥
एतत्ते कथितं सर्वं यथावृत्तं युधिष्ठिर॥ समासेन महद्ध्येतच्छ्रोतव्यं भरतर्षभ॥ ॥शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥
श्रोतुमिच्छामि भगवन्विस्तरेण महामुने॥ राजधर्मान्द्विजश्रेष्ठ चातुर्वर्ण्यस्य चाखिलान्॥ आपत्सु च यथा नीतिः प्रणेत
व्या द्विजोत्तम॥ धर्ममालक्ष्य पंथानं विजयेयं कथं महीं॥ प्रायश्चित्तकथं ह्येषा भक्ष्याभक्ष्यविवर्जिता॥ कौतूहलानुप्रवणा हर्ष
जनयतीव मे॥ धर्मचर्या च राज्यं च नित्यमेव विरुध्यते॥ एतन्मुह्यति मे चेतश्चिंतयानस्य नित्यशः॥ ॥वैशंपायनः॥ ॥तमुवा
च महाराज व्यासो वेदविदांवरः॥ नारदं समभिप्रेक्ष्य सर्वज्ञानां पुरातनं॥ श्रोतुमिच्छसि चेद्धर्मं निखिलेन नराधिप॥ प्रे
न हि भीष्मं महाबाहुं वृद्धं कुरुपितामहं॥ स ते सर्वरहस्येषु संशयान्मनसि स्थितान्॥ छेत्ता भागीरथीपुत्रः सर्वज्ञः सर्वधर्मवि
त्॥ जनयामास यं देवी दिव्या त्रिपथगा नदी॥ साक्षाद्ददर्श यो देवान्सर्वानिंद्रपुरोगमान्॥ बृहस्पतिपुरोगांश्च महर्षीन
सकृत्प्रभुः॥ तोषयित्वोपचारेण राजनीतिमधीतवान्॥ उशना वेद यच्छास्त्रं यच्च देवगुरुर्द्विजः॥ तच्च सर्वं सवैयाख्यं प्राप्तवा
न्कुरुसत्तम॥ भार्गवाच्च्यवनाच्चापि वेदानेनोपबृंहितान्॥ प्रतिपेदे महाबाहुर्वसिष्ठाच्च यतव्रतः॥ पितामहसुतं ज्येष्ठं कुमा
रं दीप्ततेजसं॥ अध्यात्मगतितत्त्वज्ञमुपाशिक्षत यः पुरा॥ मार्कंडेयमुखात्कृत्स्नं यतिधर्ममवाप्तवान्॥ रामादस्त्राणि शक्रा
च्च प्राप्तवान्पुरुषर्षभः॥ मृत्युरात्मेच्छया यस्य जातस्य मनुजेष्वपि॥ तथानपत्यस्य सतः पुण्यालोका दिवि श्रुताः॥ यस्य ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्मर्षयः पुण्या नित्यमासन्सभासदः॥ यस्य नाविदितं किंचिज्ज्ञानं ज्ञेयेषु विद्यते॥ स ते वक्ष्यति धर्मज्ञः सूक्ष्मधर्मार्थतत्ववित्॥
तमभ्येहि पुरा प्राणान्स विमुंचति धर्मवित्॥ एवमुक्तस्तु कौंतेयो दीर्घप्रज्ञो महामतिः॥ उवाच वदतां श्रेष्ठं व्यासं सत्यवतीसुतं॥ ॥
युधिष्ठिर उवाच॥ ॥ वैशसं सुमहत्कृत्वा ज्ञातीनां लोमहर्षणं॥ आगस्कृत्सर्वलोकस्य पृथिव्या नाशकारकः॥ घातयित्वा त
ख्या४ मेवाजौ छलेनाजिह्मयोधिनं॥ उपसंप्रष्टुमर्हामि तमहं केन हेतुना॥ ॥वैशंपायनः॥ ॥ततस्तं नृपतिश्रेष्ठं चातुर्वर्ण्यहि
तेप्सया॥ पुनराह महाबाहुर्यदुश्रेष्ठो महामतिः॥ ॥वासुदेव उवाच॥ ॥नेदानीमतिनिर्बंधं शोके त्वं कर्तुमर्हसि॥ यदाह भ
गवान्व्यासस्तत्कुरुष्व नृपोत्तम॥ ब्राह्मणास्त्वां महाबाहो भ्रातरश्च महौजसः॥ पर्जन्यमिव घर्मार्ता नाथमाना उपासते॥ हतशि
ष्टाश्च राजानः कृत्स्नं चैव तवागतं॥ चातुर्वर्ण्यं महाराज राष्ट्रं ते कुरुजांगलं॥ प्रियार्थमपि चैतेषां ब्राह्मणानां महात्मनां॥ नि
योगादस्य च गुरोर्व्यासस्यामिततेजसः॥ सुहृदां चास्मदादीनां द्रौपद्याश्च परंतप॥ कुरु प्रियममित्रघ्न लोकस्य च हितं कु
रु॥ ॥वैशंपायनः॥ ॥एवमुक्तस्तु कृष्णेन राजा राजीवलोचनः॥ हितार्थं सर्वलोकस्य समुत्तस्थौ महामनाः॥ सोऽनुनीतो न
रव्याघ्रो विष्टरश्रवसा स्वयं॥ द्वैपायनेन च तथा देवस्थानेन जिष्णुना॥ एतैश्चान्यैश्च बहुभिरनुनीतो युधिष्ठिरः॥ व्यजहन्मा
नसं दुःखं संतापं च महायशाः॥ श्रुतवाक्यः श्रुतनिधिः श्रुतश्रव्यविशारदः॥ व्यवस्य मनसः शांतिमगच्छत्पांडुनंदनः॥ स तैः परि
वृतो राजा नक्षत्रैरिव चंद्रमाः॥ धृतराष्ट्रं पुरस्कृत्य स्वपुरं प्रविवेश ह॥ प्रविविक्षुः स धर्मज्ञः कुंतीपुत्रो युधिष्ठिरः॥ अर्चया ४५

मास देवांश्च ब्राह्मणांश्च सहस्रशः॥ ततो रथं नवं शुभ्रं कंबलाजिनसंवृतं॥ युक्तं षोडशभिर्गोभिः पांडुरैः शुभलक्षणैः॥ मंत्रैर
भ्यर्चितः पुण्यैः स्तूयमानश्च बंदिभिः॥ आरुरोह यथा देवः सोमोऽमृतमयं रथं॥ जग्राह रश्मीन्कौंतेयो भीमो भीमपराक्रमः
॥ अर्जुनः पांडुरं छत्रं धारयामास भानुमत्॥ ध्रियमाणं तु तच्छत्रं पांडुरं रथमूर्धनि॥ शुशुभे तारकाकीर्णं सितमभ्रमिव
श्रिया॥ चामरव्यजने चास्य वीरौ जगृहतुस्तदा॥ चंद्ररश्मिप्रभे शुभ्रे माद्रीपुत्रावलंकृतौ॥ ते पंच रथमास्थाय भ्रातरः समलं
कृताः॥ भूतानीव समस्तानि राजन्ददृशिरे तदा॥ आस्थाय तु रथं शुभ्रं युक्तमश्वैर्महाजवैः॥ अन्वयात्पृष्ठतो राजन्युयुत्सुः
ग्र पांडवाग्रजं॥ रथं हेममयं शुभ्रं सैन्यसुग्रीवयोजितं॥ सह सात्यकिना कृष्णः समास्थायान्वयात्कुरून्॥ नरयानेन तु ज्येष्ठः पिता
पार्थस्य भारत॥ अग्रतो धर्मराजस्य गांधारीसहितो ययौ॥ कुरुस्त्रियश्च ताः सर्वाः कुंती कृष्णा तथैव च॥ यानैरुच्चावचैर्जग्मु
र्विदुरेण पुरस्कृताः॥ ततो रथाश्च बहुला नागाश्च समलंकृताः॥ पादाताश्च हयाश्चैव पृष्ठतः समनुव्रजन्॥ ततो वैतालिकैः
सूतैर्मागधैश्च सुभाषितैः॥ स्तूयमानो ययौ राजा नगरं नागसाह्वयं॥ तत्प्रयाणं महाबाहोर्बभूवाप्रतिमं भुवि॥ आकुला
कुलमुत्कृष्टं हृष्टपुष्टजनायुतं॥ अभियाने तु पार्थस्य नरैर्नगरवासिभिः॥ नगरं राजमार्गश्च यथावत्समलंकृतं॥
पांडुरेण च माल्येन पताकाभिश्च मेदिनी॥ संवृतो राजमार्गश्च धूपनैश्च सुधूपितः॥ अथ चूर्णैश्च मेधानां नानापुष्पैः गं
प्रियंगुभिः॥ माल्यदामभिरासक्तै राजवेश्माभिसंवृतं॥ कुंभाश्च नगरद्वारि वारिपूर्णा नवाः सिताः॥ कन्याः सुमनसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गौरीः स्थापिता स्तत्र तत्र ह ॥ तथा स्वलंकृतद्वारं नगरं पांडुनंदनः ॥ स्तूयमानः सुहृद्भिश्च प्रविवेश सुहृद्वृतः ॥ ॥ इति
श्रीशांतौराजधर्मे ॥ ॥ वैशंपायनः ॥ प्रवेशने तु पार्थानां जनानां पुरवासिनां ॥ दिदृक्षूणां सहस्राणि समाजग्मुर्बहून्य
था ॥ स राजमार्गः शुशुभे समलंकृतचत्वरः ॥ यथा चंद्रोदये राजन् वर्द्धमानो महोदधिः ॥ गृहाणि राजमार्गे तु रत्न
वंति बृहंति च ॥ प्राकंपंते च भारेण स्त्रीणां पूर्णानि भारत ॥ ताः शनैरिव सव्रीडं प्रशशंसुर्युधिष्ठिरं ॥ भीमसेनार्जु
नौ चैव माद्रीपुत्रौ च पांडवौ ॥ धन्या त्वमसि पांचाली या त्वं पुरुषसत्तमान् ॥ उपतिष्ठसि कल्याणि महर्षीनिव गौत
मी ॥ तव कर्माण्यमेयानि व्रतचर्या च भाविनि ॥ इति कृष्णां महाराज प्रशशंसुस्तदा स्त्रियः ॥ प्रशंसावचनैस्तासां
मिथःशब्दैश्च भारत ॥ प्रीतिजैश्च तथा सर्वैः पुरमासीत्समाकुलं ॥ तमतीत्य यथायुक्तं राजमार्गं युधिष्ठिरः ॥ अ
लंकृतं शोभमानमुपायाद्राजवेश्म तत् ॥ ततः प्रकृतयः सर्वाः पौरजानपदास्तथा ॥ ऊचुः कर्णसुखा वाचः समुपे
त्य ततस्ततः ॥ दिष्ट्या जयसि राजेंद्र शत्रून् शत्रुनिबर्हण ॥ दिष्ट्या राज्यं पुनः प्राप्तं धर्मेण च बलेन च ॥ भव त्वं च महा
राज यजेह शरदां शतं ॥ प्रजाः पालय धर्मेण यथेंद्रस्त्रिदिवं तथा ॥ एवं राजकुलद्वारि मंगलैरभिपूजितः ॥ आशी
र्वादान्द्विजैर्दत्तान् प्रतिगृह्य समंततः ॥ प्रविश्य भवनं राजा देवराजगृहोपमं ॥ श्रुत्वा विजयसंयुक्तं रथात्पश्चाद ५६

वातरत् ॥ प्रविश्याभ्यंतरं श्रीमान् दैवतान्यभिगम्य च ॥ पूजयामास रत्नैश्च गंधैर्माल्यैश्च सर्वशः ॥ निश्चक्राम ततः श्री
मान् पुनरेव महायशाः ॥ ददर्श ब्राह्मणांश्चैव सोऽभिरूपानवस्थितान् ॥ स संवृतस्तदा विप्रैराशीर्वादविवक्षुभिः ॥
शुशुभे विमलश्चंद्रस्तारागणवृतो यथा ॥ तान्स पूजयामास कौंतेयो विधिवद्द्विजान् ॥ धौम्यं गुरुं पुरस्कृत्य ज्ये
ष्ठं पितरमेव च ॥ सुमनोमोदकै रत्नैर्हिरण्येन च भूरिणा ॥ गोभिर्वस्त्रैश्च राजेंद्र विविधैश्च किमिच्छकैः ॥ ततः पुण्याह
घोषेण दिवं स्तब्ध्वेव भारत ॥ सुहृदां हर्षजननः पुण्यः श्रुतिसुखावहः ॥ हंसवन्नेदुषी राजा द्विजानां तत्र भारती ॥ शु
शुभे वेदविदुषां पुष्कलार्थपदाक्षरा ॥ ततो दुंदुभिनिर्घोषः शंखानां च मनोरमः ॥ जयं प्रवदतां तत्र पुनः प्रादुरभू
न्नृप ॥ निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः ॥ राजानं ब्राह्मणच्छद्मा चार्वाको राक्षसोऽब्रवीत् ॥ तत्र दुर्योधनसखा
भिक्षुरूपेण संवृतः ॥ सांख्यः शिखी त्रिदंडी च धृष्टो विगतसाध्वसः ॥ वृतः सर्वैस्तथा विप्रैराशीर्वादविवक्षुभिः ॥ पर
सहस्रै राजेंद्र तपोनियमसंवृतैः ॥ स दुष्टः पापमाशंसन् पांडवानां महात्मनां ॥ अनामंत्र्यैव तान्विप्रांस्तमुवा
च महीपतिं ॥ ॥ ब्राह्मण उवाच ॥ ॥ इमे प्राहुर्द्विजाः सर्वे समारोप्य वचो मयि ॥ धिग्भवंतं कुनृपतिं ज्ञातिघातिन
मस्तु तं ॥ किं तेन राज्येन कौंतेय कृत्वेमं ज्ञातिसंक्षयं ॥ घातयित्वा गुरूंश्चैव मृतं श्रेयो न जीवितं ॥ इति ते वै द्विजाः श्रुत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य दुष्टस्य रक्षसः॥ विव्यथुश्च भृशं सर्वे वाक्यप्रधर्षिताः॥ ततस्ते ब्राह्मणाः सर्वे स च राजा युधिष्ठिरः॥ व्रीडिताः प
रमोद्विग्नास्तूष्णीमासन् विशांपते॥ ॥युधिष्ठिर उवाच॥ ॥प्रसीदंतु भवंतो मे प्रणतस्याभियाचतः॥ प्रत्यासन्नव्यसनि
नं न मां धिक्कर्तुमर्हथ॥ ॥वैशंपायनः॥ ॥ततो राजन् ब्राह्मणास्ते सर्व एव विशांपते॥ ऊचुर्नैतद्वचोऽस्माकं श्रीरस्तु तव
पार्थिव॥ जजुश्चैव महात्मानस्ततस्ते ज्ञानचक्षुषा॥ ब्राह्मणा वेदविद्वांसस्तपोभिर्विमलीकृता॥ ॥ब्राह्मणा ऊचुः॥ ॥
एष दुर्योधनसखा चार्वाको नाम राक्षसः॥ परिव्राजकरूपेण हितं तस्य चिकीर्षति॥ न च मे ब्रूम धर्मात्मन् व्येतु ते भयमी
दृशं॥ उपतिष्ठतु कल्याणं भवंतं भ्रातृभिः सह॥ ॥वैशंपायनः॥ ॥ततस्ते ब्राह्मणाः सर्वे हुंकारैः क्रोधमूर्छिताः॥ निर्भर्त्सि
यंतः शुचयो निजघ्नुः पापराक्षसं॥ स पपात विनिर्दग्धस्तेजसा ब्रह्मवादिनां॥ महेंद्राशनिनिर्दग्धः पादपोंऽकुरवानि
व॥ पूजिताश्च ययुर्विप्रा राजानमभिनंद्य तं॥ राजा तु हर्षमापेदे पांडवः ससुहृज्जनः॥ ॥इति श्रीशांतौ राजधर्मे॥ ॥वा
सुदेव उवाच॥ ॥ब्राह्मणास्तात लोकेऽस्मिन्नर्चनीयाः सदा मम॥ एते भूमिचरा देवा वाग्विषाः सुप्रसादकाः॥ पुरा कृ
तयुगे राजंश्चार्वाको नाम राक्षसः॥ तपस्तेपे महाबाहो बदर्यां बहुवार्षिकं॥ वरेण छंद्यमानश्च ब्रह्मणा स पुनः पुनः॥
अभयं सर्वभूतेभ्यो वरयामास भारत॥ द्विजावमानादन्यत्र प्रादाद्वरमनुत्तमं॥ अभयं सर्वभूतेभ्यो ददौ तस्मै स ४७

गत्पतिः॥ स तु लब्धवरः पापो देवानमितविक्रमः॥ राक्षसस्तापयामास तीव्रकर्मा महाबलः॥ ततो देवाः समेता वै ब्रह्माणमिदमब्रु
वन्॥ वधाय रक्षसस्तस्य बलविप्रकृतास्तदा॥ तानुवाच ततो देवो विहितस्तत्र वै मया॥ यथास्य भविता मृत्युरचिरेणेति भारत॥ राजा दु
र्योधनो नाम सखास्य भविता नृपः॥ तस्य स्नेहावबद्धोऽसौ ब्राह्मणानवमंस्यते॥ तत्रैनं रुषिता विप्रा विप्रकारप्रधर्षिताः॥ धक्ष्यंति वाग्ब
लाः पापं ततो नाशं गमिष्यति॥ स एष निहतः शेते ब्रह्मदंडेन राक्षसः॥ चार्वाको नृपतिश्रेष्ठ मा शुचो भरतर्षभ॥ हतास्ते क्षत्रधर्मेण ज्ञात
यस्तव पार्थिव॥ स्वर्गताश्च महात्मानो वीराः क्षत्रियपुंगवाः॥ स त्वमातिष्ठ कार्याणि मा ते भूत् ग्लानिरच्युत॥ जहि शत्रून् प्रजा रक्ष द्विजां
श्च प्रतिपूजय॥ ॥इति श्रीशांतौ राजधर्मे॥ ॥वैशंपायन उवाच॥ ॥ततः कुंतीसुतो राजा गतमन्युर्गतज्वरः॥ कांचने प्राङ्मुखो हृष्टो न्य
र षीदत्परमासने॥ तमेवाभिमुखौ पीठे प्रदीप्ते कांचने शुभे॥ सात्यकिर्वासुदेवश्च निषीदतुररिंदमौ॥ मध्ये कृत्वा तु राजानं भीमसेनार्जु
नावुभौ॥ निषीदतुर्महात्मानौ श्लक्ष्णयोर्मणिपीठयोः॥ दांते सिंहासने शुभ्रे जांबूनदविभूषिते॥ पृथापि सहदेवेन सहास्ते नकु
लेन च॥ सुधर्मा विदुरो धौम्यो धृतराष्ट्रश्च कौरवः॥ निषेदुर्ज्वलनाकारेष्वासनेषु पृथक् पृथक्॥ युयुत्सुः संजयश्चैव गांधारी च य
शस्विनी॥ धृतराष्ट्रो यतो राजा ततः सर्वे समाविशन्॥ तत्रोपविष्टो धर्मात्मा श्वेताः सुमनसोऽस्पृशत्॥ स्वस्तिकाक्षतान् भूमीं सुवर्णं
द रजतं मणिं॥ ततः प्रकृतयः सर्वाः पुरस्कृत्य पुरोहितं॥ ददृशुर्धर्मराजानमादाय बहुमंगलं॥ पृथिवीं च सुवर्णं च रत्नानि विविधानि
च॥ आभिषेचनिकं भांडं सर्वसंभारसंभृतं॥ कांचनौदुंबरास्तत्र राजताः पृथिवीमयाः॥ पूर्णकुंभाः सुमनसो लाजा बर्हींषि गोरसं॥ श
मीपिप्पलपालाशसमिधो मधुसर्पिषी॥ स्रुव औदुंबरः शंखस्तथा हेमविभूषितः॥ दाशार्हेणाभ्यनुज्ञातस्तत्र धौम्यः पुरोहितः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रागुदक्प्रवणे वेदीं लक्षणेनोपलिप्य ह ॥ व्याघ्रचर्मोत्तरे शुक्ले सर्वतोभद्र आसने ॥ दृढपादप्रतिष्ठाने हुताशनसमत्विषि ॥
उपवेश्य महात्मानं कृष्णां च द्रुपदात्मजां ॥ जुहाव पावकं धीमान्विधिमंत्रपुरस्कृतं ॥ तत उत्थाय दाशार्हः शंखमादाय पूजितं ॥
अभिषिंचत्पतिं पृथ्व्याः कुंतीपुत्रं युधिष्ठिरं ॥ धृतराष्ट्रश्च राजर्षिः सर्वाः प्रकृतयस्तथा ॥ समनुज्ञाय कृष्णेन भ्रातृभिः सहपा-
ण्डवः ॥ पांचजन्याभिषिक्तश्च राजामृतमुखोऽभवत् ॥ ततोऽनुवादयामासुः पणवानकदुंदुभीः ॥ धर्मराजोऽपि तत्सर्वं प्रतिजग्रा-
ह धर्मतः ॥ पूजयामास तांश्चापि विधिवद्भूरिदक्षिणः ॥ ततो निष्कसहस्रेण ब्राह्मणान्स्वस्ति वाचयेत् ॥ वेदाध्ययनसंपन्ना-
न्वृत्तशीलसमन्वितान् ॥ ते प्रीता ब्राह्मणा राजन्स्वस्त्यूचुर्जयमेव च ॥ हंसा इव च नर्दंतः प्रशशंसुर्युधिष्ठिरं ॥ युधिष्ठिर
महाबाहो दिष्ट्या जयसि पांडव ॥ दिष्ट्या स्वधर्मं प्राप्तोऽसि विक्रमेण महाद्युते ॥ दिष्ट्या गांडीवधन्वा च भीमसेनश्च पांडवः ॥
त्वं चापि कुशली राजन्माद्रीपुत्रौ च पांडवौ ॥ मुक्ता वीरक्षयादस्मात्संग्रामाद्विजितद्विषः ॥ क्षिप्रमुत्तरकार्याणि कुरु सर्वाणि
भारत ॥ ततः प्रत्यर्चितः सद्भिर्धर्मराजो युधिष्ठिरः ॥ प्रतिपेदे महद्राज्यं सुहृद्भिः सह भारत ॥ ॥ इति शांतौ राजधर्मे युधिष्ठि-
राभिषेकः ॥ ॥ वैशंपायनः ॥ ॥ प्रकृतीनां च तद्वाक्यं देशकालोपबृंहितं ॥ श्रुत्वा युधिष्ठिरो राजाथोत्तरं प्रत्यभाषत ॥ धन्याः
पांडुसुता नूनं येषां ब्राह्मणपुंगवाः ॥ तथ्यान्वाप्यथवातथ्यान्गुणानाहुः समागताः ॥ अनुग्राह्या वयं नूनं भवतामिति मे मतिः ॥
यत्रैवं गुणसंपन्नानस्मान्ब्रूयुर्विमत्सराः ॥ धृतराष्ट्रो महाराजः पिता मे दैवतं परं ॥ शासनेऽस्य प्रिये चैव स्थेयं मत्प्रियकांक्षि- ५९

भिः ॥ एतदर्थं हि जीवामि कृत्वा ज्ञातिवधं महत् ॥ अस्य शुश्रूषणं कार्यं मया नित्यमतंद्रिणा ॥ यदि वाहमनुग्राह्यो भवतां सुहृदां त-
था ॥ धृतराष्ट्रे यथापूर्वं वृत्तिं वर्तितुमर्हथ ॥ एष नाथो हि जगतो भवतां च मया सह ॥ अस्यैव पृथिवी कृत्स्ना पांडवाः सर्व एव च ॥ एत-
न्मनसि कर्तव्यं भवद्भिर्वचनं मम ॥ अनुज्ञाय च ता राजा नयथेष्टं गम्यतामिह ॥ पौरजानपदान्सर्वान्विसृज्य कुरुनंदनः ॥ यौवराज्येन कौंते-
यं भीमसेनमयोजयत् ॥ मंत्रे च निश्चये चैव षाड्गुण्यस्य च चिंतने ॥ विदुरं बुद्धिसंपन्नं प्रीतिमान्स समादिशत् ॥ कृताकृतपरिज्ञा-
ने तथायव्ययचिंतने ॥ संजयं योजयामास वृद्धं सर्वगुणैर्युतं ॥ बलस्य परिमाणं च भक्तवेतनयोस्तथा ॥ नकुलं व्यादिशद्राजा
कर्मणां चान्ववेक्षणे ॥ परचक्रोपरोधे च दृप्तानां चावमर्दने ॥ युधिष्ठिरो महाराजः फाल्गुनं व्यादिदेश ह ॥ द्विजानां वेदकार्येषु का-
र्येष्वन्येषु चैव ह ॥ धौम्यं पुरोधसां श्रेष्ठं नित्यमेव समादिशत् ॥ सहदेवं समीपस्थं नित्यमेव समादिशत् ॥ तेन गोप्यो हि नृपतिः
सर्वावस्थो विशांपते ॥ यान्यान्मन्यद्योग्यांश्च येषु येष्विह कर्मसु ॥ तांस्तांस्तेष्वेव युयुजे प्रीयमाणो महीपतिः ॥ विदुरं संजयं चै-
व युयुत्सुं च महामतिं ॥ अब्रवीत्परवीरघ्नो धर्मात्मा धर्मवत्सलः ॥ उत्थायोत्थाय यत्कार्यमस्य कार्यं पितुर्मम ॥ सर्वं भवद्भिः क-
र्तव्यमप्रमत्तैर्यथातथं ॥ पौरजानपदानां च यानि कार्याणि नित्यशः ॥ राजानं समनुज्ञाप्य तानि कार्याणि भागशः ॥ ॥ इति शांतौ राज-
धर्मे भीमयौवराज्याभिषेकः ॥ ॥ वैशंपायनः ॥ ॥ ततो युधिष्ठिरो राजा ज्ञातीनां ये हता मृधे ॥ श्राद्धानि कारयामास तेषां पृथगु-
दारधीः ॥ धृतराष्ट्रो ददौ राजा पुत्राणामौर्ध्वदेहिकं ॥ सर्वकामगुणोपेतं अन्नं गाश्च धनानि च ॥ रत्नानि च विचित्राणि महार्हा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
४९ पि महायशाः ॥ युधिष्ठिरश्च द्रोणस्य कर्णस्य च महात्मनः ॥ धृष्टद्युम्नाभिमन्युभ्यां हैडिंबस्य च रक्षसः ॥ विराटप्रभृतीनां च सुहृदामु
पकारिणां ॥ द्रुपदस्य द्रौपदेयानां द्रौपद्याः सहितो ददौ ॥ ब्राह्मणानां सहस्राणि पृथगेकैकमुद्दिशन् ॥ धनैरत्नैश्च गोभिश्च वस्त्रैश्च
समतर्पयत् ॥ ये चान्ये पृथिवीपाला येषां नास्ति सुहृज्जनः ॥ उद्दिश्योद्दिश्य तेषां च चक्रे राजौर्ध्वदैहिकं ॥ सभाः प्रपाश्च विविधा
स्तडागानि च पांडवः ॥ सुहृदां कारयामास सर्वेषामौर्ध्वदैहिकं ॥ स तेषामनृणो भूत्वा गत्वा लोकेष्ववाच्यतां ॥ कृतकृत्योऽभवद्राजा प्र
जा धर्मेण पालयन् ॥ धृतराष्ट्रं यथापूर्वं गांधारीं विदुरं तथा ॥ सर्वांश्च कौरवामात्यान् भृत्यांश्च समपूजयत् ॥ याश्च तत्र स्त्रियः
काश्चिद्धतवीरा हतात्मजाः ॥ सर्वास्ताः कौरवो राजा संपूज्यापालयद्घृणी ॥ दीनांधकृपणानां च गृहाच्छादनभोजनैः ॥ आ
नृशंस्यपरो राजा चकारानुग्रहं विभुः ॥ स विजित्य महीं कृत्स्नामानृण्यं प्राप्य वैरिषु ॥ निःसपत्नः सुखी राजा विजहार युधिष्ठिरः
॥ ॥ शांतौ राजधर्मे श्राद्धक्रिया ॥ ॥ वैशंपायनः ॥ ॥ अभिषिक्तो महाप्राज्ञो राज्यं प्राप्य युधिष्ठिरः ॥ दाशार्हं पुंडरीकाक्षमुवा
च प्रांजलिः शुचिः ॥ तव कृष्ण प्रसादेन नयेन च बलेन च ॥ बुद्ध्या च यदुशार्दूल तथा विक्रमणेन च ॥ पुनः प्राप्तमिदं राज्यं पितृपैता
महं मया ॥ नमस्ते पुंडरीकाक्ष पुनःपुनररिंदम ॥ त्वामेकमाहुः पुरुषं त्वामाहुः सात्वतां पतिं ॥ नामभिस्त्वां बहुविधैः स्तुवंति प्रयता द्वि सि
जाः ॥ विश्वकर्मन्नमस्तेस्तु विश्वात्मन्विश्वसंभव ॥ विष्णो जिष्णो हरे कृष्ण वैकुंठ पुरुषोत्तम ॥ अदित्याः सप्तधा त्वं तु पुराणो गर्भ
तां गतः ॥ पृश्निगर्भस्त्वमेवैकस्त्रियुगं त्वां वदंत्यपि ॥ शुचिश्रवा हृषीकेशो घृतार्चिर्हंस उच्यते ॥ त्रिचक्षुः शंभुरेकस्त्वं विभु ४९

र्दामोदरोपि च ॥ वराहोग्निर्बृहद्भानुर्वृषभस्तार्क्ष्यलक्षणः ॥ अनीकसाहः पुरुषः शिपिविष्ट उरुक्रमः ॥ वाचिष्ठ उग्रः सेनानीः स
त्यो वाजसनिर्गुहः ॥ अच्युतश्च्यावनोऽरीणां संस्कृतो विकृतिर्वृषः ॥ कृष्णवर्मा त्वमेवाग्निर्वृषदर्भो वृणाकपिः ॥ सिंधुर्विधूर्मि
२ स्त्रिककुप् त्रिधामा त्रिदिवाच्युतः ॥ सम्राड्विराट् सुराड्वसुनराजो भवोद्भवः ॥ विभुर्भूरभिभूः कृष्ण कृष्णवर्त्मा त्वमेव च ॥
स्विष्टकृद्भिषजावर्तः कपिलस्त्वं च वामनः ॥ यज्ञो ध्रुवः पतंगश्च यज्ञसेनस्त्वमुच्यसे ॥ शिखंडी नहुषो बभ्रुर्दिवस्पृक्त्वं पुनर्वसुः ॥
सुबभ्रुरुक्मयज्ञश्च सुषेणो दुंदुभिस्तथा ॥ गभस्तिनेमिः श्रीपद्मः पुष्करः पुष्पधारकः ॥ ऋभुर्विभुः सर्वसूक्ष्मं चारित्रं चैव
पठ्यसे ॥ अंभोनिधिस्त्वं ब्रह्मा च पवित्रं धाम धामवित् ॥ हिरण्यगर्भं त्वामाहुः स्वधा स्वाहा च केशव ॥ योनिस्त्वमस्य प्रलयश्च
कृष्ण त्वमेवेदं विसृजसि विश्वमग्रे ॥ विश्वं वेदं त्वं द्वैविश्वयोने नमोस्तु ते शार्ङ्गचक्रासिपाणे ॥ एवं स्तुतो धर्मराजेन कृष्णः स
भामध्ये प्रीतिमान्पुष्कराक्षः ॥ तमभ्यनंदद्भारत पुष्कलाभिर्वाग्भिर्ज्येष्ठं पांडवं यादवाग्र्यः ॥ ॥ शांतौ राजधर्मे वासुदेवस्तुतिः
॥ ॥ वैशंपायनः ॥ ॥ ततो विसर्जयामास सर्वाः प्रकृतयो नृपः ॥ विविशुश्चाभ्यनुज्ञाता यथास्वानि गृहाणि ते ॥ ततो युधिष्ठिरो राजा
भीमं भीमपराक्रमं ॥ सांत्वयन्नब्रवीद्धीमानर्जुनं यमजौ तथा ॥ शत्रुभिर्विविधैः शस्त्रैः क्षतदेहा महारणे ॥ श्रांता भवंतः सुभृशं
तापिताः शोकमन्युभिः ॥ अरण्ये दुःखवसतीर्मत्कृते भरतर्षभाः ॥ भवद्भिरनुभूतानि यथा कुपुरुषैस्तथा ॥ यथासुखं यथाजोषं
जयोयमनुभूयतां ॥ विश्रांताल्लब्धविज्ञानान् श्वः समेतास्मि वः पुनः ॥ ततो दुर्योधनगृहं प्रासादैरुपशोभितं ॥ बहुरत्नसमाकीर्णं दा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौदासस्य मा कुलं ॥ धृतराष्ट्राभ्यनुज्ञातं भ्रात्रा दत्तं वृकोदरः ॥ प्रतिपेदे महाबाहुरर्जुनो राजशासनात् ॥ दुर्मर्षणस्य भवनं दुःशा
सनगृहाद्वरं ॥ कुबेरभवनप्रख्यं मणिहेमविभूषितं ॥ नकुलाय महाराज कर्शिताय महावने ॥ ददौ प्रीतो महाराजा धर्मपुत्रो युधि राजो
ष्ठिरः ॥ दुर्मर्षणस्य वेश्माग्र्यं श्रीमत्कनकभूषणं ॥ पूर्णं पद्मदलाक्षीणां स्त्रीणां शयनसंकुलं ॥ प्रददौ सहदेवाय सततं प्रियका
रिणे ॥ मुमुदे तच्च लब्ध्वासौ कैलासं धनदो यथा ॥ युयुत्सुर्विदुरश्चैव संजयश्च विशांपते ॥ धर्मात्मा चैव धौम्यश्च यथास्वान् जग्मु
ति रालयान् ॥ सह सात्यकिना शौरिरर्जुनस्य निवेशनं ॥ विवेश पुरुषव्याघ्रो व्याघ्रो गिरिगुहामिव ॥ तत्र भक्ष्यान्नपानैस्ते मुदिताः सु
सुखे स्थिताः ॥ सुखप्रबुद्धा राजानमुपतस्थुर्युधिष्ठिरं ॥ ॥ इति शांतौ राजधर्मे गृहप्रवेशः ॥ ॥ जनमेजय उवाच ॥ ॥ प्राप्य राज्यं
महातेजा धर्मपुत्रो युधिष्ठिरः ॥ यदन्यदकरोद्विप्र तन्मे वक्तुमिहार्हसि ॥ भगवान्वा हृषीकेशस्त्रैलोक्यस्य परो गुरुः ॥ ऋषे यदक
रोद्वीरस्तच्च व्याख्यातुमर्हसि ॥ ॥ वैशंपायन उवाच ॥ ॥ शृणु तत्त्वेन राजेंद्र कीर्त्यमानं मयानघ ॥ वासुदेवं पुरस्कृत्य यदकु
र्वंत पांडवाः ॥ प्राप्य राज्यं महातेजाः कुंतीपुत्रो युधिष्ठिरः ॥ चातुर्वर्ण्यं यथायोगं स्वे स्वे स्थाने न्यवेशयत् ॥ ब्राह्मणानां सहस्रं च स्ना
तकानां महात्मनां ॥ सहस्रं निष्कमेकैकं वाचयामास पांडवः ॥ तथानुजीविनो भृत्यान्संश्रितानतिथीनपि ॥ कामैः संतर्पयामास कृ
पणांस्तर्ककानपि ॥ पुरोहिताय धौम्याय प्रादादयुतशः सगाः ॥ धनं सुवर्णं रजतं वासांसि विविधानि च ॥ कृपाय च महाराज गुरु
वृत्तिमवर्तत ॥ विदुराय च राजा स पूजां चक्रे यतव्रतः ॥ भक्ष्यान्नपानैर्विविधैर्वासोभिः शयनासनैः ॥ सर्वान्संतोषयामास सं
श्रितान्ददतां वरः ॥ लब्धप्रशमनं कृत्वा स राजा राजसत्तमः ॥ युयुत्सोर्धार्तराष्ट्रस्य पूजां चक्रे महायशाः ॥ धृतराष्ट्राय तद्राज्यं ५०

गांधार्यै विदुराय च ॥ निवेद्य सुस्थवद्राजन्सुखमास्ते युधिष्ठिरः ॥ तथा सर्वं स नगरं प्रसाद्य भरतर्षभ ॥ वासुदेवं महात्मान
मभ्यगच्छत्कृतांजलिः ॥ ततो महति पर्यंके मणिकांचनभूषिते ॥ ददर्श कृष्णमासीनं नीलं मेरोरिव द्युतिं ॥ जाज्वल्यमानं व
पुषा दिव्याभरणभूषितं ॥ पीतकौशेयवसनं हेम्नैवोपगतं मणिं ॥ कौस्तुभेनोरसिस्थेन मणिनाभिविराजितं ॥ उद्यते
वोदयं शैलं सूर्येणाभिविराजितं ॥ नौपम्यं विद्यते तस्य त्रिषु लोकेषु किंचन ॥ सोभिगम्य महात्मानं विष्णुं पुरुषविग्रहं ॥
उवाच वचनं राजा स्मितपूर्वमिदं तदा ॥ सुखेन ते निशा कच्चिद्व्युष्टा बुद्धिमतां वर ॥ कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि त
वाच्युत ॥ तवैवोपाश्रिता देवी बुद्धिर्बुद्धिमतां वर ॥ वयं राज्यमनुप्राप्ताः पृथिवी च वशे स्थिता ॥ तव प्रसादाद्भगवंस्त्रिलो
कगतिविक्रम ॥ जयं प्राप्ता यशश्चाग्र्यं न च धर्माच्च्युता वयं ॥ तं तथा भाषमाणं तु धर्मराजमरिंदमं ॥ नोवाच भगवा
न्व न्किंचिद्ध्यानमेवान्वपद्यत ॥ ॥ इति शांतौ राजधर्मे ॥ युधिष्ठिर उवाच ॥ ॥ किमिदं परमाश्चर्यं ध्यायस्यमितविक्रम ॥
कच्चिल्लोकत्रयस्यास्य स्वस्ति लोकपरायण ॥ चतुर्थं ध्यानमार्गं त्वमालंब्य पुरुषर्षभ ॥ अपक्रांतो यतो देवस्तेन मे
विस्मितं मनः ॥ निगृहीतो हि वायुस्ते पंचकर्मा शरीरगः ॥ इंद्रियाणि सर्वाणि मनसि स्थापितानि ते ॥ वाक्च सत्त्वं च
गोविंद बुद्धौ संवेशितानि ते ॥ सर्वे चैव गुणा देवाः क्षेत्रज्ञे ते निवेशिताः ॥ नेंगति तव रोमापि स्थिरा बुद्धिस्तथा मनः ॥
काष्ठकुड्यशिलाभूतो निरीहश्चासि माधव ॥ यथा दीपो निवातस्थो निरिंगो ज्वलते पुनः ॥ तथासि भगवन्देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म॰
५१

पाषाणइव निश्चलः ॥ यदि श्रोतुं मिहार्हामि न च रहस्यं च ते यदि ॥ छिंधि मे संशयं देव प्रपन्नायाभियाचते ॥ त्वं हि कर्त्ता विकर्त्ता
च त्वं क्षरं चैवाक्षरं च हि ॥ अनादिनिधनश्चाद्यस्त्वमेव पुरुषोत्तम ॥ तत्प्रपन्नाय भक्ताय शिरसा प्रणताय च ॥ ध्यानस्यास्य य
थातत्वं ब्रूहि धर्मभृतां वर ॥ ततः स्वगोचरे न्यस्य मनो बुद्धींद्रियाणि सः ॥ स्मितपूर्वमुवाचेदं भगवान्वासवानुजः ॥ ॥भग
वानुवाच ॥ ॥शरतल्पगतो भीष्मः शाम्यन्निव हुताशनः ॥ मां ध्याति पुरुषव्याघ्रस्ततो मे तद्गतं मनः ॥ यस्य ज्यातलनिर्घोषं वि
स्फूर्जितमिवाशनेः ॥ न सेहे देवराजोपि तमस्मिन्मनसा गतः ॥ येनाभिजित्य तरसा समस्तं राजमंडलं ॥ ऊढास्तिस्र
स्तथा कन्यास्तमस्मि मनसा गतः ॥ त्रयोविंशतिरात्रं यो योधयामास भार्गवं ॥ न च रामेण निस्तीर्णस्तमस्मि मनसा ग
श्री तः ॥ एकीकृत्येंद्रियग्रामं मनः संयम्य मेधया ॥ शरणं मामुपागच्छत्ततो मे तद्गतं मनः ॥ यं गंगा गर्भविधिना धारयामास
पार्थिव ॥ वसिष्ठशिष्यं तं तात मनसास्मि गतो ह्यहं ॥ दिव्यास्त्राणि महातेजा यो धारयति बुद्धिमान् ॥ सांगांश्च चतुरो
वेदांस्तमस्मि मनसा गतः ॥ रामस्य दयितं शिष्यं जामदग्न्यस्य पांडव ॥ आधारं सर्वविद्यानां तमस्मि मनसा गतः ॥
स हि भूतं भविष्यं च भवच्च पुरुषर्षभ ॥ वेत्ति धर्मविदां श्रेष्ठस्तमस्मि मनसा गतः ॥ तस्मिन्हि पुरुषव्याघ्रे कर्मभिः स्वैर्दिवं
गते ॥ भविष्यति मही पार्थ नष्टचंद्रेव शर्वरी ॥ तद्युधिष्ठिर गांगेयं भीष्मं भीमपराक्रमं ॥ अभिगम्योपसंगृह्य पृच्छ यत्ते
मनोगतं ॥ चातुर्विद्यं चातुर्होत्रं चातुराश्रम्यमेव च ॥ राजधर्मांश्च निखिलान्पृच्छैनं पृथिवीपते ॥ तस्मिन्नस्तमिते
भीष्मे कौरवाणां धुरंधरे ॥ ज्ञानान्यल्पीभविष्यंति तस्मात्त्वां चोदयाम्यहं ॥ तच्छ्रुत्वा वासुदेवस्य तथ्यं वचनमुत्तमं ॥ सा ५१

श्रुकंठः स धर्मज्ञो वचनं चेदमब्रवीत् ॥ यद्भवानाह भीष्मस्य प्रभावं प्रति माधव ॥ तथा तन्नात्र संदेहो विद्यते मम माधव ॥
महाभाग्यं हि भीष्मस्य प्रभावश्च महाद्युते ॥ श्रुतं मया कथयतां ब्राह्मणानां महात्मनां ॥ भवांश्च कर्त्ता लोकानां यद्ब्रवीत्य
रिसूदन ॥ तथा तमनभिध्येयं वाक्यं यादवनंदन ॥ यदि त्वनुग्रहकृता बुद्धिस्ते मयि माधव ॥ त्वामग्रतः पुरस्कृत्य भीष्मं
पश्याम हे वयं ॥ आवृत्ते भगवत्यर्के स हि लोकान्गमिष्यति ॥ त्वद्दर्शनं महाबाहो तस्मादर्हति कौरव ॥ तव ह्याद्यस्य देवस्य क्ष
रस्यैवाक्षरस्य च ॥ दर्शनं तस्य लाभः स्यात्त्वं हि ब्रह्ममयो निधिः ॥ ॥वैशंपायन उवाच ॥ ॥श्रुत्वेदं धर्मराजस्य वचनं मधु
सूदनः ॥ पार्श्वस्थं सात्यकिं प्राह रथो मे युज्यतामिति ॥ सात्यकिस्त्वाशु निष्क्रम्य केशवस्य समीपतः ॥ दारुकं प्राह कृष्णस्य
युज्यतां रथ इत्युत ॥ स सात्यकेराशु वचो निशम्य रथोत्तमं कांचनभूषितांगं ॥ मसारगल्वर्कमयैर्विटंकैर्विभूषितं हेमपि
नद्धचक्रं ॥ दिवाकरांशुप्रभमाशुगामिनं विचित्रनानामणिभूषितांतरं ॥ नवोदितं सूर्यमिव प्रतापिनं विचित्रताक्ष्यध्वजिनं
पताकिनं ॥ सुग्रीवशैब्यप्रमुखैर्महाश्वैर्मनोजवैः कांचनभूषितांगैः ॥ संयुक्तमावेदयदच्युताय कृतांजलिर्दारुको राजसिं
ह ॥ ॥इति शांतौ राजधर्मे ॥ ॥जनमेजय उवाच ॥ ॥शरतल्पे शयानस्तु भरतानां पितामहः ॥ कथमुत्सृष्टवान्दे
हं कं च योगमधारयत् ॥ ॥वैशंपायनः ॥ ॥शृणुष्वावहितो राजञ्छुचिर्भूत्वा समाहितः ॥ भीष्मस्य कुरुशार्दूल देहोत्स
र्गं महात्मनः ॥ निवृत्तमात्रे त्वयन उत्तरे वै दिवाकरे ॥ समावेशयदात्मानमात्मन्येव समाहितः ॥ विकीर्णांशुरिवादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्यो भीष्मः शरशतैश्चितः॥ शिष्येण परमयाल्क्षस्या वृतो ब्राह्मणसत्तमैः॥ व्यासेन वेदविदुषा नारदेन सुरर्षिणा॥ देवस्था
नेन वात्स्येन तथाश्मसुमंतुना॥ तथा जैमिनिना चैव पैलेन च महात्मना॥ शांडिल्यदेवलाभ्यां च मैत्रेयेण च धीमता॥ बृ
हस्पतिश्च शुक्रश्च च्यवनश्च महामुनिः॥ सनत्कुमारः कपिलो वाल्मीकिस्तुंबुरुः कुरुः॥ मौद्गल्यो भार्गवो रामस्तृण
ला बिंदुर्महामुनिः॥ पिप्पलादश्च वायुश्च संवर्तः पुलहः कचः॥ काश्यपश्च पुलस्त्यश्च क्रतुर्दक्षः पराशरः॥ मरीचिरंगि
राः काश्यो गौतमो गालवो मुनिः॥ धौम्यो विभांडो मांडव्यो धौम्यः कृष्णानुभौतिकः॥ उलूकः परमो विप्रो मार्कंडेयो महा
मुनिः॥ भास्करिः पूरणः कृष्णः सूतः परमधार्मिकः॥ एतैश्चान्यैर्मुनिगणैर्महाभागैर्महात्मभिः॥ श्रद्धादमपुरस्कारै
र्वृतश्चंद्र इव ग्रहैः॥ भीष्मस्तु पुरुषव्याघ्रः कर्मणा मनसा गिरा॥ शरतल्पगतः कृष्णं प्रदध्यौ प्रांजलिः शुचिः॥ स्वरे
ण हृष्टपुष्टेन तुष्टाव मधुसूदनं॥ योगेश्वरं पद्मनाभं विष्णुं जिष्णुं जगत्पतिं॥ कृतांजलिः शुचिर्भूत्वा वाग्विदां प्रवरः प्र
भुः॥ भीष्मः परमधर्मात्मा वासुदेवमथास्तुवत्॥ ॥भीष्म उवाच॥ ॥आरिराधयिषुः कृष्णं वाचं जिगदिषामि यां॥
तया व्याससमासिन्या प्रीयतां पुरुषोत्तमः॥ शुचिं शुचिषदं हंसं तत्पदं परमेष्ठिनं॥ युक्त्वा सर्वात्मनात्मानं तं प्रपद्ये प्र
जापतिं॥ अनाद्यंतं परं ब्रह्म न देवा नर्षयो विदुः॥ एको यं वेद भगवान् धाता नारायणो हरिः॥ नारायणादृषिगणास्तथा
सिद्धमहोरगाः॥ देवा देवर्षयश्चैव यं विदुः परमव्ययं॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ यं न जानंति को ह्ये ५२

ष कुतो वा भगवानिति॥ यस्मिन्विश्वानि भूतानि तिष्ठंति च विशंति च॥ गुणभूतानि भूतेशे सूत्रे मणिगणा इव॥ य
व स्मिन्नित्ये तते तंतौ दृढे स्रगिव तिष्ठति॥ सदसद्ग्रथितं विश्वं विश्वांगे विश्वकर्मणि॥ हरिं सहस्रशिरसं सहस्रचरणेक्षणं॥
सहस्रबाहुमुकुटं सहस्रवदनोज्ज्वलं॥ प्राहुर्नारायणं देवं यं विश्वस्य परायणं॥ अणीयसामणीयांसं स्थविष्ठं च स्थवी
यसां॥ गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि॥ यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च॥ गृणंति सत्यकर्माणं सत्यं सत्ये
षु सामसु॥ चतुर्भिश्चतुरात्मानं सत्वस्थं सात्वतां पतिं॥ यं दिव्यैर्देवमर्चंति गुह्यैः परमनामभिः॥ यस्मिन्नित्यं तपस्तप्तं
यदंगेष्वनुतिष्ठति॥ सर्वात्मा सर्ववित्सर्वः सर्वज्ञः सर्वभावनः॥ यं देवं देवकी देवी वसुदेवादजीजनत्॥ भौमस्य ब्रह्मणो गुप्त्यै
दीप्तमग्निमिवारणिः॥ यमनन्यो व्यपेताशीरात्मानं वीतकल्मषं॥ दृष्ट्वानंत्याय गोविंदं पश्यत्यात्मानमात्मनि॥ अतिवाय्विंद्रकर्मा
तं णमतिसूर्यातितेजसं॥ अतिबुद्धींद्रियात्मानं तं प्रपद्ये प्रजापतिं॥ पुराणे पुरुषं प्रोक्तं ब्रह्म प्रोक्तं युगादिषु॥ क्षये संकर्षणं प्रो
क्तं तमुपास्यमुपास्महे॥ यमेकं बहुधात्मानं प्रादुर्भूतमधोक्षजं॥ नान्यभक्ताः क्रियावंतो यजंते सर्वकामदं॥ यमाहुर्जगतः को
शं यस्मिन्संनिहिताः प्रजाः॥ यस्मिंल्लोकाः स्फुरंतीह जले शकुनयो यथा॥ ऋतमेकाक्षरं ब्रह्म यत्तत्सदसतः परं॥ अनादिमध्यप
र्यंतं न देवा नर्षयो विदुः॥ यं सुरासुरगंधर्वाः ससिद्धर्षिमहोरगाः॥ प्रयता नित्यमर्चंति परमं दुःखभेषजं॥ अनादिनिधनं देवमा
त्मयोनिं सनातनं॥ अप्रतर्क्यमविज्ञेयं हरिं नारायणं प्रभुं॥ एवं द्वादशधा जज्ञे तस्मै सूर्यात्मने नमः॥ शुक्ले देवान्पितॄन्कृष्णे त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयित्यमृतेन यः॥ यश्च वरानाद्विजातीनां तस्मै सोमात्मने नमः॥ हिरण्यवर्णं यं गर्भम् अदितिर्दैत्यनाशनं॥ यं विश्वस्य कर्त्तारं जग वै
तं त्वस्य पुषां पतिं॥ वदंति जगतोध्यक्षमक्षरं परमं पदं॥ महतः तमसः पारे पुरुषं ह्यतितेजसं॥ यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञात्मने
नमः॥ यं बृहंतं बृहत्युक्थे यम् अग्नौ यं महाध्वरे॥ यं विप्रसंघा गायंति तस्मै वेदात्मने नमः॥ ऋग्यजुःसामधामानं दशार्द्धहविराकृ
तिं॥ यं सप्ततंतुं तन्वंति तस्मै यज्ञात्मने नमः॥ यः सुपर्णो यजुर्नाम छंदो गात्रस्त्रिवृच्छिराः॥ रथंतरं बृहत्साम तस्मै स्तोत्रात्मने नमः॥ यः सह यं
स्रसमे सत्रे जज्ञे विश्वसृजमृषिः॥ हिरण्यवर्णः शकुनिस्तस्मै तार्क्ष्यात्मने नमः॥ पादांगसंधिपर्वाणं स्वरव्यंजनभूषणं॥ यमा
केना हुरक्षरं नित्यं तस्मै वागात्मने नमः॥ यज्ञांगो यो वराहो वै भूत्वा गामुज्जहार ह॥ लोकत्रयहितार्थाय तस्मै वीर्यात्मने नमः॥ यः शेते
योगमास्थाय पर्यंके भोगभूषिते॥ फणासहस्ररचिते तस्मै निद्रात्मने नमः॥ यश्चिनोति सतां सेतुमृतेनामृतयोनिना॥ धर्मार्थव्यवहा
रांगैस्तस्मै सत्यात्मने नमः॥ यं पृथग्धर्मचरणाः पृथग्धर्मफलैषिणः॥ पृथग्धर्मैः समर्च्यंति तस्मै धर्मात्मने नमः॥ यतः सर्वे
प्रसूयंते ह्यनंगात्मांगदेहिनः॥ उन्मादः सर्वभूतानां तस्मै कामात्मने नमः॥ यं तत्त्वव्यक्तस्थमव्यक्तं विचिन्वंति महर्षयः॥ क्षेत्रे क्षे
त्रि त्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः॥ यं धात्मा भन मालस्थं वृतं षोडशभिर्गुणैः॥ प्राहुः सप्तदशं सांख्यास्तस्मै सांख्यात्मने नमः॥
यं विनिद्रा जितश्वासाः शांता दांता जितेंद्रियाः॥ ज्योतिः पश्यंति युंजानास्तस्मै योगात्मने नमः॥ अपुण्यपुण्योपरमे यं पुनर्भवति
निर्भयाः॥ शांताः संन्यासिनो यांति तस्मै मोक्षात्मने नमः॥ योसौ युगसहस्रांते प्रदीप्तार्चिर्विभावसुः॥ संभक्षयति भूतानि तस्मै घोरात्म ५३
ने नमः॥ संभक्ष्य सर्वभूतानि कृत्वा चैकार्णवं जगत्॥ बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः॥ अजस्य नाभ्यां संभूतं यस्मि

न्विश्वं प्रतिष्ठितं॥ पुष्करे पुष्कराक्षस्य तस्मै पद्मात्मने नमः॥ सहस्रशिरसे चैव पुरुषायामितात्मने॥ चतुःसमुद्रपर्यययो
गनिद्रात्मने नमः॥ यस्य केशेषु जीमूता नद्यः सर्वांगसंधिषु॥ कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः॥ यस्मात्सर्वाः प्रसूयं
ते सर्गप्रलयविक्रियाः॥ यस्मिंश्चैव प्रलीयंते तस्मै हेत्वात्मने नमः॥ यो निषण्णो भवेद्रात्रौ दिवा भवति विष्ठितः॥ इष्टानिष्टस्य
च द्रष्टा तस्मै द्रष्ट्रात्मने नमः॥ अकुंठं सर्वकार्येषु धर्मकार्यार्थमुद्यतं॥ वैकुंठस्य हि तद्रूपं तस्मै कार्यात्मने नमः॥ विभ
ज्य पंचधात्मानं वायुभूतः शरीरगः॥ यश्चेष्टयति भूतानि तस्मै वाय्वात्मने नमः॥ युगेष्वावर्तते योगैर्दिनर्त्वयनहायनैः॥ सर्ग
प्रलययोः कर्त्ता तस्मै कालात्मने नमः॥ ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं विशः॥ पादौ यस्याश्रिताः शूद्रास्तस्मै वर्णात्मने
नमः॥ यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः॥ सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः॥ परः कालात्परो
यज्ञात्परात्परतरश्च यः॥ अनादिरादिर्विश्वस्य तस्मै विश्वात्मने नमः॥ विषये वर्तमानानां यं ते वैशेषिके गुणैः॥ प्राहुर्विषयगो
प्तारं तस्मै गोप्त्रात्मने नमः॥ अन्नपानेंधनमयो रसप्राणविवर्द्धनः॥ यो धारयति भूतानि तस्मै प्राणात्मने नमः॥ प्राणानां
धारणार्थाय योन्नं भुंक्ते चतुर्विधं॥ अंतर्भूतः पचत्यग्निस्तस्मै पाकात्मने नमः॥ पिंगाक्षसटं यस्य रूपं दंष्ट्रानखायुधं॥
दानवेंद्रांतकरणं तस्मै दृप्तात्मने नमः॥ रसातलगतः श्रीमाननंतो भगवान्विभुः॥ जगद्धारयते कृत्स्नं तस्मै वीर्यात्मने न
मः॥ यो मोहयति भूतानि स्नेहपाशानुबंधनैः॥ सर्गस्य रक्षणार्थाय तस्मै मोहात्मने नमः॥ आत्मज्ञानमिदं ज्ञानं ज्ञात्वा प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्षुर्वस्थितं॥ यं ज्ञानेनाधिगच्छंति तस्मै ज्ञानात्मने नमः॥ अप्रमेयशरीराय सर्वतो बुद्धिचक्षुषे॥ अपारपरिमेयाय तस्मै
दिव्यात्मने नमः॥ जटिले दक्षिणे नित्यं लंबोदरशरीरिणे॥ कमंडलुनिषंगाय तस्मै ब्रह्मात्मने नमः॥ शूलिने त्रिदशे
शाय त्र्यंबकाय महात्मने॥ भस्मदिग्धोर्द्धलिंगाय तस्मै रुद्रात्मने नमः॥ चंद्रार्द्धकृतशीर्षाय व्यालयज्ञोपवीतिने॥ पि
नाकशूलहस्ताय तस्मै उग्रात्मने नमः॥ पंचभूतात्मभूताय भूतादिनिधनाय च॥ अक्रोधद्रोहमोहाय तस्मै शांतात्मने न
मः॥ यस्मिन् सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः॥ यश्च सर्वमयो देवस्तस्मै सर्वात्मने नमः॥ विश्वकर्मन्नमस्तेस्तु विश्वात्मन्वि
श्वसंभव॥ अपवर्गस्थ भूतानां पंचानां परतः स्थितः॥ नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु॥ नमस्ते दिक्षु सर्वासु त्वं
हि सर्वमयो निधिः॥ नमस्ते भगवन् विष्णो लोकानां प्रभवाव्यय॥ त्वं हि कर्ता हृषीकेश संहर्ता चापराजितः॥ तेन पश्यामि ते
भावान् दिव्यान् हि त्रिषु वर्त्मसु॥ तच्च पश्यामि तत्त्वेन यत्ते रूपं सनातनं॥ दिवं ते शिरसा व्याप्तं पद्भ्यां देवी वसुंधरा॥ विक्रमेण त्र
यो लोकाः पुरुषासि सनातनः॥ दिशो भुजा रविश्चक्षुर्वीर्ये शुक्रः प्रजापतिः॥ सप्त मार्गा निरुद्धास्ते वायोरमिततेजसः॥ अ
तसीपुष्पसंकाशं पीतकौशेयवाससं॥ ये नमस्यंति गोविंदं न तेषां विद्यते भयं॥ नमो नरकसंत्रासरक्षामंडलकारिणे॥
संसारनिम्नगावर्त्ततरिकाष्ठाय विष्णवे॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च॥ जगद्धिताय कृष्णाय गोविंदाय नमो
नमः॥ प्राणकांतारपाथेयं संसारच्छेदभेषजं॥ दुःखशोकपरित्राणं हरिरित्यक्षरद्वयं॥ यथा विष्णुमयं सत्यं यथा विष्णु ५५

मयं जगत्॥ यथा विष्णुमयं सर्वं पाप्मा मे नश्यतो तथा॥ त्वां प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे॥ यच्छ्रेयः पुंडरीकाक्ष
तद्ध्यायस्व सुरेश्वर॥ इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः॥ वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः॥ नारायणः परं
ब्रह्म नारायणः परं तपः॥ नारायणः परो देवः सर्वं नारायणात्मकं॥ ॥वैशंपायनः॥ ॥एतदुक्त्वा वचनं भीष्मस्तद्गतमान
सः॥ नम इत्येव कृष्णाय प्रणाममकरोत्तदा॥ अभिगम्य तु योगेन भक्तिं भीष्मस्य माधवः॥ त्रैलोक्यदर्शनं ज्ञानं दिव्यं दत्वा
ययौ हरिः॥ तस्मिन्नुपरते शब्दे ततस्ते ब्रह्मवादिनः॥ भीष्मं वाग्भिर्बाष्पकंठास्तमानर्चुर्महामतिं॥ ते स्तुवंतश्च विप्राग्र्याः
केशवं पुरुषोत्तमं॥ भीष्मं च शनकैः सर्वे प्रशशंसुः पुनः पुनः॥ विदित्वा भक्तियोगं तु भीष्मस्य पुरुषोत्तमः॥ सहसोत्थाय
संहृष्टो यानमेवान्वपद्यत॥ केशवः सात्यकिश्चैव रथेनैकेन जग्मतुः॥ अपरेण महात्मानौ युधिष्ठिरधनंजयौ॥ भी
मसेनो यमौ चोभौ रथमेकं समास्थितौ॥ कृपो युयुत्सुः सूतश्च संजयश्चापरं रथं॥ ते रथैर्नगराकारैः प्रयाताः पुरुषर्ष
भाः॥ नेमिघोषेण महता कंपयंतो वसुंधरां॥ ततो गिरः पुरुषवरस्तवान्विता द्विजेरिताः पथि सुमनाः स शुश्रुवे॥ कृतांज
लिं प्रणतमथापरं जनं स केशिहा मुदितमनाभ्यनंदत॥ ॥इति शांतौ राजधर्मे स्तवराजः समाप्तः॥ ॥वैशंपायनः॥
ततः स च हृषीकेशः स च राजा युधिष्ठिरः॥ कृपादयश्च ते सर्वे चत्वारः पांडवर्षभाः॥ रथैस्तैर्नगराकारैः पताकाध्वजशालि
भिः॥ ययुराशु कुरुक्षेत्रं वाजिभिः शीघ्रगामिभिः॥ ते वतीर्य कुरुक्षेत्रं केशमज्जास्थिसंकुलं॥ देहन्यासः कृतो यत्र क्षत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येस्तैर्महाहवे ॥ गजाश्वदेहास्थिचयैः पर्वतैरिव संचितं ॥ नरशीर्षकपालैश्च शंखैरिव हि सर्वशः ॥ चितासहस्रैर्निचितं वर्म-
शस्त्रसमाचितं ॥ आपानभूमिं कृतस्य तदा भुक्तोउज्जितामिव ॥ भूतसंघानुचरितं रक्षोगणनिषेवितं ॥ पश्यंतस्ते कुरुक्षे-
त्रं ययुराशु महारथाः ॥ गच्छन्नेव महाबाहुः सर्वयादवनंदनः ॥ युधिष्ठिराय प्रोवाच जामदग्न्यस्य विक्रमं ॥ अमी रामह्रदाः
पार्थ दृश्यंते पंच दूरतः ॥ येषु संतर्पयामास पितॄन्क्षत्रियशोणितैः ॥ त्रिःसप्तकृत्वो वसुधां कृत्वा निःक्षत्रियां विभुः ॥ इहेदानीं ततो
रामः कर्मणो विरराम ह ॥ ॥ युधिष्ठिर उवाच ॥ त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा ॥ रामेणेति यदा-
त्थ त्वमत्र मे संशयो महान् ॥ क्षत्रबीजं यदा दग्धं रामेण यदुपुंगव ॥ कथं भूयः समुत्पत्तिः क्षत्रस्यामितविक्रम ॥ महात्मना
भगवता रामेण यदुपुंगव ॥ कथमुत्सादितं क्षत्रं कथं वृद्धिं पुनर्गतं ॥ महतो रथयुद्धेन कोटिशः क्षत्रिया हताः ॥ तथाभूच्च
मही कीर्णा क्षत्रियैर्वदतां वर ॥ किमर्थं भार्गवेनेदं क्षत्रमुत्सादितं पुरा ॥ यत्र रामेण शार्दूल कुरुक्षेत्रे महात्मना ॥ एवं मे
छिंधि वार्ष्णेय संशयं ताक्ष्यकेतन ॥ आगमो हि परः कृष्ण त्वत्तो नो वासवानुज ॥ ततो यथावत्सगदाग्रजः प्रभुः शशंस त-
स्मै निखिलेन तत्त्वतः ॥ युधिष्ठिरायाप्रतिमौजसे तदा यथाभवत्क्षत्रियसंकुला मही ॥ ॥ इति श्री राजधर्मे रामोपाख्याने ॥
॥ वासुदेव उ० ॥ शृणु कौंतेय रामस्य प्रभावो यो मया श्रुतः ॥ महर्षीणां कथयतां विक्रमं तस्य जन्म च ॥ यथा जामदग्न्येन को-
टिशः क्षत्रिया हताः ॥ उद्भूता राजवंशेषु ये भूयो भारते हताः ॥ जह्नो राजस्तु तनयो बल्लकाश्वस्तु तत्सुतः ॥ कुशिको ना- ५५

म धर्मज्ञस्तस्य महीपते ॥ उग्रं तपः समातिष्ठत्सहस्राक्षसमो भुवि ॥ पुत्रं लभेयमजितं त्रिलोकेश्वरमित्युत ॥ तमुग्रतप-
सं दृष्ट्वा सहस्राक्षः पुरंदरः ॥ समर्थं पुत्रजनने स्वयमेवैत्य पद्यत ॥ पुत्रत्वमगमद्राजंस्तस्य लोकेश्वरेश्वरः ॥ गाधिर्नामाभव-
त्पुत्रः क्षत्रियः पाकशासनः ॥ तस्य कन्याभवद्राजन्नाम्ना सत्यवती प्रभो ॥ तां गाधिः कविपुत्राय सोऽर्चीकाय ददौ प्रभुः ॥
तस्याः प्रीतः स शौचेन भार्गवः कुरुनंदन ॥ पुत्रार्थं श्रपयामास चरुं गाधेस्तथैव च ॥ आहूयोवाच तां भार्यां स ऋचीको
भार्गवस्तदा ॥ उपयोज्यश्चरुरयं त्वया मात्रायं तव ॥ तस्या जनिष्यते पुत्रो दीप्तिमान्क्षत्रियर्षभः ॥ अजय्यः क्षत्रि-
यैर्लोके क्षत्रियर्षभसूदनः ॥ तवापि पुत्रं कल्याणि धृतिमंतं शमात्मकं ॥ तपोन्वितं द्विजश्रेष्ठं चरुरेष विधास्यति ॥
इत्येवमुक्त्वा तां भार्यां स ऋचीको भृगुनंदनः ॥ तपस्यभिरतो धीमान् जगामारण्यमेव हि ॥ एतस्मिन्नेव काले तु ती-
र्थयात्रापरो नृपः ॥ गाधिः सदारः संप्राप्तः ऋचीकस्याश्रमं प्रति ॥ चरुद्वयं गृहीत्वा च राजन्सत्यवती तदा ॥ भर्तुर्वाक्या-
त्तथा व्यग्रा मात्रे हृष्टान्यवेदयत् ॥ माता तु तस्याः कौंतेय दुहित्रे स्वं चरुं ददौ ॥ तस्याश्चरुमथाज्ञानादात्मसंस्थं चका-
र ह ॥ अथ सत्यवती गर्भं क्षत्रियांतकरं तदा ॥ धारयामास दीप्तेन वपुषा घोरदर्शनं ॥ तामृचीकस्तदा दृष्ट्वा तस्या
त्वभिगतं द्विजः ॥ अब्रवीद्भृगुशार्दूलः स्वां भार्यां देवरूपिणीं ॥ मात्रासि व्यंसिता भद्रे चरुव्यत्यासहेतुना ॥ भविष्यति
हि ते पुत्रः क्रूरकर्मा समर्षणः ॥ उत्सृज्य ते चरुं भ्राता ब्रह्मभूतस्तपोरतः ॥ विश्वं हि ब्रह्म सुमहच्चरौ तव समाहितं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षत्रवीर्यं विसकलं मात्रे तव समर्पितं। विपर्यये एतेन भद्रे नैतदेवं भविष्यति॥ मातुस्ते ब्राह्मणो भूयाः तव च क्षत्रियः सुतः॥
सैवमुक्ता महाभागा भर्त्रा सत्यवती तदा॥ पपात शिरसा तस्मै वेपमानाब्रवीदिदं॥ नार्हसे भगवन्नद्य वक्तुमेवंविधं वचः॥
ब्राह्मणापसदं पुत्रं प्राप्स्यतीति हि मा प्रभो॥ ॥ऋचीक उवाच॥ ॥नैष संकल्पितः कामो मया भद्रे यथा त्वयि॥ उग्रकर्मा
समुत्पन्नश्चरुव्यत्यासहेतुना॥ ॥सत्यवत्युवाच॥ ॥इच्छंल्लोकानपि मुने सृजेथाः किं पुनः सुतं॥ शमात्मकमृजुं पुत्रं दा
तुमर्हसि मे प्रभो॥ ॥ऋचीक उवाच॥ ॥ नोक्तपूर्वानृतं भद्रे स्वैरेष्वपि कदाचन॥ किमुताग्निं समाधाय मंत्रवच्चरुसाध
ने॥ दृष्टमेतत्पुरा भद्रे ज्ञातं च तपसा मया॥ ब्रह्मभूतं हि सकलं पितुस्तव कुले भवेत्॥ ॥सत्यवत्युवाच॥ ॥काममेवं भ
वेत्पौत्रो ममेह तव च प्रभो॥ शमात्मकमहं पुत्रं लभेयं जपतां वरं॥ ॥ऋचीक उवाच॥ ॥पुत्रे नास्ति विशेषो मे पौत्रे च वरव
र्णिनि॥ यथा त्वयोक्तं वचनं तथा भद्रे भविष्यति॥ ॥वासुदेव उवाच॥ ॥ततः सत्यवती पुत्रं जनयामास भार्गवं॥ त
पस्यभिरतं दांतं जमदग्निं तपोनिधिं॥ विश्वामित्रं च दायादं गाधिः कुशिकनंदनः॥ यः प्राप ब्रह्मसमितिं विश्वैर्ब्रह्म
गुणैर्युतं॥ ऋचीको जनयामास जमदग्निं तपोनिधिं॥ सोपि पुत्रं ह्यजनयज्जमदग्निः सुदारुणं॥ सर्वविद्यांतगं श्रे
ष्ठं धनुर्वेदस्य पारगं॥ रामं क्षत्रियहंतारं प्रदीप्तमिव पावकं॥ तोषयित्वा महादेवं पर्वते गंधमादने॥ शस्त्राणि वरया
मास परशुं चातितेजसं॥ स तेनाकुंठधारेण ज्वलितानलवर्चसा॥ दुर्वर्षेणाप्रमेयेन लोकेष्वप्रतिमो भवत्॥ एतस्मिन्ने ५६

व काले तु कृतवीर्यात्मजो बली॥ अर्जुनो नाम तेजस्वी क्षत्रियो हैहयाधिपः॥ दत्तात्रेयप्रसादेन राजा बाहुसहस्रवान्॥
चक्रवर्ती महातेजा विप्राणामाश्वमेधिके॥ ददौ स पृथिवीं सर्वां सप्तद्वीपां सपत्तनां॥ स बाह्वस्त्रबलेनाजौ जि
त्वा परमधर्मवित्॥ तृषितेन च कौंतेय भिक्षितश्चित्रभानुना॥ सहस्रबाहुर्विक्रांतः प्रादाद्भिक्षामथाग्नये॥ ग्रामान्
पुराणि राष्ट्राणि घोषांश्चैव तु वीर्यवान्॥ जज्वाल तस्य बाणाग्राच्चित्रभानुर्दिधक्षया॥ स तस्य पुरुषेंद्रस्य प्रभा
वेन महायशाः॥ ददाह कार्तवीर्यस्य शैलानथ वनस्पतीन्॥ स शून्यमाश्रमं रम्यमापवस्य महात्मनः॥ ददाह पव
नेनेद्धश्चित्रभानुः सहैहयः॥ आपवस्तु ततो रोषाच्छशापार्जुनमच्युतः॥ दग्धे श्रमे महाबाहो कार्तवीर्येण वीर्य
वान्॥ त्वया न वर्जितो यस्मान्ममेदं हि महद्वनं॥ दग्धं तस्माद्रणे रामो बाहूंस्ते छेत्स्यतेर्जुन॥ अर्जुनस्तु महातेजा
बली नित्यं शमात्मकः॥ ब्रह्मण्यश्च शरण्यश्च दाता शूरश्च भारत॥ नाचिंतयत्तदा शापं तेन दत्तं महात्मना॥ तस्य
पुत्राः सुबलिनः शापेनासन् पितुर्वधे॥ निमित्ताद्वलिसाश्चैव नृशंसाश्चैव नित्यशः॥ जमदग्निधेन्वास्ते वत्समानि
न्युर्भरतर्षभ॥ अज्ञातं कार्तवीर्येण हैहयेंद्रेण धीमता॥ तन्निमित्तमभूद्युद्धं जमदग्नेर्महात्मनः॥ ततोर्जुनस्य बाहूं
स्तांश्छित्वा रामो रुषान्वितः॥ तं च भ्रमंतं ततो वत्सं जामदग्न्यः स्वमाश्रमं॥ प्रत्यानयत राजेंद्र तेषामंतःपुरात्प्रभुः॥ अर्जु
नस्य सुतास्ते तु संभूयाबुद्धयस्तदा॥ गत्वाश्रममसंबुद्धा जमदग्नेर्महात्मनः॥ अपातयंत भल्लाग्रैः शिरः कायान्न्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

५७

नाधिपः॥ स मितुराश्रमे पिता तस्य रामस्य सुमहात्मनः॥ ततः पितृवधं मत्वा रामः परममन्युमान्॥ निःक्षत्रियां प्रतिश्रुत्य महीं श
स्त्रमगृह्णत॥ ततः स भृगुशार्दूलः कार्तवीर्यस्य वीर्यवान्॥ विक्रम्य निजघानाशु पुत्रान्पौत्रांश्च सर्वशः॥ सहैहयसहस्राणि
हत्वा परममन्युमान्॥ चकार भार्गवो राजन्महीं शोणितकर्दमां॥ स तथाशु महातेजाः कृत्वा निःक्षत्रियां महीं॥ कृपया परया
ऽविष्टो वनमेव जगाम ह॥ ततो वर्षसहस्रेषु समतीतेषु केषुचित्॥ क्षेपं संतसवाक्तीत्रं [?] प्रकृत्या कोपनः प्रभुः॥ विश्वामित्रस्य पौ
त्रस्तु रैभ्यपुत्रो महातपाः॥ परावसुर्महाराज क्षिप्त्वाह जनसंसदि॥ ये ते ययातिपतने यज्ञे संतः समागताः॥ प्रतर्दनप्रभृतयो
राम किं क्षत्रिया न ते॥ मिथ्याप्रतिज्ञो राम त्वं कत्थसे जनसंसदि॥ भयात्क्षत्रियवीराणां पर्वतं समुपाश्रितः॥ सा पुनः क्षत्रिय
शतैः पृथिवी समनुस्तृता॥ परावसोर्वचः श्रुत्वा शस्त्रं जग्राह भार्गवः॥ ततो ये क्षत्रिया राजन्शतशस्ते न निर्जिताः॥ ते विवृ
द्धा महावीर्याः पृथिवीपतयोऽभवन्॥ स पुनस्ताञ्जघानाशु बालानपि नराधिप॥ गर्भस्थैस्तु पुनः सर्वा मही क्षत्रियपुंग
वैः॥ जातं जातं स गर्भं तु पुनरेव जघान ह॥ अरक्षंस्तु सुतान्कांश्चित्तदा क्षत्रिययोषितः॥ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रि
यां प्रभुः॥ दक्षिणामश्वमेधांते कश्यपायददौ ततः॥ क्षत्रियाणां तु शेषार्थं करेणोद्दिश्य कश्यपः॥ स्रुक्प्रग्रहवता राजंस्त
तो वचनमब्रवीत्॥ गच्छ तीरं स(रय)मुद्रस्य दक्षिणस्य महामुने॥ न ते मद्विषये राम वस्तव्यमिह कर्हिचित्॥ ततः शूर्पार
कं देशं सागरस्तस्य निर्ममे॥ सहसा जामदग्न्यस्य सोऽपरांतमहीतलं॥ कश्यपस्तां महाराज प्रतिगृह्य वसुंधरां॥ कृत्वा ब्रा ५८

ह्मणसंस्थां वै प्रविष्टः सुमहद्वनं॥ ततः शूद्राश्च वैश्याश्च यथा स्वैरप्रचारिणः॥ अवर्तंत द्विजाग्र्याणां दारेषु भरतर्षभ॥ अराजके जीवलोके
दुर्बला बलवत्तरैः॥ पीड्यंते न हि वित्तेषु प्रभुत्वं कस्यचित्तदा॥ ततः कालेन पृथिवी पीड्यमाना दुरात्मभिः॥ विपर्ययेण तेनाशु प्रविवेश
रसातलं॥ अरक्ष्यमाणा विधिवत्क्षत्रियैर्धर्मरक्षिभिः॥ तां दृष्ट्वा द्रवतीं तत्र संत्रासात्स महामनाः॥ ऊरुणा धारयामास कश्यपः पृथि
वीं ततः॥ धृता तेनोरुणा येन तदोर्वीति मही स्मृता॥ रक्षणं च समुद्दिश्य ययाचे पृथिवी तदा॥ प्रसाद्य कश्यपं देवी वरयामास भूपती
न्॥ ॥पृथिव्युवाच॥ ॥ संति ब्रह्मन्मया गुप्ताः स्त्रीषु क्षत्रियपुंगवाः॥ हैहयानां कुले जातास्ते संरक्षंतु मां मुने॥ अस्ति पौरवदायादो विदू दा
रथसुतः प्रभो॥ ऋक्षैः संवर्द्धितो विप्र ऋक्षवत्येव पर्वते॥ तथानुकंपमानेन यज्वनाऽमिततेजसा॥ पराशरेण दायादः सौदासस्याभिर
क्षितः॥ सर्वकर्माणि कुरुते शूद्रवत्तस्य स द्विजः॥ सर्वकर्मेत्यभिख्यातः स मां रक्षतु पार्थिवः॥ शिबेः पुत्रो महातेजा गोपतिर्नाम नाम
तः॥ वने संवर्द्धितो गोभिः सोऽभिरक्षतु मां मुने॥ प्रतर्दनस्य पुत्रस्तु वत्सो नाम महाबलः॥ वत्सैः संवर्द्धितो गोष्ठे स मां रक्षतु पार्थिवः॥ द
धिवाहनपुत्रस्तु पौत्रो दिविरथस्य तु॥ अंगः स गौतमेनासीद्गंगाकूलेऽभिरक्षितः॥ मनुतस्यान्वये ये च रक्षिताः क्षत्रियान्वयाः॥ मनुस
तिसमाधैर्ये [?] समुद्रेणाभिरक्षिताः॥ ये ते क्षत्रियदायादास्तत्र तत्र परिश्रुताः॥ व्योकारहेमकारादिजातिं नित्यं समाश्रिताः॥ यदि
मामभिरक्षंति तत्स्थास्यामि निश्चला॥ एतेषां पितरश्चैव तथैव च पितामहाः॥ मदर्थं निहता युद्धे रामेणाक्लिष्टकर्मणा॥ तेषामप
चितिश्चैव मया कार्या महामुने॥ न ह्यहं कामये नित्यमतिक्रांतेन रक्षणं॥ वर्तमानेन वर्तेयं तत्क्षिप्रं संविधीयतां॥ ॥वासुदेव उवाच॥
॥ ॥ततः पृथिव्या निर्दिष्टांस्तान्समानीय कश्यपः॥ अभ्यषिंचन्महीपालान्क्षत्रियान्वीर्यसंमितान्॥ तेषां पुत्राश्च पौत्राश्च येषां वंशाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म॰

५८

प्रतिष्ठिताः ॥ एवमेतत्पुरावृत्तं यन्मां पृच्छसि पांडव ॥ ॥वैशंपायनः॥ ॥एवं ब्रुवन्नेव यदुप्रवीरो युधिष्ठिरं धर्मभृतां वरिष्ठं ॥ रथेन ते
नाशु ययौ महात्मा दिशः प्रकाशयन्भगवानिवार्कः ॥ ॥ इति शांतौ राजधर्मे रामोपाख्याने ॥ ॥वैशंपायनः॥ ॥ ततो रामस्य तत्कर्म
श्रुत्वा राजा युधिष्ठिरः ॥ विस्मयं परमं गत्वा प्रत्युवाच जनार्दनं ॥ अहो रामस्य वार्ष्णेय शक्रस्येव महात्मनः ॥ विक्रमो येन वसुधा क्रो
धान्निःक्षत्रिया कृता ॥ गोभिः समुद्रे च तथा गोलांगूलर्क्षवानरैः ॥ गुप्ता राममयोद्विग्नाः क्षत्रियाणां कुलोद्वहाः ॥ अहो धन्योस्मि लो
कं सभाग्याश्च नरा भुवि ॥ यत्र कर्मेदृशं धर्म्यं द्विजेन कृतमच्युत ॥ तथा यातौ तदा तात तावच्युतयुधिष्ठिरौ ॥ जग्मतुर्यत्र गांगेयः श
रतल्पगतः प्रभुः ॥ ततस्ते ददृशुर्भीष्मं शरप्रस्तरशायिनं ॥ स्वरश्मिजालसंवीतं सायंसूर्यसमप्रभं ॥ उपास्यमानं मुनिभिर्देवै
रिव शतक्रतुं ॥ देशे परमधर्मिष्ठे नदीमोघवतीमनु ॥ दूरादेव तमालोक्य कृष्णो राजा च धर्मतः ॥ चत्वारः पांडवाश्चैव ते च शार
द्वतादयः ॥ अवस्कंद्याथ वाहेभ्यः संयम्य प्रचलं मनः ॥ एकीकृत्येंद्रियग्राममुपतस्थुर्महामुनीन् ॥ अभिवाद्य तु गोविंदः सा
त्यकिस्ते च पार्थिवाः ॥ व्यासादीनृषिमुख्यांश्च गांगेयमुपतस्थिरे ॥ तपोवृद्धं तदा दृष्ट्वा गांगेयं यदुकौरवाः ॥ परिवार्य ततः सर्वे
निषेदुः पुरुषर्षभाः ॥ ततो निशाम्य गांगेयं शाम्यमानमिवानलं ॥ किंचिद्दीनमना भीष्ममिति होवाच केशवः ॥ कच्चिज्ज्ञानानि स
र्वाणि प्रसन्नानि यथा पुरा ॥ कच्चिदव्याकुला चैव बुद्धिस्ते वदतां वर ॥ शराभिघातदुःखार्तं कच्चिद्गात्रं न दूयते ॥ मानसादपि दुः
खाद्धि शारीरं बलवत्तरं ॥ वरदानात्पितुः कामं छंदमृत्युरसि प्रभो ॥ शांतनोर्धर्मनित्यस्य तत्तेन मम कारणं ॥ सुसूक्ष्मो
पि हि देहेषु शल्यो जनयते रुजं ॥ किं पुनः शरसंघातैश्चितस्य तव पार्थिव ॥ कामं नैतत्तवाख्येयं प्राणिनां प्रभवाप्ययौ ॥ उपदे ५८

ष्टुं भवान् शक्तो देवानपि हि भारत ॥ यच्च भूतं भविष्यं च भवच्च पुरुषर्षभ ॥ सर्वं तत् ज्ञानवृद्धस्य तव भीष्म प्रतिष्ठितं ॥ संहारश्चै
व भूतानां धर्मस्य च फलोदयः ॥ विदितस्ते महाप्राज्ञ त्वं हि धर्ममयो निधिः ॥ त्वां हि राज्ये स्थितं स्फीते समग्रांगमरोगिणं ॥ स्त्री
सहस्रैः परिवृतं पश्यामी वोर्ध्वरेतसं ॥ ऋते शांतनवाद्भीष्मात् त्रिषु लोकेषु पार्थिव ॥ सत्यधर्मान्महावीर्याच्छूराद्धर्मैकतत्परात् ॥
मृत्युमावार्य तपसा शरप्रस्तरशायिनः ॥ निसर्गप्रभवं किंचिन्न च तातानुशुश्रुम ॥ सत्ये तपसि दाने च यज्ञाधिकरणे तथा ॥ ध
नुर्वेदे च वेदे च नीत्यां चैवान्ववेक्षणे ॥ आनृशंस्यं शुचिं दांतं सर्वभूतहिते रतं ॥ महारथं त्वत्सदृशं न किंचिदनुशुश्रुम ॥ त्वं हि देवा
न्सगंधर्वान्ससुरासुरराक्षसान् ॥ शक्तस्त्वेकरथेनैव विजेतुं नात्र संशयः ॥ स त्वं भीष्म महाबाहो वसूनां वासवोपमः ॥ नित्यं विप्रैः
समाख्यातो नवमो नवमैर्गुणैः ॥ अहं त्वा चाभिजानामि यस्त्वं पुरुषसत्तम ॥ त्रिदशेष्वपि विख्यातः स्वशक्त्या पुरुषोत्तमः ॥ मनुष्ये
षु मनुष्येंद्र न दृष्टो न च मे श्रुतः ॥ भवतो यो गुणैस्तुल्यः पृथिव्यां पुरुषः क्वचित् ॥ त्वं हि सर्वैर्गुणैः पार्थिव देवानप्यतिरिच्यसे ॥ तप
सा हि भवान् शक्तः स्रष्टुं लोकांश्चराचरान् ॥ किं पुनश्चात्मनो लोकानुत्तमानुत्तमैर्गुणैः ॥ तदस्य तप्यमानस्य ज्ञातीनां संक्षयेन
वै ॥ ज्येष्ठस्य पांडुपुत्रस्य शोकं भीष्म व्यपानुद ॥ ये हि धर्माः समाख्याताश्चातुर्वर्ण्यस्य भारत ॥ चातुराश्रम्यसंयुक्ताः सर्वे ते वि
दितास्तव ॥ चातुर्विद्ये च ये प्रोक्ताश्चातुर्होत्रे च भारत ॥ योगे सांख्ये च नियता ये च धर्माः सनातनाः ॥ चातुर्वर्ण्यस्य यश्चोक्तो ध
र्मो न स विरुध्य ॥ सेव्यमानः स वैयाख्यो गांगेय विदितस्तव ॥ प्रतिलोमप्रसूतानां वर्णानां चैव यः स्मृतः ॥ देशजातिकुलानां च जा
नीषे धर्मलक्षणं ॥ वेदोक्तो यश्च शिष्टोक्तः स चैव विदितस्तव ॥ प्रवृत्तेश्च निवृत्तेः स चापि विदितस्तव ॥ इतिहासपुराणाश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्त्स्न्येन विदितास्तव ॥ धर्मशास्त्रं च सकलं नित्यं मनसि ते स्थितं ॥ ये च केचन लोकेस्मिन्नर्थाः संशयकारकाः ॥ तेषां छेत्ता
नास्ति लोके त्वदन्यः पुरुषर्षभः ॥ स पांडवेयस्य मनःसमुत्थितं नरेंद्र शोकं व्यपकर्ष मेधया ॥ भवद्विधा ह्युत्तमबुद्धिवि
ज स्तरा विमुह्यमानस्य जनस्य शांतये ॥ ॥ शांतौ राजधर्मे ॥ ॥ वैशंपायनः ॥ ॥ श्रुत्वा तु वचनं भीष्मो वासुदेवस्य धीमतः ॥ किं
चिदुन्नम्य वदनं प्रांजलिर्वाक्यमब्रवीत् ॥ ॥ भीष्म उवाच ॥ ॥ नमस्ते भगवन् कृष्ण लोकानां प्रभवाव्यय ॥ त्वं हि कर्ता हृ
षीकेश संहर्ता चापराजितः ॥ विश्वकर्मन्नमस्तेस्तु विश्वात्मन् विश्वसंभव ॥ अपवर्गस्थ भूतानां पंचानां परतः स्थित ॥ नमस्ते
त्रिषु लोकेषु नमस्ते परतस्त्रिषु ॥ योगेश्वर नमस्तेस्तु त्वं हि सर्वपरायणः ॥ मत्संश्रितं यदात्थ त्वं वचः पुरुषसत्तम ॥ तेन
रूपं पश्यामि ते भावान्दिव्यान् हि त्रिषु वर्त्मसु ॥ तच्च पश्यामि गोविंद यत्ते सनातनं ॥ सप्त मार्गा निरुद्धास्ते वायोरमिततेजसः ॥
दिवं ते शिरसा व्याप्तं पद्भ्यां देवी वसुंधरा ॥ दिशो भुजा रविश्चक्षुर्वीर्ये शक्रः प्रतिष्ठितः ॥ अतसीपुष्पसंकाशं पीतवाससम
च्युत ॥ वपुर्ह्यनुमिमीमस्ते मेघस्येव सविद्युतः ॥ त्वत्प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे ॥ यच्छ्रेयः पुंडरीकाक्ष तद्ध्यायस्व
सुरोत्तम ॥ ॥ वासुदेव उवाच ॥ ॥ यतः खलु परा भक्तिर्मयि ते भरतर्षभ ॥ ततो मया वपुर्दिव्यं तव राजन् प्रदर्शितं ॥ न ह्यभ
क्ताय राजेंद्र भक्तायानृजवे न वा ॥ दर्शयाम्यहमात्मानं न चाशांताय भारत ॥ भवांस्तु मम भक्तश्च नित्यं चार्जवमास्थितः ॥ दम
ते तपसि सत्ये च दाने च निरतः शुचिः ॥ अर्हस्त्वं भीष्म मां द्रष्टुं तपसा स्वेन भारत ॥ तव ह्युपस्थिता लोका येभ्यो नावर्तते पुनः ॥
पंचाशतं षट् च कुरुप्रवीर शेषं दिनानां तव जीवितस्य ॥ ततः शुभैः कर्मफलोदयैस्त्वं समेष्यसे भीष्म विमुच्य देहं ॥ एते हि ५९

देवा वसवो विमानान्यास्थाय सर्वे ज्वलिताग्निकल्पाः ॥ अंतर्हितास्त्वां प्रतिपालयंति काष्ठां प्रपद्यंतमुदक्पतंगं ॥ व्यावृत्तमा
त्रे भगवत्युदीचीं सूर्ये दिशं कालवशोपपन्ने ॥ गंतासि लोकान् पुरुषप्रवीर नावर्तते यानुपलभ्य विद्वान् ॥ अमुं च लोकं त्वयि भी
ष्म याते ज्ञानानि नंक्ष्यंत्यखिलेन वीर ॥ अतस्तु सर्वे त्वयि संनिकर्षं समागता धर्मविवेचनाय ॥ तद्ज्ञातिशोकोपहतश्रुताय सत्या
भिसंधाय युधिष्ठिराय ॥ प्रब्रूहि धर्मार्थसमाधियुक्तं सत्यं वचोस्यापनुदाशु शोकं ॥ ॥ शांतौ राजधर्मे ॥ ॥ वैशंपायनः ॥ ॥
ततः कृष्णस्य तद्वाक्यं धर्मार्थसहितं हितं ॥ श्रुत्वा शांतनवो भीष्मः प्रत्युवाच कृतांजलिः ॥ लोकनाथ महाबाहो शिव नारायणाच्युत ॥
तव वाक्यमुपश्रुत्य हर्षेणास्मि परिप्लुतः ॥ किं चाहमभिधास्यामि वाक्यं ते तव संनिधौ ॥ यदा वाचोगतं सर्वं तव वाचि समाहितं ॥
यच्च किंचित्क्वचिल्लोके कर्तव्यं क्रियते च यत् ॥ त्वत्तस्तन्निःसृतं देव लोके बुद्धिमतो हि ते ॥ कथयेद्देवलोकं यो देवराजसमीपतः ॥ ध
र्मकामार्थमोक्षाणां सोर्थं क्रियात्त्वाग्रजः ॥ शराभिघाताद्व्यथितं मनो मे मधुसूदन ॥ गात्राणि मेवसीदंति न च बुद्धिः प्रसीद
द ति ॥ न च मे प्रतिभा काचिदस्ति किंचित्प्रभाषितुं ॥ पीड्यमानस्य गोविंद विषानलसमैः शरैः ॥ बलं मे प्रजहातीव प्राणाः संत्वरयंति
च ॥ मर्माणि परितप्यंति भ्रांतचेतास्तथा ह्यहं ॥ दौर्बल्यात्सज्जते वाङ्मे स कथं वक्तुमुत्सहे ॥ साधु मे त्वं प्रसीदस्व दाशार्हकुलवर्द्ध
न ॥ तत्क्षमस्व महाबाहो न ब्रूयां किंचिदच्युत ॥ त्वत्संनिधौ विषीदेच्च वाचस्पतिरपि ब्रुवन् ॥ न दिशः संप्रजानामि नाकाशं न च मेदि
नीं ॥ केवलं तव वीर्येण तिष्ठामि मधुसूदन ॥ स्वयमेव प्रभो तस्माद्धर्मराजस्य यद्धितं ॥ तद्ब्रवीत्वाशु सर्वेषामागमानां त्वमागमः ॥
कथं त्वयि स्थिते कृष्ण शाश्वते लोककर्तरि ॥ प्रब्रूयान्मद्विधः कश्चिद्गुरौ शिष्य इव स्थिते ॥ ॥ वासुदेव उवाच ॥ ॥ उपपन्नमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० ६०

इवाक्यं कौरवाणां धुरंधरे ॥ महावीर्ये महासत्वे स्थिते सर्वार्थदर्शिनि ॥ यच्च मामथ गांगेय बाणघातरुजे प्रति ॥ गृहाणात्र व
रं भीष्म मत्प्रसादकृतं विभो ॥ न ते ग्लानिर्न ते मूर्छा न दाहो न च ते रुजा ॥ प्रभविष्यति गांगेय क्षुत्पिपासे न चाच्युत ॥ ज्ञानानि च
समग्राणि प्रतिभास्यंति तेनघ ॥ न च ते क्वचिदासक्तिर्बुद्धेः प्रादुर्भविष्यति ॥ सत्वस्थं च मनो नित्यं तव भीष्म भविष्यति ॥ रज
स्तमोभ्यां रहितं घने मुक्तमिवोडुराट् ॥ यद्यच्च धर्मसंयुक्तमर्थयुक्तमथापि च ॥ चिंतयिष्यसि तत्राग्र्या बुद्धिस्तव भविष्य
ति ॥ इमं च राजशार्दूल भूतग्रामं चतुर्विधं ॥ चतुर्दिव्यं समाश्रित्य द्रक्ष्यस्यमितविक्रम ॥ संसारंतं प्रजाजालं संयुक्तो ज्ञान
चक्षुषा ॥ भीष्म द्रक्ष्यसि तत्त्वेन जले मीन इवामले ॥ ॥ वैशंपायन ॥ ॥ ततस्ते व्याससहिताः सर्व एव महर्षयः ॥ ऋग्यजुःसा
मसहितैर्वचोभिः कृष्णमर्चयन् ॥ ततः सार्वर्तवं दिव्यं पुष्पवर्षं नभस्तलात् ॥ पपात यत्र वार्ष्णेयः सगांगेयः सपांडवः ॥ वादि
च त्राणि दिव्यानि जगुश्चाप्सरसां गणाः ॥ न चाहितमनिष्टं वा किंचित्तत्र प्रदृश्यते ॥ ववौ शिवः सुखो वायुः सर्वगंधवहः शुचिः ॥
शांतायां दिशि शांताश्च प्रावदन्मृगपक्षिणः ॥ ततो मुहूर्ताद्भगवान्सहस्रांशुर्दिवाकरः ॥ दहन्वनमिवैकांते प्रतीच्यां प्रत्यदृ
श्यत ॥ ततो महर्षयः सर्वे समुत्थाय जनार्दनं ॥ भीष्ममामंत्रयांचक्रू राजानं च युधिष्ठिरं ॥ ततः प्रणाममकरोत्केशवः सहपांड
वः ॥ सात्यकिः संजयश्चैव स च शारद्वतः कृपः ॥ ततस्ते धर्मनिरताः सम्यक्तैरभिपूजिताः ॥ श्वः समेष्याम इत्युक्त्वा यथेष्टं त्वरि
ता ययुः ॥ तथैवामंत्र्य गांगेयं केशवः पांडवास्तदा ॥ प्रदक्षिणमुपावृत्य रथानारुरुहुः शुभान् ॥ ततो रथैः कांचनचित्रकूबरैर्मही
धराभैः समदैश्च दंतिभिः ॥ हयैः सुपर्णैरिव चाशुगामिभिः पदातिभिश्चात्तशरासनादिभिः ॥ ययौ रथानां पुरतो हि सा चमू ६०

स्तथैव पश्चादतिमात्रसारिणी ॥ पुरश्च पश्चाच्च यथा महानदी तमृक्षवंतं गिरिमेति नर्मदा ॥ ततः पुरस्ताद्भगवान्निशाकरः
समुत्थितस्तामभिहर्षयंश्चमूं ॥ दिवाकरापीतरसास्तथौषधीः पुनस्स्वकेनैव गुणेन योजयन् ॥ ततः पुरं सुरपुरसंनिभं द्यु य
तिं प्रविश्य ते यदुवृषपांडवास्तथा ॥ यथोचितान्भवनवरान्समाविशन् श्रमान्विता मृगपतयो गुहा इव ॥ ॥ इति शांतौ
राजधर्मे ॥ ॥ वैशंपायनः ॥ ॥ ततः शयनमाविश्य प्रसुप्तो मधुसूदनः ॥ याममात्रावशेषायां यामिन्यां प्रत्यबुध्यत ॥ स
ध्यानपथमाविश्य सर्वज्ञानानि माधवः ॥ अवलोक्य ततः पश्चाद्दध्यौ ब्रह्म सनातनं ॥ ततः स्तुतिपुराणज्ञा रक्तकंठाः सु
शिक्षिताः ॥ अस्तुवन्विश्वकर्माणं वासुदेवं प्रजापतिं ॥ पठंति पाणिस्वनिकास्तथा गायंति गायनाः ॥ शंखानकमृदंगां
श्च प्रवादयंति सहस्रशः ॥ वीणापणववेणूनां स्वनश्चातिमनोरमः ॥ प्रहास इव विस्तीर्णः शुश्रुवे तस्य वेश्मनः ॥ ततो
युधिष्ठिरस्यापि राज्ञो मंगलसंहिताः ॥ उच्चेरुर्मधुरा वाचो गीतवादित्रनिस्वनाः ॥ ततउत्थाय दाशार्हः स्नातः प्रांजलिर्न
यतः ॥ जप्त्वा जप्यं महाबाहुरग्नीनाश्रित्य तस्थिवान् ॥ ततः सहस्रं विप्राणां चतुर्वेदविदां तथा ॥ गवां सहस्रेणैकैकं वा
चयामास माधवः ॥ मंगलालंभनं कृत्वा आत्मानमवलोक्य च ॥ आदर्शे विमले कृष्णस्ततः सात्यकिमब्रवीत् ॥ गच्छ
शैनेय जानीहि गत्वा राजनिवेशनं ॥ अपि सज्जो महातेजा भीष्मं द्रष्टुं युधिष्ठिरः ॥ ततः कृष्णस्य वचनात्सात्यकिस्त्वरितो
ययौ ॥ उपगम्य च राजानं युधिष्ठिरमभाषत ॥ युक्तो रथवरो राजन्वासुदेवस्य धीमतः ॥ समीपमापगेयस्य प्रयास्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्मे
६१

इति जनार्दनः ॥ तव प्रीत्यक्षयं कृष्ण सो धर्मराज महाद्युते ॥ यं ज्ञानं तनं कृत्यं तद्भवान्वक्तुमर्हसि ॥ एवमुक्तः प्रत्युवाच धर्मात्मा यो युधि
ष्ठिरः ॥ ॥युधिष्ठिर उवाच ॥ ॥ युज्यतां मे रथो वेगः फाल्गुनाप्रतिमद्युते ॥ न सैनिकैश्च यातव्यं यास्यामो वयमेव हि ॥ न च पी
डयितव्यो मे भीष्मो धर्मभृतां वरः ॥ अंतःपुरसमाश्चापि निवर्तंतु धनंजय ॥ अद्य प्रभृति गांगेयः परं गुह्यं प्रवक्ष्यति ॥ अतो
नेच्छामि कौंतेय पृथक्जनसमागमं ॥ ॥वैशंपायनः ॥ ॥ स तद्वाक्यमथाज्ञाय कुंतीपुत्रो धनंजयः ॥ युक्तं रथवरं तस्मा आ
चचक्षे नरर्षभः ॥ ततो युधिष्ठिरो राजा यमौ भीमार्जुनावपि ॥ भूतानीव समस्तानि ययुः कृष्णनिवेशनं ॥ आगच्छत्स्वथ
कृष्णोपि पांडवेषु महात्मसु ॥ शैनेयसहितो धीमान् रथमेवारुरोह तं ॥ रथस्थाः संविदं कृत्वा सुखां पृष्ट्वा च शर्वरीं ॥ मेघ
घोषै रथवरैः प्रययुस्ते नरर्षभाः ॥ बलाहकं मेघपुष्पं सैब्यं सुग्रीवमेव च ॥ दारुकश्चोदयामास वासुदेवस्य वाजिनः ॥ ते
हया वासुदेवस्य दारुकेण प्रचोदिताः ॥ गां खुराग्रैस्तदा राजन् लिखंतः प्रययुस्तदा ॥ ते ग्रसंत इवाकाशं वेगवंतो महाबलाः
॥ क्षेत्रं धर्मस्य कृत्स्नस्य कुरुक्षेत्रमवातरन् ॥ ततो ययुर्यत्र भीष्मः शरतल्पगतः प्रभुः ॥ आस्ते महर्षिभिः सार्द्धं ब्रह्मा
देवगणैर्यथा ॥ ततोवतीर्य गोविंदः रथात्स च युधिष्ठिरः ॥ भीमो गांडीवधन्वा च यमौ सात्यकिरेव च ॥ ऋषीनभ्यर्च्य
यामासुः करानुद्यम्य दक्षिणान् ॥ स तैः परिवृतो राजा नक्षत्रैरिव चंद्रमाः ॥ अभ्याजगाम गांगेयं ब्रह्माणमिव वासवः ॥
शरतल्पे शयानं तमादित्यं पतितं यथा ॥ ददर्श स महाबाहुर्भयाच्चागतसाध्वसः ॥ ॥ शांतौ राजधर्मे भीष्माभिगमने ॥ ६१

॥ ॥जनमेजय उवाच ॥ ॥ धर्मात्मनि महावीर्ये सत्यसंधे जितात्मनि ॥ देवव्रते महाभागे शरतल्पगतेच्युते ॥ शयाने
वीरशयने भीष्मे शंतनुनंदने ॥ गांगेये पुरुषव्याघ्रे पांडवैः पर्युपस्थिते ॥ काः कथाः समवर्तंत तस्मिन्वीरसमागमे ॥
हतेषु सर्वसैन्येषु तन्मे शंस महामुने ॥ ॥वैशंपायनः ॥ ॥ शरतल्पगते भीष्मे कौरवाणां धुरंधरे ॥ आजग्मुर्ऋषयः सि
द्धा नारदप्रमुखा नृप ॥ हतशिष्टाश्च राजानो युधिष्ठिरपुरोगमाः ॥ धृतराष्ट्रश्च कृष्णश्च भीमार्जुनयमास्तथा ॥ ते
भिगम्य महात्मानो भरतानां पितामहं ॥ अन्वशोचंत गांगेयमादित्यं पतितं यथा ॥ मुहूर्तमिव च ध्यात्वा नारदो देवद
र्शनः ॥ उवाच पांडवान्सर्वान् हतशिष्टांश्च पार्थिवान् ॥ प्राप्तकालं समाचक्षे भीष्मो यमनुयुज्यतां ॥ अस्तमेति हि गां
गेयो भानुमानिव भारत ॥ अयं प्राणान्समुत्स्रक्ष्यन् तं सर्वेभ्यनुपृच्छत ॥ कृत्स्नान्हि विविधान्धर्मांश्चातुर्वर्ण्यस्य वेत्त्य
युं यं ॥ एष वृद्धः परांल्लोकान् संप्राप्नोति तनुत्यजः ॥ तं शीघ्रमनुयुंजध्वं संशयान्मनसि स्थितान् ॥ एवमुक्ता नारदेन भी
ष्ममीयुर्नराधिपाः ॥ प्रष्टुं नाशक्नुवंतस्ते वीक्षांचक्रुः परस्परं ॥ अथोवाच हृषीकेशं पांडुपुत्रो युधिष्ठिरः ॥ नान्यस्त
द्देवकीपुत्राच्छक्तः प्रष्टुं पितामहं ॥ प्रव्याहर यदुश्रेष्ठ त्वमग्रे मधुसूदन ॥ त्वं हि नस्तात सर्वेषां सर्वधर्मविदुत्तमः ॥ ए
वमुक्तः पांडवेन भगवान्केशवस्तदा ॥ अभिगम्य दुराधर्षं प्रव्याहरयमच्युतः ॥ ॥वासुदेव उवाच ॥ ॥ कच्चित्सु
खेन रजनी व्युष्टा ते राजसत्तम ॥ विस्पष्टलक्षणा बुद्धिः कच्चिचोपस्थिता तव ॥ कच्चित् ज्ञानानि सर्वाणि प्रतिभांति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतेनघ॥ न ग्लायते ते हृदयं न चते व्याकुलं मनः॥ ॥भीष्म उवाच॥ ॥दाहो मोहः श्रमश्चैव क्लमो ग्लानिस्तथा रुजः॥

तव प्रसादाद्गोविंद सद्यः प्रतिगता विभो॥ यच्च भूतं भविष्यच्च भवच्च परमद्युते॥ तत्सर्वमनुपश्यामि पाणौ फलमि
वार्पितं॥ वेदोक्ताश्चैव ये धर्मा वेदांताधिगताश्च ये॥ तान्सर्वान्संप्रपश्यामि वरदानात्तवाच्युत॥ शिष्टैश्च धर्मो यः प्रो
क्तः स च मे हृदि वर्तते॥ देशजातिकुलानां च धर्मज्ञोस्मि जनार्दन॥ चतुर्ष्वाश्रमधर्मेषु योर्थः स च हृदि स्थितः॥ राज
धर्मांश्च सकलानवगच्छामि केशव॥ यच्च यत्र च वक्तव्यं तद्वक्ष्यामि जनार्दन॥ तव प्रसादाद्धि शुभा मनो मे बुद्धिरा
विशत्॥ युवेवास्मि तं समावृत्तस्त्वदनुध्यानबृंहितः॥ वक्तुं श्रेयः समर्थोस्मि त्वत्प्रसादाज्जनार्दन॥ स्वयं किमर्थं तु
भवान् श्रेयो न प्राह पांडवं॥ किं ते विवक्षितं चात्र तदाशु वद माधव॥ ॥वासुदेव उवाच॥ ॥यशसः श्रेयसश्चैव मू
लं मां विद्धि कौरव॥ मत्तः सर्वेभिनिर्वृत्ता भावाः सदसदात्मकाः॥ शीतांशुश्चंद्र इत्युक्ते लोके को विस्मयिष्यति॥ त
थैव यशसा पूर्णं मयि को विस्मयिष्यति॥ आधेयं तु मया भूयो यशस्तव महाद्युते॥ ततो मे विपुला बुद्धिस्त्वयि
भीष्म समर्पिता॥ यावद्धि पृथिवीपाल पृथ्वी यं स्थास्यति ध्रुवा॥ तावत्तवाक्षया कीर्तिर्लोकाननुचरिष्यति॥
यच्चैव वक्ष्यसे भीष्म पांडवायानुपृच्छते॥ वेदप्रवाद इव ते स्थास्यते पृथिवीतले॥ यश्चैतेन प्रमाणेन योक्ष्यत्यात्मान
मात्मना॥ स फलं सर्वपुण्यानां प्रेत्य चानुभविष्यति॥ एतस्मात्कारणाद्भीष्म मतिर्दिव्या मया हि ते॥ त्ता यशो विप्र द ६२

थयेत्कथं भूयस्तवे तिह॥ यावद्धि प्रथते लोके पुरुषस्य यशो भुवि॥ तावत्तस्याक्षया कीर्तिर्भवतीति विनिश्चितं॥ रा
जानो हतशिष्टास्त्वां राजन्नभित आसते॥ धर्माननुयुंक्षंतस्तेभ्यः प्रब्रूहि भारत॥ भवान्हि वयसा वृद्धः श्रुताचारस
मन्वितः॥ कुशलो राजधर्माणां पूर्वेषामपराश्च ये॥ जन्मप्रभृति ते कश्चिद्वृजिनं च ददर्श ह॥ ज्ञातारं सर्वधर्माणां
त्वां विदुः सर्वपार्थिवाः॥ तेभ्यः पितेव पुत्रेभ्यो राजन्ब्रूहि परं नयं॥ ऋषयश्चापि देवाश्च त्वया नित्यमुपासिताः॥ तस्मा
द्वक्तव्यमेवेह त्वया वश्यमशेषतः॥ धर्मं शुश्रूषमाणेभ्यः पृष्टेन च सता पुनः॥ वक्तव्यं विदुषा चेति धर्ममाहुर्मनीषि
णः॥ अप्रतिब्रुवतः कष्टो दोषो हि भवति प्रभो॥ तस्मात्पुत्रैश्च पौत्रैश्च धर्मान्पृष्टः पुरातनान्॥ विद्वन् जिज्ञासमा
नैस्त्वं प्रब्रूहि भरतर्षभ॥ ॥शांतौ राजधर्मे॥ ॥वैशंपायनः॥ ॥अथाब्रवीन्महातेजा वाक्यं कौरवनंदनः॥ हंत धर्मा
न्प्रवक्ष्यामि दृढे वाङ्मनसी मम॥ तव प्रसादाद्गोविंद भूतात्मा ह्यसि शाश्वतः॥ युधिष्ठिरस्तु धर्मात्मा मां धर्माननुपृच्छतु॥
एवं प्रीतो भविष्यामि धर्मान्वक्ष्यामि चाखिलान्॥ यस्मिन्राजर्षयो जाते धर्मात्मनि महात्मनि॥ अहृष्यन्त हलयः
सर्वे स मां पृच्छतु पांडवः॥ सर्वेषां दीप्तयशसां कुरूणां धर्मचारिणां॥ यस्य नास्ति समः कश्चित्स मां पृच्छतु पांडवः॥
धृतिर्दमो ब्रह्मचर्यं क्षमा धर्मश्च नित्यदा॥ यस्मिन्नोजश्च तेजश्च स मां पृच्छतु पांडवः॥ संबंधीनातिथीन्भृत्यान्
संश्रितांश्चैव यो भृशं॥ संमानयति सत्कृत्य स मां पृच्छतु पांडवः॥ सत्यं दानं तपः शौर्यं शांतिर्दाक्ष्यमसंभ्रमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्नृतानि सर्वाणि स मां पृच्छतु पांडवः ॥ येन कालसंस्थानं भयान्नार्थकारणात् ॥ कुर्याद्धि धर्मं धीमांस्स मां पृच्छ
तु पांडवः ॥ सत्य नित्यः क्षमा नित्यो ज्ञान नित्योऽतिथि प्रियः ॥ यो ददाति सतां नित्यं स मां पृच्छतु पांडवः ॥ इज्याध्ययन नित्य
श्च धर्मे च निरतस्सदा ॥ शांतः श्रुत रहस्यश्च स मां पृच्छतु पांडवः ॥ ॥वासुदेवः॥ ॥लज्जया परयोपेतो धर्मराजो यु
धिष्ठिरः ॥ अभिशाप भयाद्भीतो भवंतं नोपसर्पति ॥ लोकस्य कदनं कृत्वा लोकनाथो विशांपते ॥ अभिशाप भयाद्भी
तो भवंतं नोपसर्पति ॥ पूज्यान्मान्यांश्च भक्तांश्च गुरुन्संबंधिबांधवान् ॥ अर्घार्हानिषुभिर्हत्वा भवंतं नोपसर्पति ॥ ॥भीष्म
उवाच ॥ ॥ब्राह्मणानां यथा धर्मो दानमध्ययनं तपः ॥ क्षत्रियाणां तथा कृष्ण समरे देहपातनं ॥ पितॄन्पितामहान्भ्रातॄन्गुरू
न्संबंधिबांधवान् ॥ मिथ्याप्रवृत्तान्यः संख्ये निहन्याद्धर्म एव सः ॥ समयत्यागिनो लुब्धान्गुरूनपि च केशव ॥ निहंति समरे पा
पान् क्षत्रियो यः स धर्मवित् ॥ यो लोभान्न समीक्षेत धर्मसेतुं सनातनं ॥ निहंति यस्तं समरे क्षत्रियो वै स धर्मवित् ॥ लोहि
तोदां केशतृणां गजशैलां ध्वजद्रुमां ॥ महीं करोति युद्धेषु क्षत्रियो यः स धर्मवित् ॥ आहूतेन रणे नित्यं योद्धव्यं क्षत्रबंधुना ॥
धर्म्यं स्वर्ग्यं च लोक्यं च युद्धं हि मनुरब्रवीत् ॥ ॥वैशंपायनः॥ ॥एवमुक्तस्तु भीष्मेण धर्मपुत्रो युधिष्ठिरः ॥ विनीतवदुपा
गम्य तस्थौ संदर्शनेऽग्रतः ॥ अथास्य पादौ जग्राह भीष्मश्चाभिननंद तं ॥ मूर्ध्नि चैनमुपाघ्राय निषीदेत्यब्रवीत्तदा ॥ तमुवाचा
थ गांगेयो वृषभः सर्वधन्विनां ॥ मां पृच्छ तात विश्रब्धं मा भैस्त्वं कुरुसत्तम ॥ ॥इति शांतौ राजधर्मे ॥ ॥वैशंपायनः॥ ॥ ६३

प्रणिपत्य हृषीकेशमभिवाद्य पितामहं ॥ अनुमान्य गुरून्सर्वान्पर्यपृच्छद्युधिष्ठिरः ॥ ॥युधिष्ठिरः॥ ॥राज्ञां हि परमो धर्म
इति धर्मविदो विदुः ॥ महांतमेनं भारं च मन्ये तद्ब्रूहि पार्थिव ॥ राजधर्मान्विशेषेण कथयस्व पितामह ॥ सर्वस्य जीवलोकस्य रा
जधर्मः परायणं ॥ त्रिवर्गो हि समासक्तो राजधर्मेषु कौरव ॥ मोक्षधर्मश्च विस्पष्टः सकलोऽत्र समाहितः ॥ यथा हि रश्मयोऽश्व
स्य द्विरदस्यांकुशो यथा ॥ नरेंद्रधर्मो लोकस्य तथा प्रग्रहणं स्मृतं ॥ अत्र चेत्संप्रमुह्येत धर्मे राजर्षिसेविते ॥ लोकस्य संस्था
न भवेत्सर्वं च व्याकुली भवेत् ॥ उदयन्हि यथा सूर्यो नाशयेत्तामसं तमः ॥ राजधर्मास्तथालोक्यां निःक्षिपंत्यशुभां गतिं ॥ तद
ग्रे राजधर्मान्हि मदर्थे त्वं पितामह ॥ प्रब्रूहि भरतश्रेष्ठ त्वं हि धर्मभृतां वरः ॥ आगमश्च परः त्वत्तः सर्वेषां नः परंतप ॥ भवं
तं हि परं बुद्धौ वासुदेवोऽभिमन्यते ॥ ॥भीष्म उवाच ॥ ॥नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्राह्मणेभ्यो नमः कृत्वा
धर्मान्वक्ष्यामि शाश्वतान् ॥ शृणु कार्त्स्नेन मत्तस्त्वं राजधर्मान्युधिष्ठिर ॥ निरुच्यमानान्नियतो यच्चान्यदभिवांछति ॥ आ
दावेव कुरुश्रेष्ठ राज्ञा रंजनकाम्यया ॥ देवतानां द्विजानां च वर्तितव्यं यथाविधि ॥ देवतान्यर्चयित्वा हि ब्राह्मणांश्च कुरूद्वह ॥
आनृण्यं याति धर्मस्य लोकेन च समर्च्यते ॥ उत्थानेन सदा पुत्र प्रयतेथा युधिष्ठिर ॥ न ह्युत्थानमृते दैवं राज्ञामर्थं प्रसाद
येत् ॥ साधारणं द्वयं ह्येतद्दैवमुत्थानमेव च ॥ पौरुषं हि परं मन्ये दैवं निश्चित्य मुच्यते ॥ विपन्ने च समारंभे संतापं मा स्म वै कृ
थाः ॥ घटस्वैवं सदात्मानं राज्ञामेष परो नयः ॥ न हि सत्यादृते किंचिद्राज्ञां वै सिद्धिकारकं ॥ सत्ये हि राजा निरतः प्रेत्य चेह न
दंति च ॥ ऋषीणामपि राजेंद्र सत्यमेव परं धनं ॥ तथा राज्ञः परं सत्यं नान्यद्विश्वासकारणं ॥ गुणवान्शीलवान्दांतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृदुधर्मेति तं द्विषः ॥ सुदर्शनः स्वलक्ष्यश्च न प्रध्वस्तः सदा श्रियः ॥ आर्जवं सर्वकार्येषु श्रयेथाः कुरुनंदन ॥ पुनर्नयविचारेण
त्रयीसंवरणे न च ॥ मृदुर्हि राजा सततं लंघ्यो भवति सर्वशः ॥ तीक्ष्णाच्चोद्विजते लोकस्तस्मादुभयमाचर ॥ अदंड्याश्चैव ते
पुत्र विप्रास्तु वदतां वर ॥ भूतमेतत्परं लोके ब्राह्मणो नाम पांडव ॥ मनुना चैव राजेंद्र गीतौ श्लोकौ महात्मना ॥ धर्मेषु कौन
व्य हृदि तौ कर्तुमर्हसि ॥ अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं ॥ तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ अयो
हंति यदाश्मानमग्निना वारि हन्यते ॥ ब्रह्म च क्षत्रियो द्वेष्टि तदा सीदंति ते त्रयः ॥ एवं कृत्वा महाराज नमस्या एव हि द्विजाः ॥
भौमं ब्रह्म द्विजश्रेष्ठा धारयंति समर्चिताः ॥ एवं चैव नरव्याघ्र लोकत्रयविघातकाः ॥ निग्राह्या एव सततं बाहुभ्यां ये स्युरी
दृशाः ॥ श्लोकौ चोशनसा गीतौ पुरा तात महर्षिणा ॥ तौ निबोध महाराज त्वमेकाग्रमना नृप ॥ उद्यम्य शस्त्रमायांतमपि वेदां
तगं रणे ॥ निगृह्णीयात्स्वधर्मेण धर्मापेक्षी नराधिपः ॥ विनश्यमानं धर्मं हि योऽभिरक्षेत्स धर्मवित् ॥ न तेन धर्महा स स्यान्मन्यु
स्तं मन्युमृच्छति ॥ एवं चैव नरश्रेष्ठ रक्ष्या एव द्विजातयः ॥ सापराधानपि हि तान्विषयांते समुत्सृजेत् ॥ अभिशस्तमपि
ह्येषां कृपायीत विशांपते ॥ ब्रह्मघ्ने गुरुतल्पे च भ्रूणहत्ये तथैव च ॥ राजद्विष्टे च विप्रस्य विषयांते विसर्जनं ॥ विधीयते न
शारीरं दंडमेषां कदाचन ॥ दयिताश्च नरास्ते स्युर्भक्तिमंतो द्विजेषु ये ॥ न कोशः परमोऽप्यस्ति राज्ञां पुरुषसंचयात् ॥ दु
र्गेषु च महाराज षट्सु ये शास्त्रनिश्चिताः ॥ सर्वदुर्गेषु मन्यंते नरदुर्गं सुदुस्तरं ॥ तस्मान्नित्यं दया कार्या चातुर्वर्ण्ये वि ६४

पश्चिता ॥ धर्मात्मा सत्यवाक्चैव राजा रंजयति प्रजाः ॥ न च क्षांतेन ते नित्यं भाव्यं पुत्र समंततः ॥ अधर्म्यो हि मृदू राजा क्षमा
वानिव कुंजरः ॥ बार्हस्पत्ये तु शास्त्रे च श्लोको निगदितः पुरा ॥ अस्मिन्नर्थे महाराज तन्मे निगदतः शृणु ॥ क्षममाणं नृपं नि
त्यं नीचः परिभवेज्जनः ॥ हस्तियंता गजस्येव शिर एवारुरुक्षति ॥ तस्मान्नैव मृदुर्नित्यं तीक्ष्णो नैव भवेन्नृप ॥ वसंतार्क इ
व श्रीमान्न शीतो न च घर्मदः ॥ प्रत्यक्षेणानुमानेन तथौपम्यागमैरपि ॥ परीक्ष्यास्ते महाराज स्वे परे चैव नित्यशः ॥ व्यसना
नि च सर्वाणि त्यजेथा भूरिदक्षिण ॥ न चैव न प्रयुंजीत संगं तु परिवर्जयेत् ॥ नित्यं व्यसनिनो नित्यं परिभूतो भवत्युत ॥ उ
द्वेजयति लोकं चाप्यतिद्वेषी महीपतिः ॥ भवितव्यं सदा राज्ञा गर्भिणीसहधर्मिणा ॥ कारणं च महाराज शृणु येनेदमिष्य
ग ते ॥ यथा हि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगं ॥ गर्भस्य हितमाधत्ते तथा राज्ञाप्यसंशयं ॥ वर्तितव्यं कुरुश्रेष्ठ सदा धर्मानुवर्तिना ॥
स्वं प्रियं तु परित्यज्य यद्यल्लोकहितं भवेत् ॥ न संत्याज्यं च ते धैर्यं कदाचिदपि पांडव ॥ धीरस्य स्पष्टदंडस्य न भयं विद्यते क्वचि
त् ॥ परिहासश्च भृत्यैस्ते नात्यर्थं वदतां वर ॥ कर्तव्यो राजशार्दूल दोषमत्र हि मे शृणु ॥ अवमन्यंति भर्तारं संघर्षादुपजी
विनः ॥ स्वे स्थाने न च तिष्ठंति लंघयंते हि तद्वचः ॥ प्रेष्यमाणा विकल्पंते गुह्यं चाप्यनुयुंजते ॥ अयाच्यं चैव याचंते भोज्यान्या
हारयंति च ॥ क्रुध्यंति परिदीप्यंति भूमिपायाधितिष्ठते ॥ उत्कोचैर्वंचनाभिश्च कार्याण्यनुविहंति च ॥ जर्जरं चास्य विष
यं कुर्वंति प्रतिरूपकैः ॥ स्त्रीरक्षिभिश्च संसज्जंते तुल्यवेषा भवंति च ॥ वातं निष्ठीवनं चैव कुर्वते चास्य सन्निधौ ॥ निर्ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जाराजशार्दूल व्याहरंति च तद्वचः ॥ हयं वा दंतिनं चापि रथं वा नृपसत्तम ॥ अधिरोहंत्यनादृत्य हर्षले पार्थिवे मृदौ ॥ इदं
ते दुष्करं राजन्निदं ते बुद्धिचेष्टितं ॥ इदं ते सुहृदो नाम मम द्विषंति पश्चिष हताः ॥ क्रुद्धे चास्मिन् हसंत्येव न च तुष्यंति पूजि
ताः ॥ संहर्षशीलाश्च तदा भवंत्यन्योन्यकारणात् ॥ विस्रंसयंति मित्रं च विवृण्वंति च दुष्कृतं ॥ लीलया चैव कुर्वंति सावज्ञा
स्तस्य शासनं ॥ अलंकारे च भोज्ये च तथा स्नानानुलेपने ॥ हेलमाना नरव्याघ्र स्वस्थास्तस्योपशृण्वतः ॥ निंदंति स्वानधीका
रान् संत्यजंति च भारत ॥ न वृत्त्या परितुष्यंति राजदेयं हरंति च ॥ क्रीडितुं तेन चेच्छंति ससूत्रेणेव पक्षिणा ॥ अस्मत्प्रणेयो राजेति
लोके चैव वदंति च ॥ एते चैवापरे चैव दोषाः प्रादुर्भवंत्युत ॥ नृपतौ मार्दवोपेते हर्षले च युधिष्ठिर ॥ ॥ इति श्रीशांतौ राजधर्मे ॥ ॥
भीष्म उवाच ॥ ॥ नित्योद्युक्तेन वै राज्ञा भवितव्यं युधिष्ठिर ॥ प्रशास्यते न राजा हि नारीवोद्यमवर्जितः ॥ भगवानुशना चाह
श्लोकमत्र विशांपते ॥ तदेहि कमना राजन् गदतस्ते निबोध मे ॥ द्वावेतौ ग्रसते भूमिः सर्पो बिलशयानिव ॥ राजानं चाविरोद्धा
रं ब्राह्मणं चाप्रवासिनं ॥ तदेतन्नरशार्दूल हृदि त्वं कर्तुमर्हसि ॥ संधेयानपि संधत्स्व विरोध्यांश्च विरोधय ॥ सप्तांगस्य च रा
ज्यस्य वैपरीत्यं य आचरेत् ॥ गुरुर्वा यदि वा मित्रः प्रतिहंतव्य एव सः ॥ मरुत्तेन हि राज्ञायं गीतः श्लोकः पुरातनः ॥ राज्याधिका
रे राजेंद्र बृहस्पतिमते पुरा ॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ बाहोः पुत्रे
ण राज्ञा च सगरेण हि धीमता ॥ असमंजाः सुतो ज्येष्ठस्त्यक्तः पौरहितैषिणा ॥ असमंजाः सरय्वां च पौराणां बालकान् नृपा ॥ ८५

न्यमज्जयदतः पित्रा निर्भर्त्स्य स विवासितः ॥ ऋषिणोद्दालकेनापि श्वेतकेतुर्महातपाः ॥ मिथ्या विप्रानुपचरन् संत्य
क्तो दयितः सुतः ॥ लोकरंजनमेवात्र राज्ञां धर्मः सनातनः ॥ सत्यस्य रक्षणं चैव व्यवहारेषु चार्जवं ॥ न हिंस्यात्परवित्तानि
देयं काले च दापयेत् ॥ विक्रांतः सत्यवाक् क्षांतो नृपो न चलते पथः ॥ गुप्तमंत्रो जितक्रोधः शास्त्रार्थकृतनिश्चयः ॥ धर्मे
चार्थे च कामे च मोक्षे च सततं नरः ॥ त्रय्यां संवृतमंत्रस्तु राजा भवितुमर्हति ॥ वृजिनं च नरेंद्राणां नान्यच्चारक्षणात्परं ॥ चा
तुर्वर्ण्यस्य धर्माश्च रक्षितव्या महीक्षिता ॥ धर्मसंकररक्षा च राज्ञां धर्मः सनातनः ॥ न विश्वसेच्च नृपतिर्न चात्यर्थं न वि
श्वसेत् ॥ षाड्गुण्यगुणदोषांश्च स्वबुद्ध्या चावलोकयेत् ॥ द्विट्छिद्रदर्शी नृपतिर्नित्यमेव प्रशस्यते ॥ त्रिवर्गविदितार्थश्च
युक्तचारोपधिश्च यः ॥ कोशस्योपार्जनरतिर्यमवैश्रवणोपमः ॥ वेत्ता च दशवर्गस्य स्थानवृद्धिक्षयात्मनः ॥ अभृता
नां भवेद्भर्ता भृतानां चान्ववेक्षकः ॥ नृपतिः सुमुखश्च स्यात्स्मितपूर्वाभिभाषिता ॥ उपासिता च वृद्धानां जिततंद्रीरलोलु
पः ॥ सतां वृत्ते स्थितमतिः संतोप्यश्चारुदर्शनः ॥ न चाददीत वित्तानि सतां हस्तात्कदाचन ॥ असद्भ्यस्तु समादद्यात्स
द्भ्यः संप्रतिपादयेत् ॥ स्वयं प्रहर्ता दाता स्याद्वश्यात्मा वश्यसाधनः ॥ काले दाता च भोक्ता च शुद्धाचारस्तथैव च ॥ शू
रान् भक्तानसंहार्यान् कुले जातानरोगिणः ॥ शिष्टान् शिष्टाभिसंबद्धान् मानिनो नावमानिनः ॥ विद्याविदो लोक
विदः परलोकान्ववेक्षकान् ॥ धर्मेषु निरतान् साधूनचलानचलानिव ॥ सहायान् सततं कुर्याद्राजा भूतिमभिपुरस्कृ
तः ॥ तैस्तुल्यसुखभोगः स्याच्छत्रमात्राज्ञयाधिकः ॥ प्रत्यक्षा च परोक्षा च वृत्तिश्चास्य भवेत्तदा ॥ एवं कृत्वा नरेंद्रो हि न खे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्ममिह विंदति॥ सर्वाभिशंकी नृपतिर्यश्च स्यादवशेंद्रियः॥ क्षिप्रमनृजुर्लुब्धः स्वजनेनैव बध्यते॥ शुचिस्तु पृथिवी
पालो लोकचित्तग्रहे रतः॥ न पतत्यरिभिर्ग्रस्तः पतितश्चावतिष्ठते॥ अक्रोधनोप्यव्यसनी मृदुदंडो जितेंद्रियः॥ राजा भ
वति भूतानां विश्वास्यो हिमवानिव॥ प्राज्ञस्त्यागगुणोपेतः पररंध्रेषु तत्परः॥ सुदर्शः सर्ववर्णानां नयापनयवित्तथा॥
क्षिप्रकारी जितक्रोधः सुप्रसादो महामनाः॥ अरोषप्रकृतिर्युक्तः क्रियावानविकत्थनः॥ आरब्धान्येव कार्याणि न पर्य
वसितानि च॥ यस्य राज्ञः प्रदृश्यंते स राजा राजसत्तमः॥ पुत्रा इव पितुर्गेहे विषये यस्य मानवाः॥ निर्भया विचरिष्यंति स
राजा राजसत्तमः॥ अगूढविभवा यस्य पौरा राष्ट्रनिवासिनः॥ नयापनयवेत्तारः स राजा राजसत्तमः॥ स्वकर्मनि
रता यस्य जना विषयवासिनः॥ असंघातपरा दांताः पाल्यमाना यथाविधि॥ वश्या नेया विनीताश्च न च संघर्षशीलिनः॥
विषये दानरुचयो नरा यस्य स पार्थिवः॥ न यस्य कूटं कपटं न माया नैव मत्सरः॥ विषये भूमिपालस्य तस्य धर्मः

स सनातनः॥ यः सत्करोति ज्ञानानि ज्ञेयः पौरहिते रतः॥ सतां धर्मानुगस्त्यागी स राजा राज्यमर्हति॥ यस्य चाराश्च मंत्राश्च
नित्यं चैव कृताकृताः॥ न ज्ञायंते हि नृपतेः स राजा राज्यमर्हति॥ श्लोकश्चायं पुरा गीतो भार्गवेण महात्मना॥ आख्या
ने रामचरिते नृपतिं प्रति भारत॥ राजानं प्रथमं विंदेत्ततो भार्यां ततो धनं॥ राजन्यसति लोकस्य कुतो भार्या कुतो
धनं॥ तद्राजसु राजसिंहानां नान्यो धर्मः सनातनः॥ ऋते रक्षां सुविस्पष्टां रक्षा लोकस्य धारिणी॥ प्राचेतसेन मनुना ८८

श्लोकौ चेतावुदाहृतौ॥ राजधर्मेषु राजेंद्र ताविहैकमनाः शृणु॥ षडेतान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे॥ अप्रवक्तार
माचार्यमनधीयानमृत्विजं॥ अरक्षितारं राजानं भार्यां चाप्रियवादिनीं॥ ग्रामकाममेव गोपालं वनकामं च नापितं॥ ॥इति
शांतौ राजधर्मे॥ ॥भीष्म उवाच॥ एतत्ते राजधर्माणां नवनीतं युधिष्ठिर॥ बृहस्पतिर्हि भगवान्नान्यं धर्मं प्रशंस
ति॥ विशालाक्षश्च भगवान्काव्यश्चैव महातपाः॥ सहस्राक्षो महेंद्रश्च तथा प्राचेतसो मनुः॥ भरद्वाजश्च भगवांस्त
था गौरशिरा मुनिः॥ राजशास्त्रप्रणेतारो ब्राह्मणा ब्रह्मवादिनः॥ रक्षामेव प्रशंसंति धर्मं धर्मभृतां वर॥ राज्ञो राजीव
ताम्राक्ष साधनं चात्र मे शृणु॥ चारश्च प्रणिधिश्चैव काले दानममत्सरं॥ युक्त्यादानं न चादानमयोगेन युधिष्ठिर॥
सतां संग्रहणं शौर्यं दाक्ष्यं शौर्यं प्रजाहितं॥ अनार्जवैरार्जवैश्च शत्रुपक्षस्य भेदनं॥ केतनानां च जीर्णानामवेक्षं
च सीदतां॥ द्विविधस्य च दंडस्य प्रयोगः कालचोदितः॥ साधूनामपरित्यागः कुलीनानां च धारणं॥ निचयश्च नि
चेयानां सेवा बुद्धिमतामपि॥ बलानां हर्षणं नित्यं प्रजानामन्ववेक्षणं॥ कार्येष्वखेदः कोशस्य तथैव च विवर्द्धनं॥ पु
रगुप्तिरविश्वासः पौरसंघातभेदनं॥ अरिमध्यस्थमित्राणां यथावच्चान्ववेक्षणं॥ उपजापश्च भृत्यानामात्मनः पुरद
र्शनं॥ अविश्वासः स्वयं चैव परस्याश्वासनं तथा॥ नीतिधर्मानुसरणं नित्यमुत्थानमेव च॥ रिपूणामनवज्ञानं नित्यं चा
नार्यवर्जनं॥ उत्थानं हि नरेंद्राणां बृहस्पतिरभाषत॥ राजधर्मस्य यन्मूलं श्लोकांश्चात्र निबोध मे॥ उत्थानेनामृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंलब्धउत्थानेनासुराहताः॥ उत्थानेन महेंद्रेण श्रैष्ठ्यं प्राप्तं दिवीह च॥ उत्थानधीरः पुरुषो वाग्धीरानधितिष्ठति॥ उत्थान
वीरान्वाग्वीरा रमयंत उपासते॥ उत्थानहीनो राजा हि बुद्धिमानपि नित्यशः॥ धर्षणीयो रिपूणां स्याद्भुजंग इव निर्विषः॥
न च शत्रुरवज्ञेयो दुर्बलोपि बलीयसा॥ अल्पोपि हि दहत्यग्निर्विषमल्पं हिनस्ति च॥ एकांगेनापि संभूतः शत्रुर्दुर्ग
समाश्रितः॥ तं तं तापयते देशमपि राज्ञः समृद्धिनः॥ राज्ञो रहस्यं यद्वाक्यं जयार्थं लोकसंग्रहः॥ हृदि यच्चास्य जिह्म
स्यात्कारणार्थं च यद्भवेत्॥ यच्चास्य कार्यं वृजिनमार्जवेनेह निर्जयेत्॥ दंभनार्थं च लोकस्य धर्मिष्ठामाचरेत्क्रियां॥
राज्यं हि सुमहत्तंत्रं धार्यते नाकृतात्मभिः॥ न शक्यं मृदुना वोढुमायासस्थानमुत्तमं॥ राज्यं सर्वामिषं नित्यमार्जवे
नेह धार्यते॥ तस्मान्मिश्रेण सततं वर्तितव्यं युधिष्ठिर॥ यद्यप्यस्य विपत्तिः स्याद्रक्षमाणस्य वै प्रजाः॥ सोप्यस्य विपुलो
धर्म एवं वृत्ता हि भूमिपाः॥ एष ते राजधर्माणां लेशः समनुवर्णितः॥ भूयस्ते यत्र संदेहस्तद्ब्रूहि वदतां वर॥ ॥वैशं
पायनः॥ ॥ततो व्यासश्च भगवान्देवस्थानोश्म एव च॥ वासुदेवः कृपश्चैव सात्यकिः संजयस्तथा॥ साधु साध्विति
संहृष्टाः पुष्यमाणेन वै मुदा॥ अस्तुवंस्तं नरव्याघ्रं भीष्मं धर्मभृतां वरं॥ ततो दीनमना भीष्ममुवाच कुरुसत्तमः॥ ने
त्राभ्यामश्रुपूर्णाभ्यां पादौ तस्य शनैः स्पृशन्॥ श्व इदानीं स्वसंदेहं प्रक्ष्यामि त्वां पितामह॥ उपैति सविता ह्यस्तं रसंरस
मादाय पार्थिवं॥ ततो द्विजातीनभिवाद्य केशवः कृपश्च ते चैव युधिष्ठिरादयः॥ प्रदक्षिणीकृत्य महानदीसुतं ततो ६७

रथानारुरुहुर्मुदान्विताः॥ दृषद्वतीं चाप्यवगाह्य सुव्रताः कृतोदकार्याः कृतजप्यमंगलाः॥ उपास्य संध्यां विधिवत्परंत
पास्ततः पुरं ते विविशुर्गजाह्वयं॥ ॥इति श्री०शां०राजधर्मे॥ ॥वैशंपायनः॥ ॥ततः काल्यं समुत्थाय कृतपूर्वाह्णिकक्रि
याः॥ ययुस्ते नगराकारै रथैः पांडवयादवाः॥ प्रतिपद्य कुरुक्षेत्रं भीष्ममासाद्य चानघं॥ सुखां च रजनीं पृष्ट्वा गांगेयं र
थिनां वरं॥ व्यासादीनभिवाद्यर्षीन्सर्वैस्तैश्चाभिनंदिताः॥ निषेदुस्ते ततो भीष्मं परिवार्य समंततः॥ ततो राजा महा
तेजा धर्मपुत्रो युधिष्ठिरः॥ अब्रवीत्प्रांजलिर्भीष्मं प्रतिपूज्य यथाविधि॥ ॥युधिष्ठिर उवाच॥ ॥य एष राजा राजेति श
ब्दश्चरति भारत॥ कथमेष समुत्पन्नस्तन्मे ब्रूहि पितामह॥ तुल्यपाणिशिरोग्रीवस्तुल्यबुद्धींद्रियात्मकः॥ तुल्यदुः
खसुखात्मा च तुल्यमांसास्थिरोव च॥ निःश्वासोच्छ्वासतुल्यश्च तुल्यप्राणशरीरकः॥ तुल्यशुक्रास्थिमज्जश्च तु
ल्यपृष्ठमुखोदरः॥ समानजन्ममरणः समः सर्वगुणैर्नृणां॥ विशिष्टबुद्धीञ्शूरांश्च कथमेकोधितिष्ठति॥ क
थमेको महीं कृत्स्नां वीरशूरार्यसंकुलां॥ रक्षत्यपि च लोकोस्य प्रसादमभिवांछति॥ एकस्य तु प्रसादेन कृत्स्नो
लोकः प्रसीदति॥ व्याकुलेनाकुलः सर्वो भवतीति विनिश्चयः॥ एतदिच्छाम्यहं कृत्स्नं तत्त्वेन भरतर्षभ॥ श्रोतुं त
न्मे यथातत्त्वं प्रब्रूहि वदतां वर॥ नैतत्कारणमल्पं हि भविष्यति विशांपते॥ यदेकस्मिञ्जगत्सर्वं देववद्याति संन
तिं॥ ॥भीष्म उवाच॥ ॥नियतस्त्वं कुरुश्रेष्ठ शृणु सर्वमशेषतः॥ यथा राज्यं समुत्पन्नमादौ कृतयुगेभवत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

नैव राज्यं न राजासीन्न दंडो न च दांडिकः॥ धर्मेणैव प्रजाः सर्वा रक्षंति स्म परस्परं॥ पालयंतस्तथान्योन्यं नरा धर्मेण
भारत॥ खेदं परममाजग्मुस्ततस्तान्मोह आविशत्॥ ते मोहवशमापन्ना मानवा भरतर्षभ॥ प्रतिपत्तिविमोहेन
धर्मस्तेषामनीनशत्॥ नष्टायां प्रतिपत्तौ च मोहवश्या नरास्तदा॥ लोभस्य वशमापन्नाः सर्वे भरतसत्तम॥ अप्राप्तस
स्याभिमर्षं तु कुर्वतो मनुजास्ततः॥ कामो नामापरस्तत्र समपद्यत वै प्रभो॥ तांस्तु कामवशं प्राप्तान् रागो नामाभिसं
स्थितः॥ रक्ताश्च नाभ्यजानंत कार्याकार्यं युधिष्ठिर॥ अगम्यागमनं चैव वाच्यावाच्यं तथैव च॥ भक्ष्याभक्ष्यं च राजें
द्र दोषादोषं च नात्यजन्॥ विप्लुते नरलोकेस्मिंस्ततो ब्रह्म ननाश ह॥ नाशाच्च ब्रह्मणो [illegible] राजन् धर्मो नाशमुपा
गमत्॥ नष्टे ब्रह्मणि धर्मे च देवांस्त्रासः समाविशत्॥ ते त्रस्ता नरशार्दूल ब्रह्माणं शरणं ययुः॥ प्रपद्य भगवंतं
ते देवा लोकपितामहं॥ ऊचुः प्रांजलयः सर्वे दुःखवेगसमाहिताः॥ भगवन्नरलोकस्थं नष्टं ब्रह्म सनातनं॥ लोभमोहा
दिभिर्भावैस्ततो लोभं समाविशत्॥ ब्रह्मणश्च प्रणाशेन धर्मोप्यनशदीश्वर॥ ततः स्म समतां याता मर्त्यैस्त्रिभुवना
नेश्वर॥ अधो हि वर्षमस्माकं मर्त्यास्तूर्ध्वप्रवर्षिणां॥ क्रियाव्युपरमात्तेषां ततोगाधाम संशयं॥ अत्र निःश्रेयसं
यत्तद्ध्यायस्व पितामह॥ त्वत्प्रभावसमुत्थोसौ प्रभावो नो विनश्यति॥ ॥भीष्म उवाच॥ ॥तानुवाच सुरान्स
र्वान्स्वयंभूर्भगवांस्ततः॥ श्रेयोहं चिंतयिष्यामि व्येतु वो भीः सुरर्षभाः॥ ततोध्यायसहस्रस्य शतं चक्रे स्वबुद्धिजं॥ ६८

यत्र धर्मस्तथैवार्थः कामश्चैवानुवर्णितः॥ त्रिवर्ग इति विख्यातो गण एष स्वयंभुवा॥ चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः॥
मोक्षस्यापि त्रिवर्गोन्यः प्रोक्तः सत्वं रजस्तमः॥ स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दंडजः॥ आत्मा देशश्च कालश्चाप्युपायाः
कृत्यमेव च॥ सहायाः कारणं चैव षड्वर्गो नीतिजः स्मृतः॥ त्रयी चान्वीक्षिकी चैव वार्ता च भरतर्षभ॥ दंडनीतिश्च विपुला
विद्यास्तत्र निदर्शिताः॥ अमात्यरक्षाप्रणिधी राजपुत्रस्य रक्षणं॥ चारश्च विविधोपायः प्रणिधिश्च पृथग्विधः॥ साम
चोपप्रदानं च भेदो दंडश्च पांडव॥ उपेक्षा पंचमी चात्र कार्त्स्न्येन समुदाहृताः॥ मंत्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव
च॥ विभ्रमश्चैव मंत्रस्य सिध्यसिध्योश्च यत्फलं॥ संधिश्च विविधाभिख्यो हीनो मध्यस्तथोत्तरः॥ भयसंस्कारवित्ताख्यः
कार्त्स्न्येन परिकीर्तितः॥ यात्राकालाश्च चत्वारः त्रिवर्गस्य च विस्तरः॥ विजयो धर्मयुक्तश्च तथार्थविजयश्च ह॥ आ
सुरश्चैव विजयः कार्त्स्न्येन परिकीर्तितः॥ लक्षणं पंचवर्गस्य त्रिविधं चात्र वर्णितं॥ प्रकाशश्चाप्रकाशश्च दंडोथ परि
शब्दितः॥ प्रकाशोष्टविधस्तत्र गुह्यस्तु बहुविस्तरः॥ रथा नागा हयाश्चैव पादाताश्चैव पांडव॥ विष्टिर्नावश्चराश्चैव देशि
का इति चाष्टकं॥ अंगान्येतानि कौरव्य प्रकाशानि बलस्य तु॥ जंगमाजंगमाश्चोक्ताश्चूर्णयोगा विषादयः॥ स्पर्शे चाभ्य
वहार्ये चाप्युपांशुर्विविधः स्मृतः॥ अरिर्मित्रमुदासीन इत्येतेप्यनुवर्णिताः॥ कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च
ह॥ आत्मरक्षणमाश्वासः स्पशानां चान्ववेक्षणं॥ कल्पना विविधाश्चापि नृनागरथवाजिनां॥ व्यूहाश्च विविधाभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० स्या विचित्रं युद्धकौशलं ॥ उत्साताश्च युद्धं च तथैव सुपलायनं ॥ शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ ॥ ॥ नीभंडवा
६९ वा ॥ बलव्यसनमुक्तं च तथैव बलहर्षणं ॥ पीडनास्कंदकालश्च भयकालश्च पांडव ॥ तथा खातविधानं च योगसं
चार एव च ॥ चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीडनं ॥ अग्निदैर्गरदैश्चैव प्रतिरूपकचारकैः ॥ श्रेणिमुख्योपजापेन
वीरुधछेदनेन च ॥ दूषणेनापि नागानामाशंकाजननेन च ॥ आधनेन च भक्तस्य शत्रुश्चोपासनेन च ॥ सर्वं मध्यचरा रा
ज्यस्य ह्रासवृद्धिसमंजसं ॥ दूतसामर्थ्ययोगश्च राष्ट्रस्य विवर्द्धनं ॥ अरिमध्यस्थमित्राणां सम्यग्विज्ञप्रपंचनं ॥
अवमर्दप्रतीघातस्तथैव च बलीयसां ॥ व्यवहारः सुसूक्ष्मश्च तथा कंटकशोधनं ॥ श्रमव्यायामयोगश्च योगद्र
व्यस्य संचयः ॥ अभृतानां च भरणं भृतानां चान्ववेक्षणं ॥ अर्थकाले प्रदानं च व्यसने चाप्रसंगिता ॥ तथा राजगुणा
श्चैव सेनापतिगुणाश्च ये ॥ कारणं च त्रिवर्गस्य गुणदोषास्तथैव च ॥ दुष्टचिंतितं च विविधं वृत्तिश्चैवानुजीविनां ॥ शं
कितत्वं हि च सर्वस्य प्रमादस्य च वर्जनं ॥ अलब्धलाभो लब्धस्य तथैव च विवर्द्धनं ॥ प्रदानं च विवृद्धस्य पात्रेभ्यो विधि
वत्तदा ॥ विसर्गोर्थस्य धर्मार्थमर्थार्थे कामहेतुना ॥ चतुर्थो व्यसनाघाते तथैवात्रानुवर्णितं ॥ क्रोधजानि तथोग्राणि
कामजानि तथैव च ॥ दशोक्तानि कुरुश्रेष्ठ व्यसनान्यत्र चैव ह ॥ मृगयाक्षास्तथापानं स्त्रियश्च भरतर्षभ ॥ कामजान्या
हुराचार्याः शोक्तानीह स्वयंभुवा ॥ वाक्पारुष्यं तथोग्रत्वं दंडपारुष्यमेव च ॥ आत्मनो निग्रहस्त्यागोर्थदूषणमेव च ॥ ६९

यंत्राणि विविधान्येव क्रियास्तेषां च वर्णिताः ॥ अवमर्दः प्रतीघातः केतनानां च भंजनं ॥ चैत्यद्रुमाणामामर्दो रोधः कर्मानु
नाशनं ॥ अवस्कंदोथ गमनं तथोपायाश्च वर्णिताः ॥ पणवानकशंखानां भेरीणां चायुधोत्तम ॥ उपार्जनं च द्रव्याणां पर
मर्दश्च तानि षट् ॥ लब्धस्य च प्रशमनं सतां चैवानुपूजनं ॥ विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता ॥ मंगलालंभ
नं चैव शरीरस्य प्रतिक्रिया ॥ आहारयोजनं चैव नित्यमास्तिक्यमेव च ॥ एकेन च यथोत्थानं सत्यं च मधुरा गिरः ॥ उ
त्सवानां समाजानां क्रियाः केतनजास्तथा ॥ प्रत्यक्षा च परोक्षा च सर्वाधिकरणेषु च ॥ वृत्तिर्भरतशार्दूल नित्यं चैवानुवेक्ष
णं ॥ अदंड्यत्वं च विप्राणां युक्त्या दंडनिपातनं ॥ अनुजीविस्वजातिभ्यो गुणेभ्यश्च समुद्भवः ॥ रक्षणं चैव पौराणां राष्ट्र
स्य च विवर्द्धनं ॥ मंडलस्था च या चिंता राजन्द्वादशराजिका ॥ द्वासप्तति विधा चैव शरीरस्य प्रतिक्रिया ॥ देशजातिकु
लानां च धर्माः समनुवर्णिताः ॥ धर्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः ॥ उपायश्चार्थलिप्सा च विविधा भूरिद
क्षिणा ॥ मूलकर्मक्रिया चात्र माया योगश्च वर्णितः ॥ दूषणं स्रोतसां चैव वर्णितं च स्थिरांभसां ॥ यैर्यैरुपायैर्लोकि
स्तु न चलेदार्यवर्त्मनः ॥ तत्सर्वं राजशार्दूल नीतिशास्त्रेषु वर्णितं ॥ एवं कृत्वा शुभं शास्त्रं ततः स भगवान्प्रभुः ॥ देवानु
वाच संहृष्टः सर्वान् शक्रपुरोगमान् ॥ उपकाराय लोकस्य त्रिवर्गस्थापनाय च ॥ नवनीतं सरस्वत्या बुद्धिरेषा प्रभा
विता ॥ दंडेन सहिता ह्येषा लोकरक्षणकारिका ॥ निग्रहानुग्रहरता लोकाननुचरिष्यति ॥ दंडेन नीयते चेदं दंडनय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
६०

त्र

तिवा पुनः॥ दंडनीतिरिति ख्याता त्रीँल्लोकानतिवर्तति॥ षाड्गुण्यगुणसारैषा स्थास्यत्यग्रे महात्मसु॥ धर्मकामार्थमोक्षाश्च स
कला ह्यत्र कीर्तिताः॥ ततस्तां भगवान्नीतिं पूर्वं जग्राह शंकरः॥ बहुरूपो विरूपाक्षः शिवः स्थाणुरुमापतिः॥ प्रजानामायुषो ह्रासं विज्ञा
य भगवान् शिवः॥ संचिक्षेप ततः शास्त्रं संचिक्षेप पुरंदरः॥ सहस्रैः पंचभिस्तात यदुक्तं बहुदंतकं॥ अध्यायानां सहस्रैस्तु त्रिभि
रेव बृहस्पतिः॥ संचिक्षेपे सुरो बुध्या बार्हस्पत्यं यदुच्यते॥ अध्यायानां सहस्रेण काव्यः संक्षेपमब्रवीत्॥ तच्छास्त्रममितप्रज्ञो यो
गाचार्यो महायशाः॥ एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः॥ संक्षिप्तमायुर्विज्ञाय मर्त्यानां ह्रासमेव च॥ अथ देवाः समाग
म्य विष्णुमूचुः प्रजापतिं॥ एको योर्हति मर्त्येभ्यः श्रैष्ठ्यं तं वै समादिश॥ ततः संचिंत्य भगवान्देवो नारायणः प्रभुः॥ तैजसं वै विरजसं
सोसृजन्मानसं सुतं॥ विरजास्तु महाभागः प्रभुत्वं भुवि नैच्छत॥ न्यासायैवाभवद्बुद्धिः प्रणीता तस्य पांडव॥ कीर्तिमांस्तस्य पुत्रोभू
त्सोपि पंचातिगोभवत्॥ कर्दमस्तस्य तु सुतः सोप्यतप्यन्महातपः॥ प्रजापतेः कर्दमस्य त्वनंगो नाम वै सुतः॥ प्रजारक्षपिता साधु
र्दंडनीतिविशारदः॥ अनंगपुत्रोतिबलो नीतिमानभिगम्य वै॥ प्रतिपेदे महाराज्यमथेंद्रियवशोभवत्॥ मृत्योस्तु दुहिता राजन्
सुनीथा नाम मानसी॥ प्रख्याता त्रिषु लोकेषु यासौ वेणमजीजनत्॥ तं प्रजासु विधर्माणं रागद्वेषवशानुगं॥ मंत्रपूतैः कुशैर्जघ्नुरृ
षयो ब्रह्मवादिनः॥ ममंथुर्दक्षिणं चोरुमृषयस्तस्य मंत्रतः॥ ततोति विकृतो जज्ञे ह्रस्वांगः पुरुषो भुवि॥ दग्धस्थूणाप्रतीकाशो रक्ता
क्षः कृष्णमूर्धजः॥ निषीदेत्येवमूचुस्तमृषयो वेदवादिनः॥ तस्मान्निषादाः संभूताः क्रूराः शैलवनालयाः॥ ये चान्ये विंध्यनिलयाः
म्लेच्छाः शतसहस्रशः॥ भूयोस्य दक्षिणं पाणिं ममंथुस्ते महर्षयः॥ ततः पुरुष उत्पन्नो रूपेणेंद्र इवापरः॥ कवची बद्धनिस्त्रिंशः सश ६०

रः सशरासनः॥ वेदवेदांगविच्चैव धनुर्वेदे च पारगः॥ तं दंडनीतिः सकला श्रिता राजन्नरोत्तमं॥ ततस्तु प्रांजलिर्वैन्यो महर्षींस्तानु
वाच ह॥ सुसूक्ष्मा मे समुत्पन्ना बुद्धिर्धर्मार्थदर्शिनी॥ अनया किं मया कार्यं तन्मे तत्त्वेन शंसत॥ यन्मां भवंतो वक्ष्यंति कार्यमर्थ
समन्वितं॥ तदहं वै करिष्यामि नात्र कार्या विचारणा॥ तमूचुरत्र देवास्ते तथैव च परमर्षयः॥ नियतो यत्र धर्मो वै तमशंकः समा य
चर॥ प्रियाप्रिये परित्यज्य समः सर्वेषु जंतुषु॥ कामक्रोधौ च लोभं च मानं चोत्सृज्य दूरतः॥ यश्च धर्मात्प्रविचलेल्लोके कश्चन मा
नवः॥ निग्राह्यास्ते स्वबाहुभ्यां शश्वद्धर्ममवेक्षता॥ प्रतिज्ञां चाधिरोहस्व मनसा कर्मणा गिरा॥ पालयिष्याम्यहं भौमं ब्रह्म इत्ये
त्र व चासकृत्॥ यश्चात्र धर्मो नीत्युक्तो दंडनीतिव्यपाश्रयः॥ तमशंकः करिष्यामि स्ववशो न कदाचन॥ अदंड्या मे द्विजाश्चेति प्रति
जानीहि वा विभो॥ लोकं च संकरात्कृत्स्नं त्रातास्मीति परंतप॥ वैन्यस्ततस्तानुवाच देवानृषिपुरोगमान्॥ ब्राह्मणा मे महाभागा
नमस्याः पुरुषर्षभाः॥ एवमस्त्विति वैन्यस्तु तैरुक्तो ब्रह्मवादिभिः॥ पुरोधाश्चाभवत्तस्य शुक्रो ब्रह्ममयो निधिः॥ मंत्रिणो वालखि
ल्यास्तु सारस्वत्यो गणस्तथा॥ महर्षिर्भगवान्गर्गस्तस्य सांवत्सरोभवत्॥ आत्मनाष्टम इत्येव श्रुतिरेषा परा नृषु॥ उत्पन्नौ बंदि
नौ चास्य तत्पूर्वौ सूतमागधौ॥ तयोः प्रीतो ददौ राजा पृथुर्वैन्यः प्रतापवान्॥ अनूपदेशं सूताय मगधं मागधाय च॥ समतां वसु
धायाश्च स सम्यगुपपादयत्॥ वैषम्यं हि परं भूमेरासीदिति च नः श्रुतं॥ मन्वंतरेषु सर्वेषु विषमा जायते मही॥ उज्जहार ततो वैन्यः
शिलाजालान्समंततः॥ धनुःकोट्या महाराज तेन शैला विवर्धिताः॥ स विष्णुना च देवेन शक्रेणाथ विबुधैः सह॥ ऋषिभिश्च प्रजापा
लैर्ब्रह्मणा चाभिषेचितः॥ तं साक्षात्पृथिवी भेजे रत्नान्यादाय पांडव॥ सागरः सरितां भर्ता हिमवांश्चाचलोत्तमः॥ शक्रश्च ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म॰ नमस्यं प्रादात्तस्मै युधिष्ठिर॥ रुक्मं चापि महामेरुः स्वयं कनकपर्वतः॥ यक्षा राक्षसगन्धर्वाश्च भगवान्नरवाहनः॥ धर्मे चार्थे च
७१ कामे च समर्थं प्रददौ धनं॥ हया रथाश्च नागाश्च कोटिशः पुरुषास्तथा॥ प्रादुर्बभूवुर्वैण्यस्य चिंतनादेव पांडव॥ न जरा न च दुर्भि
न्ये क्षं नाधयो व्याधयस्तथा॥ सरीसृपेभ्यस्तेभ्यो न चान्योन्यात्कदाचन॥ भयमुत्पद्यते तत्र तस्य राज्ञोभिरक्षणात्॥ आपस्तस्तं
भिरे चास्य समुद्रमभियास्यतः॥ पर्वताश्च ददुर्मार्गं ध्वजसंगश्च नाभवत्॥ तेनेयं पृथिवी दुग्धा सस्यानि दशसप्त च॥ यक्षराक्ष
सनागैश्चापीप्सितं यस्य यस्य यत्॥ तेन धर्मोत्तरश्चायं कृतो लोको महात्मना॥ रंजिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते॥ ब्राह्मणा
नां क्षतत्राणात्ततः क्षत्रिय उच्यते॥ प्रथिता धनतश्चेयं पृथिवी साधुभिः स्मृता॥ स्थापनं चाकरोद्विष्णुः स्वयमेव सनातनः॥ नाति
वर्तिष्यते कश्चिद्राजंस्त्वामिति भारत॥ तपसा भगवान्विष्णुराविवेश च भूमिपं॥ देववन्नरदेवानां नमते यं जगन्नृप॥ दंडनीत्या
च सततं रक्षितव्यं नरेश्वर॥ नाधर्षयत्तथा कश्चिच्चारनित्यानुदर्शनात्॥ शुभं कर्म नरेंद्रश्च भवायोपलभ्यते॥ आत्मना कार
णैश्चैव समस्येह महीक्षितः॥ को हेतुर्यद्वशे तिष्ठेल्लोको दैवादृते गुणात्॥ विष्णोर्ललाटात्कमलं सौवर्णमभवत्तदा॥ श्रीः संभूता
यतो देवी पत्नी धर्मस्य धीमतः॥ श्रियः सकाशादर्थश्च जातो धर्मेण पांडव॥ अथ धर्मस्तथैवार्थः श्रीश्च राज्ये प्रतिष्ठिता॥ सुकृतस्य
क्षयाच्चैव स्वर्लोकादेत्य मेदिनीं॥ पार्थिवो जायते तात दंडनीतिविशारदः॥ महत्वेन च संयुक्तो वैष्णवेन नरो भुवि॥ बुध्या भवति सं
युक्तो माहात्म्यं चाधिगच्छति॥ स्थापितं च ततो देवैर्न कश्चिदतिवर्तते॥ तिष्ठत्येकस्य च वशे तं चेदनुविधीयते॥ शुभं हि कर्म राजेंद्र शु ७१
भत्वायोपलभ्यते॥ तुल्यस्यैकस्य यस्यायं लोको वचसि तिष्ठति॥ यो ह्यस्य मुखमद्राक्षीत्सौम्यं सोस्य वशानुगः॥ शुभगं चार्थवंतं च

रूपवंतं च पश्यति॥ महत्वात्तस्य दंडस्य नीतिर्विस्पष्टलक्षणा॥ नयचारश्च विपुलो येन सर्वमिदं ततं॥ आगमश्च पुराणानां मह
र्षीणां च संभवः॥ तीर्थवंशश्च वंशश्च नक्षत्राणां युधिष्ठिर॥ सकलं चातुराश्रम्यं चातुर्होत्रं तथैव च॥ चातुर्वर्ण्यं तथैवात्र चातुर्विद्यं च
कीर्तितं॥ इतिहासाश्च वेदाश्च न्यायः कृत्स्नश्च वर्णितः॥ तपो ज्ञानमहिंसा च सत्यासत्ये नयः परः॥ वृद्धोपसेवा दानं च शौचमुत्थान
मेव च॥ सर्वभूतानुकंपा च सर्वमत्रोपवर्णितं॥ भुवि वाचोगतं यच्च तच्च सर्वं समर्पितं॥ तस्मिन्पैतामहे शास्त्रे पांडवैतन्न संशयः॥ ततो
जगति राजेंद्र सततं शब्दितं बुधैः॥ देवाश्च नरदेवाश्च तुल्या इति विशांपते॥ एतत्ते सर्वमाख्यातं महत्वं प्रति राजसु॥ कार्त्स्न्येन भरत
श्रेष्ठ किमन्यदिह वर्तती॥ ॥ इति शांतौ राजधर्मे॥ ॥ वैशंपायनः॥ ॥ ततः पुनः स गांगेयमभिवाद्य पितामहं॥ प्रांजलिर्नियतो भू
त्वा पर्यपृच्छद्युधिष्ठिरः॥ के धर्माः सर्ववर्णानां चातुर्वर्ण्यस्य के पृथक्॥ चातुर्वर्ण्याश्रमाणां च राजधर्माश्च के मताः॥ केन स्विद्वर्धते
राष्ट्रं राजा केन विवर्धते॥ केन पौराश्च भृत्याश्च वर्धंते भरतर्षभ॥ कोशं दंडं च दुर्गं च सहायान्मंत्रिणस्तथा॥ ऋत्विक्पुरोहिताचा
इ र्यान्कीदृशान्वर्जयेन्नृप॥ केन विश्वसितव्यं स्यात् कस्यां चिदापदि॥ कुतो वात्मा दृढं रक्ष्यस्तन्मे ब्रूहि पितामह॥ ॥ भीष्म उवाच॥ ॥
नमो धर्माय महते नमः कृष्णाय वेधसे॥ ब्राह्मणेभ्यो नमस्कृत्य धर्मं वक्ष्यामि शाश्वतं॥ अक्रोधः सत्यवचनं संविभागः क्षमा तथा॥
प्रजनः स्वेषु दारेषु शौचमद्रोह एव च॥ आर्जवं भृत्यभरणं नवैते सार्ववर्णिकाः॥ ब्राह्मणस्य तु यो धर्मस्तं ते वक्ष्यामि केवलं॥ दममेव
महाराज धर्ममाहुः पुरातनं॥ स्वाध्यायाभ्यसनं चैव तत्र कर्म समाप्यते॥ तं चेद्वित्तमुपागच्छेद्वर्तमानं स्वकर्मणि॥ अकुर्वाणं विकु
र्माणि शांतं प्रज्ञानतर्पितं॥ कुर्वीत पत्यसंतानमथो दद्याद्यजेत च॥ संविभज्य हि भोक्तव्यं धनं सद्भिरिहेष्यते॥ परिनिष्ठितकार्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
७२

स्तु स्वाध्यायेनैव ब्राह्मणाः ॥ कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ क्षत्रियस्यापि यो धर्मस्तं ते वक्ष्यामि भारत ॥ दद्याद्रा
जन्याचेत यजेत न च याजयेत् ॥ नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ॥ नित्योद्युक्तो दस्युवधे रणे कुर्यात्पराक्रमं ॥ पि
तु क्रतुभिरीजानाः श्रुतवंतश्च भूमिपाः ॥ य एवाहवजेतारस्त एषां लोकजित्तमाः ॥ अविक्षितेन देहेन समराद्यो निवर्तते ॥ क्ष
त्रियो नास्य तत्कर्म प्रशंसंति पुराविदः ॥ एवं हि क्षत्रबंधूनां धर्ममाहुः प्रधानतः ॥ नास्य कृत्यतमं किंचिदन्यद्दस्युनिबर्हणा
त् ॥ दानमध्ययनं यज्ञो राज्ञां क्षेमो विधीयते ॥ तस्माद्राज्ञा विशेषेण योद्धव्यं धर्ममीप्सता ॥ स्वेषु धर्मेष्ववस्थाप्य प्रजाः सर्वाः
महीपतिः ॥ धर्मेण सर्वकृत्यानि शमनिष्ठानि कारयेत् ॥ परिनिष्ठितकार्यस्तु नृपतिः परिपालनात् ॥ कुर्यादन्यन्न वा कु
र्यादैंद्रो राजन्य उच्यते ॥ वैश्यस्यापीह यो धर्मस्तं ते वक्ष्यामि शाश्वतं ॥ दानमध्ययनं यज्ञः शौचेन धनसंचयः ॥ पितृव
त्पालयेद्वैश्यो युक्तः सर्वान्पशूनिह ॥ विकर्म तद्भवेदन्यत्कर्म यत्समुपाचरेत् ॥ रक्षया स हि तेषां वै महत्सुखमवाप्नुया
त् ॥ प्रजापतिर्हि वैश्याय सृष्ट्वा परिददौ पशून् ॥ ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥ तस्य वृत्तिं प्रवक्ष्यामि य
च्च तस्योपजीवनं ॥ षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं हरेत् ॥ लब्धाच्च सप्तमो भागस्तथा शृंगे कला खुरे ॥ सस्यस्यापि स
च र्वबीजानामेषा सांवत्सरी भृतिः ॥ न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ॥ वैश्ये चेच्छति नान्येन रक्षितव्याः कथंचन ॥ शू
द्रस्यापि हि यो धर्मस्तं ते वक्ष्यामि भारत ॥ प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत् ॥ तस्माच्छूद्रस्य वर्णानां परिचर्या वि ७२

धीयते ॥ तेषां शुश्रूषणाच्चैव महत्सुखमवाप्नुयात् ॥ शूद्र एतान्परिचरेत्त्रीन्वर्णाननुपूर्वशः ॥ संचयांश्च न कुर्वीत जातु शूद्रः क
थंचन ॥ पापीयान्हि धनं लब्ध्वा वशे कुर्याद्गरीयसः ॥ राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः ॥ तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्यो
पजीवनं ॥ अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते ॥ छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च ॥ यातयामानि देयानि शूद्राय प
रिचारिणे ॥ अधार्याणि विशीर्णानि वसनानि द्विजातिभिः ॥ शूद्रायैव प्रदेयानि तस्य धर्मधनं हि तत् ॥ यश्च कश्चिद्द्विजातीनां शू
द्रः शुश्रूषुराव्रजेत् ॥ कल्प्यां तस्य तु ते नाहुर्वृत्तिं धर्मविदो जनाः ॥ देयः पिंडोऽनपत्याय भर्तव्यौ वृद्धदुर्बलौ ॥ शूद्रेण न च हातव्यो
र्णा भर्ता कस्यांचिदापदि ॥ अतिरेकेण भर्तव्यो भर्ता द्रव्यपरिक्षये ॥ न हि स्वमस्ति शूद्रस्य भर्तृहार्यधनो हि सः ॥ उक्तस्त्रयाणां वर्णानां
यज्ञस्तस्य च भारत ॥ स्वाहाकारवषट्कारौ मंत्रः शूद्रेण विद्यते ॥ तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान्स्वयं ॥ पूर्णपात्रमयीमाहुः
पाकयज्ञस्य दक्षिणां ॥ शूद्रः पैजवनो नाम सहस्राणां शतं ददौ ॥ ऐंद्राग्न्येन विधानेन दक्षिणामिति नः श्रुतं ॥ ततो हि सर्ववर्णानां
षु यज्ञस्तस्यैव भारत ॥ अग्रे सर्वेषु यज्ञेषु श्रद्धायज्ञो विधीयते ॥ दैवतं हि महच्छ्रद्धा पवित्रं यजतां हि तत् ॥ दैवतं परमं विप्राः स्वेन स्वेन
परस्परं ॥ अयजन्निह सत्रैस्तैस्तैः कामैः सनातनैः ॥ संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः ॥ देवानामपि ये देवा यद्ब्रूयुस्ते प
रं हि तत् ॥ तस्माद्वर्णैः सर्वयज्ञाः संसृज्यंते न काम्यया ॥ ऋग्यजुःसामवित्पूज्यो नित्यं स्याद्देववद्द्विजः ॥ अनृग्यजुरसामा च प्राजा
पत्य उपद्रवः ॥ यज्ञो मनीषया तात सर्ववर्णेषु भारत ॥ नास्य यज्ञकृतो देवा ईहंते नेतरे जनाः ॥ तस्मात्सर्वेषु वर्णेषु श्रद्धायज्ञो विधी
यते ॥ स्वं दैवतं ब्राह्मणाः स्वेन नित्यं परान्वर्णानयजन्नेवमासीत् ॥ अधनो वितानैः संसृष्टो वैश्यब्राह्मणास्त्रिषु वर्णेषु यज्ञः स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजध मं०
७३

ष्टः ॥ तस्माद्वर्णा ऋजवो ज्ञातिवर्णाः संसृज्यन्ते तस्य विकार एव ॥ एकं साम यजुरेकं ऋचैका विप्रश्चैको निश्चये तेषु सृष्टः ॥ अत्रागा
थाः यज्ञगीताः कीर्तयन्ति पुराविदः ॥ वैखानसानां राजेन्द्र मुनीनां यष्टुमिच्छतां ॥ उदिते रुदिते चापि श्रद्दधानो जितेन्द्रियः ॥ वह्निं
जुहोति धर्मेण श्रद्धा वै कारणं महत् ॥ यस्त्वन्नमस्य तत्सर्वं पदस्कन्नं तदुत्तरं ॥ बहूनि यज्ञरूपाणि नानाकर्मफलानि च ॥ तानियः
संप्रजानाति ज्ञाननिश्चयनिश्चितः ॥ द्विजातिः श्रद्धयोपेतः स यष्टुं पुरुषोऽर्हति ॥ स्तेनो वा यदि वा पापो यदि वा पापकृत्तमः ॥ यष्टुमि
च्छति यज्ञं स साधुमेव वदंति तं ॥ ऋषयस्तं प्रशंसंति साधु चैतदसंशयं ॥ सर्वथा सर्वदा वर्णैर्यष्टव्यमिति निश्चयः ॥ नहि यज्ञस
मं किंचित्त्रिषु लोकेषु विद्यते ॥ तस्माद्यष्टव्यमित्याहुः पुरुषेणानसूयता ॥ श्रद्धापवित्रमाश्रित्य यथाशक्ति प्रयच्छति ॥ ॥ इति शां
ते राजधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ आश्रमाणां महाबाहो शृणु सत्यपराक्रम ॥ चतुर्णामपि नामानि कर्माणि च युधिष्ठिर ॥ वा
नप्रस्थं भैक्ष्यचर्यं गार्हस्थ्यं च महाश्रमं ॥ ब्रह्मचर्याश्रमं प्राहुश्चतुर्थं ब्राह्मणैर्वृतं ॥ जटाधरणसंस्कारं द्विजातित्वमवाप्य च ॥
आधानादीनि कर्माणि प्राप्य वेदमधीत्य च ॥ सदारो वाप्यदारो वा आत्मवान्संयतेंद्रियः ॥ वानप्रस्थाश्रमं गच्छेत्कृतकृत्यो गृ
हाश्रमात् ॥ तत्रारण्यकशास्त्राणि समधीत्य स धर्मवित् ॥ ऊर्ध्वरेताः प्रव्रजित्वा गच्छत्यक्षरसात्मतां ॥ एतान्येव निमित्तानि मुनीनां
मूर्ध्वरेतसां ॥ कर्तव्यानीह विप्रेण राजन्नादौ विपश्चिता ॥ चरितब्रह्मचर्यस्य ब्राह्मणस्य विशांपते ॥ भैक्ष्यचर्यास्वधीकारः प्रश
स्त इह मोक्षिणः ॥ यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः ॥ यथोपलब्धजीवी स्यान्मुनिर्दांतो जितेंद्रियः ॥ निराशीः स्यात्सम
मानी भोगो निर्विकारवान् ॥ विप्रो मोक्षाश्रमं प्राप्तो गच्छत्यक्षरसात्मतां ॥ अधीत्य वेदान्कृतसर्वकृत्यः संतानमुत्पाद्य सुखानि ७३

र्य

भुक्त्वा ॥ समाहितः प्रचरेद्दुश्चरं यो गार्हस्थ्यधर्मं मुनिधर्मदृष्टं ॥ स्वदारतुष्टः ऋतुकालगामी नियोगसेवी रशठो न जिह्मः ॥ मि
ताशनो देवपरः कृतज्ञः सत्यो मृदुश्चानृशंसः क्षमावान् ॥ दांतो विधेयो हव्यकव्ये प्रमत्तो यानस्य दाता सततं द्विजेभ्यः ॥ अमत्स
री सर्वलिंगी प्रदाता वैतानिनित्यश्च गृहाश्रमी स्यात् ॥ अथात्र नारायणगीतमाहुर्महर्षयस्तात महानुभावाः ॥ महार्थमत्यर्थतपः
प्रयुक्तं तदुच्यमानं हि मया निबोध ॥ सत्यार्जवं चातिथिपूजनं च धर्मस्तथार्थश्च रतिश्च दारैः ॥ निषेवितव्यानि सुखानि लोके ह्य
स्मिन्परे चैव मतं ममैतत् ॥ भरणं पुत्रदाराणां वेदानां धारणं तथा ॥ वसतामाश्रमं श्रेष्ठं वदंति परमर्षयः ॥ एवं हि यो ब्राह्मणो
यज्ञशीलो गार्हस्थ्यमध्यावसते यथार्थवत् ॥ गृहस्थवृत्तिं प्रविशोध्य सम्यक् स्वर्गे विशुद्धं फलमाप्नुते सः ॥ तस्य देहपरित्या
गादिष्टाः कामाक्षया मताः ॥ आनंत्यायोपतिष्ठंति सर्वतोक्षिशिरोमुखाः ॥ स्मरन्नेको जपन्नेकः सर्वानेव युधिष्ठिर ॥ एक
स्मिन्नेव वाचार्ये शुश्रूषुर्मलपंकवान् ॥ ब्रह्मचारी व्रती नित्यं नित्यं दीक्षापरो वशी ॥ शतिचापरियथावेदं कृत्यं कुर्वन्वसेत्स
दा ॥ शुश्रूषां सततं कुर्वन्गुरोः संप्रणमेत च ॥ षट्कर्मसु निवृत्तश्च न प्रवृत्तश्च सर्वशः ॥ न चरत्यधिकारेण सेवेत द्विषतो न च ॥
एषोऽश्रमपदस्तात ब्रह्मचारिण इष्यते ॥ ॥ इति शांतौ राजधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ शिवान्सुखान्महोदर्कानहिंस्रा
न्लोकसंमतान् ॥ ब्रूहि धर्मान्सुखोपायान्मद्विधानां सुखावहान् ॥ ॥ भीष्म उवाच ॥ ॥ ब्राह्मणस्य तु चत्वार आश्रमा
विहिताः प्रभो ॥ वर्णास्तान्नानुवर्तंते त्रयो भरतसत्तम ॥ उक्तानि कर्माणि बहूनि राजन्स्वर्ग्याणि राजन्यपरायणानि ॥ नेमा
नि दृष्टांतविधौ स्मृतानि क्षात्रे हि सर्वं विहितं यथावत् ॥ क्षात्राणि वैश्यानि च सेवमानः शौद्राणि कर्माणि च ब्राह्मणः सन् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मिंल्लोके निंदितो मेदचेताः परेत्र लोके निरयं प्रयाति ॥ यासंज्ञा विहिता लोके दासे शुनि वृके पशौ ॥ विकर्मणि स्थिते विप्रे सैव
संज्ञा च पांडव ॥ षड्कर्मसंप्रवृत्तस्य आश्रमेषु चतुर्ष्वपि ॥ सर्वधर्मोपपन्नस्य संभूतस्य कृतात्मनः ॥ ब्राह्मणस्य विशुद्धस्य तपस्यभि
न तस्य च ॥ निराशिषो वदान्यस्य लोका ह्यक्षरसंमिताः ॥ यो यस्मिन्कुरुते कर्म यादृशं येन यत्र च ॥ तादृशं तादृशेनैव स गुणं प्रतिप
द्यते ॥ वृध्या कृषि वणिक्क्रेनजीवसंजीवनेन च ॥ वेत्तुमर्हसि राजेंद्र स्वाध्याय गणितं महत् ॥ कालसंचोदितं लोकः कालपर्याय
निश्चयः ॥ उत्तमाधममध्यानि कर्माणि कुरुते वशः ॥ अंतवंति प्रधानानि प्रेत्य श्रेयस्कराणि च ॥ स्वकर्मनिरतो लोको ह्यक्षरः स
र्वतोमुखः ॥ ॥ शांतौ राजधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ ज्याकर्षणं शत्रुनिबर्हणं च कृषिर्वणिज्या पशुपालनं च ॥ शुश्रूषणं चा
पि तथार्थहेतोरकार्यमेतत्परमं ब्राह्मणस्य ॥ सेव्यं तु ब्रह्म षट्कर्म गृहस्थेन मनीषिणा ॥ कृतकृत्यस्य चारण्ये वासो विप्रस्य श
स्यते ॥ राजप्रेष्यं कृषिधनं जीवनं च वणिज्यया ॥ कौटिल्यं कौलटेयं च कुसीदं च विवर्जयेत् ॥ शूद्रो राजन्भवति ब्रह्मबंधुर्दुश्च
रित्रो यश्च धर्मादपेतः ॥ वृषलीपतिः पिशुनो नर्तनश्च ग्रामप्रेष्यो यश्च भवेद्विधर्मा ॥ निर्मर्यादो वा शुचौ क्रूरवृत्तो हिंसारतः त्यक्त
धर्मस्ववृत्तः ॥ हव्यं कव्यं यानि चान्यानि राजन्नदेयान्यदेयानि भवंति चास्मै ॥ तस्माद्धर्मो विहितो ब्राह्मणस्य दमः शौचं मार्दवं चा
पि राजन् ॥ तथा विप्रस्याश्रमाः सर्व एव पुरा राजन्ब्रह्मणा वै निसृष्टाः ॥ यस्तु दांतः सोमपश्चार्यशीलः सानुक्रोशः सर्वस
हो निराशीः ॥ ऋजुर्मृदुरनृशंसः क्षमावान्स वै विप्रो नेतरः पापकर्मा ॥ शूद्रं वैश्यं राजपुत्रं च राजन्लोकाः सर्वे संश्रिताः सर्वका ७४
माः ॥ तस्माद्वर्णंतानि धर्मान्विसृज्य नास्मिन्विष्णुस्तिष्ठति पांडुपुत्र ॥ नेकश्चार्थं सबलो कस्य नस्याच्चातुर्वर्ण्यं वेदवादाश्च न

स्युः ॥ सर्वाश्चेज्याः सर्वलौकिक्याश्च सद्यः सर्वे चाश्रमस्थाः नवेस्युः ॥ यश्च त्रयाणां वर्णानामिच्छेदाश्रमसेवनं ॥ चतुराश्रमदृ
ष्टाश्च धर्मास्तांश्च शृणु भारत ॥ शुश्रूषाकृतकार्यस्य कृतसंतानकर्मणः ॥ अभ्यनुज्ञातराजस्य शूद्रस्य जगतीपते ॥ अल्पां स
तरगतस्यापि दशधर्मगतस्य वा ॥ आश्रमा विहिताः सर्वे वर्जयित्वा निराशिषं ॥ भैक्षचर्यां ततः प्राहुस्तस्य तद्धर्मचारिणः ॥
तथा वैश्यस्य राजेंद्र राजपुत्रस्य चैव हि ॥ कृतकृत्यो वयोतीतो राज्ञः कृतपरिश्रमः ॥ वैश्यो गच्छेदनुज्ञातो नृपेणाश्रमसं
श्रयं ॥ विदानधीत्य धर्मेण धर्मे पावदतो नव ॥ संतानादीनि कर्माणि कृत्वा सोमं निषेव्य च ॥ पालयित्वा प्रजाः सर्वा धर्मेण वदतां व
र ॥ राजसूयाश्वमेधादीन्मखानन्यांस्तथैव च ॥ आनयित्वा यथापाठं विप्रेभ्यो दत्तदक्षिणः ॥ संग्रामे विजयं प्राप्य त
थाल्पं यदि वा बहु ॥ स्थापयित्वा प्रजापालं पुत्रं राज्ये च पांडव ॥ अन्यगोत्रप्रशस्तं वा क्षत्रियं क्षत्रियर्षभ ॥ अर्चयित्वा पि
दे तृन्सम्यक् पितृयज्ञैर्यथाविधि ॥ देवान्यज्ञैरृषीन्वेदैरर्चयित्वा च यत्नतः ॥ अंतकाले च संप्राप्ते य इच्छेदाश्रमांतरं ॥ सो
नुपूर्व्याश्रमान्राजन्गत्वा सिद्धिमवाप्नुयात् ॥ राजर्षित्वेन राजेंद्र भैक्ष्यचर्यनिसेवया ॥ अपेतगृहधर्मोपि चरेज्जीवितकां
क्षया ॥ न चैतन्नैष्ठिकं कर्म त्रयाणां भूरिदक्षिण ॥ त्रयाणां राजशार्दूल प्राहुराश्रमवासिनां ॥ बाहुवीर्यं क्षत्रिये मानवानां
लोकश्रेष्ठं धर्ममासेवमानैः ॥ सर्वे धर्माः सोपधर्मास्त्रयाणां राज्ञो धर्मादिति धर्मानुशुश्रुम ॥ यथा राजन्हस्तिपदे पदानि
संलीयंते सर्वसत्वोद्भवानि ॥ एवं धर्मान्राजधर्मेषु सर्वान्सर्वावस्थं संप्रलीनान्निबोध ॥ अल्पाश्रयानल्पफलान्वदंति
धर्मानन्यान्धर्मविदो मनुष्याः ॥ महाश्रयं बहुकल्याणरूपं क्षात्रं धर्मं नेतरं प्राहुरार्याः ॥ सर्वे धर्माः क्षत्रधर्मप्रधानाः सर्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्माः पार्थ्यमाना भवंति॥ सर्वत्यागो राज्यधर्मेषु राज्यत्यागो धर्मे चाहुरग्र्यं पुराणं॥ मज्जेत्त्रयी दंडनीतौ हतायां सर्वे धर्माः प्रक्षयेयु
र्विधियाः॥ सर्वे धर्माश्चाश्रमाणां हताः स्युः क्षात्रे त्यक्ते राजधर्मे पुराणे॥ सर्वे त्यागा राजधर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु चोक्ताः॥
सर्वा विद्या राजधर्मेषु युक्ताः सर्वे लोका राजधर्मे प्रविष्टाः॥ यथा जीवाः प्राकृतैर्वध्यमाना धर्मश्च्युतानामुपजीवनाय॥ एवं धर्मा
राजधर्मैर्विमुक्ताः संचिंतयंतो नाद्रियंते स्वधर्मं॥ ॥भीष्म उवाच॥ ॥चातुराश्रम्यधर्माश्च जातिधर्माश्च पांडव॥ लोकपालोत्तराश्चैव
क्षात्रे धर्मे समाहिताः॥ सर्वाण्येतानि धर्माणि क्षात्रे भरतसत्तम॥ निराशिषो जीवलोके क्षात्रे धर्मे व्यवस्थिताः॥ अप्रत्यक्षं ब
प हुद्वारं धर्ममाश्रमवासिनां॥ प्ररूपयंति तद्भावमागमैरेव शाश्वतं॥ अपरे वचनैः पुण्यैर्वादिनां लोकनिश्चयं॥ अनिश्चयज्ञा
धर्माणामदृष्टांते परे हताः॥ प्रत्यक्षसुखभूयिष्ठमात्मसाक्षिकमच्छलं॥ सर्वलोकहितं धर्मं क्षत्रियेषु प्रतिष्ठितं॥ धर्माश्रम
व्यवासीनां ब्राह्मणानां युधिष्ठिर॥ यथा त्रयाणां वर्णानां संख्यातोपश्रुतिः पुरा॥ राजधर्मेष्वनुत्तमा लोकाः सुचरितैरिह॥ उदाहृ
तं ते राजेंद्र यथा विष्णुं महौजसं॥ सर्वभूतेश्वरं देवं प्रभुं नारायणं पुरा॥ जग्मुः सुबहवः शूरा राजानो दंडनीतये॥ एकैकमात्मनः
कर्म तुलयित्वाश्रमं पुरा॥ राजानः पर्युपासंते दृष्टांतवचने स्थिताः॥ साध्या देवा वसवश्चाश्विनौ च रुद्राश्च विश्वे मरुतां गणाश्च॥
सृष्टाः पुरा ह्यादिदेवेन देवाः क्षात्रे धर्मे वर्तयंते च सिद्धाः॥ अत्र ते वर्तयिष्यामि धर्ममर्थविनिश्चयं॥ निर्मर्यादे वर्तमाने दानवै
कार्णवीकृते॥ बभूव राजा राजेंद्र मांधाता नाम वीर्यवान्॥ पुरा वसुमतीपालो यज्ञं चक्रे दिदृक्षया॥ अनादिमध्यनिधनं देवं नाराय ७५
णं प्रभुं॥ स राजा राजशार्दूल मांधाता परमेश्वरं॥ जगाम शिरसा पादौ यज्ञे विष्णोर्महात्मनः॥ दर्शयामास तं विष्णू रूपमास्थाय

वासवं॥ स पार्थिवैर्वृतः सद्भिरर्चयामास तं प्रभुं॥ तस्य पार्थिवसिंहस्य तस्य चैव महात्मनः॥ संवादोयं महानासीद्विष्णुं प्रति महा
द्युतिं॥ ॥इंद्र उवाच॥ ॥किमिष्यते धर्मभृतां वरिष्ठ यद्द्रष्टुकामोसि तमप्रमेयं॥ श्रुतं तमायामितसत्त्ववीर्यं नारायणं ह्यादिदेवं
पुराणं॥ नासौ देवो विश्वरूपो मयापि शक्यो द्रष्टुं ब्रह्मणा वापि साक्षात्॥ येन्ये कामास्तव राजन्हृदिस्था दास्ये वैतांस्त्वं हि मर्त्येषु रा
जा॥ सत्ये स्थितो धर्मपरो जितेंद्रियो वीरो दृढप्रीतिरतः सुराणां॥ बुद्ध्या भक्त्या चोत्तमः श्रद्धया च ततस्तेहं ददानि वरान्यथेष्टं॥
॥ ॥मांधातोवाच॥ ॥असंशयं भगवन्नादिदेवं द्रक्ष्यामि तेहं शिरसा प्रसाद्य॥ त्यक्त्वा कामान्धर्मकामो ह्यरण्यमिच्छाम्यहं तु
सत्पथं लोकजुष्टं॥ क्षात्राद्धर्माद्विपुलादप्रमेयाल्लोकाः प्राप्ताः स्थापितं स्वं यशश्च॥ धर्मो योसावादिदेवात्प्रवृत्तो लोकश्रेष्ठं त
न्न जानामि कर्तुं॥ ॥इंद्र उवाच॥ ॥असैनिका धर्मपराश्च धर्मे परां गतिं नयति ह्ययुक्तं॥ क्षात्रो धर्मो ह्यादिदेवात्प्रवृत्तः पश्चा
दन्ये शेषभूताश्च धर्माः॥ शेषाः सृष्टाः ह्यंतवंतो ह्यनंताः सुप्रस्थानाः क्षात्रधर्मा विशिष्टाः॥ अस्मिन्धर्मे सर्वधर्माः प्रविष्टास्त
स्माद्धर्मं श्रेष्ठमिमं वदंति॥ कर्मणा वै पुरा देवा ऋषयश्चामितौजसः॥ त्राताः सर्वे प्रसाध्यारीन्क्षात्रधर्मेण विष्णुना॥ य
दि ह्यसौ भगवान्नाहनिष्यद्रिपून्सर्वान्वसुमानप्रमेयः॥ न ब्राह्मणा न च लोकादिकर्ता नायं धर्मो नादिधर्मो भविष्यत्॥
इमामुर्वीं राजइष्यद्विक्रमेणादेवश्रेष्ठोसौ पुरा चेदप्रमेयः॥ चातुर्वर्ण्यं चातुराश्रम्यधर्माः सर्वे न स्युर्ब्रह्मणानां विनाशा
त्॥ न स्युर्धर्माः शतधा शाश्वतेन क्षात्रेणाधर्मेणापुनः प्रवृद्धाः॥ युगे युगे ह्यादिधर्माः प्रवृत्ता लोकज्येष्ठं क्षात्रधर्मं वदं
ति॥ आत्मत्यागः सर्वभूतानुकंपा लोकज्ञानं पालनं मोक्षणं च॥ विषण्णानां पीडितानां क्षात्रे धर्मे विद्यते पार्थिवानां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्मर्यादाः काममन्युप्रवृत्ता भीता राज्ञो नाधिगच्छंति पापं ॥ शिष्टाश्चान्ये सर्वधर्मोपपन्नाः साध्वाचाराः साधुधर्मं वदंति ॥
पुत्रवत्पाल्यमाना नि राजधर्मेण पार्थिवैः ॥ लोके भूतानि सर्वाणि चरंते नात्र संशयः ॥ सर्वधर्मात्परं क्षात्रं लोकश्रेष्ठं सना
तनं ॥ अश्वदक्षरपर्यंतमक्षरं सर्वतोमुखं ॥ ॥ शांतौ राजधर्मे ॥ ॥ इंद्र उवाच ॥ एवं वीर्यः सर्वधर्मोपपन्नः क्षात्रः श्रेष्ठः
सर्वधर्मेषु धर्मः ॥ पाल्यो युष्माभिर्लोकहितैरुदारैर्विपर्यये स्यादभावः प्रजानां ॥ भूसंस्कारं राजसंस्कारयोगमभैक्ष्य
चर्यां पालनं प्रजानां ॥ विद्याद्राजा सर्वभूतानुकंपां देहत्यागं चाहवे धर्ममग्र्यं ॥ त्यागं श्रेष्ठं मुनयो वै वदंति सर्वश्रेष्ठं यः शरी
रं त्यजेत ॥ नित्यं युक्ता राजधर्मेषु सर्वे प्रत्यक्षं ते भूमिपाला यथैव ॥ बहुश्रुत्या गुरुशुश्रूषया च परस्परासंहननाद्व
दंति ॥ नित्यं धर्मं क्षत्रियो ब्रह्मचारी चरेदेको ह्याश्रमं सर्वकालं ॥ सामान्यार्थे व्यवहारे प्रवृत्ते प्रियाप्रिये वर्जयेन्नेव य
त्नात् ॥ चातुर्वर्ण्यस्थापनात्पालनाच्च तैस्तैर्योगैर्नियमैरौरसैश्च ॥ सर्वोद्योगैराश्रमं धर्ममाहुः क्षात्रं ज्येष्ठं सर्वधर्मोपपन्नं ॥
स्वं स्वं धर्मं येन चरंति वर्णास्तांस्तान्धर्मान्नयथार्थान्वदंति ॥ निर्मर्यादान्नित्यमर्थे निविष्टानाहुस्तान्वै पशुभूतान्मनु
ष्यान् ॥ यथा नीतिं गमयत्यर्थयोगाच्छ्रेयस्तस्मादाश्रमात्क्षत्रधर्मः ॥ त्रैविद्यानां या गतिर्ब्राह्मणानां या चैवोक्ताश्चाश्र ला
मा ब्राह्मणानां ॥ एतत्कर्म ब्राह्मणस्याहुरग्र्यमन्यत्कर्म शूद्रवच्छस्त्रवध्यः ॥ चातुराश्रम्यधर्माश्च वेदधर्माश्च पार्थि
व ॥ ब्राह्मणेनानुगंतव्या नान्यो विद्यात्कदाचन ॥ अन्यथा वर्तमानस्य नासौ वृत्तिः प्रकल्प्यते ॥ कर्मणा वर्द्धते धर्मो ७६

यथा धर्मस्तथैव सः ॥ यो विकर्मस्थितो विप्रो न स संमानमर्हति ॥ कर्मस्वं नोपयुंजानमविश्वास्यं हि तं विदुः ॥ ते धर्माः स
र्वधर्मेभ्यो लीनाऽरूव्या क्षत्रिये रेषु धर्मः ॥ तस्माज्ज्येष्ठा राजधर्मा न चान्ये वीरज्येष्ठा वीरधर्मा मतो मे ॥ ॥ मांधातोवाच
॥ ॥ यवनाः किराता गांधाराश्चीना शबरबर्बराः ॥ शकास्तुषाराः कंकाश्च पह्लवाश्चांध्रमद्रकाः ॥ पुंड्राः पुलिंदाः रमठाः कां
बोजाश्चैव सर्वशः ॥ ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः ॥ कथं धर्मं चरिष्यंति सर्वे विषयवासिनः ॥ मद्विधैश्च
कथं स्थाप्याः सर्वे ते दस्युजीविनः ॥ एतदिच्छाम्यहं श्रोतुं भगवंस्तद्ब्रवीहि ते ॥ त्वं बंधुभूतो ह्यस्माकं क्षत्रियाणां सुरेश्वर ॥
॥ ॥ इंद्र उवाच ॥ ॥ मातापित्रोर्हि शुश्रूषा कर्त्तव्या सर्वदस्युभिः ॥ आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनां ॥ भूमि
पानां च शुश्रूषा कर्त्तव्या सर्वदस्युभिः ॥ वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ॥ पितृयज्ञास्तथा कूपाः प्रपाश्च श
यनानि च ॥ दानानि च यथाकालं द्विजेभ्यो विसृजेत्सदा ॥ अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनं ॥ भरणं पुत्रदा
राणां शौचमद्रोह एव च ॥ दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता ॥ पाकयज्ञा महार्हाश्च दातव्याः सर्वदस्युभिः ॥
एतान्येवंप्रकाराणि विहितानि पुरानघ ॥ सर्वलोकस्य कर्माणि कर्त्तव्यानीह पार्थिव ॥ ॥ मांधातोवाच ॥ ॥ दृश्यं
ते मानुषे लोके सर्ववर्णेषु दस्यवः ॥ लिंगांतरे वर्तमाना आश्रमेषु चतुर्ष्वपि ॥ ॥ इंद्र उवाच ॥ ॥ विनष्टायां दंडनीत्यां
राजधर्मे निराकृते ॥ संप्रमुह्यंति भूतानि राजदौरात्म्यतो नृप ॥ असंख्याता भविष्यंति भिक्षवो लिंगिनस्तथा ॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रमाणां विकल्पश्च निवृत्तेस्मिन् कृते युगे॥ अभावो नाशः पुनाणां धर्माणां प्रवराशी॥ उत्पथं प्रति पद्यंते कामाम् युस
मीरिताः॥ यदानि वर्त्यंते पापो देड़नीत्या महाम्नतिः॥ तदाघर्मा न चल्लते संभृतः शाश्वतः पनः॥ सर्वलोकगुरुं चैवं यो
वमन्यते॥ न तस्य दत्तं न हुतं न श्राद्धं फलते क्वचित्॥ मनुष्याणामधिपतिं देवभूतं महाद्युतिं॥ देवापि नावमन्यंते धर्म
कामं नरेश्वरं॥ प्रजापतिर्हि भगवान्सर्वं चैवासृजज्जगत्॥ स प्रवृत्ति निवृत्यर्थं धर्माणां क्षत्रमिच्छति॥ प्रवृत्तस्य हि
धर्मस्य बुध्यापः स्मरते गतिं॥ स मे मान्यश्च पूज्यश्च तत्र क्षात्रं प्रतिष्ठितं॥ ॥भीष्म उवाच॥ ॥एवमुक्तः स भगवान्
मनुष्प्रा वृतः प्रभुः॥ जगाम भगवद्विष्णोरक्षरं परमं पदं॥ एवं प्रवर्त्तिते चक्रे पुनरनुचरिते न घा नूःक्षत्रमनुमन्येत चेते
नावान् वहुश्रुतः॥ श्रुत्यायेन प्रवृत्तानि भूतानि च तथैव च॥ श्रांतरा विलयं यांति स्पाथा पथिविचक्षुषः॥ आदौ प्रवर्त्तिते च
क्रे तथैवादि प्रायणे॥ वर्त्तस्व पुरुषव्याघ्र संविजानामि तेनघ॥ ॥शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ श्रुतं ते कथि
ताः पूर्वं चत्वारो मानवाः श्रमाः॥ व्याख्यातघित्वाव्याख्यानमेषामाचक्ष्व पृच्छतः॥ ॥भीष्म उवाच॥ ॥विहितास्सर्व एवेह
धर्माः स्तव युधिष्ठिर॥ यथा मम महाबाहो विदिताः साधुसंमताः॥ यत्तु लिंगांतरगतं पृच्छसे मां युधिष्ठिर॥ धर्मान्त
धर्मसंभूतां श्रेयसंनिबोध नराधिपः॥ सर्वाण्येतानि कौंतेय विधंते मनुजर्षभ॥ साध्वाचारप्रवृत्तानां चातुराश्रम्य कर्मणां॥
॥अकामद्वेषयुक्तस्य दंडनीत्या युधिष्ठिर॥ समदर्शिन श्रभूतेषु भैक्ष्याश्रमपदं भवेत्॥ महान्दुजयतो निसंसंविभागिन

पांडव॥ सर्वतस्तस्य कौंतेय भैक्ष्याश्रमपदं भवेत्॥ वेत्ति दानं विसर्गं च निग्रहानुग्रहौ तथा॥ यथोक्तवृत्तिर्धीरस्य क्षेमाश्रम
पदं भवेत्॥ ज्ञातिसंबंधिमित्राणि व्यापन्नानि युधिष्ठिर॥ समभ्युद्धरमाणस्य दीक्षाश्रमपदं भवेत्॥ लोकमुख्येषु सत्का
रं लिंगसरव्येषु चासकृत्॥ कुर्वतस्तस्य कौंतेय वन्याश्रमपदं भवेत्॥ आह्निकं पितृयज्ञांश्च भूतयज्ञांश्च मानुषान्॥ म
हति परराष्ट्राणां शिष्टार्थं सत्यविक्रम॥ कुर्वतां पुरुषव्याघ्र वन्याश्रमपदं भवेत्॥ पालनात्सर्वभूतानां स्वराष्ट्रपरिपाल
नात्॥ दीक्षा वहुविधा राजन्सत्याश्रमपदं भवेत्॥ विद्याध्ययननित्यत्वं क्षमा याचार्यपूजनं॥ तथोपाध्यायशुश्रूषा ब्रह्मा
श्रमपदं भवेत्॥ आह्निकं जपमानस्य देवान्यजतः सदा॥ धर्मेण पुरुषव्याघ्र धर्माश्रमपदं भवेत्॥ मृत्युर्वा रक्षणं वेति
यस्य धर्मे विनिश्चयः॥ प्राणद्यूते ततस्तस्य ब्रह्माश्रमपदं भवेत्॥ अजिह्ममशठं मार्गं वर्तमानस्य भारत॥ सर्वदा सर्व
भूतेषु ब्रह्माश्रमपदं भवेत्॥ वानप्रस्थेषु विप्रेषु त्रैविध्येषु च भारत॥ प्रयतो धीरविपुलान्वन्याश्रमपदं भवेत्॥ सर्व
भूतेष्वनुक्रोशं कुर्वतस्तस्य भारत॥ आनृशंस्यप्रवृत्तस्य सर्वावस्थं पदं भवेत्॥ बलवृद्धेषु भूतेषु परित्राणं कुरूद्वह॥
शरणागतस्य कौंतेय कुर्वन्गार्हस्थ्यमाविशेत्॥ चराचराणां भूतानां रक्षणं चापि सर्वशः॥ यथार्हपूजां च तथा कुर्वन्
गार्हस्थ्यमावसेत्॥ ज्येष्ठानुज्येष्ठपत्नीनां भ्रातृपुत्रपिवनसत्करणं॥ निग्रहानुग्रहो पार्थ गार्हस्थ्यमिति तत्तपः॥ साधू
नामर्चनीयानां पूजामुविहितात्मनां॥ पालनं पुरुषव्याघ्र गार्हस्थ्याश्रमपदं भवेत्॥ आश्रमस्थानि भूतानि यस्तु वेश्मनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यमानत ॥ अरदीते ह्यभो ज्येनत कृष्णा हस्तिकं युधिष्ठिर ॥ ये स्थितः पुरुषो धर्मे विधिना सृष्टे यथार्थवत् ॥ आश्रमाणां हि सर्वेषां फल
प्राप्नोत्यनुत्तमं ॥ यस्मिन्न नश्यति गुणाः कौंतेय पुरुषेषु सदा ॥ आश्रमस्थं तमप्याहुर्नरश्रेष्ठं युधिष्ठिर ॥ स्थानमानं कुलेमानं
वयोमानं वयोमानं तथैव च ॥ पालयन्पुरुषव्याघ्र राजा सर्वाश्रमी भवेत् ॥ कालविभक्तिं भूतानामुपाहारांस्तथैव च ॥ अर्हया-
न्पुरुषव्याघ्र साधूनामाश्रमो भवेत् ॥ कालेविभूतिं भूतानामुपाहारांस्तथैव च ॥ अर्हयन्पुरुषव्याघ्र साधूनामाश्रमो भवे
त् ॥ देशाधर्मीत श्चापि यो धर्मे प्रत्यवेक्षते ॥ सर्वलोकस्य कौंतेय राजा भवति सोऽश्रमी ॥ ये धर्मकुशलाल्लोके धर्मं कुर्वंति भा
रत ॥ पालिता यस्य विषयेऽधर्मांशस्तस्य भूपतेः ॥ धर्मकामान्धर्मपरान्न येन रक्षंति पार्थिवाः ॥ मनवान्पुरुषव्याघ्र तेषां
पापं हरंति ते ॥ ये चाप्यत्र सहायास्युः पार्थिवानां युधिष्ठिर ॥ ते चैवांशहराः सर्वे धर्मे परकृते न च ॥ सर्वाश्रमपदेप्याहुर्गार्हस्थ्यं
दीप्तनिर्णयं ॥ पावनं पुरुषव्याघ्र यं धर्मं पर्युपास्महे ॥ आत्मोपमस्तु भूतेषु यो वै भवति मानवः ॥ न्यस्तदंडो जितक्रोधः प्रेत्येह
लभते सुखं ॥ धर्मे स्थिता सत्ववीर्या धर्मसेतुवदानका ॥ त्यागवंता धगाशीशा नेकतां संतारयिष्यति ॥ यदानिर्वृत्तः सर्वस्मात्का
मो यस्य हृदि स्थितः ॥ तदा भवति सत्वस्थस्ततो ब्रह्म समश्नुते ॥ सुप्रसन्नस्तु भावेन योगेन च नराधिप ॥ धर्मं पुरुषशार्दूल
प्राप्स्यसे पालनेरतः ॥ वेदाध्ययनशीलानां विप्राणां साधुकर्मणां ॥ पालने यत्नमातिष्ठ सर्वलोकस्य चैव ह ॥ वने चरंति यंध
ममाश्रमे च भानत ॥ रक्षणात्तच्छतगुणं धर्मं प्राप्नोति भारत ॥ एष ते विविधो धर्मः पांडवश्रेष्ठ कीर्तितः ॥ अनुतिष्ठ त्वमेवैनं पू
र्वं धर्मं सनातनं ॥ चातुराश्रम्यमेकाग्रं चातुर्वर्ण्यं च पांडव ॥ धर्मं पुरुषशार्दूल प्राप्स्यसे पालनेरतः ॥ ॥ इति शां॰ ॥ तौ राजधर्मे ॥ ७८

॥ ॥ युधिष्ठिर उवाच ॥ ॥ चातुराश्रम्यमुक्तं ते चातुर्वर्ण्यं तथैव च ॥ राष्ट्रस्य तत्कृत्यतमं तन्मे ब्रूहि पितामह ॥ ॥ भीष्म उवाच
॥ ॥ राष्ट्रस्यैतत्कृत्यतमं राज्ञ एवाभिषेचनं ॥ अनिंद्रमबलं राष्ट्रं दस्यवोऽभिभवंत्युत ॥ अराजकेषु देशेषु धर्मो न व्यवति
ष्ठते ॥ परस्परं च खादंति सर्वथा धिगराजकं ॥ इंद्रमेव प्रवृणुते यद्राजानमिति श्रुतिः ॥ यथैवेंद्रस्तथा राजा संपूज्यो भूति
मिच्छता ॥ नाराजकेषु राष्ट्रेषु हव्यमग्निर्वहत्युत ॥ अथ चेदभिवर्तेत राज्यार्थी बलवत्तरः ॥ अराजकानि राष्ट्राणि हतवी
राणि वा पुनः ॥ प्रत्युद्गम्याभिपूज्यः स्यादेतदत्र सुमंत्रितं ॥ न हि पापात्पापतरमस्ति किंचिदराजकात् ॥ स चेत्समनुपश्ये
त समग्रं कुशलं भवेत् ॥ बलवान्हि प्रकुपितः कुर्यान्निःशेषतामपि ॥ भूयांसं लभते क्लेशं योगाभवति दुर्दुहा ॥ अथ या सुदु
हा भवति नैव तां वितुदंत्यपि ॥ यदतप्तं प्रणमति न तत्संतापमर्हति ॥ यत्स्वयं नमते दारु न तत्संनामयंत्यपि ॥ एतयोपमया
वीर संनमेद्बलीयसे ॥ इंद्राय स प्रणमते नमते यो बलीयसे ॥ तस्माद्राज्ञैव कर्तव्यः सततं भूतिमिच्छता ॥ न धनार्थो
गो न दारार्थस्तेषां येषामराजकं ॥ प्रीयते हि हरन्पापः परवित्तमराजके ॥ यदास्य तद्धरंत्यन्ये तदा राजानमिच्छति ॥ पापा अ
पि तदा क्षेमं न लभंते कदाचन ॥ एकस्य हि द्वौ हरतो द्वयोश्च बहवोऽपरे ॥ अदासः क्रियते दासो ह्रियंते च बलात्स्त्रियः ॥
तस्मात्कारणाद्देवाः प्रजापालान्प्रचक्रिरे ॥ राजा चेन्न भवेल्लोके पृथिव्यां दंडधारकः ॥ जले मत्स्यानिवाभक्ष्यन्दुर्ब
लान्बलवत्तराः ॥ अराजकाः प्रजाः पूर्वं विनेशुरिति नः श्रुतं ॥ परस्परं भक्षयंतो मत्स्या इव जले कृशान् ॥ ताः संभेत्य तत
स्तक्रुः समयानिति नः श्रुतं ॥ वाक्शूरो दंडपरुषो यश्च स्यात्पारजायिकः ॥ यः परस्वमथादद्यात्त्याज्या नस्तादृशा इति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वासार्थं च वर्णानां सर्वेषामविशेषतः ॥ तांस्तथा समयं कृत्वा समये नावतस्थिरे ॥ सहितास्तास्तदा जग्मुरसुखार्ताः पितामहं ॥
अनीश्वरा विनश्यामो भगवन्नीश्वरं दिश ॥ यं पूजयेम संभूय यश्च नः प्रतिपालयेत् ॥ ततो मनुं व्यादिदेश मनुर्नाभिननंद ताः ॥
॥ ॥मनुरुवाच॥ ॥बिभेमि कर्मणः पापाद्राज्यं हि भृशदुस्तरं ॥ विशेषतो मनुष्येषु मिथ्यावृत्तिषु नित्यशः ॥ ॥भीष्म उवाच॥
तमब्रुवन्प्रजा मा भैः कर्तॄनेनो गमिष्यति ॥ पशूनामधि पंचाशद्धिरण्यस्य तथैव च ॥ धान्यस्य दशमं भागं दास्यामः कोशवर्द्ध-
नं ॥ कन्यां शुल्के चारुरूपां विवाहेषूद्यतासु च ॥ मुख्येन शस्त्रपत्रेण ये मनुष्याः प्रधानतः ॥ भवंतं तेनुयास्यंति महेंद्रमिव देवताः ॥
स त्वं जातबलो राजा दुःप्रधर्षः प्रतापवान् ॥ सुखे धास्यसि नः सर्वान्कुबेर इव नैर्ऋतान् ॥ यं च धर्मं चरिष्यंति प्रजा राज्ञा सुरक्षि-
सं ताः ॥ चतुर्थं तस्य धर्मस्य त्वत्संस्थं वै भविष्यति ॥ तेन धर्मेण महता सुखलब्धेन भावितः ॥ पाह्यस्मान्सर्वतो राजन्देवानिव शतक्र-
तुः ॥ विजयाय हि निर्याहि प्रतपन्रश्मिवानिव ॥ मानं विधम शत्रूणां धर्मो जयतु नः सदा ॥ स निर्ययौ महातेजा बलेन महता वृतः
॥ महाभिजनसंपन्नस्तेजसा प्रज्वलन्निव ॥ तस्य दृष्ट्वा महत्वं ते महेंद्रस्येव देवताः ॥ अपतत्रसिरे सर्वे स्वधर्मे च दधुर्मनः ॥ त-
तो महीं परिययौ पर्जन्य इव वृष्टिमान् ॥ शमयन्सर्वतः पापान्स्वकर्मसु नियोजयन् ॥ एवं ये भूतिमिच्छेयुः पृथिव्यां मानवाः क्वचि-
त् ॥ कुर्यू राजानमेवाग्रे प्रजानुग्रहकारणात् ॥ नमस्येरंश्च तं भक्त्या शिष्या इव गुरुं सदा ॥ देवा इव च देवेंद्रं नरा राजानमंतिके ॥
सत्कृतः स्वजनेनेह परोपि बहु मन्यते ॥ स्वजनेन त्ववज्ञातं परे परिभवंत्युत ॥ राज्ञः परैः परिभवः सर्वेषामसुखावहः ॥ तस्माच्छ-
त्रं च पत्रं च वासांस्याभरणानि च ॥ भोजनान्यथ पानानि राज्ञे दद्युर्गृहाणि च ॥ आसनानि च शय्याश्च सर्वोपकरणानि च ॥ गोप्ता ८०

तस्माद्दुराधर्षः स्मितपूर्वमभिभाषिता ॥ आभाषितश्च मधुरं प्रत्याभाषेत मानवान् ॥ कृतज्ञो दृढभक्तिः स्यात्संविभागी जितेंद्रियः ॥ ईक्षितः
प्रतिवीक्षेत मृदु वल्गु च सुष्ठु च ॥ ॥इति शांतौ राजधर्मे ॥ ॥युधिष्ठिर उवाच॥ ॥किमाहुर्दैवतं विप्रा राजानं भरतर्षभ ॥ मनुष्याणा-
मधिपतिं तन्मे ब्रूहि पितामह ॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ बृहस्पतिं वसुमना यथापप्रच्छ भारत ॥ रा-
जा वसुमना नाम कौशल्यो धीमतां वरः ॥ महर्षिं किल पप्रच्छ कृतप्रज्ञं बृहस्पतिं ॥ सर्वं वैनयिकं कृत्वा विनयज्ञो बृहस्पतिं दक्षिणानंतरो
भूत्वा प्रणम्य विधिपूर्वकं ॥ विधिं पप्रच्छ राज्यस्य सर्वलोकहिते रतः ॥ प्रजानां सुखमन्विच्छन्धर्मशीलं बृहस्पतिं ॥ ॥वसुमना उवाच॥ ॥केन
भूतानि वर्द्धंते क्षयं गच्छंति केन वा ॥ कमर्चंतो महाप्राज्ञ सुखमव्ययमाप्नुयुः ॥ एवं पृष्टो महाप्राज्ञः कौशल्येनामितौजसा ॥ राजसत्कार-
मव्यग्रं शशंसास्मै बृहस्पतिः ॥ ॥बृहस्पतिः॥ ॥राजमूलो महाप्राज्ञ धर्मो लोकस्य लक्ष्यते ॥ प्रजा राजभयादेव न खादंति परस्प-
रं ॥ राजा ह्येवाखिले लोके समुदीर्णमसुत्सकं ॥ प्रसादयति धर्मेण प्रसाद्य च विराजते ॥ यथा ह्यनुदये राजन्भूतानि शशिसूर्ययोः ॥
अंधे तमसि मज्जेयुरपश्यंतः परस्परं ॥ यथा ह्यनुदके मत्स्या निराक्रंदे विहंगमाः ॥ विहरेयुर्यथाकामं विहिंसंतः परस्परं ॥ विम-
थ्यातिक्रमेरंश्च विसह्यापि परस्परं ॥ अभावमचिरेणैव गच्छेयुर्नात्र संशयः ॥ एवमेव विना राज्ञा विनश्येयुरिमाः प्रजाः ॥ अंधे त-
मस्य मज्जेरन्नगोपाः पशवो यथा ॥ हरेयुर्बलवंतोपि दुर्बलानां परिग्रहान् ॥ हन्युर्व्यायच्छमानांश्च यदि राजा न पालयेत् ॥ ममेदमि-
ति लोकेस्मिन्न भवेत्संपरिग्रहः ॥ न दारा न च पुत्रः स्यान्न धनं न परिग्रहः ॥ विष्वग्लोपः प्रवर्तेत यदि राजा न पालयेत् ॥ यानं वस्त्रम-
लंकारान्रत्नानि विविधानि च ॥ हरेयुः सहसा पापा यदि राजा न पालयेत् ॥ पतेद्बहुविधं शस्त्रं बहुधा धर्मचारिषु ॥ अधर्मः प्रगृह्ये-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तस्याद्य दि राजा न पालयेत्॥मातरं पितरं वृद्धमाचार्यमतिथिं गुरुं॥क्लिश्नीयुरपि हिंस्युर्वा यदि राजा न पालयेत्॥वधबंधपरिक्लेशो
नित्यमर्थवतां भवेत्॥ममत्वं न च विंदेयुर्यदि राजा न पालयेत्॥अंतास्वाकाल एव स्युर्लोकोयं दस्युसाद्भवेत्॥एतेयुर्नरकं घोरं यदि न
राजा न पालयेत्॥न योनिदोषो वर्त्तेत न कृषिर्न वणिक्पथः॥मज्जेद्धर्मस्त्रयी न स्याद्यदि राजा न पालयेत्॥न यज्ञाः संप्रवर्त्तेयु
र्विधिवत्स्वाप्तदक्षिणाः॥न विवाहाः समाजो वा यदि राजा न पालयेत्॥न वृषाः संप्रवर्त्तेरन्न मथ्येरंश्च गर्गराः॥घोषाः प्रणाशं गच्छे र
युर्यदि राजा न पालयेत्॥दह्यमुद्विग्नहृदयं हाहाभूतमचेतनं॥क्षणेन विनशेत्सर्वं यदि राजा न पालयेत्॥न संवत्सरसत्राणि
तिष्ठेयुरकुतोभयं॥विधिवद्दक्षिणावंति यदि राजा न पालयेत्॥ब्राह्मणाश्चतुरो वेदान्नाधीयीरंस्तपस्विनः॥विद्यास्नाता
व्रतस्नाता यदि राजा न पालयेत्॥हस्तो हस्तं परिमुष्णीत भिद्येरन्सर्वसेतवः॥भयार्त्तं विद्रवेत्सर्वं यदि राजा न पालयेत्॥न लभे
द्धर्मसंश्लेषं पापविग्रहभाजनः॥हृत्वा स्वस्थेंद्रियो गच्छेद्यदि राजा न पालयेत्॥अनयाः संप्रवर्त्तेरन्भवेद्वै वर्णसंकरः॥दुर्भि
क्षमाविशेद्राष्ट्रं यदि राजा न पालयेत्॥विवृत्य हि यथाकामं गृहद्वाराणि शेरते॥मनुष्या रक्षिता राज्ञा समंतादकुतोभयाः॥
नाक्रुष्टं सहते कश्चित्कुतो वा हस्तलाघवं॥यदि राजा सम्यग्गोप्ता नक्षपस्य स्तिधार्मिकः॥स्त्रियश्चापुरुषा मार्गं सर्वालंका
रभूषिताः॥निर्भयाः प्रतिपद्यंते यदि रक्षति भूमिपः॥धर्ममेव प्रपद्यंते न हिंसंति परस्परं॥अनुगृह्णंति चान्योन्यं यदि
रक्षंति भूमिपाः॥यजंते च महायज्ञैस्त्रयो वर्णाः पृथग्विधैः॥युक्ताश्चाधीयते विद्यां यदा रक्षति भूमिपः॥वार्त्तामूलो
ह्ययं लोकस्त्रय्या वै धार्यते सदा॥तत्सर्वं वर्त्तते सम्यग्यदि रक्षति भूमिपः॥यदा राजा धुरं श्रेष्ठामादाय वहति प्रजाः॥ ८०

महता बलयोगेन तदा लोकः प्रसीदति॥यस्याभावेन भूतानामभावः स्यात्समंततः॥भावे च भावो नित्यं स्यात्कस्तं न प्रतिपूज
येत्॥तस्य यो वहते भारं सर्वलोकसुखावहं॥तिष्ठेत्प्रियहिते राज्ञ उभौ लोकाविभौ जयेत्॥यस्तस्य पुरुषः पापं मनसाप्यनुचिंतये
त्॥असंशयं महत्क्लिष्टः प्रेत्य चेतोपि नरकं व्रजेत्॥न हि जात्ववमंतव्यो मनुष्य इति भूमिपः॥महती देवता ह्येषा नररूपेण तिष्ठति
॥कुरुते पंच रूपाणि कालयुक्तानि यः सदा॥भवत्यग्निस्तथादित्यो मृत्युर्वैश्रवणो यमः॥यदा ह्यासीदतः पापान्दहत्युग्रेण
तेजसा॥मिथ्योपचरितो राजा तदा भवति पावकः॥यदा पश्यति चारेण सर्वभूतानि भूमिपः॥क्षेमं च कृत्वा व्रजति तदा भव
ति भास्करः॥अशुचींश्च यदा क्रुद्धः क्षिणोति शतशो नरान्॥सपुत्रपौत्रान्सामात्यांस्तदा भवति सोंतकः॥यदा त्वधार्मिकान्
सर्वांस्तीव्रैर्दंडैर्नियच्छति॥धार्मिकांश्चानुगृह्णाति तदा भवति यमस्तथा॥यदा तु धनधाराभिस्तर्पयत्युपकारिणः॥आछि
नत्ति च रत्नानि विविधान्यपकारिणां॥श्रियं ददाति कस्मैचित्कस्माच्चिदपकर्षति॥तदा वैश्रवणो राजा लोके भवति
भूमिपः॥नास्यापवादे स्थातव्यं दक्षेणाक्लिष्टकर्मणा॥धर्ममाकांक्षता लोके ईश्वरस्यानसूयता॥न हि राज्ञः प्रतीपानि
कुर्वन्सुखमवाप्नुयात्॥पुत्रो भ्राता वयस्यो वा यद्यप्यात्मसमो भवेत्॥कुर्यात्कृष्णगतिः शेषं ज्वलितोनिलसारथिः॥न
तु राज्ञाभिपन्नस्य शेषं क्वचन विद्यते॥तस्य सर्वाणि रक्षाणि दूरतः परिवर्जयेत्॥मृत्योरिव जुगुप्सेत राजस्वहरणान्न
रः॥नश्येदभिमृशन्सद्यो मृगः कूटमिव स्पृशन्॥आत्मस्वमिव संरक्षेत्राजस्वमपि बुद्धिमान्॥महांतं नरकं घोरमप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
८१

तिष्ठमचेतनं ॥ पतति विरसा चायं राजवित्तापहारिणः ॥ राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्नृपः ॥ एवं यः स्तूयते श
ब्दैः कस्तं नार्चितुमर्हति ॥ तस्माद्बुभूषुर्नियतो जितात्मा संयतेंद्रियः ॥ मेधावी स्मृतिमान् दक्षः संश्रयेत महीपतिं ॥ कृतज्ञं प्रा
ज्ञमक्षुद्रं दृढभक्तिं जितेंद्रियं ॥ धर्मनित्यं स्थितं स्थित्यां मंत्रिणः पूजयेन्नृपः ॥ दृढभक्तिं कृतप्रज्ञं धर्मसंस्थं जितेंद्रियं ॥ शूरमक
क्षुद्रकर्माणं निषिद्धजनमाश्रयेत् ॥ राजा प्रगल्भं पुरुषं करोति राजा कृशं बृंहयते मनुष्यं ॥ राजाभिपन्नस्य कुतः सुखानि राजा
भ्युपेतं सुखिनं करोति ॥ राजा प्रजानां हृदयं गरीयो गतिः प्रतिष्ठा सुखमुत्तमं च ॥ समाश्रिता लोकमिमं परं च जयंति सम्यक् पु
रुषा नरेंद्र ॥ नराधिपश्चाप्यनुशिष्य मेदिनीं दमेन सत्येन च सौहृदेन ॥ महद्भिरिष्ट्वा क्रतुभिर्महायशास्त्रिविष्टपे स्थानमुपै
ति सत्कृतं ॥ स एवमुक्तो गुरुणा कौशल्यो राजसत्तमः ॥ प्रयत्नात्कृतवान् वीरः प्रजानां परिपालनं ॥ ॥ शांतौ राजधर्म० ॥
युधिष्ठिर उवाच ॥ ॥ पार्थिवेन विशेषेण किं कर्तव्यमवशिष्यते ॥ कथं रक्ष्यो जनपदः कथं जेयाश्च शत्रवः ॥ कथं चारं नियुंजी
त वर्णान् विश्वासयेत् कथं ॥ कथं भृत्यान् कथं दारान् कथं पुत्रांश्च भारत ॥ ॥ भीष्म उवाच ॥ ॥ राजवृत्तं महाराज शृणुष्वा
वहितो मम ॥ यत्कार्यं पार्थिवेनादौ पार्थिवप्रकृतेन च ॥ आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः ॥ अजितात्मा नरपतिर्वि
जयेत कथं रिपून् ॥ एतावानात्मविजयः पंचवर्गविनिग्रहः ॥ जितेंद्रियो नरपतिर्विजेतुं शक्नुयादरीन् ॥ न्यसेत गुल्मान् दुर्गेषु
संधौ च कुरुसत्तम ॥ नगरोपवने चैव पुरोद्यानेषु सर्वशः ॥ संस्थानेषु च सर्वेषु पुरेषु नगरेषु च ॥ मध्ये च नरशार्दूल तथा ८१

राजनिवेशने ॥ प्रणिधींश्च ततः कुर्याज्जडांधबधिराकृतीन् ॥ सम्यक् परीक्षितान् प्राज्ञान् क्षुत्पिपासाक्षमान् नरान् ॥ अ
मात्येषु च सर्वेषु मित्रेषु विविधेषु च ॥ पुत्रेषु च महाराज प्रणिदध्यात् समाहितः ॥ पुरे जनपदे चैव तथा सामंतराजसु ॥ यथा न
विद्युरन्योन्यं प्रणिधेयास्तथा हिते ॥ चारांश्च विद्यात् सहितान् यत्नेन भरतर्षभ ॥ आपणेषु विहारेषु समवायेषु भिक्षुषु ॥ आरा
मेषु तथोद्यानेषु पंडितानां समागमे ॥ देशेषु चत्वरे चैव सभास्वावसथेषु च ॥ एवं हन्यात् परचरान् परचारं विचक्षणः ॥ चरेहि
तिहितं सर्वं हितं भवति पांडव ॥ यदा तु हीनो भवति विग्रहात्मानमात्मना ॥ अमात्यैः सह संमंत्र्य संधिं कुर्याद्बलीयसा ॥ अ
ज्ञायमानो हीनत्वे कुर्यात् संधिं परेण वै ॥ लिप्सुर्वा किंचिदेवार्थं त्वरमाणो विचक्षणः ॥ गुणवंतो महाबाहो धर्मज्ञाः सा
धवश्च ये ॥ संदधीत नृपैस्तैश्च राष्ट्रं धर्मेण पालयन् ॥ उच्छिद्यमानमात्मानं ज्ञात्वा राजा महामतिः ॥ पूर्वापकारिणो ह
न्याल्लोकद्विष्टांश्च सर्वशः ॥ यो नोपकर्तुं शक्नोति नापकर्तुं महीपतिः ॥ अशक्यरूपश्चोद्धर्तुमुपेक्ष्यस्तादृशो भवेत् ॥
यात्रायां यदि विज्ञातमनाक्रंदमनंतरं ॥ व्यासक्तं च प्रमत्तं च दुर्बलं च विचक्षणः ॥ यात्रामाज्ञापयेद्वीरः कल्यपुष्टः
बलः सुखी ॥ पूर्वं कृत्वा विधानं च यात्रायां नगरे तथा ॥ न च वश्यो भवेदस्य नृपो यद्यपि वीर्यवान् ॥ हीनश्च बलवीर्या
एणां कर्षयंस्तत्परो वसेत् ॥ राष्ट्रं च पीडयेत्तस्य शस्त्राग्निविषदस्युभिः ॥ अमात्यवल्लभानां च विवादांस्तस्य कारयेत् ॥
वर्जनीयं सदा युद्धं राज्यकामेन धीमता ॥ उपायैस्त्रिभिरादानमर्थस्याह बृहस्पतिः ॥ सांत्वेनानुप्रदानेन भेदेन
च नराधिप ॥ यमर्थं शक्नुयात् प्राप्तुं तेन तुष्येद्धि पंडितः ॥ आददीत बलिं चैव प्रजाभ्यः कुरुनंदन ॥ षड्भागममित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्वालस्तासामेवाभिगुप्तये ॥ दशाधर्मीतेभ्योपहृत्य बह्वल्पमेव च ॥ तत्रादद्दीत स हस्तापोनाणां रक्षणाय वै ॥ यथापुत्रा
स्तथा पौत्रा इष्टव्यास्ते न संशयः ॥ भक्तिश्चैषां न कर्त्तव्या व्यवहारे प्रदर्शिते ॥ स्तुतं च स्थापयेद्ज्ञात्वा आशाज्ञं सर्वार्थदर्शिनं ॥
व्यवहारेषु सततं धृतराष्ट्र व्यवस्थितं ॥ आकारेल्वबलोशुल्के नेनागवले तथा ॥ न्यसेदमात्यान्नृपतिः स्वाप्तसान्नापुरु
षान्वहितारः ॥ सम्यग्दंडधरो नित्यं राजधर्ममवाप्नुहि ॥ नृपस्य सततं दंडः सम्यक्कुं इं. प्रशास्यते ॥ वेदवेदांगविद्याज्ञः दं
सुतपस्वी नृपो भवेत् ॥ दानशीलश्च सततं यज्ञशीलश्च भारत ॥ एते गुणाः समस्तास्युर्नृपस्य सततं स्थिराः ॥ कि
याल्लोपेतु नृपतेः कुतस्त्युत्ति कुतो यशः ॥ यदनुपीडितो राजा भवेद्राज्ञा बलीयसा ॥ तदाभिसंश्रयेद्दुर्गं बुद्धिमा
न्पृथिवीपतिः ॥ विधावाक्सम्यमित्राणि विधानमुपकल्पयेत् ॥ येषां न्यसेत मार्गेषु ग्रामान्तु स्थापयेद्दिदि ॥ प्र
वेशयेच्च तान्सर्वान्नशारवा नगरकेष्वपि ॥ येतुसाश्चैव दुर्गाश्च देशांस्तेषु प्रवेशयेत् ॥ धनिनो बलमुख्यांश्च सांत्व
येच्च पुनः पुनः ॥ सस्यापविहारं कुर्याच्च स्वयमेव नराधिपः ॥ असंभवे प्रवेशस्य दाहयेदग्निना स्तृणं ॥ क्षेत्रस्थेषु च
शस्येषु राज्ञो रूपजपेन्न नाद्र ॥ विनाशयेद्वा तत्सर्वं बिले नाथ स्वकेन वै ॥ नदीषु दुर्गेषु सदा संक्रमान्नवसादयेत्
॥ जलं निश्रावयेत्सर्वमनिश्राव्यं च दूषयेत् ॥ तदात्वे नापतिभिस्त्व विवदेद्भ्यनंतनं ॥ प्रतिघातः परस्यानो मित्रकार्ये
ह्युपस्थिते ॥ दुर्गाणां चाभितो राजा मूलच्छेदं प्रकारयेत् ॥ सर्वेषां क्षुद्रवृक्षाणां शाखाः प्रच्छेदयेत्तथा ॥ चैत्यानां स ८२

र्ध्यावर्ज्यमपि पत्रस्य पातनं ॥ प्रगंडाः कारयेत्सम्यगाकाशवतीस्तथा ॥ आपूरयेच्च परिखाः स्थाणुनक्रझषाकु
कुलाः ॥ षडंगहारकास्मिस्युरुच्छ्वासार्थं दुरस्य च ॥ तेषां च त्वरवद्यंत्रैः कार्या सर्वात्मनाभवेत् ॥ द्वारेषु च गुरूण्येषु यं
त्राणि स्थापयेत्सदा ॥ आरोपयेच्छतघ्नीश्च स्वाधीनानि च कारयेत् ॥ काष्ठानि चाभिहार्याणि तथा कूपांश्च खानयेत् ॥
संशोधयेत्तथा कूपान्कृतान्पूर्वं पयोर्थिभिः ॥ तृणछन्नानि वेश्मानि पंकेनाथ प्रलेपयेत् ॥ निर्हरेच्च तृणं मासि चैत्रे वह्निभ
यात्पुरे ॥ नक्तमेव च भक्तानि पाचयेत नराधिपः ॥ न दिवाज्वालयेद्गेहे वर्जयित्वाग्निहोत्रिणं ॥ कर्मारारिष्टशालासु ज्व
लेदग्निः समाहितः ॥ गृहाणि च समर्याद्य विकृतस्याद्भुताशनः ॥ महान्दंडश्च तस्य स्याद्यस्याग्निर्वै दिवा ज्वलेत् ॥ प्रघो
षयेदथैवं च रक्षणार्थं पुरस्य वै ॥ भिक्षुकांश्चाक्रिकांश्चैव क्लीबोन्मत्तान्कुशीलवान् ॥ बहिः कुर्यान्नरश्रेष्ठ दोषाय स्युर्हि ते
न्यथा ॥ चत्वरेषु च सर्वेषु सभास्वावसथेषु च ॥ यथार्हं वर्णप्रणिधिं कुर्यात्सर्वत्र पार्थिव ॥ विशालान्राजमार्गांश्च कारये
तन नराधिपः ॥ प्रपांश्च विपणींश्चैव यथोद्देशं समादिशेत् ॥ भांडागारायुधागारान्धान्यागारांश्च सर्वशः ॥ अश्वागारा
न्गजागारान्बलाधिकरणानि च ॥ परिखाश्चैव कौरव्य प्रतोलीर्निष्कुटानि च ॥ न जातु कश्चित्पश्येत्तु गुह्यमेतद्युधि
ष्ठिर ॥ अर्थसंनिचयं कुर्याद्राजा परबलार्दितः ॥ तैलं मधु घृतं सस्यमौषधानि च सर्वशः ॥ अंगारकुशमुंजानां पला
शशरवर्णिनां ॥ यवसेंधनदिग्धानां कारयेत च संचयान् ॥ आयुधानां च सर्वेषां शक्त्यृष्टिप्रासवर्मणां ॥ संचया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० नवमादीनां कारयेत नराधिपः॥ औषधानि च सर्वाणि मूलानि च फलानि च॥ चतुर्विधांश्च वैद्यान्वै संगृह्णीयाद्विशे
८३ षतः॥ नटाश्च नर्तकाश्चैव मल्ला मायाविनस्तथा॥ शोभयेयुः पुरवरं मोदयेयुश्च सर्वशः॥ यतः शंका भवेच्चापि भृत्य
तो वाथ मंत्रिणः॥ चौरेभ्यो नृपतिर्वापि स्वाधीनान् कारयेत तान्॥ कृते कर्मणि राजेंद्र पूरयेद्धन संचयैः॥ मानेन च
यथार्हेण सांत्वेन विविधेन च॥ निर्वेदयित्वा च परं हत्वा वा कुरुनंदन॥ एतत्सप्तात्मकं राज्यं परिपाल्यं प्रयत्नतः॥ षा
ड्गुण्यं च त्रिवर्गं च त्रिवर्गपरमं तथा॥ यो वेत्ति पुरुषव्याघ्र स भुनक्ति पृथिवीमिमां॥ षाड्गुण्यमिति यत्प्रोक्तं तन्निबोध युधि
ष्ठिर॥ संधायासनमित्येव यात्रासंधानमेव च॥ विगृह्यासनमित्येव यात्रां संपरिगृह्य वा॥ द्वैधीभावस्तथान्ये
षां संश्रयोऽथ परस्य च॥ त्रिवर्गश्चापि यः प्रोक्तस्तमिहैकमनाः शृणु॥ क्षयः स्थानं च वृद्धिश्च त्रिवर्गमपरं तथा॥ ध
र्मश्चार्थश्च कामश्च सेवितव्यश्च कालतः॥ धर्मेण हि महीपालश्चिरं पालयते महीं॥ अस्मिन्नर्थे च यौ श्लोकौ गी
तावंगिरसा स्वयं॥ यादवीपुत्र भद्रं ते श्रोतुमर्हसि तावपि॥ कृत्वा कार्याणि सर्वाणि सम्यक् संपाल्य मेदिनीं॥ पा
लयित्वा तथा पौरान् परत्र सुखमश्नुते॥ किं तस्य तपसा राज्ञः किं च तस्याध्वरैरपि॥ अपालिताः प्रजा यस्य सर्वध
र्मविनाकृताः॥ ॥इति राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥दंडनीतिश्च राजा च समस्तौ तावुभावपि॥ किं कस्य
कुर्वतः सिध्येत्तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ महाभाग्यं दंडनीत्याः सिद्धैः शब्दैः सहेतुकैः॥ शृणु मे शंस ८३

तो राजन् यथावदिह भारत॥ दंडनीतिः स्वधर्मेभ्यश्चातुर्वर्ण्यं नियच्छति॥ चातुर्वर्ण्यं स्वधर्मस्थं मर्यादानामसंकरे॥ दंडनीति
कृते क्षेमे प्रजानामकुतोभये॥ धर्मे प्रयत्नं कुर्वंति त्रयो वर्णा यथाविधि॥ तस्माद्देवमनुष्याणां सुखं विधि समाहितं॥ कालो
वा कारणं राज्ञो राजा वा कालकारणं॥ इति ते संशयो माभूद्राजा कालस्य कारणं॥ दंडनीत्यां यदा राजा सम्यक् कार्त्स्न्येन व
र्तति॥ तदा कृतयुगं नाम कालः श्रेष्ठः प्रवर्तते॥ भवेत्कृतयुगे धर्मो नाधर्मो विद्यते क्वचित्॥ सर्वेषामेव वर्णानां नाधर्मे रमते म
तिः॥ योगक्षेमाः प्रवर्तंते प्रजानां नात्र संशयः॥ वैदिकानि च कर्माणि भवंति विगुणान्युत॥ ऋतवश्च सुखाः सर्वे भवंत्युत नि
रामयाः॥ प्रसीदंति नराणां च स्वरवर्णमनांसि च॥ व्याधयो न भवंत्यत्र नाल्पायुर्दृश्यते नरः॥ विधवा न भवंत्यत्र नृशं
सो नाभिजायते॥ अकृष्टपच्या पृथिवी भवंत्योषधयस्तथा॥ त्वक्पत्रफलमूलानि वीर्यवंति भवंति च॥ नाधर्मो वि
धर्म द्यते तत्र धर्म एव तु केवलः॥ इति कार्तयुगानेतान् धर्मान्विद्धि युधिष्ठिर॥ दंडनीत्यां यदा राजा त्रीनंशाननुवर्तते॥ चतुर्थमंशं
संत्यज्य तदा त्रेता प्रवर्तते॥ तदा तद्द्वापरं नाम स कालः संप्रवर्तते॥ कृष्टपच्यैव पृथिवी भवंत्योषधयस्तथा॥ अर्धं त्यक्त्वा
यदा राजा नीत्यर्धमनुवर्तते॥ तदा द्वापरं नाम स कालः संप्रवर्तते॥ अशुभस्य तदा त्वंशांस्त्रीननुवर्तते॥ सकृष्टपच्या पृ
थिवी भवत्यल्पफला तथा॥ दंडनीतिं समुत्सृज्य यदा कार्त्स्न्येन भूमिपः॥ प्रजाः क्लिश्यत्ययोगेन प्रवर्तते तदा कलिः॥ कलाव ध स्य
र्मो भूयिष्ठो धर्मो भवति न क्वचित्॥ सर्वेषामेव वर्णानां स्वधर्माच्च्यवते मनः॥ शूद्रा भैक्ष्येण जीवंति ब्राह्मणाः परिचर्यया॥
योगक्षेमस्य नाशश्च वर्तते वर्णसंकरः॥ वैदिकानि च कर्माणि भवंति विगुणान्युत॥ ऋतवो न सुखाः सर्वे भवंत्यामयि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नस्तथा॥ हसंति च मनुष्याणां स्वरवर्णमनांसि च॥ व्याधयश्च न भवंत्यत्र म्रियंते च गतायुषः॥ विधवाश्च न भवंत्यत्र न नृशंसा भवति प्रजाः
॥ क्वचिद्वर्षति पर्जन्यः क्वचित्सस्यं प्ररोहति॥ रसाः सर्वे क्षयं यांति यदा नेच्छति भूमिपः॥ प्रजाः संरक्षितुं सम्यग्दंडनीतिसमाहिताः॥
राजा युगस्रष्टा त्रेताया द्वापरस्य च॥ युगस्य तु चतुर्थस्य राजा भवति कारणं॥ कृतस्य करणाद्राजा स्वर्गमत्यंतमश्नुते॥ त्रेतायाः क
रणाद्राजा स्वर्गं नात्यंतमश्नुते॥ प्रवर्तनाद्द्वापरस्य यथाभागमुपाश्नुते॥ कलेः प्रवर्तनाद्राजा पापमत्यंतमश्नुते॥ ततो वसति दुष्कर्मा
नरके शाश्वतीः समाः॥ प्रजानां कल्मषे मग्नो कीर्तिं पापं च विंदति॥ दंडनीतिं पुरस्कृत्य विजानन्क्षत्रियः सदा॥ अनवाप्तं च लिप्सेत लब्धं च
परिपालयेत्॥ लोकस्य सीमंतकरी मर्यादा लोकभाविनी॥ सम्यङ्नीता दंडनीतिर्यथा माता यथा पिता॥ यस्यां भवंति भूतानि तद्विद्धि
भरतर्षभ॥ एष एव परो धर्मो यद्राजा दंडनीतिमान्॥ तस्मात्कौरव्य धर्मेण प्रजाः पालय नीतिमान्॥ एवंवृत्तः प्रजा रक्षन्स्वर्गं जेतासि दु
र्ज्जयं॥ ॥इति शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥केन वृत्तेन वृत्तज्ञ वर्तमानो महीपतिः॥ सुखेनार्थान्सुखोदर्कानिह च प्रेत्य चा
प्नुयात्॥ ॥भीष्म उवाच॥ ॥अयं गुणानां षट्त्रिंशत् षट्त्रिंशद्गुणसंयुतः॥ यान्गुणांस्तु गुणोपेतः कुर्वन्गुणमवाप्नुयात्॥ चरेद्ध
र्मानकटुको युंजन्स्नेहं न नास्तिकः॥ अनृशंसश्चरेदर्थं चरेत्काममनुद्धतः॥ प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः॥ दाता नापात्रवर्षी
स्यात्प्रगल्भः स्यादनिष्ठुरः॥ संदधीत न चानार्यैर्विगृह्णीयान्न बंधुभिः॥ नाभक्तं चारयेच्चारं कुर्यात्कार्यमपीडया॥ अर्थं ब्रूयान्न चासत्सु
गुणान्ब्रूयान्न चात्मनः॥ आदद्यान्न च साधुभ्यो नासत्पुरुषमाश्रयेत्॥ नापरीक्ष्य नयेद्दंडं न च मंत्रं प्रकाशयेत्॥ विसृजेन्न च लुब्धेभ्यो
विश्वसेन्नापकारिषु॥ अमदद्यान्न च साधुभ्यो नासत्पुरुषमाश्रयेत्॥ अनार्ये गुप्तदारः स्याद्दक्षः स्यादघृणी नृपः॥ स्त्रियः सेवेत नात्यर्थं मृष्टं ८४

भुंजीत नाहितं॥ अस्तब्धः पूजयेन्मान्यान्गुरून्सेवेदमायया॥ अर्चेद्देवान्न दंभेन श्रियमिच्छेदकुत्सितां॥ सेवेत प्रणयं हित्वा दक्षः स्यान्न त्वकाल
वित्॥ सांत्वयेन्न च मोक्षाय अनुगृह्णन्न चाक्षिपेत्॥ प्रहरेन्न त्वविज्ञाय हत्वा शत्रून्न शोचयेत्॥ क्रोधं कुर्यान्न चाकस्मान्मृदुः स्यान्नापकारि
षु॥ एवं चरस्व राज्यस्थो यदि श्रेय इहेच्छसि॥ अतोऽन्यथा नरपतिर्भयमृच्छत्यनुत्तमं॥ इति सर्वान्गुणानेतान्यथोक्तान्योनुवर्तते॥ अनुभूयेह
भद्राणि प्रेत्य स्वर्गे महीयते॥ ॥वैशंपायनः॥ ॥इदं वचः शांतनवस्य शुश्रुवान्युधिष्ठिरः पांडवमुख्यसंवृतः॥ तदा ववंदे च पितामहं नृपो यथोक्तमत
श्चैव हि चकार बुद्धिमान्॥ शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥कथं राजा प्रजा रक्षन्नाधिबंधेन युज्यते॥ धर्मे च नापराध्नोति तन्मे ब्रूहि
पितामह॥ ॥भीष्म उवाच॥ ॥समासेनैव ते राजन्धर्मान्वक्ष्यामि शाश्वतान्॥ विस्तरेणार्थधर्माणां न जात्वंतमवाप्नुयात्॥ धर्मनिष्ठान्श्रुतवतो देवव
तसमाहितान्॥ अर्चयित्वा यथा स्त्रं गृहे गुणवतो द्विजान्॥ प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च॥ अथ सर्वाणि कुर्वीथाः कार्याणि सपुरोहि
तः॥ धर्मकार्याणि निर्वर्त्य मंगलानि प्रयुज्य च॥ ब्राह्मणान्वाचयेथास्त्वमर्थसिद्धिजयाशिषः॥ आर्जवेन च संपन्नो धृत्या बुद्ध्या च भारत॥ य
थार्थं प्रतिगृह्णीयात्कामक्रोधौ च वर्जयेत्॥ कामक्रोधौ पुरस्कृत्य योर्थं राजानुतिष्ठति॥ न स धर्मं न चाप्यर्थं प्रतिगृह्णाति बालिशः॥ मा स्म लु
यु ब्धांश्च मूर्खांश्च कामार्थे प्रयुयुंजः॥ अलुब्धान्बुद्धिसंपन्नान्सर्वकर्मसु योजयेत्॥ मूर्खो ह्यधिकृतोऽर्थेषु कार्याणामविशारदः॥ प्रजाः क्लिश्यं
त्ययोगेन कामक्रोधसमन्वितः॥ बलिषष्ठेन शुल्केन दंडेनाथापराधिनां॥ शास्त्रनीतेन लिप्सेथा वेतनेन धनागमं॥ दापयित्वा करं धर्मं
राष्ट्रं नीत्या यथाविधि॥ अथैनं कल्पयेद्राजा योगक्षेममतंद्रितः॥ गोपायितारं दातारं धर्मनित्यमतंद्रितं॥ अकामद्वेषसंयुक्तमनुरज्यंति
मानवाः॥ मा स्म धर्मेण लोभेन लिप्सेथास्त्वं धनागमं॥ धर्मार्थावधिवौ तस्य यो न शास्त्रपरो भवेत्॥ अथ शास्त्रपरो राज्यधर्मार्थाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
८५

धिगच्छति ॥ आस्थाने चास्य तद्वित्तं सर्वमेव विनश्यति ॥ अधर्म्यैर्यो हि हिंसां च कुरुते स्वयमात्मनः ॥ कैरेशास्त्रदृष्टैर्हि मोहात्संपीडयन्प्रजाः ॥ ऊ-
धश्छिंद्याद्यथा धेन्वाः क्षीरार्थी न लभेत्पयः ॥ एवं राष्ट्रमयोगेन पीड्यमानं न वर्धते ॥ यो हि दोग्ध्रीमुपास्ते तु स नित्यं विंदते पयः ॥ एवं राष्ट्रमुपायेन
भुंजानो लभते फलं ॥ अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितं ॥ जनयत्यतुलां नित्यं कोशवृद्धिं युधिष्ठिर ॥ दोग्ध्री धान्यं हिरण्यं च मही राज्ञा
सुरक्षिता ॥ नित्यं स्वेभ्यः परेभ्यश्च तृप्ता माता यथा पयः ॥ मालाकारोपमो राजन्भव मांगारिकोपमः ॥ तथायुक्तश्चिरं राष्ट्रं भोक्तुं शक्ष्य-
सि पालयन् ॥ परचक्राभियानेन यदि ते स्याद्धनक्षयः ॥ अथ साम्नैव लिप्सेथा धनमब्राह्मणेषु यत् ॥ मा स्म ते ब्राह्मणं दृष्ट्वा धनस्थं
प्रचलेन्मनः ॥ अंत्यायामप्यवस्थायां किमु स्फीतस्य भारत ॥ धनानि तेभ्यो दद्यास्त्वं यथाशक्ति यथार्हतः ॥ सांत्वयन्परिरक्षंश्च स्वर्गमा-
प्स्यसि दुर्जयं ॥ एवं धर्मेण वृत्तेन प्रजास्त्वं परिपालय ॥ स्वंतं पुण्यं यशो नित्यं प्राप्स्यसे कुरुनंदन ॥ धर्मेण व्यवहारेण प्रजाः पालय पांडव ॥
युधिष्ठिर तथा युक्तो नाधिबंधेन योक्ष्यसे ॥ एष एव परो धर्मो यद्राजा रक्षति प्रजाः ॥ भूतानां हि यथा धर्मे रक्षणं परमा दया ॥ तस्माद्देवं
परं धर्मं मन्यंते धर्मकोविदाः ॥ यो राजा रक्षणे युक्तो भूतेषु कुरुते दयां ॥ यदह्ना कुरुते पापमरक्षन्भयतः प्रजाः ॥ राजा वर्षसहस्रे-
ण तस्यांतमधिगच्छति ॥ यदह्ना कुरुते धर्मं प्रजा धर्मेण पालयन् ॥ दशवर्षसहस्राणि तस्य भुंक्ते फलं दिवि ॥ स्विष्टिः स्वधीतिः सुत-
पा लोकाञ्जयति यावतः ॥ क्षणेन तानवाप्नोति प्रजा धर्मेण पालयन् ॥ एवं धर्मं प्रयत्नेन कौंतेय परिपालय ॥ ततः पुण्यफलं लब्ध्वा ना-
धिबंधेन योक्ष्यसे ॥ स्वर्गलोके च महतीं श्रियं प्राप्स्यसि पांडव ॥ असंभवश्च धर्माणामीदृशानामराजसु ॥ तस्माद्राजैव नान्यो ८५

ऽर्हति यो धर्मफलमाप्नुयात् ॥ स राज्यं धृतिमान्प्राप्य धर्मेण परिपालय ॥ इंद्रं तर्पय कामेन कामैश्च सुहृदो गणान् ॥ ॥ इति शांतौ राजध-
र्मे ॥ ॥ भीष्म उवाच ॥ ॥ य एव तु सतो रक्षेदसतश्च निवर्तयेत् ॥ स एव राज्ञा कर्तव्यो राजन्राजपुरोहितः ॥ अत्राप्युदाहरंतीममितिहासं
पुरातनं ॥ पुरूरवस ऐलस्य संवादं मातरिश्वना ॥ ॥ ऐल उवाच ॥ ॥ कुतः स्वित् ब्राह्मणो जातो वर्णाश्चापि कुतस्त्रयः ॥ कस्माच्च भवति
श्रेष्ठस्तन्मे व्याख्यातुमर्हसि ॥ ॥ मातरिश्वोवाच ॥ ॥ ब्राह्मणो मुखतः सृष्टो ब्रह्मणो राजसत्तम ॥ बाहुभ्यां क्षत्रियः सृष्ट ऊरुभ्यां वै-
श्य एव च ॥ वर्णानां परिचर्यार्थं त्रयाणां भरतर्षभ ॥ वर्णश्चतुर्थः पश्चात्तु पद्भ्यां शूद्रो विनिर्गतः ॥ ब्राह्मणो जायमानो हि पृथिव्यामनुजाय-
ते ॥ ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ॥ अतः पृथिव्यां यंतारं क्षत्रियं दंडधारणे ॥ द्वितीयं वर्णमकरोत्प्रजानामनुगुप्तये ॥ वैश्यस्तु
धनधान्येन त्रीन्वर्णान्बिभृयादिमान् ॥ शूद्रो ह्येनान्परिचरेदिति ब्रह्मानुशासनं ॥ ॥ ऐल उवाच ॥ ॥ द्विजस्य क्षत्रबंधोर्वा कस्येयं पृथि-
वी भवेत् ॥ धर्मतः सह वित्तेन सम्यग्वायो प्रचक्ष्व मे ॥ ॥ वायुरुवाच ॥ ॥ विप्रस्य सर्वमेवैतद्यत्किंचिज्जगतीगतं ॥ ज्येष्ठेनाभिजनेनेह त-
द्धर्मकुशला विदुः ॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च ॥ गुरुर्हि सर्ववर्णानां ज्येष्ठः श्रेष्ठः स वै द्विजः ॥ पत्यभावे यथैव स्त्री देवरं
कुरुते पतिं ॥ आनंतर्यात्तथा क्षत्रं पृथिवी कुरुते पतिं ॥ एष ते प्रथमः कल्प आपद्यन्यो भवेदतः ॥ यदि स्वर्गं परं स्थानं धर्मतः परिमार्ग-
सि ॥ यत्किंचिज्जयसे भूमिं ब्राह्मणाय निवेदय ॥ श्रुतवित्तोपपन्नाय धर्मज्ञाय तपस्विने ॥ स्वधर्मपरितृप्ताय यो वित्तपरो भवेत् ॥ यो न
राजानं नयेद्बुद्ध्या सर्वतः परिपूर्णया ॥ ब्राह्मणो हि कुले जातः कृतप्रज्ञो विनीतवाक् ॥ श्रेयो नयति राजानं ब्रुवंश्चित्रां सरस्वतीं ॥ राजा च-
ति रयो धर्मं ब्राह्मणेन निदर्शितं ॥ शुश्रूषुरनहंकारी क्षत्रधर्मरतः स्थितः ॥ तावता सत्कृतः प्राज्ञश्चिरं यशसि तिष्ठति ॥ तस्य सर्वस्य धर्मस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० भागी नातः पुरोहितः ॥ एवमेव प्रजाः सर्वा राजानमभिसंश्रिताः ॥ सम्यग्वृत्ताः स्वधर्मस्था न कुतश्चिद्भयान्विताः ॥ राष्ट्रे चरंति यं धर्मं राज्ञा सा
८६ ध्वभिरक्षितां ॥ चतुर्थं तस्य धर्मस्य राजा भागं स विंदति ॥ देवा मनुष्याः पितरो गंधर्वोरगराक्षसाः ॥ यज्ञमेवोपजीवंति नास्ति चेष्टमराज
के ॥ इतो दत्तेन जीवंति देवताः पितरस्तथा ॥ राजन्येवास्य धर्मस्य योगक्षेमः प्रतिष्ठितः ॥ छायायामप्सु वायौ च सुखमुष्णेऽधिगच्छति ॥ अग्नौ
वाससि सूर्ये वा सुखं शीतेऽधिगच्छति ॥ शब्दे स्पर्शे रसे रूपे गंधे च रमते मनः ॥ उपभोगेषु सर्वेषु न भीतो लभते सुखं ॥ अभयस्यैव यो दा
ता तस्यैव सुमहत्फलं ॥ न हि प्राणसमं दानं त्रिषु लोकेषु विद्यते ॥ इंद्रो राजा यमो राजा धर्मो राजा तथैव च ॥ राजा बिभर्ति रूपाणि राज्ञः सर्व
मिदं धृतं ॥ ॥ इति श्रीशांतौ राजधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ राज्ञा पुरोहितः कार्यो भवेद्विद्वान्बहुश्रुतः ॥ उभौ समीक्ष्य धर्मार्थावप्रमेयावनंतरं ॥
धर्मात्मा मंत्रविद्येषां राज्ञां राजन्पुरोहितः ॥ राजा चैवं गुणो येषां कुशलं तेषु सर्वतः ॥ उभौ प्रजा वर्द्धयतो देवान्पूर्वान्पितॄनपि ॥ भवेयातां
स्थितौ धर्मे श्रद्धेयौ सुतपस्विनौ ॥ परस्परस्य सुहृदौ विहितौ समचेतसौ ॥ ब्रह्मक्षत्रस्य संमानात्प्रजाः सुखमवाप्नुयात् ॥ विमाननात्तयोरे
व प्रजा नाश्येयुरेव हि ॥ ब्रह्मक्षत्रं हि सर्वेषां वर्णानां मूलमुच्यते ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ ऐलकाश्यपसंवादं तन्निबोध ल
युधिष्ठिर ॥ ॥ ऐल उवाच ॥ ॥ यदा हि ब्रह्म प्रजहाति क्षत्रं क्षत्रं यदा वा प्रजहाति ब्रह्म ॥ अन्वग्बलं कतमेऽस्मिन्भजंते तथा वर्णाः कत
मेऽस्मिन्ध्रियंते ॥ ॥ काश्यप उवाच ॥ ॥ व्यृद्धं राष्ट्रं भवति क्षत्रियस्य ब्रह्म क्षत्रं यत्र विरुध्यतीह ॥ अन्वग्बलं दस्यवस्तद्भजंते यथा वर्णं तत्र व ८६
दंति संतः ॥ नैषामुक्षा वर्द्धते नोत पुत्रा न गर्गरो मथ्यते नो यजंते ॥ नैषां पुत्रा वेदमधीयते च यदा ब्रह्म क्षत्रियाः संत्यजंति ॥ अपध्वस्ता द
स्युभूता भवंति ये ब्राह्मणान्क्षत्रियाः संत्यजंति ॥ एतौ हि नित्यसंयुक्तौ वितरेतरधारणे ॥ क्षत्रं वै ब्राह्मणो योनिः क्षत्रस्य वै द्विजाः ॥ उभा योनि

वेतौ नित्यमभिसंप्रपन्नौ संप्राप्नुतो महतीं संप्रतिष्ठां ॥ तयोः संधिर्भिद्यते चेत्पुराणस्ततः सर्वं भवति हि संप्रमूढं ॥ नात्र पारं लभते पा
रगामी महागाधे नौरिव संप्रपन्ना ॥ चातुर्वर्ण्यं भवति हि संप्रमूढं ततः प्रजाः क्षयसंस्था भवंति ॥ ब्रह्मवृक्षो रक्ष्यमाणो मधुम
च वर्षति ॥ अरक्ष्यमाणः सततमश्रु पापं च वर्षति ॥ अब्रह्मचारी चरणादपेतो यदा ब्रह्म ब्रह्मणि त्राणमिच्छेत् ॥ आश्च
र्यतो वर्षति तत्र देवस्तत्राभीक्ष्णं दुःसहाश्चाभवंति ॥ स्त्रियं हि यो ब्राह्मणं चापि पापः सभायां यत्र लभतेऽनुवादं ॥ राज्ञः सकाशे
न बिभेति चापि ततो भयं विद्यते क्षत्रियस्य ॥ पापैः पापे क्रियमाणेऽभिवेल ततो रुद्रो जायते देव एषः ॥ पापैः पापाः संजनयंति रुद्रं त
सर्वा तः साध्वसाधून्हि नस्ति ॥ ॥ ऐल उवाच ॥ ॥ कुतो रुद्रः कीदृशो वापि रुद्रः सत्त्वैः सत्त्वं वध्यते दृश्यमानं ॥ एतद्विद्वन्काश्यप मे
प्रचक्ष्व कुतो रुद्रो जायते देव[illegible] ॥ ॥ काश्यप उवाच ॥ ॥ आत्मा रुद्रो हृदये मानवानां स्वं स्वं देहं परदेहं वदंति ॥ वातोत्पातैः स
दृशं रुद्रमाहुर्दैवैर्जीमूतैः सदृशं रूपमस्य ॥ ॥ ऐल उवाच ॥ ॥ न चै वातः परिवृणोति कश्चिन्न जीमूतो वर्षति नापि देवः ॥
त तथा युक्तो दृश्यते मानवेषु कामद्वेषाद्बध्यते मुच्यते च ॥ ॥ काश्यप उवाच ॥ ॥ यथैकगेहे जातवेदाः प्रदीप्तः कृत्स्नं ग्राम
दहते सत्वरावान् ॥ विमोहनं कुरुते देव एष ततः सर्वं स्पृश्यते पुण्यपापैः ॥ ॥ ऐल उवाच ॥ ॥ यदि दंडः स्पृश्यते पुण्यपापं
पापैः पापे क्रियमाणेऽविशेषात् ॥ कस्य हेतोः सुकृतं नाम कुर्याद्दुष्कृतं वा कस्य हेतोर्न कुर्यात् ॥ ॥ काश्यप उवाच ॥ ॥
सुसंयोगात्साप्यपापकृतामपापान्तुल्यो दंडः स्पृश्यते मिश्रभावात् ॥ शुष्केणार्द्रं दह्यते मिश्रभावान्न मिश्रः स्यात्सापप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

८९

हृद्भिः कृथंचित्॥ ॥ऐल उवाच॥ ॥साध्वसाधून्यदा नयतीह सम्भिः साध्वसाधून्स्नापयतीह सर्वा॥ ॥साध्वसाधूंश्चाप्ति
वातीह वायुरापस्तथा साध्वसाधून्भुनंति॥ ॥कास्यप उवाच॥ ॥एवमस्मिन्वर्तते लोक एवं नामुत्रैवं वर्त्तते राजपुत्र॥
प्रेत्यैतयोरंतरवान्विशेषो यो वै पुण्यं चरते यश्च पापं॥ पुण्यस्य लोको मधुमान्घृताचिर्हिरण्यज्योतिरमृतस्य नाभिः
॥ तत्र प्रेत्य मोदते ब्रह्मचारी न तत्र मृत्युर्न जरा नोत दुःखं॥ पापस्य लोको निरयो प्रकाशो नित्यं दुःखं शोकभूयिष्ठमेव॥
तत्रात्मानं शोचती पापकर्मा बह्वीः समाः प्रतपन्नप्रतिष्ठः॥ मिथोभेदाद्ब्राह्मणक्षत्रियाणां प्रजा दुःखं दुःसहं चावि
शंति॥ एवं ज्ञात्वा कार्य एवेह नित्यं पुरोहितो नैकविद्यो नृपेण॥ तं चाभिषिंचेत तथा धर्मो विधीयते॥ अग्र्यं हि
ब्राह्मणः प्रोक्तं सर्वस्यैवेह धर्मतः॥ पूर्वं हि ब्राह्मणः सृष्टा इति ब्रह्मविदो विदुः॥ ज्येष्ठेनाभिजनेनास्य प्राप्तं पूर्वं यद
त्तरं॥ तस्मान्मान्यश्च पूज्यश्च ब्राह्मणः प्रसृताग्रभुक्॥ सर्वं श्रेष्ठं विशिष्टं च निवेद्यं तस्य धर्मतः॥ अवश्यमेव कर्त
व्यं राज्ञा बलवतापि हि॥ ब्रह्म वर्द्धयति क्षत्रं क्षत्रतो ब्रह्म वर्द्धते॥ एवं राज्ञा विशेषेण पूज्या वै ब्राह्मणाः सदा॥ ॥
इति शांतौ राजधर्मे॥ ॥भीष्म उवाच॥ ॥योगक्षेमो हि राष्ट्रस्य राजन्यायत्त उच्यते॥ योगक्षेमस्य राज्ञो पि समा
यत्तः पुरोहितः॥ यत्रादृष्टं भयं ब्रह्म प्रजानां शमयत्युत॥ दृष्टं च राजा बाहुभ्यां तद्राष्ट्रं सुखमेधते॥ अत्राप्युदाहरं
तीममितिहासं पुरातनं॥ मुचुकुंदस्य संवादं राज्ञो वैश्रवणस्य च॥ मुचुकुंदो विजित्येमां पृथिवीं पृथिवीपतिः॥ जिज्ञा ८९

स्यमानः स्वबलमुपेयादलकापतिं॥ ततो वैश्रवणो राजा राक्षसानसृजत्तदा॥ ते बलान्यवमृद्नंत मुचुकुंदस्य नैर्ऋ
ताः॥ स हन्यमाने सैन्ये स्वे मुचुकुंदो नराधिपः॥ गर्हयामास विद्वांसं पुरोहितमरिंदम॥ तत उग्रं तपस्तप्त्वा वसिष्ठो धर्म
वित्तमः॥ रक्षांस्युपावधीत्तस्य पंथानं चाप्यविंदत॥ ततो वैश्रवणो राजा मुचुकुंदमदर्शयत्॥ वध्यमानेषु सैन्येषु वच शं
नं चेदमब्रवीत्॥ बलवंतस्त्वया पूर्वं राजानः सपुरोहिताः॥ न चैवं समवर्तंत यथा त्वमिह वर्तसे॥ ते खल्वपि कृतास्त्रा
श्च बलवंतश्च भूमिपाः॥ आगम्य पर्युपासंते मामीशं सुखदुःखयोः॥ यद्यस्ति बाहुवीर्यं ते तद्दर्शयितुमर्हसि॥ किं ब्राह्म
णबलेन त्वमतिमात्रं प्रवर्त्तसे॥ मुचुकुंदस्ततः क्रुद्धः प्रत्युवाच धनेश्वरं॥ न्यायपूर्वमसंरब्धमसंभ्रांतमिदं वचः॥ ब्रह्म
स्वबल क्षत्रमिदं सृष्टमेकयोनि स्वयंभुवा॥ पृथग्बलविधानं तन्न लोकं परिरक्षति॥ ततो बलं नित्यं ब्राह्मणेषु प्रतिष्ठितं॥ मंत्र
अस्त्रबाहुबलं नित्यं क्षत्रियेषु प्रतिष्ठितं॥ ताभ्यां संभूय कर्तव्यं प्रजानां परिपालनं॥ तथा च मां प्रवर्त्ततं गर्हयस्य
वे लकाधिपं॥ ततो ब्रवीद्वैश्रवणो राजानं सपुरोहितं॥ नाहं राज्यमनिर्दिष्टं कस्मैचिद्विदधाम्युत॥ नाच्छिंदे वाप्यनिर्दि
ष्टमिति जानीहि पार्थिव॥ बाहुवीर्यार्जितं राज्यं मा श्नीयामिति कामये॥ ॥भीष्म उवाच॥ ॥ततो वैश्रवणो राजा
विस्मयं परमं ययौ॥ क्षत्रधर्मे स्थितं दृष्ट्वा मुचुकुंदमसंभ्रमं॥ ततो राजा मुचुकुंदः सो न्वशासद्वसुंधरां॥ बाहुवीर्या
र्जितां सम्यक्क्षत्रधर्ममनुव्रतः॥ एवं यो ब्रह्मविद्राजा ब्रह्मपूर्वं प्रवर्तति॥ जयत्यविजितामुर्वीं यशश्च महदश्नुते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्योदकी ब्राह्मणः स्यान्नित्यशस्त्रश्च क्षत्रियः॥ तयोर्हि सर्वमायत्तं यत्किंचिज्जगतीगतं॥ ॥इति श्रीराजधर्मे॥ मुचुकुं
दोपाख्याने॥ ॥युधिष्ठिर उवाच॥ ॥यया वृत्त्या महीपालो विवर्द्धयति मानवान्॥ पुण्यांश्च लोकान् जयति तन्मे ब्रू
हि पितामह॥ ॥भीष्म उवाच॥ ॥दानशीलो भवेद्राजा यज्ञशीलश्च भारत॥ उपवासतपःशीलः प्रजानां पालने र
तः॥ सर्वाश्चैव प्रजा नित्यं राजधर्मेण पालयेत्॥ उत्थानेन प्रदानेन पूजयेच्चापि धार्मिकान्॥ राज्ञा हि पूजितो धर्मस्त
तः सर्वत्र पूज्यते॥ यद्यदाचरते राजा तत्प्रजानां हि रोचते॥ नित्यमुद्यतदंडः स्यान्मृत्युवत्सुरिवारिषु॥ निहन्यात्सर्वतो
दस्यून्न कामात्कस्यचित्क्षमेत्॥ यं हि धर्मं चरंतीह प्रजा राज्ञा सुरक्षिताः॥ राजा चतुर्थभाक्तस्य प्रजा धर्मेण पालयेत्॥
यद्राष्ट्रे कुशलं किंचिद्राज्ञोरक्षयतः प्रजाः॥ चतुर्थं तस्य पापस्य राजा भारत विंदति॥ अप्याहुः सर्वमेवेति भूयो धर्म
विनिश्चयः॥ कर्मणः पृथिवीपाल नृशंसोऽनृतवागपि॥ तादृशात्किल्बिषाद्राजन् शृणु येन प्रमुच्यते॥ प्रत्याहर्तुम
शक्यं स्याद्धनं चोरैर्हृतं यदि॥ स्वकोशात्तत्प्रदेयं स्यादशक्तेनोपजीवतः॥ सर्ववर्णैः सदा रक्ष्यं ब्रह्मस्वं ब्राह्मणा
स्तथा॥ न स्थेयं विषये तेन योऽपकुर्याद्द्विजातिषु॥ ब्रह्मस्वे रक्ष्यमाणे हि सर्वं भवति रक्षितं॥ तस्मात्तेषां प्रसादेन कृत
कृत्यो भवेन्नृपः॥ पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः॥ नरास्तमुपजीवंति नृपं सर्वार्थसाधकं॥ न हि कामात्म
ना राज्ञा सततं कामबुद्धिना॥ नृशंसेनातिलुब्धेन शक्यं पालयितुं प्रजाः॥ ॥युधिष्ठिर उवाच॥ ॥नाहं राज्य ९८

सुखान्वेषी राज्यमिच्छाम्यपि क्षणं॥ धर्मार्थं रोचये राज्यं धर्मश्चात्र न विद्यते॥ वनमेव गमिष्यामि तस्माद्धर्मचिकीर्षया॥
तत्र मेध्येष्वरण्येषु न्यस्तदंडो जितेंद्रियः॥ धर्ममाराधयिष्यामि मुनिर्मूलफलाशनः॥ ॥भीष्म उवाच॥ ॥वेदाहं तव या बुद्धि
रानृशंस्यगुणैव सा॥ न च शुद्धानृशंस्येन शक्यं राज्यमुपासितुं॥ अपि तु त्वां मृदुं प्राज्ञमत्यार्यमतिधार्मिकं॥ क्लीबं धर्म
घृणायुक्तं न लोको बहु मन्यते॥ वृत्तं तु त्वमवेक्षस्व पितृपैतामहोचितं॥ नैतद्राज्ञां यथा वृत्तं यथा त्वं स्थातुमिच्छसि॥ न हि वैक्लव्य
संसृष्टमानृशंस्यमिहास्थितः॥ प्रजापालनसंभूतं प्राप्त धर्मफलं ह्यसि॥ न ह्येनामाशिषं पांडुर्न च कुंती त्वयाचत॥ त्वं चा
पि प्रज्ञया तात यथाचरसि मेधया॥ शौर्यं बलं च सत्त्वं च पिता तव सदाब्रवीत्॥ माहात्म्यं च महौदार्यं भवतः कुंत्ययाचत॥ नित्यं
स्वाहा स्वधा नित्यं चोभे मानुषदेवते॥ पुत्रेष्वाशासते नित्यं पितरो देवता नि च॥ दानमध्ययनं यज्ञं प्रजानां परिपालनं॥
धर्ममेतदधर्मं वा जन्मनैवाभ्यजायथाः॥ काले धुरि नियुक्तानां वहतां भार आहितं॥ सीदतामपि कौंतेय न कीर्तिरवसीद
ति॥ समंततो विनयतो वहंत्यस्खलितं हयाः॥ निर्दोषकर्मवचनात्सिद्धिः कर्मण एव सा॥ नैकांतविनिपातेन विचचारेह क
श्चन॥ धर्मी गृही वा राजा वा ब्रह्मचार्यथवा द्विजः॥ अल्पं तु साधु भूयिष्ठं यत्कर्मोदारमेव तत्॥ कृतमेवाकृताच्छ्रेयो न पापीयो
ऽस्त्यकर्मणः॥ यदा कुलीनो धर्मज्ञः प्राप्नोत्यैश्वर्यमुत्तमं॥ योगक्षेमस्तदा राज्ञः कुशलायैव कल्पते॥ दानेनान्यं बलेनान्यमन्यं
सूनृतया गिरा॥ सर्वतः परिगृह्णीयाद्राज्यं प्राप्येह धार्मिकः॥ यं हि वैद्याः कुले जाताः अवृत्तिभयपीडिताः॥ प्राप्य तृप्ताः प्रतिष्ठं
ति धर्मः कोऽभ्यधिकस्ततः॥ ॥युधिष्ठिरः॥ ॥किं ततः परतः स्वर्ग्यं का ततः प्रीतिरुत्तमा॥ किं ततः परमैश्वर्यं ब्रूहि मे य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० दिपश्यसि॥ ॥भीष्म उवाच॥ ॥यस्मिन्नरसयार्दितः सम्यक् क्षेमं विंदंत्यपि क्षणं॥ स स्वर्गजित्तमोऽस्माकं सत्यमेतद् ब्रवीमि ते
२९ ॥त्वमेव प्रीतिमांस्तस्मात् कुरूणां कुरुसत्तम॥ भव राजा जय स्वर्गं सतो रक्षासतो जहि॥ अनु त्वां तात जीवंतु सुहृदः साधुभिः
सह॥ पर्जन्यमिव भूतानि स्वादुद्रुममिवांडजाः॥ धृष्टं शूरं प्रहर्तारमनृशंसं जितेंद्रियं॥ वत्सलं संविभक्तारमुपजीवंति तं ज
नाः॥ ॥शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥स्वकर्मण्यपरे युक्तास्तथैवान्ये विकर्मणि॥ तेषां विशेषमाचक्ष्व ब्राह्मणा
नां पितामह॥ ॥भीष्म उवाच॥ ॥विद्यालक्षणसंपन्नाः सर्वत्र समदर्शिनः॥ एते ब्रह्मसमा राजन् ब्राह्मणाः परिकीर्तिताः॥
ऋग्यजुःसामसंपन्नाः स्वकर्मस्ववस्थिताः॥ एते देवसमा राजन् ब्राह्मणानां भवंत्युत॥ जन्मकर्मविहीना ये कद
र्या ब्रह्मबंधवः॥ एते शूद्रसमा राजन् ब्राह्मणानां भवंत्युत॥ अश्रोत्रियाः सर्व एव सर्वे चानाहिताग्नयः॥ तान्सर्वान्धार्मिको
राजा बलिं विष्टिं च कारयेत्॥ आह्वायका देवलका नक्षत्रग्रामयाजकाः॥ एते ब्राह्मणचांडाला महापथिकपंचमाः॥ ऋत्वि
क्पुरोहितो मंत्री दूतो वार्त्तानुकर्षकः॥ एते क्षत्रसमा राजन् ब्राह्मणानां भवंत्युत॥ अश्वारोहा गजारोहा रथिनोऽथ पदातयः॥ ए एता
ते वैश्यसमा राजन् ब्राह्मणानां भवंत्युत॥ एतेभ्यो बलिमादद्याद्धीनकोशो महीपतिः॥ ऋते ब्रह्मसमेभ्यश्च देवकल्पेभ्य
एव च॥ अब्राह्मणानां वित्तस्य स्वामी राजेति वैदिकं॥ ब्राह्मणानां च ये केचिद्विकर्मस्था भवंत्युत॥ विनियस्याः संति सज्यास्व
धर्मानुग्रहकारणात्॥ यस्य स्म विषये राज्ञः स्तेनो भवति वै द्विजः॥ राज्ञ एवापराधं तं मन्यंते तद्विदो जनाः॥ अवृत्त्या यो भवेत्स्तेनो २९
वेदवित्स्नातकस्तथा॥ राजन् स राज्ञा भर्तव्य इति वेदविदो विदुः॥ स चेन्नोपरिवर्तेत कृतवृत्तिः परंतप॥ ततो निर्वासनीयः स्यात्त

स्माद्देशात्सबांधवः॥ ॥इति शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥केषां प्रभवते राजा वित्तस्य भरतर्षभ॥ कया च वृत्त्या वर्त्ते
त तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥अब्राह्मणानां वित्तस्य स्वामी राजेति वैदिकं॥ ब्राह्मणानां च ये केचिद्विकर्मस्था भवं
त्युत॥ विकर्मस्थाश्च नोपेक्ष्या विप्रा राज्ञा कथंचन॥ इति राज्ञां पुरावृत्तमभिजल्पंति साधवः॥ यस्य स्म विषये राज्ञः स्तेनो भ
वति वै द्विजः॥ राज्ञ एवापराधं तं मन्यंते किल्बिषं नृप॥ अभिशस्तमिवात्मानं मन्यंते येन कर्मणा॥ तस्माद्राजर्षयः सर्वे ब्राह्मणा
ननुपालयन्॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ गीतं केकयराजेन ह्रियमाणेन रक्षसा॥ केकयानामधिपतिं रक्षो ज
ग्राह दारुणं॥ स्वाध्यायेनान्वितं राजन्नरण्ये संशितव्रतं॥ राजा॥ ॥न मे स्तेनो जनपदे न कदर्यो न मद्यपः॥ नानाहिताग्निर्नायज्वा
मामकांतरमाविशः॥ न च मे ब्राह्मणोऽविद्वान्नाव्रती नाप्यसोमपः॥ नानाहिताग्निर्विषये मामकांतरमाविशः॥ नानासदक्षि
णैर्यज्ञैर्यजंति विषये मम॥ अधीते नाव्रती कश्चिन्मामकांतरमाविशः॥ अधीयंतेऽध्यापयंते यजंते याजयंति च॥ ददति
सु प्रतिगृह्णंति षट्सु कर्मस्ववस्थिताः॥ पूजिताः संविभक्ताश्च मृदवः सत्यवादिनः॥ ब्राह्मणा मे स्वकर्मस्था मामकांतरमाविशः॥
॥न याचंति प्रयच्छंति सत्यधर्मविशारदाः॥ नाध्यापयंत्यधीयंते यजंते याजयंति न॥ ब्राह्मणान्परिरक्षंति संग्रामेष्वपला
यिनः॥ क्षत्रिया मे स्वकर्मस्था मामकांतरमाविशः॥ कृषिगोरक्ष्यवाणिज्यमुपजीवंत्यमायया॥ अप्रमत्ताः क्रियावंतः सुव्र
ताः सत्यवादिनः॥ संविभागं दमं शौचं सौहृदं च व्यपाश्रिताः॥ मम वैश्याः स्वकर्मस्था मामकांतरमाविशः॥ त्रीन्वर्णानुपति
ष्ठंति यथावदनसूयकाः॥ मम शूद्राः स्वकर्मस्था मामकांतरमाविशः॥ कृपणानाथवृद्धानां दुर्बलातुरयोषितां॥ संवि
भक्तास्मि सर्वेषां मामकांतरमाविशः॥ कुलदेशादिधर्माणां प्रथितानां यथाविधि॥ अव्युच्छेत्तास्मि सर्वेषां मामका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०
१०

तन्मा विशः ॥ तपस्विनो मे विषये पूजिताः परिपालिताः ॥ संविभक्ताश्च सत्कृत्य मामकांतन्मा विशः ॥ नासंविभज्य
भोक्तास्मि नाविशामि परस्त्रियं ॥ स्वतंत्रो जातु न क्रीडे मामकां० ॥ नाब्रह्मचारी भिक्षावी भिक्षुर्नाब्रह्मचर्यवान् ॥ अनृ
त्विजा हुतं नास्ति मामकां० ॥ नावजानाम्यहं वैद्यान्न वृद्धान्न तपस्विनः ॥ राष्ट्रस्य प्रतिभानाभि मामकां० ॥ आत्मविज्ञान
संपन्नस्तपस्वी सर्वधर्मवित् ॥ स्वामी सर्वस्य राज्यस्य श्रीमान्मम पुरोहितः ॥ दानेन विद्यामभिवांछयामि सत्येनार्थि
ब्राह्मणानां च गुप्त्या ॥ शुश्रूषया चापि गुरूनुपैमि न मे भयं विद्यते राक्षसेभ्यः ॥ न मे राष्ट्रे विधवा ब्रह्मबंधुर्न ब्राह्मणः कि
तवो नोत चौरः ॥ अयाज्ययाजी न च पापकर्मा न मे भयं विद्यते राक्षसेभ्यः ॥ न मे शस्त्रैरनिर्भिन्नं गात्रे द्व्यंगुलमंतरं ॥
धर्मार्थं युध्यमानस्य मामकांतन्मा विशः ॥ गोब्राह्मणेभ्यो यज्ञेभ्यो नित्यं स्वस्त्ययनं मम ॥ आशासते जना राष्ट्रे मामकां
तन्मा विशः ॥ ॥ राक्षस उवाच ॥ ॥ यस्मात्सर्वास्ववस्थासु धर्ममेवान्ववेक्षसे तस्मात्प्राप्नुहि केकय गृहं स्वस्ति व्रजा
म्यहं ॥ येषां गोब्राह्मणा रक्ष्याः प्रजा रक्ष्याश्च केकय ॥ न रक्षोभ्यो भयं तेषां कुत एव तु मानुषात् ॥ येषां पुरोगमा विप्रा ये
षां ब्रह्म परं बलं ॥ अतिथिप्रियास्तथा पौरास्ते वै स्वर्गजितो नराः ॥ ॥ भीष्म उवाच ॥ ॥ तस्माद्द्विजातीन्रक्षेत ते हि रक्षं
ति रक्षिताः ॥ आशीरेषां भवेद्राजन्राज्ञां सम्यक्प्रवर्ततां ॥ तस्माद्राज्ञा विशेषेण विकर्मस्था द्विजातयः ॥ नियम्याः
संविभज्याश्च प्रजानुग्रहकारणात् ॥ य एवं वर्तते राजा पौरजानपदेष्विह ॥ अनुभूयेह भद्राणि प्राप्नोतींद्रसलोकतां
॥ ॥ शांतौ राजधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ व्याख्याता राजधर्मेण वृत्तिरापत्सु भारत ॥ कथं स्विद्वैश्यधर्मेण संजी १०

वेद्ब्राह्मणो न वा ॥ ॥ भीष्म उवाच ॥ ॥ अशक्तः क्षत्रधर्मेण वैश्यधर्मेण वर्तयेत् ॥ कृषिगोरक्ष्यमास्थाय व्यसने वृ
त्तिसंक्षये ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कानि पण्यानि विक्रीणन्स्वर्गलोकान्न हीयते ॥ ब्राह्मणो वैश्यधर्मेण वर्तयन्
भरतर्षभ ॥ ॥ भीष्म उवाच ॥ ॥ सुरां लवणमित्येवं तिलान्केसरिणः पशून् ॥ ऋषभान्मधु मांसं च कृतान्नं च युधिष्ठि
र ॥ सर्वास्ववस्थास्वेतानि ब्राह्मणः परिवर्जयेत् ॥ एतेषां विक्रयात्तात ब्राह्मणो नरकं पतेत् ॥ अजोऽग्निर्वरुणो मेषः सूर्यो
ऽश्वः पृथिवी वीविराट् ॥ धेनुर्यज्ञश्च सोमश्च न विक्रेयाः कथंचन ॥ पक्वेनामस्य निमयं न प्रशंसंति साधवः ॥ निमयेत्
पक्वमामेन भोजनार्थाय भारत ॥ वयं सिद्धमशिष्यामो भवानस्साधयतामिमं ॥ एवं समीक्ष्य निमयं नाधर्मोऽस्ति कदाचन ॥
त्र अत्र ते वर्तयिष्यामि यथा धर्मः पुरातनः ॥ व्यवहारप्रवृत्तानां तन्निबोध युधिष्ठिर ॥ भवतेऽहं ददानीदं भवानेतत्प्रयच्छतु
॥ रुचिते वर्तते धर्मो न बलात्संप्रवर्तते ॥ इत्येवं संप्रवर्तंते व्यवहाराः पुरातनाः ॥ ऋषीणामितरेषां च साधु चैतदसंशयं ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ अथ तात यदा सर्वाः शस्त्रमाददते प्रजाः ॥ व्युत्क्रामंति स्वधर्मेभ्यः क्षत्रस्य क्षीयते बलं ॥ रा
जा त्राता न लोकस्य कथं च स्यात्परायणं ॥ एतन्मे संशयं ब्रूहि विस्तरेण नराधिप ॥ ॥ भीष्म उवाच ॥ ॥ दानेन तप
सा यज्ञैरद्रोहेण दमेन च ॥ ब्राह्मणप्रमुखा वर्णाः क्षेममिच्छेयुरात्मनः ॥ तेषां ये वेदबलिनस्तेऽभ्युत्थाय समंततः ॥ राज्ञो ब
लं वर्धयेयुर्महेंद्रस्येव देवताः ॥ राज्ञो हि क्षीयमाणस्य ब्रह्मैवाहुः परायणं ॥ तस्माद्ब्रह्मबलेनैव समुत्थेयं विजानता
॥ यदा तु विजयी राजा क्षेमं राष्ट्रेऽभिसंदधेत् ॥ तदा वर्णा यथाधर्मं निविशेयुः कथंचन ॥ उन्मर्यादे प्रवृत्ते तु दस्युभिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म
९१

कं रेकृते॥ सर्वेषणानि दुष्येयुः शस्त्रं वै तो युधिष्ठिर॥ ॥युधिष्ठिर उवाच॥ ॥अथ चेत्सर्वतः क्षत्रं प्रदुष्येत् ब्राह्मणां प्रति
॥ कस्तस्य ब्राह्मणस्त्राता को धर्मः किं परायणं॥ ॥भीष्म उवाच॥ ॥तपसा ब्रह्मचर्येण शस्त्रेण च बलेन च॥ अमायया
मायया च नियंतव्यं तदा भवेत्॥ क्षत्रियस्याति वृद्धस्य ब्राह्मणेषु विशेषतः॥ ब्रह्मैव संनियंता स्यात् क्षत्रं ब्रह्मसनातनं॥ अ
द्भ्यो ग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं॥ तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति॥ यदा छिनत्त्ययोश्मानमग्निश्चापोभि
मथति॥ क्षत्रं च ब्राह्मणं द्वेष्टि तदा शाम्यंति ते त्रयः॥ तस्माद्ब्रह्मणि शाम्यंति क्षत्रियाणां युधिष्ठिर॥ समुदीर्णान्यजेया
नि तेजांसि च बलानि च॥ ब्रह्मवीर्ये मृदौ भूते क्षत्रवीर्ये च दुर्बले॥ दुष्टेषु सर्ववर्णेषु ब्राह्मणान्प्रति सर्वशः॥ ये तत्र युद्धं
कुर्वंति त्यक्त्वा जीवितमात्मनः॥ ब्राह्मणान्परिरक्षंतो धर्ममात्मानमेव च॥ मनस्विनो मन्युमंतः पुण्यलोका भवंति ते॥ ब्रा
ह्मणार्थं हि सर्वेषां शस्त्रग्रहणमिष्यते॥ अतिस्विष्टस्व्यधीतानां लोकानतितपस्विनां॥ अनाशकाग्न्योर्विशतां शूरा यांति
परां गतिं॥ ब्राह्मणस्त्रिषु वर्णेषु शस्त्रं गृह्णन्न दुष्यति॥ एवमेवात्मनस्त्यागान्नान्यं धर्मं विदुर्जनाः॥ तेभ्यो नमश्च भद्रं च
ये शरीराणि जुह्वते॥ ब्रह्मद्विषो नियच्छंतो स्माकमस्तु सलोकता॥ ब्रह्मलोकजितः स्वर्ग्यान्वीरांस्तान्मनुरब्रवीत्॥ यथा
श्वमेधावभृथे स्नाताः पूता भवंत्युत॥ दुष्कृतस्य प्रणाशाच्च तथा शस्त्रहता रणे॥ भवत्यधर्मो धर्मो वा धर्माधर्मावुभावपि
कारणाद्देशकालस्य देशकालः स तादृशः॥ मित्रा क्रूराणि कुर्वंतो यजंति स्वर्गमुत्तमं॥ धर्म्याः पापानि कुर्वंतो गच्छंति
परमां गतिं॥ ब्राह्मणस्त्रिषु लोकेषु शस्त्रं गृह्णन्न दुष्यति॥ आत्मत्राणे वर्णदोषे दुर्गस्य नियमेषु च॥ ॥युधिष्ठिर उ ९१

वाच॥ ॥अभ्युत्थिते दस्युबले क्षत्रार्थे वर्णसंकरे॥ संप्रमूढेषु वर्णेषु यद्यन्योभिभवेद्बली॥ ब्राह्मणो यदि वा वैश्यः शू
द्रो वा राजसत्तम॥ दस्युभ्योथ प्रजा रक्षेद्दंडं धर्मेण धारयेत्॥ कार्यं कुर्यान्न वा कुर्यात्संवार्यो वा भवेन्न वा॥ तस्माच्छस्त्रं ग्र
हीतव्यमन्यत्र क्षत्रबंधुतः॥ ॥भीष्म उवाच॥ ॥अपारे यो भवेत्पारमप्लवे यः प्लवो भवेत्॥ शूद्रो वा यदि वाप्यन्यः सर्व
था मानमर्हति॥ यमाश्रित्य नरा राजन्वर्तयेयुर्यथासुखं॥ अनाथाः पत्यकल्पंते दस्युभिः परिपीडिताः॥ तमेव पूजयेर
न्प्रीत्या स्वमिव बांधवं॥ महद्ध्यभीक्ष्णं कौरव्य कर्ता संमानमर्हति॥ किमुक्ष्णावहता कृत्यं किं धेन्वा चाप्यदुग्धया॥ वंध्या
या भार्यया को र्थः को र्थो राज्ञाप्यरक्षता॥ यथा दारुमयो हस्ती यथा चर्ममयो मृगः॥ यथा ह्यर्थः षंढो वा पार्थिक्षेत्रं यथोष
रं॥ एवं विप्रो नधीयानो राजा यश्च न रक्षति॥ न वर्षति यो मेघः सर्वे ह्येते निरर्थकाः॥ नित्यं यस्तु सतो रक्षेदसतस्तु
निबर्हयेत्॥ स एव राजा कर्तव्यस्तेन सर्वमिदं धृतं॥ ॥इति शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥किंसमुत्थाः क
थंशीलाः ऋत्विजः स्युः पितामह॥ कथं विधाश्च राजेंद्र तद्ब्रूहि वदतां वर॥ ॥भीष्म उवाच॥ ॥प्रतिकर्म पुराचार ऋ
त्विजां स्म विधीयते॥ छंदांसि सामादि विज्ञाय द्विजानां श्रुतमेव च॥ ये त्वेकरतयो नित्यं धीरा न्यायप्रियवादिनः॥ परस्प
रस्य सुहृदः संमतास्समदर्शिनः॥ आनृशंस्यं सत्यवाक्यमकुसीदमथार्जवं॥ अद्रोहो नतिमानश्च ह्रीस्तितिक्षा दमः श
मः॥ एतैरेव गुणैर्युक्तः स वै कार्यस्त्विजः प्रभोः॥ धीमान्सत्यधृतिर्दांतो भूतानामविहिंसकः॥ अकामद्वेषसंयुक्तस्त्रिभिः
शुक्लैः समन्वितः॥ अहिंसको ज्ञानतृप्तः स ब्रह्मासनमर्हति॥ एते महर्त्विजस्तात सर्वे मान्या यथार्हतः॥ ॥युधिष्ठिर उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० वाच॥ ॥यदिदं वेदवचनं दक्षिणासु विधीयते॥ इदं देयमिदं देयं न कश्चिद्व्यवतिष्ठते॥ नेदं प्रतिपन्नं शास्त्रमापद्धर्मो
९२ नुशास्त्रतः॥ आज्ञाशास्त्रस्य घोरत्वं न शक्तिं समवेक्षते॥ श्रद्धावता हि यष्टव्यमित्येषा वैदिकी श्रुतिः॥ मिथ्योपेतस्य
यज्ञस्य किंनु श्रद्धा करिष्यते॥ ॥भीष्म उवाच॥ ॥न वेदानां परिभवान्न शाठ्येन न मायया॥ कश्चिन्महदवाप्नोति
मा तेभूद्बुद्धिरीदृशी॥ यज्ञांगं दक्षिणास्तात वेदानां परिबृंहणं॥ न यज्ञा दक्षिणाहीना तारयंति कथंचन॥ शक्तिः पू
र्णपात्रेण संमिता न समा भवेत्॥ अवश्यं तात यष्टव्यं त्रिभिर्वर्णैर्यथाविधि॥ सोमो राजा ब्राह्मणानामित्येषा वैदिकी श्रु
तिः॥ तं च विक्रेतुमिच्छंति न वृथा वृत्तिरिष्यते॥ तेन क्रीतेन यज्ञेन ततो यज्ञः प्रवर्त्तते॥ इत्येवं धर्मतो ध्यातमृषिभिर्धर्मचा
रिभिः॥ पुमान्यज्ञश्च सोमश्च न्यायवृत्तो यथा भवेत्॥ अन्यायवृत्तः पुरुषो न परस्य न चात्मनः॥ शरीरं वृत्तिमास्थाय इत्ये
षा श्रूयते श्रुतिः॥ नातिसम्यक्प्रणीतानि ब्राह्मणानां महात्मनां॥ ततो यज्ञादपि श्रेष्ठमित्येषा परमा श्रुतिः॥ तत्ते त
पः प्रवक्ष्यामि विद्वंस्तदपि मे शृणु॥ अहिंसा सत्यवचनमानृशंस्यं तपो घृणा॥ तत्तपो विदुर्धीरा न शरीरस्य शोष २
णं॥ अप्रामाण्यं च वेदानां शास्त्राणां चाभिलंघनं॥ अव्यवस्था च सर्वत्र तद्वै नाशनमात्मनः॥ निबोध दश होतॄणां विधा
नं पार्थ यादृशं॥ चित्तं स्रुक् चित्तमाज्यं च पवित्रं ज्ञानमुत्तमं॥ सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदं॥ एतावान्ज्ञानविष
यः किं प्रलापः करिष्यति॥ ॥इति शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥यद्यप्यल्पतरं कर्म तदप्येकेन दुष्करं॥ पुरुषे
णासहायेन किमु राज्ञा पितामह॥ किंशीलः किंसमाचारो राज्ञोऽथ सचिवो भवेत्॥ कीदृशे विश्वसेद्राजा कीदृशे न ९२

विश्वसेत्॥ ॥भीष्म उवाच॥ ॥चतुर्विधानि मित्राणि राज्ञां राजन्भवंत्युत॥ सहार्थो भजमानश्च सहजः कृत्रिमस्त
था॥ धर्मात्मा पंचमो मित्रं स तु नैकस्य न द्वयोः॥ यतो धर्मस्ततो वा स्यान्मध्यस्थो वा ततो भवेत्॥ यस्तस्यार्थो न रोचेत
न तं तस्य प्रकाशयेत्॥ धर्माधर्मेण राजानश्चरंति विजिगीषवः॥ चतुर्णां मध्यमौ श्रेष्ठौ नित्यं शंकेत चापरौ॥ सर्वे
नित्यं शंकितव्याः प्रत्यक्षं कार्यमात्मनः॥ न हि राज्ञा प्रमादो वै कर्त्तव्यो मित्ररक्षणे॥ प्रमादिनं हि राजानं लोकाः परिभ
वंत्युत॥ असाधुः साधुतामेति साधुर्भवति दारुणः॥ अरिश्च मित्रं भवति मित्रं चापि प्रदुष्यते॥ अनित्यचित्तः पुरु
षस्तस्मिन्को जातु विश्वसेत्॥ यस्मात्प्रधानं तत्कार्यं प्रत्यक्षं तत्समाचरेत्॥ एकांतेन हि विश्वासः कृत्स्नो धर्मार्थनाश
कः॥ अविश्वासश्च सर्वत्र मृत्युना न विशिष्यते॥ अकालमृत्युर्विश्वासो विश्वसन्हि विपद्यते॥ यस्मिन्करोति विश्वा
समिच्छातस्तस्य जीवति॥ तस्माद्विश्वसितव्यं च शंकितव्यं च केषुचित्॥ एषा नीतिगतिस्तात लक्ष्म्याश्चैव सना
तनी॥ यं मन्येत ममाभावादिममर्थागमः स्पृशेत्॥ नित्यं तस्माच्छंकितव्यममित्रं तं विदुर्बुधाः॥ यस्य क्षेत्रादप्युदकं
क्षेत्रमन्यस्य गच्छति॥ तत्रानियच्छतस्तस्य भिद्येरन्सर्वसेतवः॥ तथैवात्युदकाद्भीतस्तस्य भेदनमिच्छति॥ यमेवं ल
क्षणं विद्यात्तममित्रं विनिर्दिशेत्॥ यः समृध्या न तुष्येत क्षये दीनतरो भवेत्॥ एतदुत्तममित्रस्य निमित्तमिति चक्ष
ते॥ यं मन्येत ममाभावादस्याभावो भवेदिति॥ तस्मिन्कुर्वीत विश्वासं यथा पितरि वै तथा॥ तं शक्त्या वर्द्धमानश्च सर्वतः
परिबृंहयेत्॥ नित्यं क्षताद्वारयति यो धर्मेष्वपि कर्मसु॥ क्षताद्भीतं विजानीयादुत्तमं मित्रलक्षणं॥ ये तस्य क्षतमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजध मं०
९३

कं तितेतस्य रिपवः स्मृताः॥ व्यसनान्नीत्यभीतो यः समभ्यायोन तप्यते॥ यस्यादेवं विधं मित्रं तदात्मसममुच्यते॥ रूपवर्णस्वरो
पेतस्तितिक्षुरनसूयकः॥ कुलीनः शीलसंपन्नः स तस्मात् प्रत्यनंतरः॥ मेधावी स्मृतिमान् दक्षः प्रकृत्या चानृशंसवान्॥ यो मा
नितो मानितो वा न च दुष्येत् कदाचन॥ ऋत्विग्वा यदि वाचार्यः सखा वात्यन्तसंस्तुतः॥ गृहे वसेदमात्यस्ते सः स्यात् परमपूजि
तः॥ स ते विद्यात् परं मंत्रं प्रकृतिं चार्थधर्मयोः॥ विश्वासस्ते भवेत्तत्र यथा पितरि वै तथा॥ नैव द्वौ न त्रयः कार्या न मृष्येरन् प
रस्परं॥ एकार्थे ह्येव भूतानां भेदो भवति सर्वदा॥ कीर्तिप्रधानो यश्च स्याद्यश्च स्यात् समये स्थितः॥ समर्थान् यश्च न द्वेष्टि ना
नर्थान् कुरुते च यः॥ यो न कामाद्भयाल्लोभात् क्रोधाद्वा धर्ममुत्सृजेत्॥ दक्षः पर्याप्तवचनः स ते स्यात् प्रत्यनंतरः॥ कुलीनः शी
लसंपन्नस्तितिक्षुरविकत्थनः॥ शूरश्चार्यश्च विद्वांश्च प्रतिपत्तिविशारदः॥ एते ह्यमात्याः कर्त्तव्याः सर्वकर्मस्ववस्थिताः॥ पू
जिताः संविभक्ताश्च सुसहायाः सुनिष्ठिताः॥ कृत्स्नमेते विनिक्षिप्ताः प्रतिरूपेषु कर्मसु॥ युक्ता महत्सु कार्येषु श्रेयांस्युत्पाद
यंति च॥ एते कर्माणि कुर्वंति स्पर्द्धमाना मिथः सदा॥ क्रोमर्द्दीर्घवदान्यस्य ह्रीमतः सत्यवादिनः॥ नान्यो ज्ञाते महाबाहो
विनाशमभिनंदति॥ अज्ञातितापि न सुखा नावज्ञाते स्वतः परः॥ अज्ञातिमंतं पुरुषं परे चाभिभवंत्युत॥ निकृतस्य नरै
रन्यैर्ज्ञातिरेव परायणं॥ नान्यो विकारं सहते ज्ञातेर्ज्ञातिः कथंचन॥ आत्मानमेव जानाति निकृतं बांधवैरपि॥ तेषु संति गुणा
श्चैव नैर्गुण्यं चैव लक्ष्यते॥ नाज्ञातिरनुगृह्णाति न च ज्ञातिर्नमस्यति॥ उभयं ज्ञातिवर्गेषु दृश्यते साध्वसाधु च॥ तान्मानयेत् पूज
येच्च वाचा नित्यं च कर्मणा॥ कुर्याच्च प्रियमेतेभ्यो नाप्रियं किंचिदाचरेत्॥ विश्वस्तवदविश्वस्तस्तेषु वर्तेत सर्वदा॥ न हि दो ९३

षो गुणो वेति निरूप्यत्र स्ति प्रदृश्यते॥ तस्यैवं वर्तमानस्य पुरुषस्याप्रमादिनः॥ अमित्राः संप्रसीदंति तथा मित्री भवंत्यपि॥ य
एवं वर्तते नित्यं ज्ञातिसंबंधिमंडले॥ मित्रेष्वमित्रमध्यस्थे चिरं यशसि तिष्ठति॥ ॥ शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥
एवमग्राह्यके तस्मिन् ज्ञातिसंबंधिमंडले॥ मित्रेष्वमित्रेष्वपि च कथं भावो विभाव्यते॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाह
रंतीममितिहासं पुरातनं॥ संवादं वासुदेवस्य महर्षेर्नारदस्य च॥ ॥वासुदेव उवाच॥ ॥नासुहृत् परमं मंत्रं नारदार्हति वे
दितुं॥ अपंडितो वापि सुहृत् पंडितो वाप्यनात्मवान्॥ स ते सौहृदमास्थाय किंचिद्वक्ष्यामि नारद॥ कृत्स्नां बुद्धिबलं प्रेक्ष्य सं
पृच्छे त्रिदिवंगम॥ दास्यमैश्वर्यवादेन ज्ञातीनां वै करोम्यहं॥ अर्द्धभोक्तास्मि भोगानां वाग्दुरुक्तानि च क्षमे॥ अरणीम
ग्निकामो वा मथ्नाति हृदयं मम॥ वाचा दुरुक्तं देवर्षे तन्मे दहति नित्यदा॥ बलं संकर्षणे नित्यं सौकुमार्यं पुनर्गदे॥ रूपेण सं
मत्तः प्रद्युम्नः सोऽसहायोस्मि नारद॥ अन्ये हि सुमहाभागा बलवंतो दुरुत्सहाः॥ नित्योत्थानेन संपन्ना नारदांधक
वृष्णयः॥ यस्य न स्युर्न वै स स्याद्यस्य स्युः कृत्स्नमेव तत्॥ द्वाभ्यां निवारितो नित्यं वृणोम्येकतरं न च॥ स्यातां यस्याहुका
क्रूरौ किं नु दुःखतरं ततः॥ यस्य वापि न तौ स्यातां किं नु दुःखतरं ततः॥ सोहं कितवमातेव द्वयोरपि महामते॥ एकस्य ज
यमाशंसे द्वितीयस्य पराजयं॥ ममैवं क्लिश्यमानस्य नारदोभयतः सदा॥ वक्तुमर्हसि यच्छ्रेयो ज्ञातीनामात्मनस्तथा॥
श्वा ॥ ॥नारद उवाच॥ ॥आपदो द्विविधाः कृष्ण बाह्याश्चाभ्यंतराश्च याः॥ प्रादुर्भवंति वार्ष्णेय स्वकृता यदि वान्यतः॥ सेयमभ्यंत
रा तुभ्यमापत्कृच्छ्रा स्वकर्मजा॥ अक्रूरभोजप्रभवाः सर्वे ह्येते तदन्वयाः॥ अर्थहेतोर्हि कामाद्वा वाचा बीभत्सया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

९४

पिबा॥ आत्मनाशाय मे ऐश्वर्यमन्यत्र प्रतिपादितं॥ कृतमूलमिदानीं तु ज्ञातिशब्दसहायवान्॥ नशक्यं पुनरादातुं वां
तमन्नमिव सया॥ बभ्रूग्रसेनयो राज्यं नाप्तुं शक्यं कथंचन॥ ज्ञातिभेदभयात्कृष्ण त्वया चापि विशेषतः॥ तच्च सिध्येत्प्र
यत्नेन कृत्वा कर्म सुदुष्करं॥ महाक्षयं व्ययं वा स्याद्विनाशो वा पुनर्भवेत्॥ अनायासेन शस्त्रेण मृदुना हृदयछिदा॥ जि
ह्वामुद्धर सर्वेषां परिमृज्यानुमृज्य वा॥ ॥वासुदेवः॥ ॥अनायसं मुने शस्त्रं मृदु विद्यामहं कथं॥ येनैषामुद्धरे जि
ह्वां परिमृज्यानुमृज्य च॥ ॥नारद उवाच॥ ॥शक्त्यान्नदानं सततं तितिक्षार्जवमार्दवं॥ यथार्हं प्रतिपूजा च शस्त्र
मेतदनायसं॥ ज्ञातीनां वक्तुकामानां कटुकानि लघूनि च॥ गिरा त्वं हृदयं वाचं शमयस्व मनांसि च॥ नमहापुरुषः
कश्चिन्नानात्मा नासहायवान्॥ महतीं धुरमाधत्ते तामुद्यम्योरसा वह॥ सर्वमेव गुरुं भारमनड्वान्वहते समे॥
दुर्गे प्रतीतः सुगवो भारं वहति दुर्वहं॥ भेदाद्विनाशः संघानां संघमुख्योसि केशव॥ यथा त्वां प्राप्य नोत्सीदेदयं संघ
स्तथा कुरु॥ नान्यत्र बुद्धिक्षांतिभ्यां नान्यत्रेंद्रियनिग्रहात्॥ नान्यत्र धनसंयोगाद्गुणः प्राज्ञस्य वतिष्ठते॥ धन्यं यशस्य
मायुष्यं स्वपक्षोद्भावनं शुभं॥ ज्ञातीनामविनाशः स्याद्यथा कृष्ण तथा कुरु॥ आयत्यां च तदात्वे च न तेऽस्त्यविदि
तं प्रभो॥ षाड्गुण्यस्य प्रसादेन पात्रीयानविधौ तथा॥ यादवाः कुकुरा भोजाः सर्वे चांधकवृष्णयः॥ त्वय्यासक्ता महा
बाहो लोका लोकेश्वराश्च ये॥ उपासते हि त्वद्बुद्धिमृषयश्चापि माधव॥ त्वं गुरुः सर्वभूतानां जानीषे त्वं गताग
तं॥ त्वामासाद्य यदुश्रेष्ठमेधंते यादवाः सुखं॥ ॥इति शांतौ राजधर्मे॥ ॥भीष्म उवाच॥ ॥एषा प्रथ ९४

मतो वृत्तिर्द्वितीयां शृणु भारत॥ यः कश्चिज्जनयेदर्थं राज्ञा रक्ष्यः स मानवः॥ ह्रियमाणममात्येन भृतो वा यदि वा
स्वतः॥ यो राजकोशं नश्यंतमाचक्षीत युधिष्ठिर॥ श्रोतव्यमस्य वचनं रहो रक्ष्यश्च अमात्यतो भवेत्॥ अमात्या
स्यपहर्त्तारो भूयिष्ठं घ्नंति भारत॥ राजकोशस्य गोप्तारं राजकोशविलोपकाः॥ समेत्य सर्वे बाधंते स विनश्य
त्यरक्षितः॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ मुनिः कालकवृक्षीयः कौशल्यं यदुवाच ह॥ कोशलाना
माधिपत्यं संप्राप्तं क्षेमदर्शिनं॥ मुनिः कालकवृक्षीय आगतामेति नः श्रुतं॥ स काकं पंजरे बध्वा विषयं क्षेमद
र्शिनः॥ सर्वं पर्यचरद्युक्तः प्रवृत्त्यर्थी पुनः पुनः॥ अधीध्वं वायसीं विद्यां शंसंति मम वायसाः॥ अनागतमतीतं
च यच्च संप्रति वर्त्तते॥ इति राष्ट्रे परिपतन् बहुभिः पुरुषैः सह॥ सर्वेषां राजयुक्तानां दुष्कृतं परिदृष्टवान्॥ स बुध्वा
तस्य राष्ट्रस्य व्यवसायं हि सर्वशः॥ राजयुक्तोपहाराणां श्च सर्वान्बुध्वा ततस्ततः॥ ततः स काकमादाय राजानं द्र
ष्टुमागमत्॥ सर्वज्ञोस्मीति वचनं ब्रुवाणः संशितव्रतः॥ स स्म कौशल्यमागम्य राजामात्यमलंकृतं॥ प्राह काक
स्य वचनादमुत्रेदं त्वया कृतं॥ असौ चासौ च जानीते राजकोशस्त्वया हृतः॥ एवमाख्याति काकोयं तच्छीघ्रमनु
गम्यतां॥ तथान्यानपि संप्राह राजकोशहरांस्तथा॥ न चास्य वचनं किंचिदनृतं श्रूयते क्वचित्॥ तेन विप्रकृताः स
र्वे राजयुक्ताः कुरूद्वह॥ तमस्यातिप्रसुप्तस्य निशि काकमवेधयन्॥ वायसं तु विनिर्भिन्नं दृष्ट्वा बाणेन पंजरे॥ पूर्वा
ह्णे ब्राह्मणो वाक्यं क्षेमदर्शिनमब्रवीत्॥ राजंस्त्वामभयं याचे प्रभुं प्राणधनेश्वरं॥ अनुज्ञातस्त्वया ब्रूयां वच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

९५ वंसचतो हितं ॥ मित्रार्थमभिसंपन्नो भक्त्या सर्वात्मनागतः ॥ अयं तवार्थो हि यते यो ब्रूयाद्दक्षमान्वितः ॥ संबुबोधयिषुर्मि-
त्रं सदृश्व मिवस्मानथिः ॥ अतिमन्युप्रसक्तो हि प्रसह्य हितकारणात् ॥ तथा मित्रस्य सुहृदा ज्ञातव्यं सुविजानता ॥ ऐश्वर्यमिच्छ-
ता नित्यं पुरुषेण बुभूषता ॥ तं राजा प्रत्युवाचेदं यन्मां किंचिद्भवान्वदेत् ॥ कस्मादहं न क्षमेयं मा कांक्षन्नात्मनो हितं ॥ ब्राह्मणः प्रति-
जानीते प्रब्रूहि यदि वेत्सि ॥ कथिष्यामि हितं वाक्यं यदस्मान्विप्र वक्ष्यसि ॥ ॥ मुनिरुवाच ॥ ॥ ज्ञात्वा पापानपापांश्च स्त्यतस्ते-
नया निच ॥ भक्त्या रतिं समास्थातुं भवतो नैकमागतं ॥ ज्ञातो दोषाः कृतदोषा यमाचार्यैन्नपसेवनां ॥ आगतीकगातिर्ह्येषा पापारा-
जोपजीवका ॥ आशीविषैश्च तस्याहुः संगतं यस्य राजभिः ॥ बहुमित्राश्च राजानो बहुमित्रास्तथैव च ॥ तेभ्यः सर्वेभ्य एवाहुर्भ-
यं राजोपसेविनां ॥ अथैषां राजतो राजन्मुहूर्तादेव भीर्भवेत् ॥ नैकांतेनाप्रमादो हि शक्यः कर्तुं महीपते ॥ न तु प्रमादः कर्तव्यः
कथंचिद्भूतिमिच्छता ॥ प्रमादाद्धि स्खलेद्राजा स्खलिते नास्ति जीवितं ॥ अग्निं दीप्तमिवासीदेद्राजानमुपशिक्षितः ॥ आशीवि-
षमिव क्रुद्धं प्रभुं प्राणधनेश्वरं ॥ यत्नेनोपचरेन्नित्यं नाहमस्मीति मानवः ॥ दुर्व्याहृताच्छंकमानो दुःखितादुरधिष्ठितात् ॥ दुरा-
तादुर्विजितादिंगितादंगचेष्टितात् ॥ देववत्सर्वार्थं कुर्याद्राजा प्रसादितः ॥ वैश्वानर इव क्रुद्धः समूलमपि निर्दहेत् ॥ इति ना-
जन्नय आह वर्त्तते च तथैव तत् ॥ अथ भूयांसमेवाहं करिष्यामि पुनः पुनः ॥ ददात्यस्मद्विधोमात्यो बुद्धिसाहाय्यमापदि ॥ वायस-
स्त्वेव मे राजा तव कार्याभिसंहितः ॥ न च मे त्वं भवान्क्रुद्धो न च ये पांसवानुप्रियः ॥ हिताहितस्तु बुध्येथा मा पनोक्तमतिर्भव ॥
चेतादानपराये वसंति सवतो गृहे ॥ अक्लृप्तिकाम कृता नांता हृदेशे मेभिसंहितं ॥ ये ज्ञेस वद्विनाशेन राज्यमिच्छंत्यनंतरं ॥ आंतरे-
रभिसंधायाराजन्सिध्यति चान्यथा ॥ तेषामहं भयाद्राजन्गमिष्याम्यन्यमाश्रमं ॥ तैर्हि मे संधितो बाणः काके निपतितः प्रभो ॥ ९५

छद्मनाममकाकः स्वर्गमितो यमसादनं ॥ दृष्टं ह्येतन्मया राजंस्तपो दीर्घेण चक्षुषा ॥ बहुनक्रझषग्राहां तिमिंगिलगणायुतां ॥ का-
केन वडिशेनेव यामतर्षमहं नदीं ॥ स्थाण्वश्मकंटकवतीं व्याघ्रसिंहसमाकुलां ॥ दुरासदां दुष्प्रसहां गुहां हैमवतीमिव ॥ अग्नि-
ना तामसं दुर्गं नौभिराप्यं च गम्यते ॥ राजा दुर्गावतरणे नोपायं पंडिता विदुः ॥ गहनं भवतो राज्यमंधकारतमोन्वितं ॥ नेह विश्व-
सितुं शक्यं भवतापि कुतो मया ॥ अतो नायं शुभो वासस्तुल्ये सदसती इह ॥ वधो ह्येवात्र सुकृते दुष्कृते वन संशयः ॥ न्यायतो दुष्कृ-
ते घातः सुकृते न कथंचन ॥ नेह युक्तं चिरं स्थातुं जवेनैवाव्रजेद्बुधः ॥ सीता नाम नदी राजन्प्लवो यस्यां निमज्जति ॥ तथोपमा-
मिमां मन्ये वागुरां सर्वघातिनीं ॥ मधुप्रपातो हि भवान्भोजनं विषसंयुतं ॥ असतामिव ते भावो वर्तते न सतामिव ॥ आशीवि- न
परिवृतः कूपस्त्वमसि पार्थिव ॥ दुर्गतीर्था बृहत्कूला कारीरा वेत्रसंयुता ॥ यथा मधुरपानीया नदी राजंस्तथा भवान् ॥ श्वगृ-
ध्रगोमायुयुतो राजहंससमो ह्यसि ॥ यथाश्रित्य महावृक्षं कक्षः संवर्द्धते महान् ॥ ततः सं संवृणोत्येव तेनैव सह वर्द्धते ॥ तेनै-
वोल्बणेनैव दावो दहति दारुणः ॥ तथोपमा ह्यमात्यास्ते राजंस्तान्परिशोधय ॥ भवतैव कृता राजन्भवता परिपालिताः ॥ भ-
वंतमभिसंधाय जिघांसंति भवत्प्रियं ॥ उषितं शंकमानेन प्रमादं परिरक्षता ॥ अंतःसपरिवागारे वीरयत्वाइवालये ॥ शीलं-
ज्ञासमानेन राजन्श्च सहजीविनः ॥ कच्चिज्जितेंद्रियो राजा कच्चिदस्यांतरा जिताः ॥ कच्चिदेषां प्रियो राजा कच्चिद्राज्ञः प्रियाः प्रजाः ॥
विजिज्ञासुरिह प्राप्तस्तवाहं राजसत्तम ॥ तस्य मे रोचते राजन्क्षुधितस्येव भोजनं ॥ अमात्या मे न रोचंते वितृष्णस्य यथोदकं ॥ भव-
तोर्थकृदित्येवं मम दोषो हि तैः कृतः ॥ विद्यते कारणं नान्यदिति मे नात्र संशयः ॥ तेषामहं न वै द्रुग्धस्तत्तेषां दोषदर्शनं ॥ अरेर्हि
दुर्हृदा त्तेयं भग्नपृष्ठादिवोरगात् ॥ राजा ॥ भूयसा परिहारेण सत्कारेण च भूयसा ॥ पूजितो ब्राह्मणश्रेष्ठ भूयो वस गृहे मम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत्वां ब्राह्मणेनेर्ष्यति तेन वदस्यंति मेगृहे॥ स वर्तते हि तत्ज्ञेयं यदिदानीमनंतरं॥ यथा स्यात्सुधृतो दंडो यथा च सुकृतं कृतं॥ त
था समीक्ष्य भगवंस्तस्मा विनियुङ्क्ष्व मां॥ ॥मुनिः॥ ॥अदर्शयन्निमं दोषमेकैकं दुर्बलीकुरु॥ ततः कारणमाज्ञाय पुरुषं पुरुष
ज्जहि॥ एवं दोषा हि बहवो म्हीसुरपि कंटकात्॥ मंत्रसिद्धमयाज्ञाजंस्तस्मादेतद्ब्रवीमि ते॥ वयं तु ब्राह्मणानामह दुर्दंडाः कृपा
लयः॥ स्वक्ति चेच्छाम भवतः परेषां च यथा मनः॥ राजन्लोमनमावक्षे संबंधी भवतो ह्यहं॥ मुनिः कालकवृक्षीय इत्येव सभि
संज्ञितः॥ पितुः सखा च भवतः संमतः सत्यसंगतः॥ व्यापन्ने भवतो राज्यराजन्वितरि संस्थिते॥ सर्वकामान्परित्यज्य तपस्तप्तं त
दामया॥ स्नेहात्त्वां प्रब्रवीम्येतत् मा भूयो विभ्रमेदिति॥ उभे दृष्ट्वा सुखदुःखे प्राप्य राज्यं यदृच्छया॥ राज्येनामात्यसंस्थेन क
थं राजन्प्रमाद्यसि॥ ततो राजकुले नंदे संयतेस्म यसी पुनः॥ पुरोहितकुले चैव संप्राप्ते ब्राह्मणर्षभे॥ एकछत्रीं महीं कृत्वा कौ
शल्याय यशस्विने॥ मुनिः कालकवृक्षीय इजे क्रतुभिरुत्तमैः॥ हितं तद्वचनं श्रुत्वा कौशल्यो व्यजयन्महीं॥ तथा च कृतवान्रा
ज्य यथोक्तस्तेन भारत॥ ॥शांतौ राजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥सभासदः सहायाश्च सुहृदश्च विशांपते॥ परिच्छ
दास्तथामात्याः कीदृशाः स्युः पितामह॥ ॥भीष्म उवाच॥ ॥ह्रीनिषेधाः सदा संतः सत्यार्जवगुणान्विताः॥ शक्ताः कथयितुं स
म्यकृते तव स्युः सभासदः॥ अमात्यांश्चातिशूरांश्च ब्राह्मणांश्च बहुश्रुतान्॥ सुसंतुष्टांस्तु कौंतेय महोत्साहांश्च कर्मसु॥
रताः सहाया लिप्सेथाः सर्वास्वापत्सु भारत॥ कुलीनः पूजितो नित्यं न हि शक्तिं निगूहति॥ प्रसन्नमप्रसन्नं वा पीडितं हृतमेव च॥
आवर्तयति भूयिष्ठं तदेको ह्यनुपालितः॥ कुलीना देशजाः प्राज्ञा रूपवंतो बहुश्रुताः॥ प्रगल्भाश्चानुरक्ताश्च ते तव स्युः परि

च्छदाः॥ दौष्कुलेयाश्च लुब्धाश्च नृशंसा निरपत्रपाः॥ ते त्वां तात निषेवेयुः यावदार्द्रकपाणयः॥ कुलीनान्सत्वसंपन्नान्निंगिता
ज्ञाननिष्ठुरान्॥ देशकालविधानज्ञान्भर्तृकार्यहितैषिणः॥ नित्यमर्थेषु सर्वेषु राजा कुर्वीत मंत्रिणः॥ अर्थमानार्थसत्का
नैर्भोगैरुच्चावचैः प्रियान्॥ यानर्थभाजो मन्येथास्ते ते स्युः सुखभागिनः॥ अभिन्नवृत्ता विद्वांसः सद्वृत्ताश्चरितव्रताः॥ न त्वां नि
त्यं स्वार्थिनो जह्युरक्षुद्राः सत्यवादिनः॥ अनार्या ये न जानंति समयं मंदचेतसः॥ तेभ्यः प्रतिजुगुप्सेथा ये चाप्य समयच्युताः॥ नैकम य
प्यर्थं हित्वास्याद्वेदन्यतरग्रहः॥ यस्त्वेको बहुभिः श्रेयान्कामं तेन शतं त्यजेत्॥ श्रेयसो लक्षणं चैतद्विक्रमो यस्य दृश्यते॥
कीर्तिप्रधानो यश्च स्यात्समये यश्च तिष्ठति॥ समर्थान्पूजयेद्यश्च नास्पर्धैः स्पर्धते च यः॥ न च कामाद्भयात्क्रोधाल्लोभाद्वा
धर्ममुत्सृजेत्॥ अमानी सत्यवाग्दांतो जितात्मा मानसंयुतः॥ स ते मंत्रसहायः स्यात्सर्वावस्थं परीक्षितः॥ कुलीनः सत्वसंपन्न
स्तितिक्षुर्दक्ष आत्मवान्॥ शूरः कृतज्ञः सत्यश्च श्रेयसः पार्थ लक्षणं॥ तस्यैवं वर्तमानस्य पुरुषस्य विजानतः॥ अमित्राः संप्रसी
दंति ततो मित्री भवंत्यपि॥ अत ऊर्ध्वममात्यानां परीक्षेत गुणागुणान्॥ संयतात्मा कृतप्रज्ञो भूतिकामश्च भूमिपः॥ संबंधाः पु
रुषैरन्यैरभिज्ञातैश्च देशजैः॥ अहार्यैरव्यभीचारैः सर्वशः सुपरीक्षितैः॥ यौनाः श्रौतास्तथा मौलास्तथैवाप्यनहंकृताः॥ क
र्तव्या भूतिकामेन पुरुषेण बुभूषता॥ येषां वैनेयिकी बुद्धिः प्रकृतिश्चैव शोभना॥ तेजो धैर्यं क्षमा शौचमनुरागः स्थितिर्धृ
तिः॥ परीक्षितगुणान्नित्यं प्रौढभावान्धुरंधरान्॥ पंचोपधाव्यतीतांश्च कुर्याद्राजार्थकारिणः॥ पर्याप्तवचनान्वीरान्प्रतिप
त्तिविशारदान्॥ कुलीनान्सत्वसंपन्नान्निंगितज्ञाननिष्ठुरान्॥ देशकालविधानज्ञान्भर्तृकार्यहितैषिणः॥ नित्यमर्थेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म सर्वेषु राज्ञा कुर्वीत मंत्रिणः॥ हीनतेजो भिसंस्पृष्टो नैव जातु व्यवस्यति॥ अवश्यं जनयत्येव सर्वकर्मसु संशयान्॥ एवमल्प
९८ श्रुतो मंत्री कल्याणाभिजनोप्युत॥ धर्मार्थकामयुक्तोपि नालं मंत्रं परीक्षितुं॥ तथैवानभिजातोपि काममस्तु बहुश्रुतः॥ अ
नायक इवाचक्षुर्मुह्यत्यणुषु कर्मसु॥ यो वाप्यस्थिरसंकल्पो बुद्धिमानागतागमः॥ उपायज्ञोपि नालं स कर्म यापयितुं चिरं॥
केवलात्पुनरादाना कर्मणो नोपपद्यते॥ परामर्शो विशेषाणामश्रुतस्येह दुर्मतेः॥ मंत्रिण्यननुरक्तेपि विश्वासो नेह विद्यते॥
तस्मादननुरक्ताय नैव मंत्रं प्रकाशयेत्॥ व्यथयेद्धि स राजानं मंत्रिभिः सहितो नृजुः॥ मारुतोपहितच्छिद्रैः प्रविश्याग्निरिव द्रुमं॥
संक्रुद्धश्चैकदा स्वामी स्थानाच्चैवापकर्षति॥ वाचा क्षिपति संरब्धस्ततः पश्चात्प्रसीदति॥ तानि तान्यनुरक्तेन वाक्यानि हि ति
यस्तु तिक्षितुं॥ मंत्रिणां च भवेत्क्रोधो विस्फूर्जितमिवाशनेः॥ संहरते तानि भर्तुः प्रियचिकीर्षया॥ समानदुःखसुखं तं पृच्छेदर्थेषु मान
वं॥ अनृजुस्त्वनुरक्तोपि संपन्नश्चेतरैर्गुणैः॥ राज्ञः प्रज्ञानयुक्तोपि न मंत्रं श्रोतुमर्हति॥ अविद्वानशुचिस्तब्धः शत्रुसेवी चकत्थ
यं॥ असुहृत्क्रोधनो लुब्धो न मंत्रं श्रोतुमर्हति॥ आगंतुश्चानुरक्तोपि काममस्तु बहुश्रुतः॥ सत्कृतः संविभक्तोपि न मंत्रं श्रो
तुमर्हति॥ यस्त्वल्पेन कार्येण सुहृदां क्षापितो भवेत्॥ पुनरन्यैर्गुणैर्युक्तो न मंत्रं श्रोतुमर्हति॥ सर्वलोकमिमं यस्तु सांत्वेन
कुरुते वशे॥ तस्मै मंत्रः प्रयोक्तव्यो दंडमाधित्सता नृपे॥ कृतप्रज्ञस्तु मेधावी बुद्धो जानपदः शुचिः॥ सर्वकर्मसु यः शुद्धः स
मंत्रं श्रोतुमर्हति॥ संतुष्टः संमतः सत्यः शौंडीरो द्वेष्यपापकः॥ मंत्रवित्कालविच्छूरः स मंत्रं श्रोतुमर्हति॥ ज्ञातविज्ञानसंपन्नः
प्रतिज्ञः परात्मनोः॥ सुहृदात्मसमो राज्ञः स मंत्रं श्रोतुमर्हति॥ सत्यवाक्शीलसंपन्नो गंभीरः सत्रपो मृदुः॥ पितृपैताम ९८

हो यस्यात्स मंत्रं०॥ सर्वलोकमिमं शक्तः सांत्वेन कुरुते वशे॥ मंत्रे मंत्रिः प्रयोक्तव्यो दंडमाधित्सता नृप॥ पौरजानपदा यस्मिन्वि
श्वासं धर्मतो गताः॥ योद्धा नयविपश्चिच्च स मंत्रं०॥ तस्मात्सर्वगुणैरेतैरुपपन्नाः सुपूजिताः॥ मंत्रिणः सुकृतज्ञाः स्युः स्थ्यवश्या
महदीसवथसाधुप्रकृतिषु छिद्रं रक्षयेदन्य नस्परं॥ मंत्रिणां मंत्रमूलं हि राज्ञो राष्ट्रं विवर्द्धते॥ नास्य छिद्रं परः पश्येत् छिद्रेषु
परमन्वियात्॥ गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्मनः॥ मंत्रग्रहा हि राष्ट्रस्य मंत्रिणो ये मनीषिणः॥ मंत्रसंहननो राजा मंत्रा
गानितरे जनाः॥ राज्यं प्रणिधिमूलं हि मंत्रसारं प्रचक्षते॥ स्वामिनस्त्वनुवर्तंते मंत्रिणस्त्वनुवर्तिनः॥ संवियमदक्रोधौ मानमी
र्ष्याविनिर्वृताः॥ नित्यं पंचोपधातीतैर्मंत्रयेत्सह मंत्रिभिः॥ येषां त्रयाणां त्रिविधं विमर्षं वुध्येच्चित्तं विनिवेश्य तत्र॥ सुनिश्चयं
त तंपरिनिश्चयज्ञं निवेदयेदुत्तरमंत्रकाले॥ धर्मार्थकामज्ञमुपेत्य पृच्छेद्युक्तो गुरुं ब्राह्मणमुत्तमार्थी॥ निष्ठा कृता तेन यदा सहस्या
तं तत्र मंत्रं प्रणयेदसक्तः॥ एवं सदा मंत्रयितव्यमाहुर्ये मंत्रतत्त्वार्थविनिश्चयज्ञाः॥ तस्मात्तमेवं प्रणयेत्सदैव मंत्रं प्रजासंग्र
हणे समर्थः॥ न वामनाः कुब्जकृशा न खंजा नांधो जडः स्त्री च न पुंसकश्च॥ न चात्र तिर्यङ्पुरो न पश्चान्नोर्ध्वं न चाधः प्रचरेत कश्चि
त्॥ आरुह्य चावेश्म तथैव शून्यं स्थलं प्रकाशं कुशकाशहीनं॥ वागंगदोषान्परिहृत्य सम्यक् संवर्द्धयेत्कार्यमहीनकालं॥ ॥
शांतौ राजधर्मे मंत्रिपरीक्षायां॥ ॥ भीष्म उवाच॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ बृहस्पतेश्च शक्रस्य च युधिष्ठि
र॥ ॥ शक्र उवाच॥ ॥ किंस्विदेकपदं ब्रह्मन्पुरुषः सम्यगाचरन्॥ प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत्॥ एतदेकपदं
शक्र सर्वलोकसुखावहं॥ आचरन्सर्वभूतेषु प्रियो भवति सर्वदा॥ यो हि नाभाषते किंचित्सततं भ्रुकुटीमुखः॥ द्वेष्यो भवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानां श्रेयो नातलिप्सितं ॥ यस्तु सर्वमभिप्रेक्ष्य पूर्वमेवाभिलाषते ॥ स्मितपूर्वाभिभाषी च तस्य लोकः प्रसीदति ॥ दानमेव
हि सर्वत्र सांत्वेनानभिजल्पितं ॥ न प्रीणयति भूतानि निर्व्यंजनमिवाशनं ॥ आदानादपि भूतानां मधुरामीरयन् गिरं ॥ सर्वलो
कमिमं शक्रः सांत्वेन कुरुते वशं ॥ तस्मात्सांत्वं प्रयोक्तव्यं दंडमाधित्सतापि हि ॥ फलं च जनयत्येवं न चास्योद्विजते जनाः ॥ सु
कृतस्य हि सांत्वस्य श्लक्ष्णस्य मधुरस्य च ॥ सम्यगासेवमानस्य तुल्यं जातु न विद्यते ॥ ॥श्रीभगवानुवाच॥ ॥इत्युक्तः कृतवान्
सर्वं तथा शक्रः पुरोधसा ॥ तथा त्वमपि कौंतेय सम्यगेतत्समाचर ॥ ॥इति श्रीशांतौ राजधर्मे गोसारीक्षासमाप्ता ॥ ॥युधिष्ठि
र उवाच ॥ ॥कथं स्विदिह राजेंद्र पालयन् पार्थिवः प्रजाः ॥ प्रीति धर्मविशेषेण कीर्तिमाप्नोति शाश्वतीं ॥ ॥श्रीभगवानुवाच ॥ ॥व्य
वहारेण शुद्धेन प्रजापालनतत्परः ॥ प्राप्य धर्मं च कीर्तिं च लोकावाप्नोत्युभौ शुचिः ॥ ॥युधिष्ठिर उवाच ॥ ॥कीदृशो व्यवहा
रैस्तु कैश्चिद्व्यवहरेन्नृपः ॥ एतन्मे महाप्राज्ञ यथावद्वक्तुमर्हसि ॥ ये चैव पूर्वं कथिता गुणास्ते पुरुषं प्रति ॥ नैकस्मिन् पुरुषे ह्ये
ते विद्यंते इति मे मतिः ॥ ॥श्रीभगवानुवाच ॥ ॥एवमेतन्महाप्राज्ञ यथावदसि बुद्धिमन् ॥ दुर्लभः पुरुषः कश्चिदेभिर्गुणगणैर्वृतः ॥
किं तु संक्षेपतः शीलप्रयत्नेनेह दुर्लभं ॥ वक्ष्यामि तु यथामात्यान्यादृशांस्त्वं करिष्यसि ॥ चतुरो ब्राह्मणान्वैद्यान्प्रगल्भान्स्नातका
न्शुचीन् ॥ त्रीश्च शूद्रान्विनीतांश्च शुचीन्कर्मणि पूर्वके ॥ अष्टाभिश्च गुणैर्युक्तः सूतः पौराणिको भवेत् ॥ पंचाशद्वर्षवयसं प्र
गल्भमनसूयकं ॥ श्रुतिस्मृतिसमायुक्तं विनीतं समदर्शनं ॥ कार्ये विवदमानानां शक्तमर्थेष्वलोलुपं ॥ विवर्जितानां व्यसनैः सुघोरैः
सप्तभिर्भृशं ॥ अष्टानां मंत्रिणां मध्ये मंत्रं राजोपधारयेत् ॥ ततः संप्रेषयेद्राष्ट्रे राष्ट्रियाय च दर्शयेत् ॥ अनेन व्यवहारेण द्र ९८

ष्टव्यास्ते सदा प्रजाः ॥ न चापि गूढं कार्यं ते ग्राह्यं कार्योपघातकं ॥ कार्ये खलु विपन्ने त्वां सो धर्मस्तांश्च संस्पृशेत् ॥ विद्रवे
च्चैव राष्ट्रं ते श्येनात्पक्षिगणा इव ॥ परिस्रवेच्च सततं नौर्विशीर्णेव सागरे ॥ प्रजाः पालयतोऽसम्यगधर्मेणेह भूपतेः
॥ हार्दं भयं संभवति स्वर्गश्चास्य निरुध्यते ॥ अथ योऽधर्मतः पाति राजामात्योऽथवात्मजः ॥ धर्मासने नियुक्तः सन् स धर्ममूलं
नरर्षभः ॥ कार्येष्वधिकृताः सम्यगकुर्वंतो नृपानुगाः ॥ आत्मानं पुरतः कृत्वा यात्यधः सह पार्थिवाः ॥ बलात्कृतानां बलिभिः
कृपणं बहु जल्पतां ॥ नाथो वै भूमिपो नित्यमनाथानां नृणां भवेत् ॥ ततः साक्षिकृतं स्मार्तं द्वैधवादकृतं भवेत् ॥ अ
साक्षिकमनाथं वा परीक्ष्यं तद्विशेषतः ॥ अपराधानुरूपं च दंडं पापेषु कारयेत् ॥ नियोजयेद्धनैरिद्धानदरिद्रान
र्थबंधनैः ॥ विनयेच्चापि दुर्वृत्तान्प्रहारैरपि पार्थिवः ॥ सांत्वेनोपप्रदानेन शिष्टांश्च परिपालयेत् ॥ राजो वधं चि
कीर्षेद्यस्तस्य चित्रो वधो भवेत् ॥ आदीपकस्य स्तेनस्य वर्णसंकरिकस्य च ॥ सम्यक्प्रणयतो दंडं भूमिपस्य विशां
पते ॥ युक्तस्य वा नास्त्यधर्मो धर्म एव हि शाश्वतः ॥ कामकारेण दंडं तु यः कुर्यादविचक्षणः ॥ स इहाकीर्तिसंयुक्तो
मृतो नरकमाप्नुयात् ॥ न परस्य प्रवादेन परेषां दंडमर्पयेत् ॥ आगमानुगमं कृत्वा बध्नीयान्मोक्षयेत वा ॥ न तु हन्या
न्नृपो जातु दूतं कस्यांचिदापदि ॥ दूतस्य हंता निरयानाविशेत्सचिवैः सह ॥ यथोक्तवादिनं दूतं क्षत्रधर्मरतो नृपः ॥
यो हन्यात्पितरस्तस्य भ्रूणहत्यामवाप्नुयुः ॥ कुलीनः शीलसंपन्नो वाग्मी दक्षः प्रियंवदः ॥ यथोक्तवादी स्मृतिमा
न् दूतः स्यात्सप्तभिर्गुणैः ॥ एतैरेव गुणैर्युक्तः प्रतीहारोऽस्य रक्षिता ॥ शिरोरक्षश्च भवति गुणैरेतैः समन्वितः ॥ धर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शास्त्रार्थतत्वज्ञः संधिविग्रहिको भवेत्॥ मतिमान्धृतिमान्ह्रीमान्रहस्यविनिगूहिता॥ कुलीनः शीलसंपन्नः शुक्लमा
सः प्रशस्यते॥ एतैरेव गुणैर्युक्तस्तथा सेनापतिर्भवेत्॥ व्यूहयंत्रायुधानां च तत्वज्ञो विक्रमान्वितः॥ वर्षशीतोष्णवाता
नां सहिष्णुः परमंध्रवित्॥ विश्वासयेत्परांश्चैव विश्वसेन्न तु कस्यचित्॥ पुत्रेष्वपि हि राजेंद्र विश्वासो न प्रशस्य
ते॥ एतच्छास्त्रार्थतत्वं तु मयाख्यातं तवानघ॥ अविश्वासो नरेंद्राणां गुह्यं परममुच्यते॥ ॥इति श्री॰ शां॰ राजधर्मे मा॰ स
विभागः॥ ॥युधिष्ठिर उवाच॥ ॥कथंविधं पुरं राजा स्वयमावस्तुमर्हति॥ कृतं वा कारयित्वा वा तन्मे ब्रूहि पितामह॥
॥ ॥भीष्म उवाच॥ ॥यत्र कौंतेय वस्तव्यं सपुत्रज्ञातिबंधुना॥ न्याय्यं तत्र परिप्रष्टुं गुप्तिं वृत्तिं च भारत॥ तस्मात्ते वर्तयि
ष्यामि दुर्गकर्मविशेषतः॥ श्रुत्वा तथा विधातव्यमनुष्ठेयं प्रयत्नतः॥ षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत्॥ स
र्वसंपत्प्रधानं यद्बाहुल्यं चापि संभवेत्॥ धनुर्दुर्गं महीदुर्गं गिरिदुर्गं तथैव च॥ मनुष्यदुर्गं मृद्दुर्गं वनदुर्गं च तानि षट्॥
यत्पुरं दुर्गसंपन्नं धान्यायुधसमन्वितं॥ दृढप्राकारपरिखं हस्त्यश्वरथसंकुलं॥ विद्वांसः शिल्पिनो यत्र निचयो
श्च सुसंचिताः॥ धार्मिकश्च जनो यत्र दाक्ष्यमुत्तममास्थितः॥ ऊर्जस्विनरनागाश्वं चत्वरापणशोभितं॥ प्रसिद्धव्य
वहारं च प्रशांतमकुतोभयं॥ प्रभासंसानुनादं च सुप्रशस्तनिवेशनं॥ शूराढ्यजनसंपन्नं सदापूजितदैवतं॥ वश्या
मात्यबलो राजा तत्पुरं स्वयमाविशेत्॥ तत्र कोशं बलं मित्रं व्यवहारं च वर्द्धयेत्॥ पुरे जनपदे चैव सर्वदोषान्निवर्त
येत्॥ भांडागारायुधागारं प्रयत्नेनाभिवर्द्धयेत्॥ पुरे जनपदे चैव सर्वदोषान्निवर्तयेत्॥ निचयान्वर्द्धयेत्सर्वांस्तथायं ९९

त्रायुधालयान्॥ काष्ठलोहतुषांगारदारुशृंगास्थिवैणवान्॥ मज्जास्नेहवसाक्षौद्रमौषधग्राममेव च॥ शणं सर्जरसं धान्य
मायुधानि शरांस्तथा॥ चर्म स्नायुं तथा वेत्रं मुंजबल्वजधन्वनान्॥ आशयाश्चोदपानाश्च प्रभूतसलिलाकराः॥ निरो
द्धव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः॥ सत्कृताश्च प्रयत्नेन आचार्यर्त्विक्पुरोहिताः॥ महेष्वासाः स्थपतयः सांवत्सरचि
कित्सकाः॥ प्राज्ञा मेधाविनो दांता दक्षाः शूरा बहुश्रुताः॥ कुलीना बुद्धिसंपन्ना युक्ताः सर्वेषु कर्मसु॥ पूजयेद्धार्मिकान्राजा
निगृह्णीयादधार्मिकान्॥ नियुंज्याच्च प्रयत्नेन सर्ववर्णान्स्वकर्मसु॥ बाह्यमाभ्यंतरं चैव पौरजानपदं तथा॥ चारैः सुविदि
तं कृत्वा ततः कर्म प्रयोजयेत्॥ चरान्मंत्रं च कोषं च दंडं चैव विशेषतः॥ अनुतिष्ठेत्स्वयं राजा सर्वं ह्यत्र प्रतिष्ठितं॥ उदासी
नारिमित्राणां सर्वमेव चिकीर्षितं॥ पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा॥ ततस्तेषां विधातव्यं सर्वमेव प्रमादतः॥ भक्ता
न्पूजयता नित्यं द्विषतश्च निगृह्णता॥ यष्टव्यं क्रतुभिर्नित्यं दातव्यं चाप्यपीडया॥ प्रजानां रक्षणं कार्यं न कार्यं कर्म
गर्हितं॥ कृपणानाथवृद्धानां विधवानां च योषितां॥ योगक्षेमं च वृत्तिं च नित्यमेव प्रकल्पयेत्॥ आश्रमेषु यथाकालं त
चैलभाजनभोजनं॥ सदैवोपहरेद्राजा सत्कृत्यान्यनुमान्य च॥ आत्मानं सर्वकार्याणि तापसे राज्यमेव च॥ निवेद
येत्प्रयत्नेन तिष्ठेत्प्रह्वश्च सर्वदा॥ सर्वार्थत्यागिनं राजा कुले जातं बहुश्रुतं॥ पूजयेत्तादृशं दृष्ट्वा शयनासनभोजनैः॥ त
स्मै कुर्वीत विश्वासं राजा कस्यांचिदापदि॥ तापसेषु हि विश्वासमपि कुर्वीत दस्यवः॥ तस्मिन्निधीनाधीत प्रज्ञां प
र्याददीत च॥ न चाप्यभीक्ष्णं सेवेत भृशं वा प्रतिपूजयेत्॥ अन्यः कार्यः स्वराष्ट्रेषु परराष्ट्रेषु चापरः॥ अटवीषु परः का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्गः सामंतनगरेषु च ॥ तेषु सत्कानसंमानान्संविभागांश्च कारयेत् ॥ पत्तनाद्भ्राटवीस्थेषु यथास्व विषये तथा ॥ तिकस्यां
चिदवस्थायां शरणं शरणार्थिने ॥ राज्ञो दस्युर्यथाकामं तापसाः शंसितव्रताः ॥ एष ते लक्षणोद्देशः संक्षेपेण प्रकी
र्तितः ॥ यादृशं नगरं राजा स्वयमावस्तुमर्हति ॥ ॥ शांतौ राजधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ राष्ट्रगुप्तिं च मे राजन्
राष्ट्रस्यैव च संग्रहं ॥ सम्यग्जिज्ञासमानाय प्रब्रूहि भरतर्षभ ॥ ॥ भीष्म उवाच ॥ ॥ राष्ट्रगुप्तिं च ते सम्यग्राष्ट्रस्यै
व च संग्रहं ॥ हंत सर्वं प्रवक्ष्यामि तत्त्वमेकमनाः शृणु ॥ ग्रामस्याधिपतिः कार्यो दशग्राम्यास्तथा परः ॥ द्विगुणायाः
शतस्यैवं सहस्रस्य च कारयेत् ॥ ग्रामे यान्ग्रामदोषांश्च ग्रामिकः परिपालयेत् ॥ तान्ब्रूयाद्दशपायासौ स तु विंश
तिपाय वै ॥ सोपि विंशत्यधिपतिर्वृत्तिं जानपदे जने ॥ ग्रामाणां शतपालाय सर्वमेवं निवेदयेत् ॥ यानि ग्राम्याणि भो
ज्यानि ग्रामिकस्तान्यवाप्नुयात् ॥ दशपस्तेन भर्तव्यस्तेनापि द्विगुणाधिपः ॥ ग्रामं ग्रामशताध्यक्षो भोक्तुमर्हति
सत्कृतः ॥ महांतं भरतश्रेष्ठ सुस्फीतं जनसंकुलं ॥ तत्र ह्यनेकपायत्तं राज्ञो भवति भारत ॥ शाखानगरमर्हस्तु
सहस्रपतिरुत्तमः ॥ धान्यहैरण्यभोगेन भोक्तुं राष्ट्रियसंज्ञितः ॥ तेषां संग्रामकृत्यं स्याद्ग्रामकृत्यं च तेषु यत् ॥ ध
र्मज्ञः सचिवः कश्चित्तत्प्रपश्येदतंद्रितः ॥ नगरे नगरे च स्यादेकः सर्वार्थचिंतकः ॥ उच्चैः स्थाने घोररूपो नक्षत्राणा
मिव ग्रहः ॥ भवेत्स तान्परिक्रामेत्सर्वानेव सभासदः ॥ तेषां वृत्तिं परिणयेत्कश्चिद्राष्ट्रेषु तच्चरः ॥ जिघांसवः पाप
कामाः परस्वादायिनः शठाः ॥ रक्षाभ्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः ॥ विक्रयं क्रयमध्वानं भक्तं च सपरिच्छदं ॥ यो ॥ १००

क्षेमं च संप्रेक्ष्य वणिजः कारयेत्करान् ॥ उत्पत्तिं दानवृत्तिं च शिल्पं संप्रेक्ष्य चासकृत् ॥ शिल्पं प्रतिकरानेवं शिल्पिनः
प्रतिकारयेत् ॥ उच्चावचकरान्याज्याः कुर्वीरन्पांडुनंदन ॥ यथा यथा न हीयेरंस्तथा कुर्यान्महीपतिः ॥ फलं च
कर्म संप्रेक्ष्य ततः सर्वं प्रकल्पयेत् ॥ फलं कर्म च निर्हेतु न कश्चित्संप्रवर्तते ॥ यथा राजा च कर्ता च स्यातां कर्मणि भा
गिनौ ॥ समवेक्ष्य तथा राज्ञा प्रणेयाः सततं कराः ॥ नोच्छिंद्यादात्मनो मूलं परेषां चापि तृष्णया ॥ ईहाद्वाराणि संरुध्य
राजा संप्रीतिदर्शनः ॥ प्रद्विषंति परिख्यातं राजानमतिखादिनं ॥ प्रद्विष्टस्य कुतः श्रेयः संप्रियो लभते फलं ॥ व
त्सौपम्येन दोग्धव्यं राष्ट्रमक्षीणबुद्धिना ॥ हृतो वत्सो न जातबलः पीडां सहति पार्थिव ॥ न कर्म कुरुते वत्सो भृ
शं दुग्धो युधिष्ठिर ॥ राष्ट्रमप्यतिदुग्धं हि न कर्म कुरुते महत् ॥ यो राष्ट्रमनुगृह्णाति परिरक्षन्स्वयं नृपः ॥ संजातमु
पजीवन्स लभते सुमहत्फलं ॥ आपदर्थं च निचयान्राजानं इह तं च ते ॥ राष्ट्रं च कोशभूतं स्यात्कोशो वेश्मगतस्तथा
॥ पौरजानपदान्सर्वान्संश्रितोपाश्रितांस्तथा ॥ यथाशक्त्यनुकंपेत सर्वानल्पधनानपि ॥ बाह्यं जनं भेदयित्वा भो
क्तव्यो मध्यमः सुखं ॥ एवं न संप्रकुप्यंति जनाः सुखितदुःखिताः ॥ प्रागेव तु धनादानमनुभाष्य ततः पुनः ॥ संनिपत्य स्वा
न्स्वविषये भयं राष्ट्रे प्रदर्शयेत् ॥ इयमापत्समुत्पन्ना परचक्रभयं महत् ॥ अपि चांताय कल्पेत वेणोरिव फलाग
मः ॥ अरयो मे समुत्थाय बहुभिर्दस्युभिः सह ॥ इदमात्मवधायैव राष्ट्रमिच्छंति बाधितुं ॥ अस्यामापदि घोरायां संप्रा
प्ते दारुणे भये ॥ परित्राणाय भवतः प्रार्थयिष्ये धनानि च ॥ प्रतिदास्ये च भवतां सर्वं चाहं भयक्षये ॥ नारयः प्रतिह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यंति यद्ध्रेयुर्बलात्क्षिताः॥ कलत्रमादितः कृत्वा नस्येत्स्वं स्वयमेव हि॥ अपि चेत्सुव्यवस्थार्थमर्थसंचय इष्यते॥ नंदामि वप्र
सादेन पुत्राणामिव चोदये॥ यथाशक्त्यानुगृह्णामि नाकुस्यापीड्याव वः॥ आपत्स्वेव च वोढव्यं भवद्भिः पुंगवैरिह॥

न प्रियं सततं कार्यं धनं कस्यांचिदापदि॥ इति वाचा मधुरया श्लक्ष्णया सोपचारया॥ स्वरश्मीनभ्यवसृजेद्योगमाधा
य कालवित्॥ प्राकारं भृत्यभरणं व्ययं संग्रामतो भयं॥ योगक्षेमं च संप्रेक्ष्य गोमिनः कारयेत्करं॥ उपेक्षिता हि नश्ये
युर्गोमिनोऽरण्यवासिनः॥ तस्मात्तेषु विशेषेण मृदुपूर्वं समाचरेत्॥ सांत्वनं रक्षणं दानमवस्था चाप्यभीक्ष्णशः॥ गोमि
नो पार्थ कर्तव्यः संविभागाः प्रियाणि च॥ अजस्रमुपयोक्तव्यं फलं गोमिषु सर्वशः॥ प्रभावयति राष्ट्रं च व्यवहारं कृषिं तथा॥
तस्माद्गोमिषु यत्नेन प्रियं कुर्याद्विचक्षणः॥ दयावानप्रमत्तश्च करान्संप्रणयेन्मृदुः॥ सर्वत्र क्षेमचरणं सुलभं नाम तात गो
मिभिः॥ न ह्यतः सदृशं किंचिद्धनमस्ति युधिष्ठिर॥ ॥शांतिराजधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥यदा राजा समर्थोऽपि को
तू शार्थी स्यान्महामते॥ कथं प्रवर्तेत तथा तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥यथादेशं यथाकालमपि चैव यथाब
लं॥ अनुशिष्यात्प्रजा राजा धर्मार्थी तद्धिते रतः॥ यथैवासां च मन्येत श्रेय आत्मन एव च॥ यथा स्वल्पापि कर्माणि रा
जा राष्ट्रेषु वर्तयेत्॥ मधुदोहं दुहेद्राष्ट्रं भ्रमरा इव पादपं॥ वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत्॥ जलौका व
व त्पिबेद्राष्ट्रं मृदुनैव नराधिपः॥ व्याघ्रीव च हरेत्पुत्रान्संदशेन्न च पीडयेत्॥ यथा शल्यकवानाखुः पदं धूनयते सदा॥ अ
तीक्ष्णेनाप्युपायेन तथा राष्ट्रं समापिबेत्॥ अल्पेनाल्पेन देयेन वर्धमानं प्रदापयेत्॥ ततो भूयस्ततो भूयः कामं वृ १०१

द्धिं समाचरेत्॥ दमयन्निव दम्यानि शश्वद्भारं प्रवर्धयेत्॥ मृदुनापि प्रयत्नेन शनाच्छनैरभ्यवहारयेत्॥ सकृत्पाशा सो
वकीर्णास्ते न सविष्यंति दुर्दमाः॥ उचितेनापि भोक्तव्यास्ते भविष्यंति यत्नतः॥ तस्मात्सर्वसमारंभो दुर्लभः पुरुषं प्रति॥
यथा मुख्यं सांत्वयित्वा भोक्तव्य इतरो जनः॥ ततस्तान्भेदयित्वाथ परस्परविवक्षितान्॥ भुंजीत सांत्वयित्वैव यथासु
खमयत्नतः॥ न चास्थाने न वा काले करानेभ्यो निपातयेत्॥ आनुपूर्व्येण सांत्वेन यथाकालं यथाविधि॥ उपायान्प्रब्रवी
म्येनान्न मे माया विवक्षिता॥ अनुपायेन दमयन्प्रकोपयति वाजिनः॥ पानागारनिवेशाश्च वेश्याः प्रापणिकास्तथा॥ कु
वा. शीलवाः सकितवा ये चान्ये केचिदीदृशाः॥ नियम्याः सर्व एवैते ये राष्ट्रस्योपघातकाः॥ एते राष्ट्रे हि तिष्ठंतो बाधंते भद्रिकाः
प्रजाः॥ न केनचिद्याचितव्यः कश्चित्किंचिदनापदि॥ इति व्यवस्था भूतानां पुरस्तान्मनुना कृता॥ सर्वे तथा न जीवेयुर्न
कुर्युः कर्म चेदिह॥ सर्व एव इमे लोका न भवेयुर्न संशयः॥ प्रभुर्नियमने राजा य एतान्न नियच्छति॥ भुंक्ते स तस्य पापस्य च
तुर्भागमिति श्रुतिः॥ भोक्ता स तस्य पापस्य सुकृतस्य यथा तथा॥ नियंतव्याः सदा राज्ञा पापा ये स्युर्नराधिप॥ कृतपापस्त्वसौ
राजा य एतान्न नियच्छति॥ तथा कृतस्य धर्मस्य चतुर्भागमुपाश्नुते॥ स्थानान्येतानि संयम्य प्रसंगो भूतिनाशनः॥ कामप्र
सक्तः पुरुषः कामकार्यं विसर्जयेत्॥ आपद्यवनया चैव येषां नास्ति परिग्रहः॥ दातव्यं धर्मतस्तेभ्यस्त्वनुक्रोशाद्दयात्र
तु॥ मा ते राष्ट्रे याचनका भूवन्मा चापि दस्यवः॥ ऐषां दातार एवैते नैते भूतस्य भावकाः॥ ये भूतान्यनुगृह्णंति वर्धयंति च
ते प्रजाः॥ एते राष्ट्रे प्रवर्तंतां मा भूतानामभावकाः॥ दंड्यास्ते च महाराज धनादानप्रयोजकाः॥ प्रयोगं कारयेयुस्तान्यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० बलिकानां स्तथा॥ कृषिगोरक्षवाणिज्यं यच्चान्यत्किंचिदीदृशं॥ पुरुषैः कारयेत्कर्म बहुभिः कर्मभेदतः॥ नरश्चेत्कृषिगोरक्ष्यं वा
णिज्यं चाप्यनुष्ठितः॥ संशयं लभते किंचित्तेन राजा विगर्हितः॥ धनिनः पूजयेन्नित्यं पानाच्छादनभोजनैः॥ वक्तव्याश्चानुगृ
१०२ त ह्णीध्वं प्रजाः सह मयेति वै॥ अंगमेतन्महद्राज्ञां धनिनो नाम भारत॥ ककुदं सर्वभूतानां धनस्थो नात्र संशयः॥ प्रा
ज्ञः शूरो धनस्थश्च स्वामी धार्मिक एव च॥ तपस्वी सत्यवादी च बुद्धिमांश्चाभिरक्षति॥ तस्मादेतेषु सर्वेषु प्रीतिमा
न्भव पार्थिव॥ सत्यमार्जवमक्रोधमानृशंस्यं च पालय॥ एवं दंडं च कोशं च मित्रं भूमिं च लप्स्यसे॥ सत्यार्जव
परो राजन्मित्रकोशबलान्वितः॥ ॥दांतौ राजधर्मे राजानुशास्तिः॥ ॥भीष्म उवाच॥ वनस्पतीन्भक्ष्यफलान्न छिं
द्युर्विषये तव॥ ब्राह्मणानां मूलफलं धर्ममाहुर्मनीषिणः॥ ब्राह्मणेभ्योतिरिक्तं च भुंजीरन्नितरे जनाः॥ न ब्राह्म
णोपरोधेन हरेदन्यः कथंचन॥ विप्रश्चेत्त्यागमातिष्ठेदाख्यायावृत्तिकर्शितः॥ परिकल्प्यास्य वृत्तिः स्यात्सदार
स्य नराधिप॥ स चेन्नोपनिवर्तेत वाच्यो ब्राह्मणसंसदि॥ कस्मिन्निदानीं मर्यादामयं तो कः करिष्यति॥ अ
संशयं निवर्तेत न चेद्वक्ष्यत्यतः परं॥ पूर्वं परोक्षं कर्तव्यमेतत्कौंतेय शासनं॥ आहुरेतज्जना ब्रह्मन्न चैतच्छ्र
द्दधाम्यहं॥ निमंत्र्यश्च भवेद्भोगैरवृत्या चेत्तदा भवेत्॥ कृषिगोरक्षवाणिज्यं लोकानामिह जीवनं॥ ऊ
र्ध्वं चैव त्रयी विद्या सा भूतान्भावयत्युत॥ तस्यां प्रवर्तमानायां ये स्युस्तत्परिपंथिनः॥ दस्यवस्तद्वधायेह
ब्रह्म क्षत्रमथासृजत्॥ शत्रून्जहि प्रजा रक्ष यजस्व क्रतुभिर्नृप॥ युध्यस्व समरे वीरो भव कौरव १०२

नंदन॥ संरक्ष्य पालयेद्राजा यः स राजार्यसत्तम॥ ये केचित्तान्न रक्ष्यंति ते रथो नास्ति कश्चन॥ सदेवराजा
यो द्रव्यं सर्वलोकाद्युधिष्ठिर॥ तस्मादेतो हि भुंजीत मनुष्यानेव मानवः॥ अंतरेभ्यः परान्रक्षेत्परेभ्यः पुन
रंतरान्॥ परान्परेभ्यः स्वान्स्वेभ्यः सर्वान्पालय नित्यदा॥ आत्मानं सर्वतो रक्षेद्राजा रक्षस्व मेदिनीं॥ आ
त्ममूलमिदं सर्वमाहुर्हि विदुषो जनाः॥ किं छिद्रं कोनु संगो मे किं वास्त्यविनिपातितं॥ कुतो माममवेद्दोष इ
ति नित्यं विचिंतयेत्॥ आसेस्तानेरनुमतेः पृथिवीमनुवानयेत्॥ जानीयुर्यदि मे वृत्तं प्रशंसंति तदा पुनः॥ किंचि
द्रोचेज्जनपदे कच्चिद्दृष्टे च मे यशः॥ धर्मज्ञानां धृतिमतां संग्रामेष्वपलायिनां॥ राष्ट्रं च ये नु जीवंति ये च राज्ञोनु
जीविनः॥ अमात्यानां च सर्वेषां मध्यस्थानां च सर्वशः॥ ये च त्वाभिप्रशंसेयुर्निंदेयुरपि वा पुनः॥ सर्वांस्तु परि
णीतानां सत्कारयेथा युधिष्ठिर॥ एकांतेन हि सर्वेषां न शक्यं तात रोचितुं॥ मित्रामित्रमथो मध्यं सर्वभूतेषु भार
त॥ तुल्यबाहुबलानां च तुल्यानां च गुणैरपि॥ कथं स्यादधिकः कश्चिदनु भुंजीत मानवः॥ यच्चराश्च वनान्घुर
दंष्ट्रान्दंष्ट्रिणस्तथा॥ आशीविषानिव क्रुद्धान्भुजंगान्भुजगानिव॥ एतेभ्यश्चाप्रमत्तस्य सदा शत्रोर्युधिष्ठिर
॥ भारुंडसदृशा ह्येते निपतंति प्रमाद्यतः॥ कच्चित्ते वणिजो राष्ट्रे नोद्विजंति करार्दिताः॥ क्रीडंतो बहुनाल्पेन कांता
रकृतविश्रमाः॥ कच्चित्कृषिकरा राष्ट्रं न जहत्यतिपीडिताः॥ ये वहंति धुरं राज्ञां ते भरंतीतरानपि॥ इतो द
त्तेन जीवंति देवाः पितृगणास्तथा॥ मनुष्योरगरक्षांसि पशवः पक्षिणस्तथा॥ एषा ते राजवृत्तिश्च राष्ट्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युधिष्ठिर भारत॥ एवमेवार्थमाश्रित्य भूयो वक्ष्यामि भारत॥ ॥शांतौ राजधर्मे राष्ट्रगुप्तिः॥ ॥भीष्म उवाच॥ ॥
यानंगिराः क्षत्रधर्मानुतथ्यो मुनिसत्तमः॥ मांधात्रे यौवनाश्वाय प्रीतिमानभ्यभाषत॥ स यथानुशशासै
नमुतथ्यो ब्रह्मवित्तमः॥ तत्ते सर्वं प्रवक्ष्यामि निखिलेन युधिष्ठिर॥ ॥उतथ्य उवाच॥ ॥धर्माय राजा भ
वति न कामकरणाय तु॥ मांधातर्वै विजानीहि राजा लोकस्य रक्षिता॥ राजा चरति चेद्धर्मं देवत्वायैव कं
ल्प्यते॥ स चेदधर्मं चरति नरकायैव गच्छति॥ धर्मे तिष्ठंति भूतानि धर्मो राजनि तिष्ठति॥ तं राजा साधु
यः शास्ति स राजा पृथिवीपतिः॥ राजा परमधर्मात्मा लक्ष्मीवान्पाप उच्यते॥ देवाश्च गर्हां गच्छंति धर्मो
नास्तीति चोच्यते॥ अधर्मे वर्तमानानामर्थसिद्धिः प्रदृश्यते॥ तदेव मंगलं सर्वो लोकः समनुवर्त्तते॥ उ
च्छिद्यते धर्मवृत्तमधर्मो विद्यते महान्॥ भयमाहुर्दिवारात्रं यथा पापो न वर्द्धते॥ ममेदमिति नेदं च साधू
नां तात धर्मतः॥ नैव व्यवस्था भवति यदा पापो न वार्यते॥ नैव भार्या न पशवो न क्षेत्रं न निवेशनं॥ संदृ
श्येत मनुष्याणां यदा पापबलं भवेत्॥ देवाः पूजां न जानंति न स्वधां पितरस्तथा॥ न पूज्यंते चातिथयो य
दा पापो न वार्यते॥ वध्यानामिव सर्वेषां मनो भवति विह्वलं॥ मनुष्याणां महाराज यदा पापो न वार्यते॥
उभौ लोकावभिप्रेक्ष्य राजानमृषयः स्वयं॥ असृजन्सुमहद्भूतमयं धर्मो भविष्यति॥ यस्मिन्धर्मो विरा
जेत तं राजानं प्रचक्षते॥ यस्मिन्विलीयते धर्मस्तं देवा वृषलं विदुः॥ वृषो हि भगवान्धर्मो यस्तस्य १०३

कुरुते ह्यलं॥ वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत्॥ धर्मे वर्द्धति वर्द्धंति सर्वभूतानि सर्वदा॥ तस्मिन्ह्रसति ही
यंते तस्माद्धर्मं न लोपयेत्॥ धनात्स्रवति धर्मो हि धारणाद्वेति निश्चयः॥ अकार्याणां मनुष्येंद्र स सीमांतकरः
स्मृतः॥ प्रभवार्थं हि भूतानां धर्मः सृष्टः स्वयंभुवा॥ तस्मात्प्रवर्त्तयेद्धर्मं प्रजानुग्रहकारणात्॥ तस्माद्धि रा
जशार्दूल धर्मः श्रेष्ठ इति स्मृतः॥ स राजा यः प्रजाः शास्ति स एव पुरुषर्षभ॥ कामक्रोधावनादृत्य धर्ममेवानुपा
लयेत्॥ धर्मः श्रेयस्करतमो राज्ञां भरतसत्तम॥ धर्मस्य ब्राह्मणा योनिस्तस्मात्तान्पूजयेत्सदा॥ ब्राह्मणानां च मां
धातः कुर्यात्कामानमत्सरी॥ तेषां ह्यकामकरणाद्राज्ञः संजायते भयं॥ मित्राणि च न वर्द्धंते तथामित्रा भवंत्यपि॥
क ब्राह्मणानां सदासूयाद्बाल्याद्वैरोचनो बलिः॥ तथास्माच्छ्रीरपाक्रामद्यस्मिन्नासीत्प्रतापिनी॥ ततस्तस्मादपाक्र
म्य साऽगच्छत्पाकशासनं॥ अथ सोऽन्वतपत्पश्चाच्छ्रियं दृष्ट्वा पुरंदरे॥ एतत्फलमसूयाया अभिमानस्य चा
विभो॥ तस्माद्बुध्यस्व मांधातर्मा त्वां जह्यात्प्रतापिनी॥ दर्पो नाम श्रियः पुत्रो जज्ञे धर्मादिति श्रुतिः॥ तेन देवा
सुरा राजन्नीताः सुबहवो वशं॥ राजर्षयश्च बहवस्तथा बुध्यस्व पार्थिव॥ राजा भवति तं जित्वा दासस्तेन परा
जितः॥ स यथा दर्पसहितमधर्मं नानुसेवते॥ तथा वर्त्तस्व मांधातश्चिरं चेत्स्थातुमिच्छसि॥ मत्तात्प्रमत्ता
त्पौगंडादुन्मत्ताच्च विशेषतः॥ तदभ्यासादुपावर्त्तं संहितानां च सेवनात्॥ निगृहीतादमात्याच्च स्त्रीभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० श्चैव विशेषतः ॥ पर्वताद्विषमां दुर्गां हस्तिनोश्वात्सरीसृपात् ॥ एतेभ्यो नित्ययुक्तः स्यान्नक्तं चर्यां च वर्जयेत् ॥
अत्यागं चातिमानं च दंभं क्रोधं च वर्जयेत् ॥ अविज्ञातासु च स्त्रीषु क्लीबासु स्वैरिणीषु च ॥ परभार्यासु कन्या-
१०४ सु नाचरेन्मैथुनं नृपः ॥ कुलेषु पापरक्षांसि जायंते वर्णसंकरात् ॥ अपुमांसोंगहीनाश्च स्थूलजिह्वा विचे-
तसः ॥ एते चान्ये च जायंते यदा राजा प्रमाद्यति ॥ तस्माद्राज्ञा विशेषेण वर्तितव्यं प्रजाहिते ॥ क्षत्रियस्य
प्रमत्तस्य दोषः संजायते महान् ॥ अधर्माः संप्रवर्तंते प्रजासंकरकारकाः ॥ अशीते विद्यते शीतमुष्णे
चोष्णं न विद्यते ॥ अवृष्टिरतिवृष्टिश्च व्याधिश्चाप्याविशेत्प्रजाः ॥ नक्षत्राण्युपतिष्ठंति ग्रहा घोरास्तथा
राते ॥ उत्पाताश्चात्र दृश्यंते बहवो राजनाशनाः ॥ अरक्षितात्मा यो राजा प्रजाश्चापि न रक्षति ॥ प्रजाश्च
तस्य क्षीयंते ताश्च सोनु विनश्यति ॥ द्वावाददाते ह्येकस्य द्वयोश्च बहवोपरे ॥ कुमार्यः संप्रलुप्यंते तदा-
हुर्नृपदूषणं ॥ ममेदमिति नैकस्य मनुष्येष्ववतिष्ठते ॥ त्यक्त्वा धर्मं यदा राजा प्रमादमनुतिष्ठति ॥ ॥
शां॰ तौ स राजधर्मे उतथ्यगीतासु ॥ ॥ उतथ्य उवाच ॥ ॥ कालवर्षी च पर्जन्यो धर्मचारी च पार्थिवः ॥ सं-
पद्यदेषा भवति सा बिभर्ति सुखं प्रजाः ॥ यो न जानाति हंतुं वा वस्त्राणां रजको मलं ॥ रक्तानां वा शोध- १०४

यितुं यथा नास्ति तथैव सः ॥ एवमेव द्विजेंद्राणां क्षत्रियाणां विशां तथा ॥ शूद्रश्चतुर्थो वर्णानां नानाकर्मस्वव-
स्थितः ॥ कर्म शूद्रे कृषिर्वैश्ये दंडनीतिश्च राजनि ॥ ब्रह्मचर्यं तपो मंत्राः सत्यं चापि द्विजातिषु ॥ तेषां यः क्षत्रि-
यो वेद वस्त्राणामिव शोधनं ॥ शीलदोषान्विनिर्हंतुं स पिता स प्रजापतिः ॥ कृतं त्रेता द्वापरं च कलिश्च भर-
तर्षभ ॥ राजवृत्तानि सर्वाणि राजैव युगमुच्यते ॥ चातुर्वर्ण्यं तथा वेदाश्चातुराश्रम्यमेव च ॥ सर्वे प्रमुह्यते
ह्येते यदा राजा प्रमाद्यति ॥ अग्निस्त्रेता त्रयी विद्या यज्ञाश्च सहदक्षिणाः ॥ सर्व एव प्रमाद्यंति यदा राजा प्र-
माद्यति ॥ राजैव कर्ता भूतानां राजैव च विनाशकः ॥ धर्मात्मा यः स कर्ता स्यादधर्मात्मा विनाशकः ॥ राज्ञो
भार्याश्च पुत्राश्च बांधवाः सुहृदस्तथा ॥ समेत्य सर्वे शोचंति यदा राजा प्रमाद्यति ॥ हस्तिनोश्वाश्च गावश्चा-
प्युष्ट्राश्वतरगर्दभाः ॥ अधर्मवृत्ते नृपतौ सर्वे सीदंति जंतवः ॥ दुर्बलार्थं बलं सृष्टं धात्रा मांधातरुच्यते ॥
अबलं महद्भूतं सर्वं यस्मिन्प्रतिष्ठितं ॥ यच्च भूतं संभजते ये च तदन्वयाः ॥ अधर्मस्थे हि नृपतौ सर्वे
शोचंति पार्थिव ॥ दुर्बलस्य च यच्चक्षुर्मुनेराशीविषस्य च ॥ अविषह्यतमं मन्ये मा स्म दुर्बलमासदः ॥
दुर्बलांस्तात बुध्येथा नित्यमेवाविमानितान् ॥ मा त्वां दुर्बलचक्षूंषि प्रदहेयुः सबांधवं ॥ न हि दुर्बलदु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नघस्य न किंचिदवशिष्यते ॥ विमानितो हतः क्रुष्टस्त्रातारं चेन्न विंदति ॥ अमानुषकृतस्तत्र दंडो हंति नराधि-
पं ॥ मा स्म तात रणे स्थित्वा भुंजीथा दुर्बलं जनं ॥ मा त्वां दुर्बलचक्षूंषि दहंत्वग्निरिवाश्रयं ॥ यानि मिथ्याभिप्रा-
स्तानां पतंत्यश्रूणि रोदतां ॥ तानि पुत्रान्पशून्घ्नंति तेषां मिथ्याभिशंसनात् ॥ यदि नात्मनि पुत्रेषु न चे-
त्पौत्रेषु नप्तृषु ॥ न हि पापं कृतं कर्म सद्यः फलति गौरिव ॥ यत्राबलो वध्यमानस्त्रातारं नाधिगच्छति ॥
महान्दैवकृतस्तत्र दंडः पतति दारुणः ॥ युक्ता यदा जनपदा भिक्षंते ब्राह्मणा इव ॥ अभीक्ष्णं भिक्षुरूपे-
ण राजानं घ्नंति दारुणाः ॥ राज्ञो यदा जनपदे बहवो राजपूरुषाः ॥ अनयेनोपवर्त्तंते तद्राज्ञः किल्बिषं म-
हत् ॥ यदा युक्त्या नयेतार्थान्कामाद्वार्थवशेन वा ॥ कृपणं याचमानानां तद्राज्ञो वैशसं महत् ॥ महावृक्षो
जायते वर्द्धते च तद्देव भूतानि समाश्रयंति ॥ यदा वृक्षश्छिद्यते दह्यते वा तदाश्रया अनिकेता भवंति ॥ स
दा राष्ट्रे धर्ममग्र्यं चरंति संस्कारं वा राजगुणं ब्रुवाणाः ॥ तैरेव धर्मश्चरितो धर्ममोहात्तूर्णं जह्यात्सुकृ-
तं दुष्कृतं वा ॥ यत्र पापा ज्ञायमानाश्चरंति सतां कलिर्विंदति तत्र राज्ञः ॥ यदा राजा शास्ति नरानशिष्टांस्त- ९०५
द्राज्यं वर्द्धते भूमिपस्य ॥ यश्चामात्यं मानयित्वा यथार्थं मंत्रे च युद्धे च नृपो नियुंज्यात् ॥ विवर्द्धते यस्य

राष्ट्रं नृपस्य भुंक्ते महीमखिलां सोचिराय ॥ अत्रापि सुकृतं कर्म वाचं चैव सुभाषितं ॥ समीक्ष्य पूजयन्राजा ध-
र्ममाप्नोत्यनुत्तमं ॥ संविभज्य यदा भुंक्ते न चामात्यानवमन्यते ॥ पापमाचरते यत्र कर्मणा व्याहृतेन च ॥ प्रिय-
स्यापि न मृष्येत स राज्ञो धर्म उच्यते ॥ यदा सदक्षिणैर्यज्ञैर्यजते श्रद्धयान्वितः ॥ कामद्वेषावनादृत्य स रा-
ज्ञो धर्म उच्यते ॥ कृपणानाथवृद्धानां यदाश्रु परिमार्जनं ॥ हर्षं संजनयन्नृणां स राज्ञो धर्म उच्यते ॥ वि-
वर्द्धयति मित्राणि तथारींश्चापकर्षति ॥ संपूजयति साधूंश्च स राज्ञो धर्म उच्यते ॥ सत्यं पालयति प्रीत्या
नित्यं धर्मे नियच्छति ॥ पूजयेदतिथीन्भृत्यान्स राज्ञो धर्म उच्यते ॥ निग्रहानुग्रहौ चोभौ यत्र स्यातां प्रति-
ष्ठितौ ॥ अस्मिंल्लोके परे चैव राजा तत्प्राप्नुते फलं ॥ यमो राजा धार्मिकाणां मांधातः परमेश्वरः ॥ संयच्छ-
न्भवति प्राणान्न संयच्छंस्तु पापकः ॥ ऋत्विक्पुरोहिताचार्यान्सत्कृत्यानवमन्य च ॥ यदा सम्यक्प्रगृ-
ह्णाति स राज्ञो धर्म उच्यते ॥ यमो यच्छति भूतानि सर्वाण्येवाविशेषतः ॥ तस्य राज्ञानुकर्त्तव्यं यंतव्या
विधिवत्प्रजाः ॥ सहस्राक्षेण राजा हि सर्व एवोपमीयते ॥ स पश्यति हि यं धर्मं स धर्मः पुरुषर्षभः ॥ अप्र-
मादेन वीक्ष्यथाः क्षमां धर्मं धृतिं मतिं ॥ भूतानां तत्त्वजिज्ञासां साध्वसाधु च सर्वदा ॥ संग्रहः सर्वभू-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानां दानं च मधुरां च वाक् ॥ पौरजानपदाश्चैव गोप्तव्याश्च यथा प्रजाः ॥ न चातुरक्षो धिपतिः प्रजाः शक्नोति
रक्षितुं ॥ न हि शक्यमदंडेन क्लीबेनाप्यबुद्धिना ॥ अभिजात्यैः कुले जातैर्हृष्टभक्तैर्बहुश्रुतैः ॥ सर्वबुद्धिः परी
क्षेथाः सत्ता पत्नीश्च मित्राणामपि ॥ जनतत्त्वं सर्वभूतानां धर्मान्वेतस्य सिवे परं ॥ स्वदेशे परदेशे वा न ते धर्मो विनं
स्यति ॥ धर्मश्चार्थश्च कामाच्च धर्म एवोत्तरो भवेत् ॥ अस्मिन्लोके परे चैव धर्मात्मा सुखमेधते ॥ त्यजंति दारा
न्प्राणांश्च मनुष्याः प्रतिपूजिताः ॥ संग्रहस्तेश्च भक्तानां दानं च मधुरा च वाक् ॥ अप्रमादश्च शौचं च तात भूति
करं महत् ॥ एतेभ्यश्चैव मांधातः सततं मा प्रमादिथाः ॥ अप्रमत्तो भवेद्राजा छिद्रदर्शी परात्मनोः ॥ नास्य
छिद्रं परः पश्येच्छिद्रेषु परमन्वियात् ॥ एतद्वृत्तं वासवस्य यमस्य वरुणस्य च ॥ राजर्षीणां च सर्वेषां तत्त्वम
प्यनुपालय ॥ तत्कुरुष्व महाराज यत्तद्वृत्तं महर्षिसेवितं ॥ आतिष्ठ दिव्यं पंथानं मह्याय भरतर्षभ ॥ धर्म
वृत्तं हि राजानं प्रेत्य चेह च भारत ॥ देवर्षिपितृगंधर्वाः कीर्तयंत्यमितौजसः ॥ ॥ भीष्म उवाच ॥ ॥ स
व एवमुक्तो मांधाता तेनोतथ्येन भारत ॥ कृतवानविशंकस्तमेकः प्राप स मेदिनीं ॥ त्वं चापि च तथा सम्यक् कु
मांधातेव महीपते ॥ धर्मं कृत्वा महीं रक्ष स्वर्गे स्थानमवाप्स्यसि ॥ ॥ शांतौ राजधर्मे उतथ्यगीता १०६

समाप्ता ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं धर्मे स्थातुमिच्छन् राजा वर्तेत भारत ॥ पृच्छामि त्वां कुरुश्रेष्ठ तन्मे ब्रू
हि पितामह ॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ गीतं दृष्टार्थतत्त्वेन वामदेवेन
धीमता ॥ राजा वसुमना नाम कौशल्यो बलवान् शुचिः ॥ महर्षिं परिपप्रच्छ वामदेवं तपस्विनं ॥ ॥ वसुम
ना उवाच ॥ ॥ धर्मार्थसहितं वाक्यं भगवन्ननुशाधि मां ॥ येन वृत्तेन वै तिष्ठन्न च्यवेयं स्वधर्मतः ॥ ॥ भीष्म
उवाच ॥ ॥ तमब्रवीद्वामदेवः तपस्वी जपतां वरः ॥ हेमवर्णमुपासीनं ययातिमिव नाहुषं ॥ ॥ वामदेव उवाच ॥ ॥
धर्ममेवानुवर्तस्व न धर्माद्विद्यते परं ॥ धर्मे स्थिता हि राजानो जयंति पृथिवीमिमां ॥ अर्थसिद्धेः परं धर्मं मन्यते यो महीपतिः
॥ वृद्धां च कुरुते बुद्धिं स धर्मेण विरोचते ॥ अधर्मदर्शी यो राजा बलादेव प्रवर्तते ॥ क्षिप्रमेवापयातोस्मादुभौ प्रथममध्य
मौ ॥ असत्पापिष्ठसचिवो वध्यो लोकस्य धर्महा ॥ सहैव परिवारेण क्षिप्रमेवावसीदति ॥ अर्थानामननुष्ठाता कामचारी
विकत्थनः ॥ अपि सर्वां महीं लब्ध्वा क्षिप्रमेव विनश्यति ॥ अथ वदानः कल्याणमनसूयुर्जितेंद्रियः ॥ वर्धते मतिमान्राजा
स्रोतोभिरिव सागरः ॥ न पूर्णोस्मीति मन्येत धर्मतः कामतोर्थतः ॥ बुद्धितो मित्रतश्चापि सततं वसुधाधिपः ॥ एतेष्वपि च सर्वेषु
लोकयात्रा प्रतिष्ठिता ॥ एतानि शृण्वंल्लभते यशः कीर्तिं श्रियं प्रजाः ॥ एवं यो धर्मसंरंभी धर्मार्थपरिचिंतकः ॥ अर्थान्समीक्ष्यारभते
स ध्रुवं महदश्नुते ॥ अदाता ह्यनतिस्नेहो दंडेनावर्तयन्प्रजाः ॥ साहसप्रकृती राजा क्षिप्रमेव विनश्यति ॥ अथ पापं कृतं बुध्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० न च पञ्चस्य बुद्धिमान् ॥ अकीर्त्यापि समायुक्तो मृतो नरकमश्नुते ॥ अथ माधितुर्दृतिः शुक्रस्य गुणवेदिनः ॥ वासनं स्वमिवो सन्नं वि
जिघांसंति मानवाः ॥ यस्य नाक्रियतु दुर्धर्मं निवान्या नानुपश्यति ॥ सुखं तं त्रौ यल्लोके पुनश्चिरं महदश्नुते ॥ गुरुप्रधानो धर्मेषु स्व
१०७ धर्मार्थान्विवक्षितां ॥ धर्मप्रधानो लोकेषु सचिरं महदश्नुते ॥ ॥ इति शान्तौ राजधर्मे ॥ ॥ वासुदेव उवाच ॥ ॥ यज्ञाधर्मं प्रणाय
तेदुर्बले बलवत्तराः ॥ तां वृत्तिमुपजीवंति तद्रूवंति यदन्वयाः ॥ राजानमनुवर्तंते तं पापाभिप्रवर्तकं ॥ अविनीतमनुष्यं तत्तु क्षिप्रं
राष्ट्रं विनश्यति ॥ यद्वृत्तमनुजीवंति प्रकृतिस्थास्य मानवाः ॥ तदेव विषमस्थस्य क्षिप्रमेव विनश्यति ॥ यो यं ताचरितां वृत्तिं क्ष
त्रियो नानुवर्तति ॥ जिता नाम जितानां च क्षत्रबन्धर्मीदर्पितिसः ॥ शक्तः स्याद्दु न वीरराजा कुर्यात्करणमापदि ॥ प्रियो भवति भूतानां न च
विनश्यते श्रियः ॥ अप्रियं यस्य कुर्वंति फायस्तस्य प्रियं चरेत् ॥ न चिरेण प्रियः सः स्याद्यो प्रियः प्रियमाचरेत् ॥ मृषावादं परिह
नेकुर्यात्प्रियमयाचितः ॥ न च कामान्न संरंभान्नद्वेषाद्धर्ममुत्सृजेत् ॥ नापत्रपेत प्रश्नेषु नाभिभाष्यो गिरं चरेत् ॥ न त्वरेत न
च सूयेतथा संगृह्यते परः ॥ प्रिये नातिभृशं हृष्येदप्रियेन च संज्वरेत् ॥ न तप्येतार्थकृत्येषु प्रजाहितमनुस्मरन् ॥ यः प्रियं कु
रुते नित्यं गुणतो वासुधाधिपः ॥ तस्य कर्माणि सिध्यंति न सं सीयते श्रिया ॥ निवृत्तं प्रतिकूलेषु वर्तमानमनु प्रिये ॥ भक्तं
च भजेत नृपतिः सदैवस्ससमाहितः ॥ अप्रकीर्णेंद्रियप्राज्ञमत्यंतानुगतं शुचिं ॥ शक्तं चैवानुरक्तं च युंज्यान्महति कर्मणि ॥ एव
मेतैर्गुणैर्युक्तो यो नुरज्जति भूमिपं ॥ भर्तुरर्थेषु संतसंनियुंज्यादर्थकर्मणि ॥ मूढमैंद्रियं कं लुब्धमनार्यचरितं शठं ॥ अन १०७
नीतो हिं स्त्रं दुर्बुद्धिमबहुश्रुतं ॥ त्यक्तोदात्तं मद्यसहितं द्यूतस्त्रीमृगयापरं ॥ कार्ये महति युंजानो हीयते स नृपः श्रिया ॥

रक्षितात्मा च यो राजा रक्ष्यान्याश्चानुरक्षति ॥ प्रजाश्च तस्य वर्द्धंते ध्रुवं च महदश्नुते ॥ ये केचिद्भूमिपतयः सर्वांस्तान च वेक्ष
येत् ॥ सुहृद्भिरनभिख्यातैस्तेन राजा भविष्यति ॥ अपकृत्य बलस्थस्य दूरस्थोस्मीति नाश्वसेत् ॥ श्येनाभिपतनैरेते नि
पतंति प्रमाद्यतः ॥ दृढमूलस्त्वदुष्टात्मा विदित्वा बलमात्मनः ॥ अबलानभियुंजीत न तु ये बलवत्तराः ॥ विक्रमेण महीं
लब्ध्वा प्रजाधर्मेण पालयेत् ॥ आहवे निधनं कुर्याद्राजा धर्मपरायणः ॥ मरणांतमिदं सर्वं न हि किंचिदनामयं ॥ तस्माद्धर्मे
स्थितो राजा प्रजाधर्मेण पालयेत् ॥ रक्षाधिकरणं युद्धं तथा धर्मानुशासनं ॥ मंत्रचिंता सुखं काले पंचभिर्वर्द्धते मही ॥
एतानि तस्य गुप्तानि स राजा राजसत्तमः ॥ सततं वर्तमानो च राजा भुंक्ते महीमिमां ॥ नैतान्येकेन शक्यानि सातत्येना
नुवेक्षितुं ॥ तेषु सर्वं प्रतिष्ठाप्य राजा भुंक्ते महीमिमां ॥ दातारं संविभक्तारं मार्दवोपागतं शुचिं ॥ असंत्यक्तमनुष्यं च तं
जनः कुरुते प्रियं ॥ यस्तु निःश्रेयसं श्रुत्वा ज्ञानं तत्प्रपद्यते ॥ आत्मनो मतमुत्सृज्य तं लोकोनुविधीयते ॥ योर्थकामस्य वच
नं प्रातिकूल्यान्न मृष्यते ॥ शृणोति प्रतिकूल्यानि सर्वदा विमनाइव ॥ अग्राम्याचरितां वृत्तिं मत्यंतं यो नु बुध्यते ॥ जिता
नामजितानां च क्षत्रधर्मीदर्पितिसः ॥ निग्रहीता दमात्यानां स्त्रीभ्यश्चैव विशेषतः ॥ पर्वताद्विषमाद्दुर्गाद्धस्तिनोश्वात्सरी
सृपात् ॥ एतेभ्यो नित्ययुक्तः सन्रक्षेदात्मानमेव च ॥ मुख्यानमात्यान्यो हित्वा निहीनान्कुरुते प्रियान् ॥ स वै व्यसन
मासाद्य गाधमार्तो न विंदति ॥ यः कल्याणगुणान्ज्ञातीन्द्वेषान्नोपबुभूषति ॥ अदृढात्मा दृढक्रोधो नास्यार्थो रमते
ंतिके ॥ अथ यो गुणसंपन्नान्हृदयस्य प्रियानपि ॥ प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति ॥ नाकाले प्रणयेदर्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नाप्रियान्ज्ञातुसंज्वपेत् ।। प्रियेणातिस्तरां बुध्येद्युञ्जीतानोद्यकर्मणि ।। केमेनुनक्ता राजानः केन्त्रपाःसमुपासि
ताः ।। मध्यस्थदोषाकेचैषामिति नित्यं विनिश्चयेत् ।। नचात्रबलवान्भूत्वा दुर्बलेनैर्विश्वसेत्कथंचित् ।। भारुंडसदृ
शाह्येते निपतंति प्रमाद्यतः ।। अपियुक्तोगुणैर्युक्तं भर्त्तारं प्रियवादिनं ।। अभिद्रुह्यति पापात्मा तस्माद्वै विद्विषे
ज्जनान् ।। एवं राज्ञोपनिषदं ययातिस्माह नाहुषः ।। मनुष्यविजयेयुक्तो हंति शत्रूननुत्तमान् ।। ।।वामदेवगी
तासु ।। ।।अयुद्धेनैव विजयं वर्द्धयेद्वसुधाधिपः ।। जघन्यमाहुर्विजयं युद्धेन च नराधिप ।।नचाप्यलब्धं लिप्सेत मूलेनाति
दृढेसति ।। नहिदुर्बलमूलस्य राज्ञो लाभो विधीयते ।। यस्य कांतो जनपदः संपन्नः प्रियराजकः ।। संतुष्टपुष्टसचिवो दृढमूलः स
पार्थिवः ।। यस्य योधाः सुसंतुष्टाः सांत्विकाः सूपधस्थिताः ।। अल्पेनापि स दंडेन महीं जयति पार्थिवः ।।पौरजानपदायस्य स्वनुरक्ताः सु
पूजिताः ।। सधना धान्यवंतश्च दृढमूलः स पार्थिवः ।। प्रतापकालमधिकं यदा मन्येत चात्मनि ।। तदा लिप्सेत मेधावी परभूमिं ध
न्यान्युत ।। भोगेष्वदयमानस्य भूतेषु च दयावतः ।। वर्द्धते त्वरमाणस्य विषयो रक्षितात्मनः ।। तक्षत्यात्मानमेवैष वनं परशुनाय
था ।। यः सम्यग्वर्तमानेषु स्वेषु मिथ्याप्रवर्त्तते ।। नवैद्विषंतः क्षीयंते राज्ञो नित्यमपि घ्नतः ।। क्रोधं नियंतुं यो वेद तस्य द्वेष्टा न विद्यते ।।
यदार्यजनविद्विष्टं कर्म तन्नाचरेद्बुधः ।। यत्कल्याणमभिध्यायेत्तत्रात्मानं नियोजयेत् ।। नैनमन्येवजानंति नात्मना परितप्यते
।। कृत्यशेषेण यो राजा सुखान्यनुबुभूषति ।। इदं वृत्तं मनुष्येषु वर्त्तते यो महीपतिः ।। उभौ लोकौ विनिर्जित्य विजये संप्रतिष्ठि
तः ।। इत्युक्तो वामदेवेन सर्वं तत्कृतवान्नृपः ।। तथा कुर्वंस्त्वमप्येतौ लोकौ जेता न संशयः ।।।। इति श्रीतौ राजधर्मे वामदेवगीता ।। १०९

युधिष्ठिरउवाच ।। ।।अथयोविजिगीषेत क्षत्रियः क्षत्रियं युधि ।। कस्तस्य धर्मो विजय एतत्पृष्टो ब्रवीहि मे ।। ।।भीष्मउवाच ।। ।।स
सहायोसहायो वा राष्ट्रमागम्य भूमिपः ।। ब्रूयादहं वो राजेति रक्षिष्यामि च वः सदा ।। मम धर्म्यं बलिं दत्त किं वा मां प्रतिपत्स्यथ ।। ते
चेत्तमागतं तत्र वृणुयुः कुशलं भवेत् ।। ते चेदक्षत्रियाः संतो विरुध्येयुः कथंचन ।। सर्वोपायैर्नियंतव्या विकर्मस्था नराधिप ।। अशस्त्रं
क्षत्रियं मत्वा शस्त्रं गृह्णात्यथापरः ।। त्राणायाप्यसमर्थं तं मन्यमानमतीव च ।। ।।युधिष्ठिरउवाच ।। ।।अथ यः क्षत्रियो राजा क्ष
त्रियं प्रत्युपाव्रजेत् ।। कथं स प्रतियोद्धव्यस्तन्मे ब्रूहि पितामह ।। ।।भीष्मउवाच ।। ।।सुसन्नद्धो कवचिना योद्धव्यः क्षत्रियो रणे ।।
एक एकेन वाच्यश्च विसृजस्व क्षिपामि च ।। स चेत्संनद्ध आगच्छेत्संनद्धव्यं ततो भवेत् ।। स चेत्ससैन्य आयाति ससैन्यस्तमथा
ह्वयेत् ।। स चेन्निकृत्या युध्येत निकृत्या तं प्रसादयेत् ।। अथ चेद्धर्मतो युद्धे धर्मेणैव निवारयेत् ।। नाश्वेन रथिनं यायादुदिया
द्रथिनं रथी ।। व्यसने न प्रहर्तव्यं न भीताय जिताय च ।। नेषुर्लिप्तो न कर्णी स्यादसतामेतदायुधं ।। यथार्थमेव योद्धव्यं न क्रुध्ये
ज्जिघांसतः ।। साधूनां च मिथोभेदात्साधुश्चेद्व्यसनी भवेत् ।। निःप्राणो नाभिहंतव्यो नानपत्यः कथंचन ।। भग्नशस्त्रो विप
न्नाश्वश्छिन्नज्यो हतवाहनः ।। चिकित्स्यः स्यात्स्वविषये प्राप्यो वा स्वगृहे भवेत् ।। निर्व्रणश्चापि मोक्तव्य एष धर्मः सनात
नः ।। तस्माद्धर्मेण योद्धव्यमिति स्वायंभुवोब्रवीत् ।। यस्तु नित्यं सतां धर्मस्तमास्थाय न नाशयेत् ।। यो वै जयत्यधर्मेण क्ष
त्रियो धर्मसंगरः ।। आत्मानमात्मना हंति पापो निकृतिजीवनः ।। कर्म चैतदसाधूनामसाधुं साधुना जयेत् ।। धर्मेण निधनं
श्रेयो न जयः पापकर्मणा ।। नधर्मश्चरितो राजन्सद्यः फलति गौरिव ।। मूलस्य प्रशाखाश्च सुदहन्समनुगच्छति ।। पापेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मणा विजितं लब्ध्वा पापः प्रतुष्यति॥ स वर्द्धमानस्तेयेन पापः पापेषु युज्यते॥ न धर्मोस्तीति मन्वानः शुचीनवहसन्निव॥ अश्रद्द
धानभावाच्च विनाशमुपगच्छति॥ स बद्धो वारुणैः पाशैरमर्त्य इव मन्यते॥ महादृतिरिवाध्मातः स्वकृतेनैव वर्त्तते॥ ततः समूलो
ह्रियते नदीकूलादिव द्रुमः॥ अथैनमभिनिंदंति भिन्नं कुंभमिवाश्मनि॥ तस्माद्धर्मेण विजयं कोशं लिप्सेत भूमिपः॥ ॥शां
तौ राजधर्मे विजिगीषमाणवृत्तौ॥ ॥भीष्म उवाच॥ ॥नाधर्मेण महीं जेतुं लिप्सेत जगतीपतिः॥ अधर्मविजयं लब्ध्वा कोनु
मन्येत भूमिपः॥ अधर्मयुक्तो विजयो ह्यध्रुवोऽस्वर्ग्य एव च॥ सादयत्येष राजानं महीं च भरतर्षभ॥ विशीर्णकवचं चैव तवा
स्मीति प्रवादिनं॥ कृतांजलिं न्यस्तशस्त्रं न गृहीत्वा विहिंसयेत्॥ बलेनावजितो यस्तु न तं युध्येत भूमिपः॥ संवत्सरं विप्र
णाये तस्माज्जातः पुनर्भवेत्॥ नार्वाक् संवत्सरात्कन्या प्रष्टव्या विक्रमाहृता॥ एवमेव धनं सर्वं यच्चान्यत्सहसा हृतं॥ न
तु वध्यं धनं तिष्ठेत् पिबेयुर्ब्राह्मणाः पयः॥ युंजीरन्वाप्यनडुहः क्षंतव्यं वा तदा भवेत्॥ राज्ञा राजैव योद्धव्यः तथा धर्मो न हीयते॥
नान्यो राजानमभ्यस्येदराजन्यः कदाचन॥ अनीकयोः संनिहितयो यदीयाद्ब्राह्मणोंतरं॥ शांतिमिच्छन्नुभयतो न योद्धव्यं भ
वेत्तदा॥ मर्यादां शाश्वतीं भिंद्याद्ब्राह्मणं योभिलंघयेत्॥ अथ चेल्लंघयेदेतां मर्यादां क्षत्रियो ध्रुवं॥ असंख्येयस्तदूर्ध्वं
स्यादनादेयस्तु संसदि॥ या तु धर्मविलोपेन मर्यादाभेदनेन वा॥ तां वृत्तिं नानुवर्त्तेत विजिगीषुर्महीपतिः॥ धर्मलब्धो हि वि
जयात्को लोभोऽभ्यधिको भवेत्॥ सहसानार्यभूतानि क्षिप्रमेव प्रसादयेत्॥ सांत्वेन भोगदानेन स राज्ञां परमो नयः॥ भुज्यमा १०९
नास्त्वयोगेन स्वराष्ट्राद भितापिनः॥ अमित्रान्पर्युपासीरन्व्यसनौघप्रतीक्षणः॥ अमित्रोपग्रहं वास्य ते कुर्युः क्षिप्रमे

वहि अतुष्टाः सर्वतो राजन् राजव्यसनकांक्षिणः॥ नामित्रो विनिवर्त्तेत नातिछिद्यः कथंचन॥ जीवितं ह्यतनिच्छिन्नः संत्य
जेत कथंचन॥ नित्यं संतुष्टस्स विभो हृदमूलः स पार्थिवः॥ कीर्त्तिकृत्पुरोहिताचार्या ये चान्ये श्रुतसंमताः॥ पूजार्हाः पूजि
तायस्य स वै लोकविदुच्यते॥ एतेनैव च वृत्तेन महीं प्राप सुरोत्तमः॥ अनेन चेंद्रविजयं विजिगीषंति पार्थिवाः॥ भूमिव
र्धनं राजा जित्वा राजानमाहवे॥ अपि चान्नौषधीः शश्वदाजहार प्रतर्दनः॥ अग्निहोत्राग्निशेषं च हविर्भाजनमेव
च॥ आजहार दिवोदासस्ततो विप्रकृतोभवेत्॥ स राजकानि राष्ट्राणि नाभागो दक्षिणां ददौ॥ अन्यत्र श्रोत्रियस्वाच्च ता
पसस्वाच्च भारत॥ उच्चावचानि वित्तानि धर्मज्ञानां युधिष्ठिर॥ आसन्राज्ञां पुराणानां सर्वं तन्मम रोचते॥ सर्वविद्यातिरेका
न्जयमिच्छेन्महीपतिः॥ न मायया न दंभेन य इच्छेद्भूतिमात्मनः॥ ॥इति शांतौ राजधर्मे विजिगीषमाणवृत्ते॥ ॥यु
धिष्ठिर उवाच॥ ॥क्षत्रधर्मान्न पापीयान्धर्मोस्ति नराधिप॥ अपयाने न युद्धे च राजा हंति महाजनं॥ अप्यस्य
कर्मणा केन लोकान्जयति पार्थिवः॥ विद्वन्जिज्ञासमानाय प्रब्रूहि भरतर्षभ॥ ॥भीष्म उवाच॥ ॥निग्रहेण च पापा
नां साधूनां प्रग्रहेण च॥ यज्ञैर्दानैश्च राजानो भवंति शुचयोमलाः॥ उपरुंधंति राजानो भूतानि विजयार्थिनः॥ त एव विजयं प्रा
प्य वर्द्धयंति पुनः प्रजाः॥ अपविध्यंति भूतानि दानयज्ञतपोबलैः॥ अनुग्रहाय भूतानां पुण्यमेषां विवर्द्धते॥ यथैव क्षेत्रनिर्याता
निर्यातुं क्षेत्रमेकदा॥ हिनस्ति धान्यं कक्षं च न च धान्यं विनश्यति॥ एवं शस्त्राणि मुंचंतो घ्नंति वध्याननेकधा॥ तस्यैव निष्क
तिः कृत्स्ना भूतानां भावनं पुनः॥ ये भूतानि धनाज्जात्या वधात्क्लेशाच्च रक्षति॥ दस्युभ्यः प्राणदानात्स धनदः सुखदो विराट्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स सर्वयज्ञैरीजानो राजाथाभयदक्षिणैः ॥ अनुभूयेह भद्राणि प्राप्नोतींद्रसलोकतां ॥ ब्राह्मणार्थे समुत्पन्ने यो निःसृत्य युध्य
ति ॥ आत्मानं यूपमुत्सृज्य स यज्ञोऽनंतदक्षिणः ॥ अभीतो विकिरन् शत्रून् प्रतिगृह्य शरांस्तथा ॥ न तस्मात् त्रिदशाः श्रेयो भुवि पश्यं
ति किंचन ॥ तस्य यावंति शस्त्राणि त्वचं भिंदंति संयुगे ॥ तावतः सोऽश्नुते लोकान् सर्वकामदुहोऽक्षयान् ॥ यदस्य रुधिरं गात्राद
हवे संप्रवर्तते ॥ सह तेनैव पापेन सर्वपापैः प्रमुच्यते ॥ यानि दुःखानि सहते क्षत्रियो युधि तापिनः ॥ न ततोऽस्ति तपो भूय इति ध
र्मविदो विदुः ॥ पृष्ठतो भीरवः संख्ये वर्तंतेऽधमपूरुषाः ॥ शूरा च्छरणमिच्छंतः पर्जन्यादिव जीवनं ॥ यदि शूरस्तथा क्षेमे प्र
तिरक्षेद्यथा भये ॥ प्रतिरूपं जनं कुर्यान्न चेत्तद्वर्तते तथा ॥ यदि ते कृतमाज्ञाय नमस्कुर्युः सदैव तं ॥ युक्तं न्याय्यं च कुर्युस्ते न
चेद्वर्तते तथा ॥ पुरुषाणां समानानां दृश्यते महदंतरं ॥ संग्रामेऽनीकवेलायामुत्क्रुष्टेऽभिपतत्सु च ॥ पतत्यभिमु
खः शूरः परान्भीरुः पलायते ॥ आस्थायास्वर्ग्यमध्वानं सहायान्विषमे त्यजेत् ॥ मास्म तांस्तादृशांस्तात जनिष्टाः पु
रुषाधमान् ॥ ये सहायान्रणे हित्वा स्वस्तिमंतो गृहान्ययुः ॥ अस्वस्ति तेभ्यः कुर्वंति देवा इंद्रपुरोगमाः ॥ त्यागे
न यः सहायानां स्वान्प्राणांस्त्रातुमिच्छति ॥ काष्ठैर्लोष्ठैश्च तं हन्युर्दहेयुर्वा कटाग्निना ॥ पशुवन्मारयेयुर्वा क्षत्रि
या ये स्युरीदृशाः ॥ अधर्मः क्षत्रियस्यैष यच्छय्यामरणं भवेत् ॥ विसृजन् श्लेष्मपित्तानि कृपणं परिदेवयन् ॥ अ
विक्षतेन देहेन प्रलयं योऽधिगच्छति ॥ क्षत्रियो नास्य तत्कर्म प्रशंसंति पुराविदः ॥ न गृहे मरणं तात ११०

क्षत्रियाणां प्रशस्यते ॥ शौटीराणामशौटीर्यमधर्मं कृपणं स्मृतं ॥ इदं दुःखमहो कष्टं पापीय इति निष्टनन् ॥ प्रति
ध्वस्तमुखः पूतिरमात्यान्बहु शोचयन् ॥ अरोगाणां स्पृहयति स्वर्गं मृत्युमपीच्छति ॥ वीरो दृप्तोऽभिमानी च ने
दृशं मृत्युमर्हति ॥ रणेषु कदनं कृत्वा ज्ञातिभिः परिवारितः ॥ तीक्ष्णैः शस्त्रैरभिक्लिष्टः क्षत्रियो मृत्युमर्हति
॥ शूरो हि काममन्युभ्यामाविष्टो युध्यते भृशं ॥ हन्यमानानि गात्राणि परैर्नैवावबुध्यते ॥ स संख्ये निधनं प्रा
प्य प्रशस्तं लोकपूजितं ॥ स्वधर्मं विपुलं प्राप्य शक्रस्यैति सलोकतां ॥ सर्वयोधः परं स्वर्गमाप्नोति त्यक्तजी
वितः ॥ प्राप्नोतींद्रस्य सालोक्यं शूरः पृष्ठमदर्शयन् ॥ यत्र तत्र हतः शूरः शत्रुभिः परिवारितः ॥ अक्षय्या
लो ल्लभते लोकान्यदि क्लैब्यं न भाषते ॥ ॥ इति श्रीशांतिपर्वणि राजधर्मे विजिगीषमाणवृत्ते ॥ ॥ युधिष्ठिर उवाच ॥ ॥
के लोका युध्यमानानां शूराणामनिवर्तिनां ॥ भवंति निधनं प्राप्य तन्मे ब्रूहि पितामह ॥ ॥ भीष्म उवाच ॥ ॥
अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ अंबरीषस्य संवादमिंद्रस्य च युधिष्ठिर ॥ अंबरीषो हि नाभा
गिः स्वर्गं गत्वा सुदुर्लभं ॥ ददर्श सुरलोकस्थं शक्रेण सचिवं सह ॥ सर्वतेजोमयं दिव्यं विमानवरमास्थितं
॥ उपर्युपरि गच्छंतं स्वां वै सेनापतिं शुभं ॥ स दृष्ट्वोपरि गच्छंतं सेनापतिमुदारधीः ॥ ऋद्धिं दृष्ट्वा सुदेवस्य वि

स्थितः प्राह वासवं ॥ ॥अंबरीष उवाच ॥ ॥समग्रां तां महीं कृत्स्नामनुशिष्य यथाविधिं ॥ चातुर्वर्ण्यं यथाशा
स्त्रं प्रवृत्तो वृत्तकाम्यया ॥ ब्रह्मचर्येण घोरेण गुरुराचार्यसेवया ॥ वेदानधीत्य धर्मेण राजशास्त्रं च केवलं
॥ अतिथीनन्नपानेन पितॄंश्च स्वधया तथा ॥ ऋषीन्स्वाध्यायदीक्षाभिर्देवान्यज्ञैरनुत्तमैः ॥ क्षत्रध
र्मे स्थितो भूत्वा यथाशास्त्रं यथाविधि ॥ उदीक्षमाणः पृतनां जयामि युधि वासव ॥ देवराजसुदेवोयं मम से
नापतिः पुरा ॥ आसीद्योधः प्रशान्तात्मा सोयं कस्मादतीव मां ॥ ॥इंद्र उवाच ॥ ॥एतस्य विततस्तात सुदेव
स्य बभूव ह ॥ संग्राम यज्ञः सुमहान्यश्चान्यो युध्यते नरः ॥ सन्नद्धो दीक्षितः सर्वो योधः प्राप्य चमूमुखं ॥
युद्धयज्ञाधिकारस्थो भवतीति विनिश्चयः ॥ ॥अंबरीष उवाच ॥ ॥कानि यज्ञे हवींष्यत्र किमाज्यं का च
दक्षिणा ॥ ऋत्विजश्चात्र के प्रोक्तास्तन्मे ब्रूहि शतक्रतो ॥ ॥इंद्र उवाच ॥ ॥ऋत्विजः कुंजरास्तत्र वाजिनोध्वर्य
वस्तथा ॥ हवींषि परमांसानि रुधिरं त्वाज्यमुच्यते ॥ शृगालगृध्रकाकोलाः सदस्यास्तत्र सत्रिणः ॥ आज्यशेषं
पिबंत्येते हविः प्राश्नंति चाध्वरे ॥ बाणतोमरसंघाताः खड्गशक्तिपरश्वधाः ॥ ज्वलंतो निशिताः पीताः स्रुवस्त
स्याथ सत्रिणः ॥ चापवेगायतस्तीक्ष्णः परकायावभेदकः ॥ ऋजुः सुनिशितः पीतः सायकश्च स्रुवो महा १११

र ॥ द्वीपिचर्मावनद्धश्च नागदंतकृतत्सरुः ॥ हस्तिहस्तगतः खड्गः स्फ्यो भवेत्तत्र संयुगे ॥ ज्वलितैर्निशितैः प्रासैः श
स्त्रवृष्टिसपत्नद्धैः ॥ शैक्यायसमयैस्तीक्ष्णैरभियातो भवेद्वसु ॥ आवेगाद्यत्तु रुधिरं संग्रामे स्यंदते भुवि
सास्य पूर्णाहुतिर्होमे समृद्धा सर्वकामधुक् ॥ छिंधि भिंधीति यस्यैतत्क्रियते वाहिनीमुखे ॥ सामानि सा
मगास्तस्य गायंति यमसादने ॥ हविर्धानं तु तस्याहुः परेषां वाहिनीमुखे ॥ कुंजराणां हयानां च वर्मिणां च समु
च्चयः ॥ अग्निः श्येनचितो नाम तस्य यज्ञे विधीयते ॥ उत्तिष्ठति कबंधोत्र सहस्रे निहते तु यः ॥ स यूपस्तस्य शू
रस्य खादिरोष्टाश्रिरुच्यते ॥ इडोपहूताः क्रोशंति कुंजरा अंकुशेरिताः ॥ व्युष्टतलनादेन वषट्कारेण पा
र्थिव ॥ उद्गाता तत्र संग्रामे त्रिसामा दुंदुभी नृप ॥ ब्रह्मस्वे ह्रियमाणे यस्त्यजेत्प्राणान्प्रियां तनुं ॥ आत्मानं यूप
मुत्सृज्य स यज्ञोनंतदक्षिणः ॥ भर्तुरर्थे च यः शूरो विक्रमेद्वाहिनीमुखे ॥ न भयाद्विनिवर्तेत तस्य लोका
यथा मम ॥ नीलचर्मावृतैः खड्गैर्बाहुभिः परिघोपमैः ॥ यस्य वेदिरुपस्तीर्णा तस्य लोका यथा मम ॥ यस्य
शोणितसंघाता मांसशोणितकर्दमाः ॥ अस्थिचर्मलवा घोरा केशशैवलशाड्वला ॥ अश्वनागरथैःकृष सं
छिन्नैः कृतसंक्रमा ॥ पातकध्वजवानीरा हतवाहनवाहिनी ॥ शोणितोदा सुसंपूर्णा दुस्तरा पारगै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म नैः॥ हतनागमहानक्रा परलोकवहाशिवा॥ शक्त्यसिखड्गवहा हत्नौ कान्तध्वजं कतन्नुलवा॥ पुरुषादानुचरिता भी
११२ रुहौ एणं कल्मषावहा॥ नदी योधस्य संग्रामे तदस्यावभृथं स्मृतं॥ वेदी यस्य त्वमित्राणां शिरोभिरवकीर्यते॥
अश्वस्कंधैर्गजस्कंधैस्तस्य लोका यथा मम॥ पत्नीशाला कृता यस्य परेषां वाहिनीमुखे॥ हविर्धानं स्ववाहि
न्यस्तदस्याहुर्मनीषिणः॥ सदस्या दक्षिणा योधा आग्नीध्रश्चोत्तरां दिशं॥ शत्रुसेना कलत्रं च सर्वलोका नदू
रतः॥ तथाभ्रंतपते व्यूहोभवत्याकाशमग्रतः॥ सास्य वेदी तथा यज्ञे नित्यं वेदास्त्रयोग्नयः॥ यस्तु योधः प
रावृत्तः संत्रस्तो बध्यते परैः॥ अप्रतिष्ठं स नरकं याति नास्त्यत्र संशयः॥ यस्य शोणितवेगेन नदी स्यात्संप
रिप्लुतः॥ केशमांसास्थिसंपूर्णा स गच्छेत्परमां गतिं॥ यस्तु सेनापतिं हत्वा तद्यानमधिरोहति॥ नायकं वा
प्रधानं वा यो वा स्यात्तत्र पूजितः॥ स विष्णुविक्रमकामी बृहस्पतिसमः प्रभुः॥ जीवग्राहं प्रगृह्णाति तस्य लो
का यथा मम॥ आहृतं तु हतं शूरं न शोचेत कदाचन॥ अशोच्यो हि हतः शूरः स्वर्गलोके महीयते॥ न ह्यन्नं नो
दकं तस्य न स्नानं नाप्यशौचकं॥ हतस्य कर्तुमिच्छंति तस्य लोकाञ्शृणुष्व मे॥ वराप्सरःसहस्राणि शूर
मायोधने हतं॥ त्वरमाणानि धावंति मम भर्ता भवेदिति॥ एतत्तपश्च पुण्यं च धर्मश्चैव सनातनः॥ च ११२

त्वारश्चाश्रमास्तस्य यो युद्धे न पलायते॥ वृद्धं बालं न हंतव्यो न च स्त्री नैव पृष्ठतः॥ तृणपूर्णमुखश्चैव तवास्मी
ति च यो वदेत्॥ अहं वृत्रं बलं पाकं शतमायं विरोचनं॥ दुर्वार्यं चैव नमुचिं नैकमायं च शंबरं॥ विप्रचित्तिं च दैते
यं दनोः पुत्रांश्च सर्वशः॥ प्रह्लादं च निहत्याजौ ततो देवाधिपोभवत्॥ ॥भीष्म उवाच॥ ॥इत्येतच्छक्रवचनं नि
शम्य प्रतिगृह्य च॥ योधानामात्मनः सिद्धिमंबरीषोभिपन्नवान्॥ ॥इति शांतौ राजधर्मे शक्रांबरीषसंवा
दः॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं॥ प्रातर्दनो मैथिलश्च संग्रामं यत्र चक्रतुः॥
यज्ञोपवीती संग्रामे मैथिलो यन्न वान्यथा॥ योधान्हर्षयामास तन्निबोध युधिष्ठिर॥ जनको मैथिलो
राजा महात्मा सर्वतत्त्ववित्॥ योधान्स्वान्दर्शयामास स्वर्गं नरकमेव च॥ अभीतानामिमे लोका भास्वंतो हत
पश्यत॥ पूर्णा गंधर्वकन्याभिः सर्वकामदुहोक्षयाः॥ इमे पलायमानानां नरकाः प्रत्युपस्थिताः॥ अकीर्तिः शा
श्वती चैव पतितव्यमनंतरं॥ तान्दृष्ट्वारीन्विजयत भूत्वा संत्यागबुद्धयः॥ नरकस्याप्रतिष्ठस्य मा भूत वशव
र्तिनः॥ त्यागमूलं हि शूराणां स्वर्गद्वारमनुत्तमं॥ इत्युक्तास्ते नृपतिना योधाः परपुरंजयाः॥ व्यजयंत रणे श
त्रून्हर्षयंतो जनेश्वरं॥ तस्मादात्मवता नित्यं स्थातव्यं रणमूर्द्धनि॥ गजानां रथिनां मध्ये रथानामनुसादिनः॥
सादिनामंतरा स्थाप्यं पादातमपि दंशितं॥ य एवं व्यूहते राजा स नित्यं जयते द्विषः॥ तस्माद्देवं विधातव्यं नित्यमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

११३

वयुधिष्ठिर॥ सर्वैकतमिदं तिसुयुद्धेनातिमन्यवः॥ क्षोभयेयुरनीकानि सागरं मकरो यथा॥ हर्षयेयुर्विषण्णांश्च व्य
वस्थाप्य परस्परं॥ जितां च भूमिं रक्षेयुर्भग्नान्नात्यनुसारयेत्॥ पुनरावर्तमानानां निराशानां च जीविते॥ न वेगः सुसहो
राजन्नुस्तस्मान्नात्यनुसारयेत्॥ न हि प्रहर्तुमिच्छंति शूराः प्रद्रवतो भृशं॥ तस्मात्पलायमानानां कुर्यान्नात्यनुसार
णं॥ चराणामचरं ह्यन्नमदंष्ट्रा दंष्ट्रिणामपि॥ अपाणयः पाणिमतामन्नं शूरस्य कातराः॥ समानपृष्ठोदरपाणि
पादाः पश्चाच्छूरं भीरवोऽनुव्रजंति॥ अतो भयार्ताः प्रणिपत्य भूयः कृत्वांजलीनुपतिष्ठंति शूरान्॥ शूरबाहुषु लोको
यं लंबते पुत्रवत्सदा॥ तस्मात्सर्वास्ववस्थासु शूरः संमानमर्हति॥ न हि शौर्यात्परं किंचित्त्रिषु लोकेषु विद्यते॥ शू
रः सर्वं पालयति सर्वं शूरे प्रतिष्ठितं॥ ॥इति शांतौ राजधर्मे॥ विजिगीषमाण हते॥ ॥युधिष्ठिर उवाच॥ ॥यथा
जयार्थिनः सेनां नयंति भरतर्षभ॥ ईषद्धर्मं प्रपीड्यापि तन्मे ब्रूहि पितामह॥ भीष्म उवाच॥ ॥सत्येन हि स्थितो ध
र्मरूपपत्त्या तथापरे॥ साध्वाचारतया केचित्तथैवोपयिकादपि॥ उपायधर्मान्वक्ष्यामि सिद्धार्थं चार्थधर्मयोः॥ निर्मर्या
दा दस्यवस्तु भवंति परिपंथिनः॥ तेषां प्रतिघातार्थं प्रवक्ष्याम्यथ नैगमं॥ कार्याणां प्रतिसिद्ध्यर्थं तानुपायान्निबोध
मे॥ उभे प्रज्ञे वेदितव्ये ऋज्वी वक्रा च भारत॥ जानन्वक्रां न सेवेत प्रतिसेवेत चागतां॥ अमित्रमेव राजानं भेदेनोप
चरंत्युत॥ तां राजन्निकृतिं जानन्यथामित्रान्प्रबाधते॥ गजानां पार्श्ववर्माणि गोवृषाजगराणि च॥ शल्यकंटकलो
हानि तनुत्राणि मराणि च॥ शीतपीतानि वस्त्राणि सन्नाहा पीतलोहिताः॥ नानारंजनरक्ताः स्युः पताकाः केतवश्च ते॥ च ११३

ष्टयस्तोमराः खड्गा निशिताश्च परश्वधाः॥ फलकान्यथ चर्माणि प्रतिकल्प्यान्यनेकशः॥ अतिपीतानि शस्त्राणि यो
धाश्च कृतनिश्चयाः॥ चैत्र्यां वा मार्गशीर्ष्यां वा सेनायोगः प्रशस्यते॥ सर्वसस्या हि पृथिवी भवत्यनुमता सदा॥ नैवाति
शीतो नात्युष्णः कालो भवति भारत॥ तस्मात्तदा योजयेत परेषां व्यसनेषु वा॥ एते हि योगाः सेनायाः प्रशस्ताः परबा
धने॥ जलवांस्तृणवान्मार्गः समो गम्यः प्रशस्यते॥ चारैः सुविहिताभ्यासः कुशलैर्वनगोचरैः॥ न ह्यरण्येन शक्येत
गंतुं मृगगणैरिव॥ तस्मात्सेनासु तान्नेव योजयंति जयार्थिनः॥ आवासस्तोयवान्दुर्गः पर्याकाशः प्रशस्यते॥ परेषा
मुपयातानां मुपघाय यद्भवेत्॥ आकाशात्तु वनाभ्यासं मन्यंते गुणवत्तरं॥ बहुभिर्गुणजातैश्च ये युद्धकुशला ज
नाः॥ उपास्या भावतत्पर्णी पदातीनां च गूहनं॥ अथ शत्रुप्रतीघातमापदर्थं परायणं॥ सप्तर्षीन्पृष्ठतः कृत्वा युद्धे
रन्नचला इव॥ अनेन विधिना शत्रून्जिगीषेतापि दुर्जयान्॥ यतो वायुर्यतः सूर्यो यतः शुक्रस्ततो जयः॥ पूर्वं पू
र्वं ज्यायएषां सन्निपाते युधिष्ठिर॥ अकर्दमामनुदकाममर्यादामलोष्टकां॥ अश्वभूमिं प्रशंसंति ये युद्धकुश
लाजनाः॥ समा निरुदका काशा रथभूमिः प्रशस्यते॥ नीचद्रुमा महाकक्षा सोदका हस्तियोधिनां॥ बहुदुर्गा
महावृक्षा वेणुवेत्रसमाकुला॥ पदातीनां क्षमा भूमिः सर्वतो वनाचिता॥ पदातिबहुला सेना दृढा भवति
भारत॥ रथाश्वबहुला सेना सुदिनेषु प्रशस्यते॥ पदातिनागबहुला प्रावृट्काले प्रशस्यते॥ गुणानेतान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंख्याय देशकालौ प्रयोजयेत्॥ एवं संचिन्त्य यो याति तिथिनक्षत्रपूजितः॥ विजयं लभते नित्यं सम्यक् से
नां प्रयोजयन्॥ प्रसुप्तांस्तृषितान् श्रान्तान् प्रकीर्णान् नाभिघातयेत्॥ मोक्षे प्रयाणे चलने पानभोजनकाल
योः॥ अतिक्षिप्तान् व्यतिक्षिप्तान् विहतान् प्रतनूकृतान्॥ सुविस्रब्धान् कृतारंभानुपन्यासान् प्रतापितान्॥ बहिश्चर
ानुपन्यासान् कृत्वा वेश्मानुसारिणः॥ पारंपर्यागते द्वारे ये केचन रक्षिणः॥ अनीकं ये प्रभिंदंति भिन्नं सं
स्थापयंति च॥ समानाशनपानास्ते कार्या द्विगुणवेतनाः॥ दशाधिपतयः कार्याः शताधिपतयस्तथा॥ ततः
सहस्राधिपतिं कुर्याच्छूरमतंद्रितं॥ यथामुख्यं संनिपात्य वक्तव्याः संशपामहे॥ यथा जयार्थं संग्रामे न त्य
जामः परस्परं॥ इहैव ते निवर्तंतां ये च केचन भीरवः॥ न घातयेयुः प्रदरं कुर्वाणास्तुमुले युधि॥ न्यस्तं नि
पातयेत् पक्षं वधं वा कुर्युरीदृशाः॥ आत्मानं च स्वपक्षं च पलायन् हंति संयुगे॥ द्रव्यनाशो वधोऽकीर्तिरयशश्च पला
यने॥ मनोज्ञस्तु ... वाचः पुरुषस्य पलायतः॥ प्रतिध्वस्तोष्ठदंतस्य न्यस्तसर्वायुधस्य च॥ अमित्रैरनुबद्ध
स्य द्विषतामस्तु तादृशः॥ मनुष्यापसदा ह्येते ये भवंति पराङ्मुखाः॥ राशिवर्धनमात्रास्ते नैव ते प्रेत्य नो इह॥
अमित्रा हृष्टमनसः प्रत्युद्यांति पलायिनं॥ जयिनं सुहृदस्तात वंदनैर्मंगलेन च॥ यस्य स्म व्यसने राजन्ननु
मोदंति शत्रवः॥ तदसह्यतरं दुःखमहं मन्ये वधादपि॥ जयं जानीत धर्मस्य मूलं सर्वसुखस्य च॥ या भीरूणां ११४

परा ग्लानिः शूरस्तामधिगच्छति॥ ते वयं स्वर्गमिच्छंतः संग्रामे त्यक्तजीविताः॥ जयंतो वध्यमाना वा प्राप्नुयाम मह
द्गतिं॥ एवं संशप्तशपथाः समभित्यक्तजीविताः॥ अमित्रवाहिनीं वीराः प्रतिगाहंत्यभीरवः॥ अग्रतः पुरुषानी
कमसिचर्मवतां भवेत्॥ पृष्ठतः शकटानीकं कलत्रं मध्यतस्तथा॥ परेषां प्रतिघातार्थं पदातीनां च गहनं॥ अ
पि यस्मिन् पुरोगस्युर्भवेयुर्ये पुरोगमाः॥ ये पुरस्तादभिमताः सत्ववंतो मनीषिणः॥ ते वर्तेयुस्तथा तानन्वपीतरे ज
नाः॥ अपि चोद्धर्षणं कार्यं भीरूणामपि यत्नतः॥ स्कंधदर्शनमात्रात्तु विष्ठुर्वा समीपतः॥ संहतान् यो
धयेदल्पान् कामं विस्तारयेद्बहून्॥ सूचीमुखमनीकं स्यादल्पानां बहुभिः सह॥ संप्रयुद्धे निकृष्टे च सत्ये वा य
दि वानृतं॥ प्रगृह्य बाहून् क्रोशेत भग्ना भग्नाः परा इति॥ आगतं नो मित्रबलं प्रहरध्वमभीतवत्॥ शब्द
वंतोऽभिधावेयुः कुर्वंतो भैरवारवं॥ क्ष्वेडाः किलकिलाशब्दाः क्रकचा गोविषाणिकाः॥ भेरीमृदंगपण
वान्नादयेयुश्च कुंजरान्॥ ॥इति शांतौ राजधर्मे सेनानीतिः॥ ॥युधिष्ठिर उवाच॥ ॥किंशीलाः किंसमाचाराः
कथंरूपाश्च भारत॥ किंसंनाहाः कथंशस्त्रा जनाः स्युः संयुगे नृप॥ ॥भीष्म उवाच॥ ॥यथाचरितमेवात्र शस्त्र
पत्रं विधीयते॥ आचाराच्चैव पुरुषस्तथा कर्मसु वर्तते॥ गांधाराः सिंधुसौवीरा नखरप्रासयोधिनः॥ तथा
यवनकांबोजा मथुरामभितश्च ये॥ एते नियुद्धकुशला दाक्षिणात्यासिपाणयः॥ सर्वत्र शूरा जायंते महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्वामहाबलाः॥ एषएवसमुद्दिष्टालक्षणानितुमेशृणु॥ सिंहशार्दूलवर्णाक्षाःसिंहशार्दूलगामिनः॥ पारावतकु
 लिंगाक्षाःसर्वेशूराःप्रमाथिनः॥ मृगस्वना॥ द्वीपिनेत्रा ऋषभाक्षामनस्विनः॥ प्रमादिनश्चमंदाक्षाःक्रोधनाःकिंकि
णीस्वनाः॥ मेघस्वनाःक्रोधमुखाःकेचित्करभसन्निभाः॥ जिह्मनासाग्रजिह्वाश्चदूरगादूरपातिनः॥ बिडालकु
ब्जास्तनवस्तनुकेशास्तनुत्वचः॥ शीघ्राश्चपलवृत्ताश्चभवंतिचदुरासदाः॥ गोधानिमीलिताःकेचिन्मृदुप्रकृतय
स्तथा॥ तुरंगगतिनिर्घोषास्तेनराःपारयिष्णवः॥ सुसंहताःप्रतनवोव्यूढोरस्काःसुसंस्थिताः॥ प्रवादितेषुक्रुध्यं
ति हृष्यंतिकलहेषुच॥ गंभीराक्षानिःसृताक्षाःपिंगलाभ्रुकुटीमुखाः॥ नकुलाक्षास्तथाचैवसर्वेशूरास्तनु
त्यजः॥ जिह्माक्षाःप्रललाटाश्चनिर्मांसहनवोपिच॥ वक्रबाह्वंगुलीसंघाःकृशाधमनिसंतताः॥ प्रविशंतीच
वेगेनसंपरायेह्युपस्थिते॥ वारणाइवसंमत्तास्तेभवंतिदुरासदाः॥ प्रदीप्तस्फुटकेशांताःस्थूलपार्श्वहनूमुखाः
उन्नतांसाःपृथुग्रीवाःविकटाःस्थूलपिंडिकाः॥ उद्वृत्ताइवसुग्रीवाविनताविहगाइव॥ पिंडशीर्षाविवक्त्राश्च
वृषदंशमुखास्तथा॥ उग्रस्वनामन्युमंतोयुद्धेष्वारावसारिणः॥ अधर्मज्ञावलिप्ताश्चघोरारौद्रप्रदर्शिनः॥ त्य
क्तात्मानःसर्वएतेकुलत्यागितवर्तिनः॥ पुरस्कार्याःसदासैन्येहन्यतेघ्नंतिचापिते॥ अधार्मिकाभिन्नवृत्ताःसां
त्वेनैषांपराभवः॥ एवमेवप्रकुप्यंतिराज्ञोप्येतेह्यभीक्ष्णशः॥ ॥राजधर्मेविजिगीषमाणवृत्ते॥ ॥

युधिष्ठिरउवाच॥ ॥जैत्र्याःकानिरूपाणिभवंतिभरतर्षभ॥ पृतनायाःप्रशस्तानितानिहेच्छामिवेदितुं॥ ॥भीष्मउवा
च॥ ॥जैत्र्यायानिरूपाणिभवंतिभरतर्षभ॥ पृतनायाःप्रशस्तानितानिवक्ष्यामिसर्वशः॥ दैवंपूर्वंप्रकुपितेमानुषेका
लचोदितं॥ तद्विद्वांसोनुपश्यंतिज्ञानदीर्घेणचक्षुषा॥ प्रायश्चित्तविधिंचात्रजपहोमेनतद्विदः॥ मंगलानिचकुर्वंतिशम
यंत्यशुभानिच॥ उदीर्णमनसोयोधावाहनानिचभारत॥ यस्यांभवंतिसेनायांध्रुवंतस्याःपरोजयः॥ अन्वेतान्वायवो
वांतितथैवेंद्रधनूंषिच॥ अनुप्लवंतिमेघाश्चतथादित्यस्यरश्मयः॥ गोमायवश्चानुकूलावलाहकाश्चसर्वशः॥
आचरेयुर्महासेनांतस्यासिद्धिरनुत्तमा॥ प्रसन्नभाःपावकऊर्ध्वरश्मिःप्रदक्षिणावर्तशिखोविधूमः॥ पुण्यागंधा
श्चाहुतीनांप्रवांतिजयस्यैतद्भाविनोरूपमाहुः॥ इष्टाम्नगाःपृष्ठतोवामतश्चसंप्रस्थितानांचगमिष्यतांच॥ जिघां
सतांदक्षिणाःसिद्धिमाहुर्येत्वग्रतस्तेविनिषेधयंति॥ मांगल्यशब्दाःशकुनावदंतिहंसाःक्रौंचाःशतपत्राश्चभासाः
॥हृष्टाःपेयाःप्रस्थितास्वन्ववैतोजयस्यैतद्भाविनोरूपमाहुः॥ शस्त्रैःपत्रैःकवचैःकेतुभिश्चसुभानुभिर्मुखवर्णैश्च
मत्ताः॥ भ्राजिष्मतीदुष्प्रतीक्ष्यापियायेषांचमूस्तेविजयंतिशत्रून्॥ शुश्रूषवश्चानभिमानिनश्चपरस्परंसौहृ
दमास्थिताश्च॥ येषांयोधाःशौचमनुष्ठिताश्चजयस्यैतद्भाविनोरूपमाहुः॥ शब्दाःस्पर्शास्तथागंधाविचरंति
मनःप्रियाः॥ धैर्यंचविशतेयोधान्विजयमुखंहितत्॥ इष्टोवामःप्रविष्टस्यदक्षिणःप्रविविक्षितः॥ पश्चात्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साधयेत्तेन पुरस्तात्प्रतिषेधति ॥ संवृत्य महतीं सेनां चतुरंगां युधिष्ठिर ॥ साम्नैव वर्तितं पूर्वं प्रयतेथास्ततो युधि ॥
जघन्य एष विजयो यद्युद्धं नाम भारत ॥ याहृच्छिको युधि जयो दैवो चेति विचारणं ॥ अपामिव महावेगास्त्रस्ता
मृगगणा इव ॥ दुर्निवार्यतमा चैव प्रभग्ना महती चमूः ॥ भग्ना इत्येव भज्यंते विद्वांसोपि न कारणं ॥ उदारसा
रा महती रूरु संघोपमा चमूः ॥ परस्परज्ञाः संहृष्टास्त्यक्तप्राणाः सुनिश्चिताः ॥ अपि पंचाशतं शूरा निघ्नंति प
रवाहिनीं ॥ अथवा पंच षट् सप्त संहताः कृतनिश्चयाः ॥ कुलीनाः पूजिताः सम्यग्विजयंतीह शात्रवान् ॥ संनिपातो
न मंतव्यः शक्ये सति कथंचन ॥ सांत्वभेदप्रदानानां युद्धमुत्तरमुच्यते ॥ संसर्पणाद्धि सेनाया भयं भीरून्प्रबाधते ॥
वज्रादिव प्रज्वलितादियं क्वनु पतिष्यति ॥ अभिप्रयातां समितिं ज्ञात्वा ये प्रतियंत्यथ ॥ तेषां स्पंदंति गात्राणि यो
धानां विजयस्य च ॥ विषयो व्यथते राजन्सर्वः सस्थाणुजंगमः ॥ अस्त्रप्रतापतप्तानां मज्जा सीदंति देहिनां ॥
तेषां सांत्वं क्रूरमिश्रं प्रणेतव्यं पुनः पुनः ॥ संपीड्यमाना हि परे योगमायांति सर्वतः ॥ आंतराणां च भेदार्थं चरान
भ्यवचारयेत् ॥ यश्च तस्मात्परो राजा तेन संधिः प्रशस्यते ॥ नहि तस्यान्यथा पीडा शक्या कर्तुं तथाविधा ॥ यथा
साद्दं अभिमित्रेण सर्वतः प्रतिबाधिनं ॥ क्षमा वै साधुमायाति न ह्यसाधून्क्षमा सदा ॥ क्षमायाश्चाक्षमायाश्च विद्धि
पार्थ प्रयोजनं ॥ विजित्य क्षममाणस्य यशो राज्ये विवर्द्धते ॥ महापराधे ह्यप्यस्मिन्विश्वसंत्यपि शत्रवः ॥ मन्यंते ११६

कर्षयित्वा तु क्षमा साध्वीति शंबरः ॥ असमंतं तु यद्दारु प्रत्येति प्रकृतिं पुनः ॥ नैतत्प्रशंसंत्याचार्या न च साधुनिदर्श
नं ॥ अक्रोधेनाविनाशेन नियंतव्याः स्वपुत्रवत् ॥ द्वेष्यो भवति भूतानामुग्रो राजा युधिष्ठिर ॥ मृदुमप्यवमन्यंते
तस्मादुभयभाग्भवेत् ॥ प्रहरिष्यन्प्रियं ब्रूयात्प्रहरन्नपि भारत ॥ प्रहृत्य च कृपायीत शोचन्निव रुदन्निव ॥ न
मे प्रियं यन्निहताः संग्रामे वं पुनः पुनः ॥ न चैते स्वं न मे वाक्यं मुच्यमानं श्रुतं पुनः ॥ अहो जीवितमाकांक्षन्नेदृशो व
धमर्हति ॥ सुदुर्लभाः सुपुरुषाः संग्रामेष्वपलायिनः ॥ कृतं ममाप्रियं तेन येनायं निहतो मृधे ॥ इति वाचा वदन्
हंतॄन्पूजयेत रहोगतः ॥ हंतॄणां चाहतानां च यत्कुर्युरपराधिनः ॥ क्रोशेद्बाहुं प्रगृह्यापि चिकीर्षञ्जनसंग्रहं ॥ ए
वं सर्वास्ववस्थासु सांत्वपूर्वं समाचरेत् ॥ प्रियो भवति भूतानां धर्मज्ञो वीतभीर्नृपः ॥ विश्वासं चात्र गच्छंति सर्वभू
तानि भारत ॥ विश्वस्तः शक्यते भोक्तुं यथाकाममुपस्थितः ॥ तस्माद्विस्रायेद्राजा सर्वभूतान्यमायया ॥ सर्वतः
परिरक्षेत यो महीं भोक्तुमिच्छति ॥ ॥ इति शांतौ राजधर्मे सेनानीतिः ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं मृदौ कथं
तीक्ष्णे महापक्षे च पार्थिव ॥ आदौ वर्तेत नृपतिस्तन्मे ब्रूहि पितामह ॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाहरंती
ममितिहासं पुरातनं ॥ बृहस्पतेश्च संवादमिंद्रस्य च युधिष्ठिर ॥ बृहस्पतिं देवपतिरभिवाद्य कृतांजलिः ॥ उ
पसंगम्य पप्रच्छ वासवः परवीरहा ॥ अहितेषु कथं ब्रह्मन्प्रवर्तेयमतंद्रितः ॥ असमुच्छिद्य चैवैतान्नियच्छेय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म॰ मुपायतः॥सैन यो: प्रतिसंगेन जयः स्याधारणो भवेत्॥ किं कुर्वाणो न भ्रंशयाज्ज्वलितां श्रीः प्रतापिनी॥ ततो धर्मा
र्थकामानां कुशलः प्रतिभानवान्॥ राजधर्मविधानज्ञः प्रत्युवाच पुरंदरं॥ ॥बृहस्पतिरुवाच॥ ॥न जातु का
११८ लहेन क्षेप्तुमिच्छेत्तु मपकारिणः॥ बालसंसेवितं ह्येतद्यदमर्षो यदक्षमा॥ न शत्रुर्विवृतः कार्यो वधमस्या
भिकांक्षता॥ क्रोधं भयं च हर्षं च नियम्य स्वयमात्मनि॥ अमित्रमुपसेवेत विश्वस्तवद्विश्वसन्॥ प्रियमे
व वदेन्नित्यं नाप्रियं किंचिदाचरेत्॥ विरमेच्छुष्कवैरेषु कंठायामं च वर्जयेत्॥ यथा वैतंशिको युक्तो द्विजा
नां सदृशात्मनः॥ तान्द्विजान्कुरुते वश्यांस्तथा युक्तो महीपतिः॥ वशं चोपनयेच्छत्रून्निहन्याच्च पुरंदर॥
न नित्यं परिभूयारीन्सुखं स्वपिति वासव॥ जागर्त्येव हि दुष्टात्मा संकरेऽग्निरिवोत्थितः॥ असंनिपातः क
र्तव्यः सामान्ये विजये सति॥ विश्वास्यैवोपसन्नार्थो वशे कृत्वा रिपुः प्रभो॥ संप्रधार्य सहामात्यैर्मंत्रवि
द्भिर्महात्मभिः॥ उपेक्षमाणो वज्ञातो हृदयेनापराजितः॥ अथास्य प्रहरेत्काले किंचिद्विचलिते पदे॥
दंडं च दूषयेदस्य पुरुषैराप्तकारिभिः॥ आदिमध्यावसानज्ञः प्रच्छन्नं च विधारयेत्॥ बलानि दूषयेदस्य
जानन्नेव प्रमाणतः॥ भेदेनोपप्रदानेन संसृजन्नौषधैस्तथा॥ न त्वेवं खलु संसर्गं रोचयेदरिभिः सह॥ ११८

दीर्घकालमपीक्षेत निहन्यादेव शात्रवान्॥ कालकांक्षी हि सपयेद्यथा विस्रंभमाप्नुयुः॥ न सद्योरीन्विहन्याच्च द्रष्टव्यो
विजयो ध्रुवः॥ न शल्यं वा घट्टयति न वाचा कुरुते व्रणं॥ प्राप्ते च प्रहरेत्काले न च संवर्तते पुनः॥ हंतुकामस्य देवेंद्र पुरुषं च
रिपुं प्रभो॥ यं हि कालो व्यतिक्रामेत्पुरुषं कालकांक्षिणं॥ दुर्लभः स पुनस्तेन कालः कर्मचिकीर्षुणा॥ तेजश्च विजयं नि
त्यं संग्रहं साधुसंमतं॥ अकाले साधयेन्मित्रं न च प्राप्ते प्रपीडयेत्॥ विहाय कामं क्रोधं च तथाहंकारमेव च॥ युक्तो विव
रमन्विच्छेदहितानां पुनः पुनः॥ मार्दवं दंडमालस्यं प्रमादश्च सुरोत्तम॥ माया सुविहिता शक्र सादयत्य विचक्षणं॥ नि
हत्यैतानि चत्वारि मायां प्रतिविहत्य च॥ ततः शक्नोति शत्रूणां प्रहर्तुमविचारयत्॥ यदेवैकेन शक्येत गुह्यं कर्तुं तदाच
रेत्॥ यच्छंति सचिवा गुह्यं मिथो विश्रावयंत्यपि॥ अशक्यमिति कृत्वा वा ततोन्यैः संविदं चरेत्॥ ब्रह्मदंडमदृष्टेषु दृष्टे
षु चतुरंगिणीं॥ भेदं च प्रथमं युंज्यात्तूष्णीं दंडं तथैव च॥ काले प्रयोजयेद्राजा तस्मिंस्तस्मिंस्तदा तदा॥ प्रणिपातं च
गच्छेत काले शत्रोर्बलीयसः॥ युक्तोस्य वधमन्विच्छेदप्रमत्तः प्रमाद्यतः॥ प्रणिपातेन दानेन वाचा मधुरया ब्रुवन्॥
अमित्रमपि सेवेत न च जातु विशंकयेत्॥ स्थानानि शंकितानां च नित्यमेव विसर्जयेत्॥ न चैतेष्वाश्वसेद्द्रोग्धा जाग्र
तीह निराकृता॥ न ह्यतो दुष्करं कर्म किंचिदस्ति सुरोत्तम॥ यथा विविधवृत्तानामैश्वर्यमपनाधिप॥ तथा विविधशी
लानामपि संभव उच्यते॥ यतते योगमास्थाय मित्रामित्रं निवारयेत्॥ मृदुमप्यवमन्यंते तीक्ष्णादुद्विजते जनः॥ मातो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म.
११८

क्ष्णो मा मृदुर्भूस्त्वा तीक्ष्णो भव मृदुर्भव ।। यथा वप्रे भवति सर्वतः संप्लुतोदके ।। नित्यं विवरणाद्बाधस्तथा राज्यं प्रमा
द्यतः ।। न बहूनभियुंजीत यौगपद्येन शात्रवान् ।। साम्ना दानेन भेदेन दंडेन च पुरंदर ।। एकैकमेषां निष्पिष्य शिष्टेषु
निपुणं चरेत् ।। न तु शक्तो ऽपि मेधावी सर्वानेवारभेन्नृपः ।। यदा स्यान्महती सेना हयनागरथाकुला ।। पदातियंत्रबहु
ला ऽनुरक्ता षडंगिणी ।। यदा बहुविधां वृद्धिं मन्येत प्रतिलोमतः ।। तदा विवृत्य प्रहरेद्दस्यूनानुविचारयेत् ।। न सा
मदंडो ऽपनिषत्प्रशस्यते न मार्दवं शत्रुषु यात्रिकं सदा ।। न सस्यघातो न च संकरक्रिया न चापि भूयः प्रकृतेर्विचार
णा ।। मया विशेषानुपसर्जनानि तथैव पापं न यशः प्रयोगात् ।। आप्तैर्मित्रेरूपचारयेत पुरेषु राष्ट्रेषु च संप्र
युक्तान् ।। पुरापि चैषामनुसृत्य भूमिपाः पुरेषु भोगान्निखिलाञ्जयंति हि ।। पुरेषु नीतिं विहितां यथाविधि प्रयोजयं
तो बलवृत्रसूदन ।। प्रदाय गूढानि वसूनि नाम प्रच्छिद्य भोगानवधाय च स्वान् ।। दुष्टाः स्वदोषैरिति कीर्तयि
त्वा पुरेषु राष्ट्रेषु च योजयंति ।। तथैव चान्यैरपि शास्त्रवेदिभिः स्वलंकृतैः शास्त्रविधानदृष्टिभिः ।। सुशिक्षितैर्भा
ष्यकथाविशारदैः परेषु कृत्यानुपधारयेच्च ।। ।। इंद्र उवाच ।। कानि लिंगानि दुष्टस्य भवंति द्विजसत्तम ।। कथं दु
ष्टं विजानीयामेतत्पृष्टो ब्रवीहि मे ।। ।। बृहस्पतिरुवाच ।। परोक्षमगुणानाह सद्गुणानभ्यसूयते ।। परैर्वा कीर्त्य
मानेषु तूष्णीमास्ते पराङ्मुखः ।। तूष्णींभावेपि विज्ञेयं न चेद्भवति कारणं ।। निश्वासमोष्ठसंदंशं शिरसश्च प्रक ११८

पनं ।। करोत्यभीक्ष्णं संसृष्टमसंसृष्टश्च भाषते ।। अदृष्टितो ऽपि न कुरुते दृष्टो नैवाभिभाषते ।। पृथगेत्य समश्नाति
नेदमद्य यथाविधि ।। आसने शयने याने भावा लक्ष्या विशेषतः ।। आर्तिरार्ते प्रिये प्रीतिरेतावन्मित्रलक्षणं ।। विपरी
तं तु बोद्धव्यमरिलक्षणमेव तत् ।। एतान्येव यथोक्तानि बुध्येथास्त्रिदशाधिप ।। पुरुषाणां प्रदुष्टानां स्वभावो बल
वत्तरः ।। इति दुष्टस्य विज्ञानमुक्तं ते सुरसत्तम ।। निशाम्य शास्त्रतत्वार्थं यथावदमरेश्वर ।। ।। भीष्म उवाच ।। ।। स
तद्वचः शत्रुनिबर्हणे रतस्तथा चकारावितथं बृहस्पतेः ।। चचार काले विजयाय चारिहा वशं च शत्रूननयत्पुरंदरः
।। ।। इति शांतौ राजधर्मे बृहस्पतिसंवादः ।। ।। युधिष्ठिर उवाच ।। धार्मिकोर्थानसंप्राप्य राजामात्यैः प्रबाधितः ।। च्यु
तः कोशाच्च दंडाच्च सुखमिच्छन्कथं चरेत् ।। ।। भीष्म उवाच ।। ।। अत्रायं क्षेमदर्शीयमितिहासो ऽनुगीयते ।। तत्ते ऽहं सं
प्रवक्ष्यामि तन्निबोध युधिष्ठिर ।। क्षेमदर्शीं नृपसुतो यत्र क्षीणबलः पुरा ।। मुनिं कालकवृक्षीयमाजगामेति नः श्रु
तं ।। तं पप्रच्छोपसंगृह्य कृच्छ्रामापदमास्थितः ।। ।। राजोवाच ।। ।। अर्थेषु भागी पुरुष ईहमानः पुनः पुनः ।। अलब्ध्वा
मद्विधो राज्यं ब्रह्मन्किं कर्तुमर्हति ।। अन्यत्र मरणात्स्तैन्यादन्यत्र परसंश्रयात् ।। क्षुद्रादन्यच्च वा वा तन्मम मा
चक्ष्व सत्तम ।। व्याधिना चापि पन्नस्य मानसेनेतरेण वा ।। बहुश्रुतः कृतात्मा च त्वद्विधः शरणं भवेत् ।। निर्विद्यति न
रः काममिर्विद्य सुखमेधते ।। सत्यक्त्वा प्रीतिशोकौ च लब्ध्वा बुद्धिमयं वसु ।। सुखमर्थाश्रयं येषामनुशोचामि तान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म

११९

हं॥ मम त्वर्थासु बहवो नष्टाः स्वम इवागताः॥ दुष्करं तत्प्रकुर्वंति महतोर्थांस्त्यजंति ये॥ वयं त्वेतान्परित्यक्तुमसंतोपि
न शक्नुम॥ इमामवस्थां संप्राप्तं दीनमार्त्तं श्रिया च्युतं॥ यदन्यत्सुखमस्तीह तद्ब्रूहि त्वमनुशाधि मां॥ कौशल्ये
नैव मुक्तस्तु राजपुत्रेण धीमता॥ मुनिः कालकवृक्षीयः प्रत्युवाच महाद्युतिः॥ ॥मुनिरुवाच॥ ॥पुरस्तादेव ते बु
द्धिरियं कार्या विजानता॥ अनित्यं सर्वमेवैतन्मदहं च ममास्ति यत्॥ यत्किंचिन्मन्यसेस्तीति सर्वं तन्नास्ति
ति विद्धि तत्॥ एवं न व्यथते प्राज्ञः कृच्छ्रामप्यापदं गतः॥ यद्धि भूतं भविष्यच्च सर्वं तन्न भविष्यति॥ एवं विदितवेद्य
स्त्वमधर्मेभ्यः प्रमोक्ष्यसे॥ यच्च पूर्वे समाहारे यच्च पूर्वे परे परे॥ सर्वं तन्नास्ति ते चैव तत्तु ज्ञात्वा कोनु संज्वरेत्॥
भूत्वा च न भवत्येतदभूत्वा च भवत्यपि॥ शोके न ह्यस्ति सामर्थ्यं शोकं कुर्यात्कथं न न॥ क्व नु तेद्य पिता राजन्
क्व नु तेद्य पितामहाः॥ न त्वं पश्यसि तानद्य त्वां पश्यंति ते पि च॥ आत्मनो ध्रुवतां पश्य तांस्त्वं किमनुशोचसि॥
बुद्ध्या चैवानुबुध्यस्व ध्रुवं हि न भविष्यसि॥ अहं च त्वं च नृपते शत्रवः सुहृदश्च ते॥ अवश्यं न भविष्यामः सर्वं च
न भविष्यति॥ ये तु विंशतिवर्षा वै त्रिंशद्वर्षाश्च मानवाः॥ अर्वागेव हि ते सर्वे मरिष्यंति शरच्छतात्॥ अपि चेन्म
हतो वित्तान्न प्रमुच्येत पूरुषः॥ नैतन्ममेति तन्मत्वा कुर्वीत प्रियमात्मनः॥ अनागतं यन्न ममेति विद्यादतिक्रांतं
यन्न ममेति विद्यात्॥ दिष्टं बलीय इति मन्यमानास्ते पंडितास्तत्सतां स्थानमाहुः॥ अनाढ्याश्चापि जीवंति राज्यं चाप्य ११९

नुशासति॥ बुद्धिपौरुषसंपन्नास्त्वया तुल्याधिका जनाः॥ न च त्वमिव शोचंति तस्मात्त्वमपि मा शुचः॥ किं
नु त्वं वै नतैः श्रेयांस्तुल्यो वा बुद्धिपौरुषैः॥ ॥राजोवाच॥ ॥यादृच्छिकं ममासीत्तद्राज्यमन्ये वर्तितय॥ क्रियते
सर्वमेवेदं कालेन महता द्विज॥ तस्यैवं ह्रियमाणस्य स्रोतसेव तपोधन॥ फलमेतत्प्रपश्यामि यथालब्धेन वर्त्त
यन्॥ ॥मुनिरुवाच॥ ॥अनागतमतीतं च यथातथ्यं विनिश्चयात्॥ नानुशोचेत कौशल्य सर्वार्थेषु तथा भव॥ अवा
प्यान्कामयन्नर्थान्नानवाप्यान्कथंचन॥ प्रत्युत्पन्ननननुभवन्मा शुचस्त्वमनागतान्॥ यथालब्धोपपन्नार्थैस्त
था कौशल्य रंस्यसे॥ कच्चिच्छुद्धस्वभावेन श्रिया हीनो न शोचसि॥ पुनस्ताद्धीनभाग्यत्वाद्धीनभाग्यो हि दुर्मतिः॥
धातारं गर्हते नित्यं लब्धार्थांश्च न मृष्यते॥ अनर्हानपि चैवान्यान्मन्यते श्रीमतो जनान्॥ एकस्मात्कारणादेतद्दुः
खं भूयोनुवर्तते॥ ईर्ष्याभिमानसंपन्ना राजन्पुरुषमानिनः॥ कच्चित्त्वं न तथा राजन्मत्सरी कौशलाधिप॥ सहस्व श्रि
यमन्येषां यद्यपि त्वयि नास्ति सा॥ अन्यत्राप्यसती लक्ष्मीः कुशला भुंजते सदा॥ अभिनिष्पद्यते श्रीर्हि सत्यपि द्विष
तो जने॥ श्रियं च पुत्रपौत्रं च मनुष्या धर्मचारिणः॥ योगधर्मविदो धीराः स्वयमेव त्यजंत्युत॥ बहुशः संकुकं दृष्ट्वा वि
धित्सासाधनेन च॥ तथान्ये संत्यजंत्येवं मत्वा परमदुर्लभं॥ त्वं पुनः प्राज्ञरूपः सन्कृपणं परितप्यसे॥ अकाम्यान्काम
यन्नर्थान्पराधीनाननुपद्रवान्॥ तां बुद्धिमुपजिज्ञासुस्त्वमेवैनान्परित्यज॥ अनर्थांश्चार्थरूपेण अर्थांश्चानर्थरूपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाः॥ अथ यदि वहि केषांचिद्धननाशो भवेत्स्तुत ॥ अनत्यं तं सुखं मत्वा श्रिय मन्यः परास्मति ॥ न सम्यापाः श्रिया कश्चिन्न
न्य द्वेयो भिमन्यते ॥ तथा कस्येह मानस्य समारंभो विनश्यति ॥ कृच्छ्राल्लब्धमभिप्रेतं यदि कौशल्य न स्यति ॥ बुद्धा
निर्विद्यते सोर्थात्सत्रिभग्नक्रमो नरः ॥ धर्ममेके भिपद्यंते कल्याणाभिजनावनाः ॥ परत्र सुखमिच्छंतो निर्विद्ये
युश्चलौकिकात् ॥ जीवितं संत्यजंत्येके धनलोभपरा नराः ॥ न जीवितार्थं मन्यंते पुरुषा हि धनादृते ॥ पश्य तेषां कृपणा
तां पश्यन्तेषामबुद्धितां ॥ अध्रुवे जीविते मोहादर्थदृष्ट्यामपाश्रिताः ॥ संचये न विनाशांते विनाशांते च जीविते ॥ सं
योगे च वियोगांते कोनु विप्रणयेन्मनः ॥ धनं वा पुरुषो राजन्पुरुषं वा पुनर्धनं ॥ अवश्यं प्रजहात्येतद्विद्वान्कोनु सं
ज्वरेत् ॥ अन्येषामपि नश्यंति सुहृदश्च धनानि च ॥ पश्य बुध्या मनुष्याणां राजन्नापदमात्मनः ॥ नियच्छ य
च्छ संयच्छ इंद्रियाणि मनो गिरं ॥ प्रतिषेधान्न चाप्येषु दुर्बलेषु हितेषु च ॥ प्राप्तिस्वष्टिपुभावेषु व्यपकृष्टेषु
संभवे ॥ प्रज्ञानतृप्तो विक्रांतस्त्वद्विधो नानुशोचति ॥ अल्पमिच्छन्न चपलो मृदुर्दांतः सुसंयतः ॥ ब्रह्मचर्योपप
न्नश्च त्वद्विधो नानुशोचति ॥ न त्वेवात्मा कापाली वृत्तिमेषितुमर्हसि ॥ नृशंसवृत्तिं पापिष्ठां दुःखां कापुरुषो
चितां ॥ अपि मूलफलाजीवो रमस्वैको महावने ॥ वाग्यतः संगृहीतात्मा सर्वभूतदयान्वितः ॥ सदृशं पंडितस्यै
तदीशादंतेन दंतिनां ॥ य एको रमते रण्ये पश्यान्यल्पेन तुष्यति ॥ महाह्रदः संक्षुभितआत्मनैव प्रसीदति ॥ १२०

एतदेवं गतस्याहं सुखं पश्यामि केवलं ॥ असंभवे श्रियो राजन्हीनस्य सचिवादिभिः ॥ दैवे प्रतिनिविष्टे च किं श्रेयोम
न्यते भवान् ॥ ॥ शांतौ राजधर्मे कालवृक्षीये ॥ ॥मुनिरुवाच॥ ॥अथ चेत्पौरुषं किंचित्क्षत्रियस्य निपश्यसि ॥ ब्र
मि वीमि हिं ततो नीतिं राज्यस्य प्रतिपत्तये ॥ तां चेत्समक्ष्यस्य नुष्ठातुं कर्म चैव करिष्यति ॥ शृणु सर्वमशेषेण यत्त्वं वक्ष्यामि
तत्त्वतः ॥ आचरिष्यसि चेत्कर्म महतोर्थानवाप्स्यसि ॥ राज्यं राज्यस्य मंत्रं वा महतीं वा पुनः श्रियं ॥ यद्येतद्रोचते राज
न्पुनर्ब्रूहि ब्रवीमि ते ॥ ॥राजोवाच॥ ॥ ब्रवीतु भगवान्नीतिमुपपन्नोस्म्यहं प्रभो ॥ अमोघमिदमद्यास्तु त्वया सह समा
गत ॥ ॥मुनिरुवाच॥ ॥हित्वा स्तंभं च मानं च क्रोधं हर्षभयं तथा ॥ अप्यमित्रं निषेवस्व प्रणिपत्य कृतांजलिः ॥ तमु
त्तमेन शौचेन कर्मणा चाभिधारय ॥ दातुमर्हति ते वित्तं वैदेहः सत्यसंगरः ॥ प्रमाणं सर्वभूतेषु प्रग्रहं च गमिष्य
सि ॥ ततः सहायंशोभनानलप्स्यसे व्यसनात्शुचीन् ॥ वर्तमानः स्वशास्त्रे वै संयतात्मा जितेंद्रियः ॥ अभ्युद्ध
रति चात्मानं प्रसादयति च प्रजाः ॥ तेनैव त्वं धृतिमता श्रीमता चाभिसत्कृतः ॥ प्रमाणं सर्वभूतेषु गत्वा प्रग्रहणं महत्
॥ ततः सुहृद्बलं लब्ध्वा मंत्रयित्वा सुमंत्रिभिः ॥ आंतरैर्भेदयित्वारीन्बिल्वं बिल्वेन शातय ॥ परैर्वा संविदं कृत्वा बलम
प्यस्य घातय ॥ अलभ्या ये शुभा भावाः स्त्रियश्चाच्छादनानि च ॥ शय्यासनानि महार्हाणि वाहनानि च ॥ पक्षिणो मृगा
जातानि रसान्गंधाः फलानि च ॥ तेष्वेवं सज्जयेथास्त्वं यथा नश्येत्स्वयं परः ॥ न जातु विवृतः कार्यः शत्रुः सुनयमिच्छता ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म
१२१

पनस्तपरमामिते विषयैः शास्त्रसंमतः ॥ मनस्वी श्रेत तीये मित्राधममनर्थकैः ॥ आरंभान्नस्य महतो दुस्तरांस्तं प्रयो
जय ॥ नदीवज्रविरोधांश्च बलवद्भिर्विरोधितो ॥ उद्यानानि महार्हाणि शयनान्यासनानि च ॥ प्रतिभोगसुखेनैव को
शमस्य विनोदय ॥ यत्तदाने प्रसाध्येस्मिंश्च ब्राह्मणानन्तुवर्ण्यतान् ॥ तैप्रतिकरिष्यंतिते भोक्ष्यंति हकाइव ॥ असंशयं
पुण्यशीलः प्राप्नोति परमां गतिं ॥ त्रिविष्टपे पुण्यतमं स्थानं प्राप्नोति मानवः ॥ कोशक्षये त्वमित्राणां वशं कौशल्य तो
मृच्छति ॥ उभयत्र प्रसक्तस्य धर्मे चाधर्म एव च ॥ फलार्थमूलं व्युच्छिद्येत तेन वंदंति शात्रवः ॥ निंदवैमानुषं कर्म दैव
मस्योपवर्णय ॥ असंशयं दैवपरः क्षिप्रमेव परस्यति ॥ याजयेनं विश्वजिता सर्वस्वेन पुनस्त्वं ॥ ततो गाच्छसि सिद्धार्थः
पीड्यमाने महाजनं ॥ योगधर्मविदो पुण्यं कश्चिदस्योपवर्णय ॥ अपित्यागे बुभूषेत कश्चित्कृच्छ्रदनामयं ॥ सि
द्धेनौषधयोगेन सर्वशत्रुविनाशिना ॥ नागानश्वान्मनुष्यांश्च कृतकैरुपघातय ॥ एते चान्ये च बहवो दंभयोगाः सु
विस्तृतः ॥ शक्या विसहता कर्तुं पुरुषेण बुभूषता ॥ ॥ इति श्रीशांतौ राजधर्मे कालकवृक्षीये ॥ ॥ राजोवाच ॥ ॥ न
निकृत्या न दंभेन ब्रह्मन्निच्छामि जीवितुं ॥ नाधर्मयुक्तानिच्छेयमर्थान्सुमहतोप्यहं ॥ पुरस्तादेव भगवन्मयैत
दपि वर्जितं ॥ येन मां नाभिशंकेत यन्न कृत्स्नं हितं भवेत् ॥ आनृशंस्येन धर्मेण लोके ह्यस्मिन्जिजीविषुः ॥ ना
हमेतदलं कर्तुं नैतत्त्वय्युपपद्यते ॥ ॥ मुनिरुवाच ॥ ॥ उपपन्नस्त्वमेतेन यथा क्षत्रिय भाषसे ॥ प्रकृत्या ह्युपप १२१

न्नोसि बुध्याचाद्भुतदर्शन ॥ उभयोरेव वामर्थे यतिष्ये तव तस्य च ॥ संश्लेषं वा करिष्यामि शाश्वतं त्वनपायिनं ॥ त्वादृशं हि कुले जातम
नृशंसं बहुश्रुतं ॥ अमात्यं को न कुर्वीत राज्यप्रणयकोविदं ॥ यस्त्वं प्रव्यावितो राज्याद्व्यसने चोत्तमं गतः ॥ आनृशंस्येन वृत्तेन
क्षत्रियेच्छसि जीवितुं ॥ आगंता मद्गृहं तात वैदेहः सत्यसंगरः ॥ यथाहं विनियोक्ष्यामि तत्करिष्यत्यसंशयः ॥ तत आहूय वैदेहं मु
निर्वचनमब्रवीत् ॥ अयं राजकुले जातो विदिताभ्यंतरो मम ॥ आदर्श इव शुद्धात्मा शारदश्चंद्रमा इव ॥ नास्मिन्पश्यामि वृजि
नं सर्वतो मे परीक्षितः ॥ तेन ते संधिरेवास्तु विश्वसास्मिन्यथा मयि ॥ न राज्यमनमात्येन शक्यं शास्तुममित्रहन् ॥ अमात्यः शू
र एव स्याद्बुद्धिसंपन्न एव च ॥ ताभ्यां चैवोभयं राजन्पश्य राज्यस्य योजनं ॥ धर्मात्मनां क्वचिल्लोके नान्यास्ति गतिरीदृशी ॥
महात्मा राजपुत्रोयं सतां मार्गमनुष्ठितः ॥ सुसंगृहीतस्त्वेवैष त्वया धर्मपुरोगमाः ॥ संसेव्यमानः शत्रुस्ते गृह्णीयान्म
हतो गणान् ॥ यद्ययं प्रतियुध्येत्तां स्वकर्म क्षत्रियस्य तत् ॥ जिगीषमाणस्त्वां युद्धे पितृपैतामहे पदे ॥ त्वं चापि प्रतियुध्ये
था विजिगीषुर्व्रते स्थितः ॥ अयुध्वैव नियोगान्मे वशे वैदेह ते स्थितः ॥ सत्वं धर्ममवेक्षस्व त्यक्त्वा लोभमसांप्रतं ॥ न
च कामान्न च क्रोधात्स्वधर्मं हातुमर्हसि ॥ नैव नित्यं जयस्तात नैव नित्यं पराजयः ॥ तस्माद्भोजयितव्यश्च भोक्तव्यश्च परो
जनः ॥ आत्मन्यपि च संदृश्याउभौ जयपराजयौ ॥ निःशेषकारिणां तात निःशेषकरणाद्भयं ॥ इत्युक्तः प्रत्युवाचेदं वचनं
ब्राह्मणर्षभं ॥ प्रतिपूज्याभिसत्कृत्य पूजार्हमनुमान्य च ॥ यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयाद्बहुश्रुतः ॥ श्रेयस्कामो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा ब्रूयादुभयोरेव तत्समं ॥ यतद्वचनमुक्तोस्मि करिष्यामि वचस्तथा ॥ एतद्धि परमं श्रेयो न मेत्रास्ति विचारणा ॥ ततः कौ
शल्यमागम्य वैदेहो वाक्यमब्रवीत् ॥ धर्मतो नीतितश्चैव बलेन च जितो मया ॥ अहं त्वयात्मगुणैर्जितः पार्थिवसत्त
म ॥ आत्मानमनवज्ञाय जितवद्वर्त्तितां भवान् ॥ नावमन्यामि ते बुद्धिं नावमन्ये च पौरुषं ॥ नावमन्ये जयामीति जितवद्वर्तितं
भवान् ॥ यथावत्पूजितो राजन् गृहं गन्तासि मे गृहात् ॥ ततः संपूज्य तौ विप्र विश्वस्तौ जग्मतुर्गृहान् ॥ वैदेहस्त्वथ कौशल्यं
प्रवेश्य गृहमंजसा ॥ पाद्यार्घ्यमधुपर्कैस्तं पूजार्हं प्रत्यपूजयत् ॥ ददौ दुहितरं चास्मै रत्नानि विविधानि च ॥ एष राज्ञां
परो धर्मः संध्यौ जयपराजयौ ॥ ॥ शांतौ राजधर्मे कालकवृक्षीये ॥ ॥ युधिष्ठिर उवाच ॥ ॥ ब्राह्मणक्षत्रियविशां
शूद्राणां च परंतप ॥ धर्मवृत्तिं च वृत्तिं च वृत्तिपायफलानि च ॥ राज्ञो वृत्तिं च कोशं च कोशसंजननं जयः ॥ अमा
त्यगुणवृद्धिश्च प्रकृतीनां च वर्द्धनं ॥ षड्गुणगुणकल्पश्च सेनावृत्तिस्तथैव च ॥ दुष्टस्य च परिज्ञानमदुष्टस्य
च लक्षणं ॥ समहीनाधिकानां च यथावल्लक्षणं च यत् ॥ मध्यमस्य च तुष्ट्यर्थं यथा स्थेयं विवर्द्धता ॥ क्षी
णग्रहणवृत्तिश्च यथाधर्मं प्रकीर्तिता ॥ लघुना देशरूपेण ग्रंथयोगेन भारत ॥ विजिगीषोस्तथा वृत्तमुक्तं चै
व तथैव ते ॥ गणानां वृत्तिमिच्छामि श्रोतुं मतिमतां वर ॥ यथा गणाः प्रवर्द्धंते न भिद्यंते च भारत ॥ परांश्च विजिगीषं
ते सुहृदः प्राप्नुवंति च ॥ भेदमूलो विनाशो हि गणानामुपलक्ष्यते ॥ मंत्रसंवरणं दुःखं बहूनामिति मे मतिः ॥ १२२

एतदिच्छाम्यहं श्रोतुं निखिलेन परंतप ॥ यथा चैते न भिद्येरंस्तच्च मे वद पार्थिव ॥ ॥ भीष्म उवाच ॥ ॥ गणानां च कु
लानां च राज्ञां भरतसत्तम ॥ वैरसंदीपनावेतौ लोभामर्षौ जनाधिप ॥ लोभमेको हि वृणुते ततोमर्षमनंतरं ॥
तौ क्षयव्ययसंयुक्तावन्योन्यं च विनाशिनौ ॥ चारमंत्रबलादानैः साममंत्रविभेदनैः ॥ क्षयव्ययभयोपायैः कर्षय
तीतरेतरं ॥ तत्र दानेन भिद्यंते गणाः संघातवृत्तयः ॥ भिन्ना विमनसः सर्वे गच्छंत्यरिवशं भयात् ॥ भेदाद्गणा विन
श्यंति भिन्नाः सूपजपाः परैः ॥ तस्मात्संघातयोगेन प्रयतेरन् गणाः सदा ॥ अर्थाश्चैवाधिगम्यंते संघातबलपौरु
षात् ॥ बाह्याश्च मैत्रीं कुर्वंति तेषु संघातवृत्तिषु ॥ ज्ञानवृद्धाः प्रशंसंति शुश्रूषंतः परस्परं ॥ विनिवृत्ताभिसंधानाः
सुखमेधंति सर्वशः ॥ धर्मिष्ठान्व्यवहारांश्च स्थापयंतश्च शास्त्रतः ॥ यथावत्संप्रपश्यंतो विवर्द्धंते गणोत्तमाः ॥ पुत्रा
न्भ्रातॄन्निगृह्णंतो विनयंतश्च तान्सदा ॥ विनीतांश्च प्रगृह्णंतो विवर्द्धंते गणोत्तमाः ॥ चारमंत्रविधानेषु कोशसंनि
चयेषु च ॥ नित्ययुक्ता महाबाहो वर्द्धंते सर्वतो गणाः ॥ प्राज्ञाञ्शूरान्महोत्साहान्कर्मसु स्थिरपौरुषान् ॥ मा
नयंतः सदा युक्ता विवर्द्धंते गणा नृप ॥ द्रव्यवंतश्च शूराश्च शस्त्रज्ञाः शास्त्रपारगाः ॥ कृच्छ्रास्वापत्सु संमूढा
भेदो भयं न्गणान्संतारयंति ते ॥ क्रोधो भेदो भयं दंडः कर्षणं निग्रहो वधः ॥ नयंत्यरिवशं सद्यो गणान्भरतसत्तम ॥ तस्मान्मानयि
तव्यास्ते गणमुख्याः प्रधानतः ॥ लोकयात्रा समायत्ता भूयसी तेषु पार्थिव ॥ मंत्रगुप्तिः प्रधानेषु चारश्चामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ञ्च कर्षण ॥ न गणाः कृत्स्नशो मंत्रं श्रोतुमर्हंति भारत ॥ गणमुख्यैस्तु संभूय कार्यं गणहितं मिथः ॥ पृथग्गण
स्य भिन्नस्य विततस्य ततोन्यथा ॥ अर्थाः प्रत्यवदंती तथानर्थो भवंति च ॥ तेषामन्योन्यभिन्नानां स्वशक्तिमनु
तिष्ठतां ॥ निग्रहः पंडितैः कार्यः क्षिप्रमेव प्रधानतः ॥ कुलेषु कलहा जाताः कुलवृद्धैरुपेक्षिताः ॥ गोत्रस्य राजन्कु
र्वंति गणभेदस्य कारणं ॥ आभ्यंतरं भयं रक्ष्यं सुरक्ष्यं बाह्यतो भयं ॥ आभ्यंतरं भयं राजन्सद्यो मूलानि कृं
तति ॥ अकस्मा लोभमोहाद्वा वापजाद्वास्वभावजात् ॥ अन्योन्यं नाभिभाषंते तत्पराभवलक्षणं ॥ जात्या च
सदृशाः सर्वे कुलेन सदृशास्तथा ॥ न तु शौर्येण बुध्या वा रूपद्रव्येण वा पुनः ॥ भेदाच्चैव प्रदानाच्च नाम्यंते रिपु
भिर्बलात् ॥ तस्मात्संघातमेवाहुर्नान्येषां शरणं महत् ॥ ॥ शांतौ राजधर्मे गणवृत्तं नाम ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ महानयं धर्मपथो बहुशाखश्च भारत ॥ किंस्विदेवेह धर्माणामनुष्ठेयतमं मतं ॥ किं कार्यं सर्वध
र्माणां गरीयो भवतो मतं ॥ यथाहं परमं धर्ममिह च प्रेत्य चाप्नुयां ॥ ॥ भीष्म उवाच ॥ ॥ मातापित्रोर्गुरूणां च
पूजा बहुमता मम ॥ अत्र युक्तो नरो लोकान्यशश्च महदश्नुते ॥ यच्चैतेभ्यनुजानीयुः कर्म तात सुपूजिताः ॥ ध
र्मानुधर्मविरुद्धं वा तत्कर्तव्यं युधिष्ठिर ॥ न तैरभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥ यं च तेभ्यनुजानीयुः स धर्म
इति निश्चयः ॥ एत एव त्रयो लोका एत एवाश्रमास्त्रयः ॥ एत एव त्रयो वेदा एत एव त्रयोऽग्नयः ॥ पिता वै गार्हपत्यो १२३

ग्निर्माताग्निर्दक्षिणः स्मृतः ॥ गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥ त्रिष्वप्रमाद्यन्नेतेषु त्रीँल्लोकांश्च विजे
ष्यसि ॥ पितृवृत्त्या त्विमं लोकं मातृवृत्त्या तथा परं ॥ ब्रह्मलोकं गुरोर्वृत्त्या नियमेन तरिष्यसि ॥ सम्यगेतेषु वर्तस्व
त्रिषु लोकेषु भारत ॥ यशः प्राप्स्यसि भद्रं ते धर्मं च सुमहाफलं ॥ नैतानतिशयेज्जातु नात्यश्नीयान्न दूषयेत् ॥ नि
त्यं परिचरेच्चैव तद्वै सुकृतमुत्तमं ॥ कीर्तिं पुण्यं यशो लोकान्प्राप्स्यसे राजसत्तम ॥ सर्वे तस्यादृता लोका यस्यै
ते त्रय आदृताः ॥ अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ नैवायं न परो लोकस्तस्य चैव परंतप ॥ अमा
निता नित्यमेव यस्यैते गुरवस्त्रयः ॥ न चास्मिन्न परे लोके यशस्तस्य प्रकाशते ॥ न चान्यदपि कल्याणं पर
त्र समुदाहृतं ॥ तेभ्य एव हि यत्सर्वं कृत्वा यद्विसृजाम्यहं ॥ उदासीन शतगुणं सहस्रगुणमेव च ॥ तस्मा
न्मे संप्रकाशंते त्रयो लोका युधिष्ठिर ॥ दशैव तु सदाचार्यः श्रोत्रियानतिरिच्यते ॥ दशाचार्यानुपाध्याय उपाध्या
यान्पिता दश ॥ पितॄन्दश तु माता तु सर्वां वा पृथिवीमपि ॥ गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः ॥ गुरुर्ग
रीयान्पितृतो मातृतश्चेति मे मतिः ॥ उभौ तु मातापितरौ जन्मन्येवोपयुज्यतः ॥ शरीरमेव सृजतः पिता माता
च भारत ॥ आचार्यशिष्टा या जातिः सा शिष्टा साजरामरा ॥ अवध्या हि सदा माता पिता चाप्यपकारिणौ ॥ न संदु
ष्यति तत्कृत्वा न च ते दूषयंति ते ॥ धर्माय यतमानानां विदुर्देवा महर्षिभिः ॥ यश्चावृणोत्यवितथेन कर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एणा ऋतं ब्रुवन्नमृतं संप्रयच्छत्॥ तं वै मन्ये पितरं मातरं च तस्मै न द्रुह्येत्कृतमस्य जानन्॥ विद्यां श्रुत्वा ये गुरुं नाद्रियंते
प्रत्यासन्नं मनसा कर्मणा वा॥ यथैव ते गुरुभिर्भावनीयास्तथा तेषां गुरवोप्यर्चनीयाः॥ तस्मात्पूजयितव्याश्च संविभ
ज्याश्च यत्नतः॥ गुरवोर्चयितव्याश्च पुराणं धर्ममिच्छता॥ येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः॥ प्रीणाति मातरं येन
पृथिवी तेन पूजिता॥ येन प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितं॥ मातृतः पितृतश्चैव तस्मात्पूज्यतमो गुरुः॥ ऋ
षयश्च हि देवाश्च प्रीयंते पितृभिः सह॥ पूज्यमानेषु गुरुषु तस्मात्पूज्यतमो गुरुः॥ न च केन च वृत्तेन ह्यवज्ञेयो गुरुर्भ
वेत्॥ न च माता न च पिता मन्यते यादृशो गुरुः॥ न ते च मानमर्हंति न तेषां दूषयेत्कृतं॥ गुरूणामेव सत्कारं विदुर्देवा म
हर्षिभिः॥ उपाध्यायं पितरं मातरं च ये द्रुह्यंते मनसा कर्मणा वा॥ तेषां पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पापकृदस्ति
म लोके॥ हतो वृद्धो यो विभर्ति पुत्रः स्वयोनिजः पितरं मातरं च॥ तद्वै पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पापकृद
स्ति लोके॥ मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य पिशुनस्य च॥ चतुर्णां वयमेतेषां निष्कृतिं नानुशुश्रुम॥ एतत्सर्वमनि
र्दिष्टं यत्कर्तव्यं पुरुषेणेह लोके॥ एतच्छ्रेयो नान्यदस्माद्विशिष्टं सर्वान्धर्माननुसृत्यैतदुक्तं॥ ॥शांतौ रा
जधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥कथं धर्मे स्थातुमिच्छन्नरो वर्तेत भारत॥ विद्वञ्जिज्ञासमानाय प्रब्रूहि भरत
र्षभ॥ सत्यं चैवानृतं चोभे लोकानावृत्य तिष्ठति॥ तयोः किमाचरेद्राजा पुरुषो धर्मनिश्चितः॥ किं स्वित्सत्यं किम १२४

मनुष्यनुरोधाच्च वा समरोचयत्॥ तस्य शौचममृष्यंतः सर्वे ते सह ज्ञातयः॥ चालयंति स्म तां बुद्धिं वचनैः
प्रश्रयोत्तरैः॥ वसन्पितृवने रौद्रे शौचे वर्तितुमिच्छसि॥ इयं हि प्रतिपत्तिस्ते यदा त्वं पिशिताशनः॥ तस्मा
ना भवास्माभिर्भक्ष्यं दास्यामहे वयं॥ भुंक्ष्व शौचं परित्यज्य यद्धि भक्तं तदस्तु ते॥ इति तेषां वचः श्रुत्वा प्र
त्युवाच समाहितः॥ मधुरैः प्रसृतैर्वाक्यैर्हेतुमद्भिरनुष्ठितैः॥ अप्रमाणा प्रसूतिर्मे शीलतः क्रियते कुलं
॥ प्रार्थयामि तु तत्कर्म येन विस्तीर्यते यशः॥ श्मशाने यदि वासो मे समाधिर्मे निशाम्यतां॥ आत्मा फलति
कर्माणि नाश्रमो धर्मकारणं॥ आश्रमे यो द्विजं हन्याद्गां वा दद्यादनाश्रमे॥ किन्नु तत्पातकं न स्यात्तद्वा दत्तं
वृथा भवेत्॥ भवंतः स्वार्थलोभेन केवलं भक्षणे रताः॥ अनुबंधे तु ये दोषास्तान्न पश्यंति मोहिताः॥ अप्रत्य
यकृतां गर्ह्यामर्थापनयदूषितां॥ इह चामुत्र चानिष्टां तस्माद्वृत्तिं न रोचये॥ तं शुचिं पंडितं मत्वा शार्दूलः
ख्यातिविक्रमः॥ कृत्वात्मसदृशीं पूजां साचिव्ये वरयत्स्वयं॥ ॥शार्दूल उवाच॥ ॥सौम्य विज्ञातरूपस्त्वं गच्छ
यात्रां मया सह॥ व्रियंतामीप्सिता भोगाः परिहार्याश्च पुष्कलाः॥ तीक्ष्णा वयमिहाख्याता भवंतं ज्ञापयाम
हे॥ मृदुपूर्वं हितं चैव श्रेयश्चाधिगमिष्यसि॥ अथ संपूज्य तद्वाक्यं मृगेंद्रस्य महात्मनः॥ गोमायुः प्रश्रितं वाक्यं
मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवेत्॥ अर्थस्थिरक्षणार्थाय परेषां धर्मकारणात्॥ परेषां धर्ममाकांक्षन्नीचः स्याद्धर्मभिक्षुकः॥ प्रतिश्रुत्य प्रदातव्यः स्व
कार्यस्तु बलात्कृतः॥ यः कश्चिद्धर्मसमयात्प्रच्युतो धर्मसाधनः॥ दंडेनैव स हंतव्यस्तं पथा नं समाश्रतः॥ च्युतः स्वदेव धर्मे
भ्यो ला न वं धर्ममास्थितः॥ शठः स्वधर्ममुत्सृज्य तमिच्छेदुपजीवितुं॥ सर्वोपायैर्नियंतव्यः पापो निकृतिजीविनः॥ धर्ममित्ये
व पापानां सर्वेषामिह निश्चयः॥ अविस्रब्धाद्य संभोज्या निकृत्या यतनेगताः॥ च्युता देवमनुष्येभ्यो यथा प्रेतास्तथैव
ते॥ निर्यज्ञास्तपसा हीना मास्मतैः सह संगमः॥ धननाशाद्दुःखतरं जीविताद्विप्रयोजनं॥ अयं ते रोचतां धर्म इति वा
च्यः प्रयत्नतः॥ न कश्चिदस्ति पापानां धर्म इत्येव निश्चयः॥ तथाप्तं वै यो हन्यान्नासौ पापेन लिप्यते॥ स्वकर्मणा हतं ह
तिहत एव स हन्यते॥ तेषु यः समयं कश्चित्कुर्वीत हतबुद्धिषु॥ यथा काकश्च गृध्रश्च तथैवोपधिजीविनः॥ ऊर्द्ध्वं देहवि
मोक्षांते भवंत्येतासु योनिषु॥ यस्मिन्यथा वर्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्मः॥ मायाचारो मायया बाधि
तव्यः साध्वाचारः साधुना प्रत्युपेयः॥ इति शांतौ राजधर्मे सिस्यान्तर्कं॥ ॥युधिष्ठिर उवाच॥ क्लिश्यमानेषु भूतेषु तैस्तै
र्भावैस्ततस्ततः॥ दुर्गाण्यतितरेद्येन तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥आश्रमेषु यथोक्तेषु यथोक्तं ये द्वि
जातयः॥ वर्तंते संयतात्मानो दुर्गाण्यतितरंति ते॥ ये दंभान्नाचरंति स्म येषां वृत्तिश्च संयता॥ विषयांश्च निगृह्णंति दु
र्गाण्यतितरंति ते॥ प्रत्याहुर्नोच्यमाना हि येन हिंसंति हिंसिताः॥ प्रयच्छंति न याचंते दुर्गाण्यतितरंति ते॥ वासयंत्यति १२५

थीन्नित्यं नित्यं ये चानुसूयकाः॥ नित्यं स्वाध्यायशीलाश्च दुर्गाण्यतितरंति ते॥ मातापित्रोश्च ये वृत्तिं वर्तंते धर्मकोविदाः
वर्जयंति दिवा स्वप्नं दुर्गाण्यतितरंति ते॥ ये न लोभान्नयंत्यर्थान् राजानो रजसान्विताः॥ विषयान्परिरक्षंति दुर्गाण्यति
तरंति ते॥ ये स्वदारेषु वर्तंते न्यायवृत्तिमृतावृतौ॥ अग्निहोत्रपराः संतो दुर्गाण्यतितरंति ते॥ आहवेषु च ये शूराः त्यक्त्वा
मरणजं भयं॥ धर्मेण जयमिच्छंति दुर्गाण्यतितरंति ते॥ ये पापानि न कुर्वंति कर्मणा मनसा गिरा॥ निक्षिप्तदंडा भूते
षु दुर्गाण्यतितरंति ते॥ ये वदंतीह सत्यानि प्राणात्ययेऽप्युपस्थिते॥ प्रमाणभूता भूतानां दुर्गाण्यतितरंति ते॥ कर्मा
ॐ ण्यहेतुकानि ये षां वाचश्च सूनृताः॥ एषामर्थाश्च सन्नीर्था दुर्गाण्यतितरंति ते॥ अनध्यायेषु ये विप्राः स्वाध्यायं नेह कुर्वते॥
तपोनित्याः सुतपसो दुर्गाण्यतितरंति ते॥ ये तपश्च तपस्यंति कौमारब्रह्मचारिणः॥ विद्यावेदव्रतस्नाता दुर्गाण्यतितरंति रं
ते॥ ये च संशांतरजसः संशांततमसश्च ये॥ सत्त्वे स्थिता महात्मानो दु०॥ येषां न कश्चित्त्रसति त्रसंति हि कस्य
चित्॥ येषामात्मसमो लोको दु०॥ परश्रिया न तप्यंते ये संतः पुरुषर्षभाः॥ ग्राम्यादर्थान्निवृत्ताश्च दुर्गाण्यति०॥
सर्वान्देवान्नमस्यंति सर्वान्धर्मांश्च शृण्वते॥ ये श्रद्दधाना दांताश्च दु०॥ येन मानित्वमिच्छंति मानयंति च ये न नान्॥ मा
न्यमानान्नमस्यंति दु०॥ ये च श्राद्धानि कुर्वंति तिथ्यां तिथ्यां प्रजार्थिनः॥ सुविशुद्धेन मनसा दु०॥ ये क्रोधं संनियच्छं
ति क्रुद्धान्संशमयंति च॥ न संकुप्यंति भृतानां दु०॥ मधुमांसं च ये नित्यं वर्जयंतीह मानवाः॥ जन्मप्रभृति मद्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च दुर्गा०॥ यात्रार्थं भोजनं येषां संतानार्थं च मैथुनं॥ वाक्सत्यवचनार्थाय दुर्गा०॥ ईश्वरं सर्वभूतानां जगतः प्रभवा
प्ययं॥ भक्ता नारायणं देवं दु०॥ य एष रक्तपद्माक्षः पीतवासा महाभुजः॥ सुहृद्भ्राता च मित्रं च संबंधी च तवा
च्युतः॥ य इमांसकलांल्लोकांश्चर्मवत्परिवेष्टयेत्॥ य इच्छन्प्रभुरचिंत्यात्मा गोविंदः पुरुषोत्तमः॥ स्थितप्रजाहि
ते विष्णुः स एष पुरुषोत्तमः॥ राजंस्तव च दुर्धर्षो वैकुंठः पुरुषोत्तमः॥ य एनं संश्रयंतीह भक्त्या नारायणं हरिं॥
ते तरंतीह दुर्गाणि न चात्रास्ति विचारणा॥ दुर्गातितरणं ये च पठंति श्रावयंति च॥ कथयंति च विप्रेभ्यो दुर्गा
ण्यतितरंति ते॥ इति कृत्यसमुद्देशः कीर्तितस्ते मयानघ॥ प्रतरेद्येन दुर्गाणि परत्रेह च मानवः॥ ॥इति श्री शां
तौ राजधर्मे दुर्गातितरणं नाम॥ ॥युधिष्ठिर उवाच॥ ॥असौम्याः सौम्यरूपेण सौम्याश्चासौम्यदर्शनाः॥
ईदृशान्पुरुषांस्तात कथं विद्यामहे वयं॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं॥ व्याघ्रगो
मायुसंवादं तन्निबोध युधिष्ठिरः॥ पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः॥ परहिंसारतिः क्रूरो बभूव पुरु
षाधमः॥ स त्वायुषि परिक्षीणे जगामानीप्सितां गतिं॥ गोमायुत्वं च संप्राप्तो दूषितः पूर्वकर्मणा॥ संस्मृत्य
पूर्वसंपत्तिं च निर्वेदं परमं गतः॥ न भक्षयति मांसानि परैरूपहृतान्यपि॥ अहिंस्रः सर्वभूतेषु सत्यवाक्
सुदृढव्रतः॥ चकार च यथाकालमाहारं पतितैः फलैः॥ श्मशाने तत्र वै वासो गोमायोः संमतो भवत्॥ ज १२६

न्मभूम्यनुरोधाच्च वासमरोचयत्॥ तस्य शौचममृष्यंतः सर्वे ते सहजातयः॥ चालयंति स्म तां बुद्धिं वचनैः
प्रश्रयोत्तरैः॥ वसन्पितृवने रौद्रे शौचे वर्तितुमिच्छसि॥ इयं विप्रतिपत्तिस्ते यदा त्वं पिशिताशनः॥ तत्समा
नो भवास्माभिर्भक्ष्यं दास्यामहे वयं॥ भुंक्ष्व शौचं परित्यज्य यद्धि भक्तं तदस्तु ते॥ इति तेषां वचः श्रुत्वा प्र
त्युवाच समाहितः॥ मधुरैः प्रश्रितैर्वाक्यैर्हेतुमद्भिरनुष्ठितैः॥ अप्रमाणा प्रसूतिर्मे शीलतः क्रियते कुलं
॥प्रार्थयामि तु तत्कर्म येन विस्तीर्यते यशः॥ श्मशाने यदि वासो मे समाधिर्मे निशाम्यतां॥ आत्मा फलति
कर्माणि नाश्रमो धर्मकारणं॥ आश्रमे यो द्विजं हन्याद्गां वा दद्यादनाश्रमे॥ किं नु तत्पातकं न स्यात्तद्वा दत्तं
वृथा भवेत्॥ भवंतः स्वार्थलोभेन केवलं भक्षणे रताः॥ अनुबंधे तु ये दोषास्तान्न पश्यंति मोहिताः॥ अप्रत्य
यकृतां गर्ह्यामर्थापनयदूषितां॥ इह चामुत्र चानिष्टां तस्माद्वृत्तिं न रोचये॥ तं शुचिं पंडितं मत्वा शार्दूलः
ख्यातविक्रमः॥ कृत्वात्मसदृशीं पूजां साचिव्ये वरयत्स्वयं॥ ॥शार्दूल उवाच॥ ॥सौम्य विज्ञातरूपस्त्वं गच्छ
यात्रां मया सह॥ व्रियंतामीप्सिता भोगाः परिहार्याश्च पुष्कलाः॥ तीक्ष्णा वयमिति ख्याता भवंतं ज्ञापयाम
हे॥ मृदुपूर्वं हितं चैव श्रेयश्चाधिगमिष्यसि॥ अथ संपूज्य तद्वाक्यं मृगेंद्रस्य महात्मनः॥ गोमायुः प्रश्रितं वाक्यं
मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बभाषेद्विं विनीतवत्॥ ॥गोमायुरुवाच॥ ॥सदृशं मृगराजैतत्तव वाक्यं मदंतरे॥ यत्सहायान्मृगयसे धर्मा
र्थकुशलान्शुचीन्॥ न शक्यमनमात्येन महत्त्वमनुशासितुं॥ दुष्टामात्येन वा वीर राज्ञा शरीरपरिपंथिना॥ स
हायाननुरक्तांस्तु नयज्ञानुपसंहितान्॥ परस्परमसंहृष्टान्विजिगीषूनलोलुपान्॥ अनतीतोपधान्प्राज्ञान्
हिते युक्तान्मनस्विनः॥ पूजयेथा महाभागांस्त्वं यथा पितॄन्॥ न त्वेव मम संतोषाद्रोचतेन्यन्मृगाधि
प॥ न कामये सुखान्भोगानैश्वर्यं च त्वदाश्रयं॥ न योक्ष्यति हि मे शीलं तव भृत्यैः पुरातनैः॥ ते त्वां विभेद
यिष्यंति दुःखशीला मदंतरे॥ न संश्रयः श्लाघनीयो ह्यन्येषामपि भास्वती॥ कृतात्मा सुमहाभागः पापके
ष्वप्यदारुणः॥ दीर्घदर्शी महोत्साहः स्थूललक्ष्यो महाबलः॥ कृती चामोघकर्तासि भाव्यैश्च समलंकृ
तः॥ न स्वप्नेनास्मि संतुष्टो दुःखा वृत्तिरनुष्ठिता॥ सेवायां चापि नाभिज्ञः स्वच्छंदेन वनेचरः॥ राज्ञोपक्रोश
दोषाश्च सर्वे संश्रयवासिनां॥ वनचर्या तु निःसंगा निर्भया वनवासिनां॥ नृपेणाहूयमानस्य यत्तिष्ठति भयं हृ
दि॥ न तत्तिष्ठति भुक्तानां वने मूलफलाशिनां॥ पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरं॥ विचार्य खलु प
श्यामि तत्सुखं यत्र निर्वृतिः॥ अपराधैर्न तावंतो भृत्याः शिष्टा नराधिपैः॥ उपघातैर्यथा भृत्या दूषितानि १२८

धनं गताः॥ यदि त्वेतन्मया कार्यं मृगेंद्रो यदि मन्यते॥ समयं कृतमिच्छामि वर्तितव्यं यथा मयि॥ मदीया मान
नीयास्ते श्रोतव्यं च हितं यदि॥ कल्पिता या च मे वृत्तिः सा भवेत्त्वयि च स्थिता॥ न मंत्रयेयमन्यैस्ते सचिवैः सह
कर्हिचित्॥ नीतिमंतः परीप्संतो यथा ब्रूयुः परे मयि॥ एक एकेन संगम्य रहो ब्रूयां हितं वचः॥ न च ते ज्ञातिकार्येषु प्र
ष्टव्योऽहं हिताहिते॥ मया संमंत्र्य पश्चाच्च न हिंस्याः सचिवास्त्वया॥ मदीयानां च कुपितो मा त्वं दंडं निपातयेः॥ एवम दी
स्त्विति तेनासौ मृगेंद्रेणाभिपूजितः॥ प्राप्तवान्मतिसाचिव्यं गोमायुर्व्याघ्रयोनितः॥ तं तथा सत्कृतं दृष्ट्वा पूज्यमानं स्वक
र्मसु॥ प्राद्विषन्कृतसंघाताः पूर्वभृत्या मुहुर्मुहुः॥ मित्रबुद्ध्या च गोमायुं सांत्वयित्वा प्रसाद्य च॥ दोषेषु सम
तां नेतुमैच्छन्नशुभबुद्धयः॥ अन्यथा ह्युचिताः पूर्वं परद्रव्यापहारिणः॥ अशक्ताः किंचिदादातुं द्रव्यं गोमा
युयंत्रिताः॥ व्युत्थानं चापि कांक्षद्भिः कथाभिः प्रलोभ्यते॥ धनेन महता चैव बुद्धिरस्य विलोभ्यते॥ न चा
पि सुमहाप्राज्ञस्तस्माद्धैर्याच्चचाल ह॥ अथास्य समयं कृत्वा विनाशाय स्थिताः परे॥ ईप्सितं तु मृगेंद्रस्य
मांसं यत्तत्र संस्कृतं॥ अपनीय स्वयं तद्धि तैर्न्यस्तं तस्य वेश्मनि॥ यदर्थं चाप्यपहृतं येन यच्चैव मंत्रितं॥
दि तस्य तद्विदितं सर्वं कारणार्थं च मर्षितं॥ समयोऽयं कृतस्तेन साचिव्यमुपगच्छता॥ नोपघातस्त्वया ग्राह्यो
राजन्मैत्रीमिहेच्छता॥ ॥भीष्म उवाच॥ ॥क्षुधितस्य मृगेंद्रस्य भोक्तुमभ्युत्थितस्य च॥ भोजने चोपहृतं तन्मां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सनोपहस्यते॥ ततो राजेन चाज्ञप्तं मृग्यतां चौर इत्युत॥ कृतकेश्चैव तन्मांसं मृगेंद्रायोपवर्णितं॥ सचिवेनाप
नीतं स्याद्विदुषा प्राज्ञमानिना॥ सनोष स्तथ शार्दूलः श्रुत्वा गोमायुचापलं॥ बभूव सामर्षितो राजा वधं चा
स्याभ्यरोचयत्॥ छिद्रं तु तत दृष्ट्वा प्रोचुस्ते पूर्वमंत्रिणः॥ सर्वेषामेव सोस्माकं वृत्तिभंगे प्रवर्तते॥ निश्चि
त्यैवं ततस्तस्य तत्कर्माण्यवर्णयन्॥ इदं चास्य कृतं कर्म बालिश्यं नानुवर्तते॥ श्रुतश्च स्वामिना पूर्वं यादृशो
नैव तादृशः॥ वाङ्मात्रेणैव धर्मिष्ठः स्वभावेनैव दारुणः॥ धर्मच्छद्मा ह्ययं पापो वृथाचारपरिग्रहः॥ कार्या
र्थे भोजनार्थेषु वृत्तेषु कृतवान् श्रमं॥ यदि विप्रत्ययो ह्येषा तदिदं दर्शयामते॥ तन्मांसं चैव गोमायोस्तत्क्षणा
न्नैश्च वो कितं॥ सोस्मापनयनं ज्ञात्वा व्याघ्रस्तेषां च तद्वचं॥ आज्ञापयामास ततो गोमायुर्वध्यतामिति॥ शार्दू
लवचनं श्रुत्वा शार्दूलजननी ततः॥ मृगराजं हितैर्वाक्यैः संबोधयितुमागमत्॥ पुत्रनैवत्वया ग्राह्यं कपटारं
भसंयुतं॥ कर्मसंहर्षजैर्दोषैर्मुच्यता शुचिभिः शुचिः॥ नोच्छ्रितं सहते कश्चित् सत्क्रिया वैरकारिणी॥ शुचेरपि
यु हितैस्तस्य दोष एव निपात्यते॥ मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः॥ उत्पद्यंते त्रयः पक्षा मित्रोदासीनश
त्रवः॥ लुब्धानां शुचयो द्वेष्याः कातराणां तरस्विनः॥ मूर्खाणां पंडिता द्वेष्या दरिद्राणां महाधनाः॥ अधर्मिष्ठा १२८

णां धर्मिष्ठा विरूपाणां सुरूपिणः॥ बहवः पंडिता मूर्खा लुब्धा मायोपजीविनः॥ कुर्युर्दोषमदोषस्य बृहस्पतिमतेरपि॥ शू
त्र न्यात्तैरहतन्मांसं यद्गृहापहृतं तव॥ नेच्छेद्दीयमानं च साधु तावद्विमृश्यतां॥ असभ्याः सभ्यसंकाशाः सभ्याश्चासभ्यदर्शनाः
॥ दृश्यंते विविधा भावास्तेषु युक्तं परीक्षणं॥ तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव॥ नचैवास्ति तलं व्योम्नि न खद्योते हुताश
नः॥ तस्मात्प्रत्यक्षदृष्टोपि युक्तमर्थः परीक्षितुं॥ परीक्ष्य ज्ञापयन्नर्थान्न पश्चात्परितप्यते॥ न दुष्करमिदं पुत्र यत्प्रभुः घातये
त्परं॥ श्लाघनीया यशस्या च लोके प्रभवतां क्षमा॥ स्थापितोयं त्वया पुत्र सामंतेष्वपि विश्रुतः॥ दुःखेनासाद्यते पात्रं धार्यतामे
ष ते सुहृत्॥ दूषितं परदोषैर्हि गृह्णीते योन्यथा शुचिं॥ स्वयं संदूषितामात्यः क्षिप्रमेव विनश्यति॥ तस्मादपारिसंघाता
द्गोमायोः कश्चिदागतः॥ धर्मात्मा तेन चाख्यातं यथैतत्कपटं कृतं॥ ततो विज्ञातचरितः सत्कृत्य स विमोक्षितः॥ परिष्वक्तश्च
सस्नेहं मृगेंद्रेण पुनः पुनः॥ अनुज्ञाप्य मृगेंद्रं तु गोमायुर्नीतिशास्त्रवित्॥ तेनामर्षेण संतप्तः प्रायमासितुमैच्छत॥ शा
र्दूलस्तं तु गोमायुं स्नेहात्प्रस्फुटलोचनः॥ अवारयत्स धर्मिष्ठं पूजया प्रतिपूजयन्॥ तं च गोमायुरालोक्य स्नेहादागत
संभ्रमं॥ बभाषे प्रणतो वाक्यं बाष्पगद्गदया गिरा॥ पूजितोहं त्वया पूर्वं पश्चाच्चैव विमानितः॥ परेषामास्पदं नीतो वस्तुं
नार्हाम्यहं त्वयि॥ असंतुष्टाः च्युताः स्थानान्मानात् प्रत्यवरोपिताः॥ स्वयं चोपहृता भृत्या ये चाप्युपहिताः परैः॥ परिक्षीणा
श्च लुब्धाश्च क्रुद्धा भीताः प्रतारिताः॥ हृतस्वाः पिमिनो ये च त्यक्तोदात्ता महेप्सवः॥ संतापिताश्च ये केचिद्व्यसनौघप्रतीक्षिणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अंतर्हिताः सो पहिताः सर्वे ते परसाधनाः॥ अवमानेन युक्तस्य स्थानभ्रष्टस्य वा पुनः॥ कथं यास्यामि विश्वासमहमेष्यामि
वा कथं॥ समर्थ इति संगृह्य स्थापयित्वा परीक्ष्य च॥ कृतं कर्मसमयं हित्वा त्वया हमहमानितः॥ प्रथमं यः समाख्यातः शीलवा
निति संसदि॥ न वाच्यं तस्य वैगुण्यं प्रतिज्ञां परिरक्षिता॥ एवं चावमतेस्येह विश्वासं मे न यास्यसि॥ त्वयि चापेत विश्वा
सि ममोद्वेगो भविष्यति॥ शंकितस्त्वमहं भीतः परे छिद्रानुदर्शिनः॥ अस्निग्धाश्चैव दुस्तोषाः कर्म चैतद्बहुच्छलं॥ दुःखेनाश्लि
ते भिन्नं श्लिष्टं दुःखेन भिद्यते॥ भिन्नश्लिष्टा तु या प्रीतिः न सा स्नेहेन वर्तते॥ कश्चिदेव हिते सक्तः दृश्यते न परात्मनोः॥ कार्यापे
क्षा हि वर्त्तंते भावाः स्निग्धाः सुदुर्लभाः॥ सुदुःखं पुरुषज्ञानं चित्तं ह्येषां चलाचलं॥ समर्थो वाप्यशक्तो वा शतेष्वेको हि गम्यते॥
अकस्माच्च क्रियां नृणामकस्माच्चापकर्षणं॥ शुभाशुभे महत्त्वे च प्रकर्तुं बुद्धिलाघवं॥ एवं बहुविधैः सांत्वमुक्तो धर्मा
र्थहेतुकं॥ प्रसादयित्वा राजानं गोमायुर्वनमभ्यगात्॥ अगृह्यानुनयं तस्य मृगेंद्रस्य स बुद्धिमान्॥ गोमायुः प्रायमासीन
स्त्यक्त्वा देहं दिवं ययौ॥ ॥शांतौ राजधर्मेषु व्याघ्रगोमायुसंवादः॥ ॥युधिष्ठिर उवाच॥ ॥ किं पार्थिवेन कर्तव्यं किं च कृत्वा
सुखी भवेत्॥ तन्ममाचक्ष्व तत्त्वेन सर्वधर्मभृतां वर॥ ॥भीष्म उवाच॥ ॥हंत ते हं प्रवक्ष्यामि शृणु कार्यैकनिश्चयं॥ यथा राज्ञो
ह कर्तव्यं यच्च कृत्वा सुखी भवेत्॥ न त्वेवं वर्तितव्यं स्म यथेदमनुशुश्रुम॥ उष्ट्रस्य सुमहद्वृत्तं तन्निबोध युधिष्ठिर॥ जातिस्मरो १२९
महानुष्ट्रः प्राजापत्ययुगे भवत्॥ तपः सुमहदातिष्ठदरण्ये संशितव्रतः॥ तपसस्तस्य चांते वै प्रीतिमानभवत्प्रभुः॥ वरेण छं

दयामास ततश्चैनं पितामहः॥ उष्ट्र उवाच॥ ॥ भगवंस्त्वत्प्रसादेन दीर्घग्रीवो भवेदियं॥ योजनानां शतं साग्रं यो गच्छेच्चरि
तुं प्रभो॥ एवमस्त्विति चोक्तः स वरदेन महात्मना॥ प्रतिलभ्य वरं श्रेष्ठं ययावुष्ट्रः स्वकं वनं॥ स चकार तदालस्यं वरदानात्
सुदुर्मतिः॥ न चैच्छच्चरितुं गंतुं दुरात्मा कालमोहितः॥ स कदाचित्प्रसार्यैव तां ग्रीवां शतयोजनां॥ चचाराश्रांतहृदयो वात
श्चागात्ततो महान्॥ स गुहायां शिरो ग्रीवां निधाय पशुरात्मनः॥ आस्तेथ वर्षमभ्यागात्सुमहत्प्लावयज्जगत्॥ अथ शी
तपरीतांगो जंबुकः क्षुच्छ्रमान्वितः॥ सदारस्तां गुहामाशु प्रविवेश जलार्दितः॥ स दृष्ट्वा मांसजीवी तु सुभृशं क्षुच्छ्रमान्वितः॥
अभक्षयत्ततो ग्रीवामुष्ट्रस्य भरतर्षभ॥ यदा त्वबुध्यतात्मानं भक्ष्यमाणं च वै पशुः॥ यदा संकोचने यत्नमकरोद्भृश
दुःखितः॥ यावदूर्ध्वमधश्चैव ग्रीवां संक्षिपते प्रभुः॥ तावत्तेन सदारेण जंबुकेन स भक्षितः॥ स हत्वा भक्षयित्वा च तमु
ष्ट्रं जंबुकस्तदा॥ विगते वातवर्षे च निश्चक्राम गुहामुखात्॥ एवं दुर्बुद्धिना प्राप्तमुष्ट्रेण निधनं तदा॥ आलस्यस्य क्रमा
त्पश्य महांतं दोषमागतं॥ त्वमप्येवं विधं त्यक्त्वा योगेन नियतेंद्रियः॥ वर्तस्व बुद्धिमूलं हि विजयं मनुरब्रवीत्॥ बुद्धि
श्रेष्ठानि कर्माणि बाहुमध्यानि भारत॥ तानि जंघाजघन्यानि भारप्रत्यवराणि च॥ राज्यं तिष्ठति दक्षस्य संगृहीतेंद्रि
यस्य च॥ आर्तस्य बुद्धिमूलं हि विजयं मनुरब्रवीत्॥ सुसयं च श्रुतवतो ससहायस्य चानघ॥ परीक्ष्यकारिणोर्थास्तु ति
ष्ठंतीह युधिष्ठिर॥ सहाययुक्तेन मही कृत्स्ना युक्ता प्रशासितुं॥ इदं हि सद्भिः कथितं विधिज्ञैः पुरा महेंद्रप्रतिमप्रभाव॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मया पितोक्तं तव शास्त्रदृष्ट्या त्वमत्र युक्तः प्रचरस्व राजन्॥ ॥इति शांतौ राजधर्मे दुष्टद्वीपोपाख्यानं॥ ॥युधिष्ठिर उवा
च॥ ॥मानानुराज्यमनुप्राप्य दुर्लभं भरतर्षभ। अमित्रस्यातिवृद्धस्य कथं तिष्ठेदसाधनः॥ ॥भीष्म उवाच॥ ॥अत्राप्यु
दाहरंतीममितिहासं पुरातनं। सरितां चैव संवादं सागरस्य च भारत॥ सुरारिनिलयः शश्वत्सागरः सरितां पतिः॥ पप्र
च्छ सरितः सर्वाः संशयं जातमात्मनः॥ ॥सागर उवाच॥ ॥समूलशाखान्पश्यामि निहतान्कायिनो द्रुमान्॥ युष्माभिरिह
पूर्णाभिर्नान्यास्तत्र न वेतसं॥ अकायश्चाल्पसारश्च वेतसः कूलजश्च वः॥ अवज्ञया नानीतः किंचिद्वा तेन वः कृतं॥ त
दहं श्रोतुमिच्छामि सर्वासामेव वो मतं॥ यथा चेमानि कूलानि हित्वा नायाति वेतसः॥ तत्र प्राह नदी गंगा वाक्यं सरित्पतिं॥
॥गंगा उवाच॥ ॥तिष्ठंत्येते यथास्थानं नगा ह्येकनिकेतनाः॥ ततस्त्यजंति तत्स्थानं प्रातिलोम्यान्न वेतसः॥ वेतसो वेगमायां
तं दृष्ट्वा नमति नेतरे॥ स च वेगेऽप्यतिक्रांते स्थानमासाद्य तिष्ठति॥ कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्धतः॥ अनुलो
मस्तथास्तब्धस्तेन नाभ्येति वेतसः॥ मारुतोदकवेगेन ये नमंत्युन्नमंति च॥ ओषध्यः पादपा गुल्मा न ते यांति पराभवं॥ यो
हि शत्रोर्विवृद्धस्य प्रभोर्वधविनाशने॥ पूर्वं न सहते वेगं क्षिप्रमेव स नश्यति॥ सारासारं बलं वीर्यमात्मनो द्विषतश्च
यः॥ जानन्विचरति प्राज्ञो न स याति पराभवं॥ एवमेव यदा विद्वान्मन्यतेतिबलं नृपं॥ संश्रयेद्वैतसीं वृत्तिमेतत्प्रज्ञान
लक्षणं॥ ॥इति शांतौ राजधर्मे सरित्सागरसंवादः॥ ॥युधिष्ठिर उवाच॥ ॥विद्वान्मूर्खप्रगल्भेन मृदुस्तीक्ष्णेन भारत॥ १३०

आक्रुश्यमानः सदसि कथं कुर्यादरिंदम॥ ॥भीष्म उवाच॥ ॥श्रूयतां पृथिवीपाल यथैषोर्थोनुगीयते॥ सदा सुचेताः स
हते नरस्येहाल्पचेतसः॥ अरुष्यन्क्रुश्यमानस्य सुकृतं नाम विंदति॥ दुष्कृतं चात्मनो मर्षी रुष्यत्येवापमार्ष्टि वै॥ टिट्टिभं त
मुपेक्षेत वाशमानमिवातुरं॥ लोकविद्वेषमापन्नो निष्फलं प्रतिपद्यते॥ इति स श्लाघते नित्यं तेन पापेन कर्मणा॥ इदमुक्तं
मया कश्चित्संमतो लोकसंसदि॥ तत्र व्रीडितः शुष्को मृतकल्पोवतिष्ठति॥ श्लाघन्नश्लाघनीयेन कर्मणा निरपत्रपः॥
उपेक्षितव्यो यत्नेन तादृशः पुरुषाधमः॥ यद्यद्ब्रूयादल्पमतिस्तत्तदस्य सहेत सदा॥ प्राकृतो हि प्रशंसन्वा निंदन्वा किं करिष्य
ति॥ वने काक इवाबुद्धिर्वाशमानो निरर्थकं॥ यदि वाग्भिः प्रयोगः स्यात्प्रयोगे पापकर्मणः॥ वागेवार्थे भवेत्तस्य न ह्येवा
र्थे जिघांसतः॥ निषेकं विपरीतं स आचष्टे वृत्तचेष्टया॥ मयूर इव कौपीनं नृत्यन्संदर्शयन्निव॥ यस्यावाच्यं न लोकेस्ति
नाकार्यं चापि किंचन॥ वाचं तेन न संदध्याच्छुचिः संक्लिष्टकर्मणा॥ प्रत्यक्षं गुणवादी यः परोक्षे चापि निंदकः॥ स मान
वः श्ववल्लोके नष्टलोकपरायणः॥ तादृग्जनशतस्यापि यद्ददाति जुहोति च॥ परोक्षेणापवादेन तन्नाशयति तत्क्षणात्॥
तस्मात्प्राज्ञो नरः सद्यस्तादृशं पापचेतसं॥ वर्जयेत्साधुभिर्वर्ज्यं सारमेयामिषं यथा॥ परिवादं ब्रुवाणो हि दुरात्मा वै महा
जने॥ प्रकाशयति दोषान्स्वान्सर्पः फणमिवोच्छ्रितं॥ तं स्वकर्माणि कुर्वाणं प्रतिकर्तुं य इच्छति॥ भस्मकूट इवाबुद्धिः ख
रो रजसि मज्जति॥ मनुष्यशालावृकमप्रशांतं जनापवादे सततं निविष्टं॥ मातंगमुन्मत्तमिवोन्नदंतं त्यजेत तं श्वानमि
वातिरौद्रं॥ अधीरजुष्टे पथि वर्त्तमानं दमादपेतं विनयाच्च पापं॥ अरिव्रतं नित्यमभूतिकामं धिगस्तु तं पापमतिं मनुष्यं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसुच्यमानस्तत्रभिन्नपरभिर्निशाम्यमाणस्तमथातरूपः॥ उच्चस्य नीचेन हि संप्रयोगं विगर्हयंति स्थिरबुद्धयो ये॥ कुदो
दशार्हेनुताउयेद्वास पांशुभिरविकेनु चैव॥ विदूष्यदंतोश्च विभीषयेद्या स्तिष्ठंहिमक्षैकुपितोन शंसे॥ निगर्हणं
परमदुरात्मना कृतं सहेत यः संसदि दुर्जनान्नरः॥ पठेद्विदे वापि निदर्शनं सदा नवाक्यं येसलभतिकिंचिदप्रियं॥ ॥
दि राजधर्मेषु हिमकेनाम॥ ॥युधिष्ठिरः॥ ॥पितामह महाप्राज्ञ संशयो मे महानयं॥ संछेत्तव्यस्त्वया राजन् भवान्कुलक
रो हि नः॥ पुरुषाणामयं तात दुर्वृत्तानां दुरात्मनां॥ कथितो वाक्यसंचारस्ततो विज्ञापयामि ते॥ यद्धितं राज्यतंत्रस्य सुखोद
यं॥ आयत्यां च तदात्वे च क्षेमं वृद्धिकरं च यत्॥ पुत्रपौत्राभिरामं च राष्ट्रवृद्धिकरं च यत्॥ अन्नपाने शरीरे च हितं यत्तद्ब्रवीहि
मे॥ अभिषिक्तो हि यो राजा राज्यस्थो मित्रसंवृतः॥ ससुहृत्समुपेतो वा स कथं रंजयेत्प्रजाः॥ यो ह्यसत्प्रग्रहरतिः स्नेहरागब
लात्कृतः॥ इंद्रियाणामनीशत्वादसज्जनबुभुक्षिकः॥ तस्य भृत्या विगुणतां यांति सर्वे कुलोद्गताः॥ न च भृत्यफलैरर्थैः
स राजा संप्रयुज्यते॥ एतन्मे संशयस्थस्य राजधर्मान्सुदुर्विदान्॥ बृहस्पतिसमो बुद्ध्या भवान्शंसितुमर्हति॥ शंसिता
पुरुषव्याघ्र त्वं नः कुलहिते रतः॥ क्षत्ता वै को महाप्राज्ञो यो नः शंसति सर्वदा॥ त्वत्तः कुलहितं वाक्यं श्रुत्वा राज्यहितोदयं॥ अमृ
तस्याव्ययस्येव तृप्तः स्वप्स्याम्यहं सुखं॥ कीदृशाः संनिकर्षस्था भृत्याः स्युः सर्वगुणान्विताः॥ कीदृशैः किंकुलीनैर्वा सह यात्रा वि
धीयते॥ न ह्येको भृत्यरहितो राजा भवति रक्षिता॥ राज्यं चेदं जनः सर्वे तत्कुलीनोभिकांक्षति॥ न च प्रशास्तुं राज्यं हि शक्यम
मेकेन भारत॥ असहायवता तात नैवार्थाः केचिदच्युत॥ लब्धुं लब्ध्वापि सततं रक्षितुं भरतर्षभ॥ ॥भीष्मः॥ ॥ १३१

यस्य भृत्यजनः सर्वो ज्ञानविज्ञानकोविदः॥ हितैषी कुलजः स्निग्धः स राज्यफलमश्नुते॥ मंत्रिणो यस्य कुलजा असंहार्याः
सहोषिताः॥ नृपतेर्मतिदाः संति संबंधज्ञानकोविदाः॥ अनागतविधातारः कालज्ञानविशारदाः॥ अतिक्रांतमशोचंतः
स राज्यफलमश्नुते॥ समदुःखसुखा यस्य सहायाः प्रियकारिणः॥ अर्थचिंतापराः सत्याः स राज्यफलमश्नुते॥ यस्य ना
तो जनपदः संनिकर्षगतः सदा॥ अक्षुद्रः सत्पथालंबी स राजा राज्यभाग्भवेत्॥ कोषाक्ष्यपटले यस्य कोशवृद्धिपरैर्न
रैः॥ आप्तैस्तुष्टैश्च सततं चीयते संप्रपोतमः॥ कोष्ठागारमसंहार्यैराप्तैः संचयतत्परैः॥ पात्रभूतैरलुब्धैश्च पाल्यमा
नं सुखी भवेत्॥ व्यवहारश्च नगरे यस्य कर्मफलोदयः॥ दृश्यते शंखलिखितः स धर्मफलभाग्भवेत्॥ संगृहीतम
ष नुष्यो राजा राजधर्मवित्॥ षड्भागं प्रतिगृह्णाति स धर्मफलमश्नुते॥ ॥शांतौ राजधर्मे॥ ॥भीष्म उवाच॥ ॥
अत्राप्युदाहरंतीममितिहासं पुरातनं॥ निदर्शनं परं लोके सज्जनाचरितं सदा॥ अस्यैवार्थस्य सदृशं यद्वृत्तं मे
तपोवने॥ जामदग्न्यस्य रामस्य यदुक्तं मुनिसत्तमैः॥ वने महति कस्मिंश्चिदमनुष्यनिषेविते॥ ऋषिर्मूलफला
हारो नियतो नियतेंद्रियः॥ दीक्षादमपरः शांतः स्वाध्यायपरमः शुचिः॥ उपवासविशुद्धात्मा सततं सत्पथे स्थितः॥
तस्य संदृश्य सद्भावमुपविष्टस्य धीमतः॥ सर्वे सत्त्वाः समीपस्था भवंति वनचारिणः॥ सिंहव्याघ्राः सशरभा मा
त्ताश्चैव महागजाः॥ द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः॥ ते सुखप्रश्नदाः सर्वे भवंति क्षतजाशनाः॥ ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेस्यर्ष्येरुपविष्टस्य पादमूले महामते ॥ मनुष्यवत्कृतो भावं स्नेहबद्धो भवच्छुनः ॥ ततोभ्ययान्महावीर्यो द्वीपी
क्षतजभोजनः ॥ स्वार्थमत्यंतसंतुष्टः क्रूरः काल इवांतकः ॥ लेलिह्यमानस्तृषितः पुच्छास्येनात्मनः ॥ व्यादितास्
स्यः क्षुधा युक्तः प्रार्थयानस्तदामिषं ॥ तं दृष्ट्वा क्रूरमायांतं जीवितार्थी जनाधिप ॥ प्रोवाच श्वा मुनिं तत्र तत्तच्छृणु वि
शांपते ॥ श्वशत्रुर्भगवन्नेष द्वीपी क्षतजभोजनः ॥ त्वत्प्रसादाद्भयं तस्याद्धस्मान्नमम महामुने ॥ स मुनिः स्तस्य
विज्ञाय भावज्ञो भयकारणं ॥ कृतः ततः सर्ववित्ततां नात मैश्वर्यसमन्वितः ॥ ॥मुनिरुवाच॥ ॥न भयं द्वीपिनः का
यमृत्युर्नस्ति कथंचन ॥ एष स्वरूपरहितो द्वीपी भवसि पुत्रक ॥ ततः श्वा द्वीपितां नीतो जांबूनदनिभाकृतिः ॥
चित्रांगो विस्फुरद्दंष्ट्रो वने वसति निर्भयः ॥ तं दृष्ट्वा संमुखे द्वीपी आत्मनः सदृशं शुभं ॥ अविरुद्धस्ततः
स्तस्य क्षणेन समपद्यत ॥ ततोभ्ययान्महारौद्रो व्यादितास्यः क्षुधान्वितः ॥ द्वीपिनं लेलिहद्वक्त्रो व्याघ्रो
रुधिरलालसः ॥ व्याघ्रं दृष्ट्वा क्षुधाभुग्नं दंष्ट्रिणं वनगोचरं ॥ द्वीपी जीवितरक्षार्थमृषिं शरणमेयिवान् ॥ ततः
संवासजं स्नेहमृषिणा कुर्वता तदा ॥ स द्वीपी व्याघ्रतां नीतो रिपुभ्यो बलवत्तरः ॥ ततो दृष्ट्वा स शार्दूलो नाहनत्तं
विशांपते ॥ स तु श्वा व्याघ्रतां यातो बलवान्पिशिताशनः ॥ न मूलफलभोगेषु स्पृहामप्यकरोत्तदा ॥ यथा मृ
गपतिर्नित्यं प्रकांक्षति वनौकसः ॥ तथैव स महाराज व्याघ्रः समभवत्तदा ॥ ॥इति श्रीराजधर्मे श्वऋषिसंवादे १२१

॥श्रीभीष्म उवाच॥ ॥व्याघ्रश्चोटजमूलस्थः सुप्तस्तृप्तो मृगैर्हतैः ॥ गजश्चागात्तमुद्देशं मत्तो मेघ इवोत्थितः ॥ प्रभि
न्नकरटः पीशुः पद्मी विततमस्तकः ॥ सुविषाणो महाकायो मेघगंभीरनिःस्वनः ॥ तं दृष्ट्वा कुंजरं मत्तमायांतं
बलदर्पितं ॥ व्याघ्रो हस्तिभयात्त्रस्तस्तमृषिं शरणं ययौ ॥ ततो नयत्कुंजरतां तं व्याघ्रमृषिसत्तमः ॥ महामेघ
निभं दृष्ट्वा तं स भीतो भवद्गजः ॥ ततः कमलषंडानि शल्लकीगहनानि च ॥ व्यचरन्स मुदा युक्तः पद्मरेणुवि
भूषितः ॥ कदाचिद्रममाणस्य हस्तिनः सुमुखं तदा ॥ ऋषेस्तस्योटजस्थाय कालोगच्छन्निशानिशं ॥ अ
थाजगाम तं देशं केसरी केसरारुणः ॥ गिरिकंदरजो भीमः सिंहो नागकुलांतकः ॥ तं दृष्ट्वा सिंहमायां
तं नागः सिंहभयार्दितः ॥ ऋषिं शरणमापेदे वेपमानो भयातुरः ॥ स ततः सिंहतां नीतो नागेंद्रो मुनिना
तदा ॥ वन्यं नागणयत्सिंहं तुल्यजातिसमन्वयात् ॥ दृष्ट्वा चसोभवत्सिंहो वन्योभयसमन्वितः ॥ स चा
श्रमे वसत्सिंहस्तस्मिन्नेव महावने ॥ न तस्य क्षुद्रपशवस्तपोवननिवासिनः ॥ अदृश्यंत भयत्रस्ता जी
विताकांक्षिणस्तथा ॥ कदाचित्कालयोगेन सर्वप्राणविहिंसकः ॥ बलवान्क्षतजाहारो नानासत्त्वभयंक
रः ॥ अष्टपादूर्ध्वनयनः शरभो वनगोचरः ॥ तं सिंहं हंतुमागाच्च मुनेस्तस्य निवेशनं ॥ तं मुनिः शरभं चक्रे
बलोत्कटमरिंदम ॥ ततः स शरभो वन्यो मुनेः शरभमग्रतः ॥ दृष्ट्वा बलिनमत्युग्रं द्रुतं संप्राद्रवद्वना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्॥ स एवं शरभस्स्थाने सन्यस्तो मुनिना तदा॥ मुनेः पार्श्वगतो नित्यं शरभः सुखमास वान्॥ ततः शरभसंत्रस्ताः
सर्वे मृगगणास्तदा॥ दिशः संश्रिता इवन् राजन् भययाज्जीविनकांक्षिणः॥ शरभो प्यतिसंहृष्टो नित्यं प्राणिवधे र
तः॥ फलमूलाशनाद्धर्तुं मैच्छत्स पिशिताशनः॥ ततो रुधिरतर्षेण बलिना शरभो न्वितः॥ इयेष तं मुनिं हंतुं मकृत
ज्ञः श्वयोनिजः॥ ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा॥ विज्ञाय च महाप्राज्ञो मुनिः श्वानं तम ब्रवीत्॥ श्वा
त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः॥ व्याघ्रो नागो मदपटुर्नागः सिंहत्वमागतः॥ सिंहो ऽतिबलमापन्नो
भूयः शरभतां गतः॥ मयास्नेहपरीतेन विसृष्टो न कुलान्वयः॥ यस्मादेवमपापं मां पापहिंसितुमर्हसि
॥ तस्मात्स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि॥ ततो मुनिजनद्वेष्टा दुष्टात्मा कृतबुद्धयः॥ ऋषिणा शा
रभः शप्तः श्वरूपं पुनराप्तवान्॥ ॥ इति श्रीराजधर्मे श्वर्षिसंवादे॥ ॥ भीष्म उवाच॥ ॥ स श्वा प्रकृतिमा
पन्नः परं दैन्यमुपागतः॥ ऋषिणा हुंकृतः पापस्तपोवनाद्बहिःकृतः॥ एवं राज्ञा मतिमता विदित्वा सत्य
शौचतां॥ आर्जवं प्रकृतिं सत्त्वं श्रुतं वृत्तं कुलं दमं॥ अनुक्रोशं बलं वीर्यं प्रभावं प्रशमं क्षमां॥ भृत्या ये
यत्र योग्याः स्युस्तत्र स्थाप्याः सुरक्षिताः॥ नापरीक्ष्य महीपालः सचिवं कर्तुमर्हति॥ अकुलीनन १२३

राकीर्णेन राजा सुखमेधते॥ कुलजः प्रकृतो राज्ञा तत्कुलीनतया सदा॥ न पापकुरुते बुद्धिं भिद्यमानो प्यनागसि॥
अकुलीनस्तु पुरुषः प्राकृतः साधुसंश्रयात्॥ दुर्लभैश्वर्यतां प्राप्तो निंदितः शत्रुतां व्रजेत्॥ कुलीनं शिक्षितं प्राज्ञं
ज्ञानविज्ञानपारगं॥ सर्वशास्त्रार्थतत्त्वज्ञं सहिष्णुं देशजं तथा॥ कृतज्ञं बलवंतं च क्षांतं दांतं जितेंद्रियं॥ अलुब्ध
लब्धसंतुष्टं स्वामिमित्रबुभूषकं॥ सचिवं देशकालज्ञं सत्त्वसंग्रहणे रतं॥ सततं युक्तमनसं हितैषिणमतंद्रि
तं॥ युक्ताचारं स्वविषये संधिविग्रहकोविदं॥ राज्ञस्त्रिवर्गवेत्तारं पौरजानपदप्रियं॥ खातकव्यूहतत्त्वज्ञं बलह
र्षणकोविदं॥ इंगिताकारतत्त्वज्ञं यात्रायानविशारदं॥ हस्तिशिक्षाविद्यातत्त्वज्ञं मनहंकारविवर्जितं॥ प्रगल्भं दाक्षि
ण्यं दांतं बलिनं युक्तकारिणं॥ चौक्षं चौक्षजनाकीर्णं सुवेषं सुखदर्शनं॥ नायकं नीतिकुशलं गुणचेष्टास
मन्वितं॥ अस्तब्धं प्रश्रितं श्लक्ष्णं मृदुवादिनमेव च॥ धीरं श्लक्ष्णं महर्द्धिं च देशकालोपपादकं॥ सचिवं यः
प्रकुरुते न चैनमवमन्यते॥ तस्य विस्तीर्यते राज्यं ज्योत्स्ना ग्रहपतेरिव॥ एतैरेव गुणैर्युक्तो राजा शास्त्रविशा
रदः॥ एष्टव्यो धर्मपरमः प्रजापालनतत्परः॥ धीरो मर्षी शुचिस्तीक्ष्णः काले पुरुषकालवित्॥ शुश्रू
षुः श्रुतवान्श्रोता ऊहापोहविशारदः॥ मेधावी धारणायुक्तो यथान्यायोपपादकः॥ दांतः सदा प्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाषी क्षमावांश्च विपर्यये ॥ दानशीलः स्वयंकाली साध्वाचारः सुदर्शनः ॥ आर्तहस्तप्रदो नित्यमाप्तामात्यो नये रतः ॥ नाहं
वादी न निर्द्वन्द्वो न यत्किंचनकारकः ॥ चरतेचः प्रजावेक्षी धर्मार्थकुशलः सदा ॥ राजा शौण्डे यो कीर्पाष्टए यो तादृशो
भवेत् ॥ यथा चैव मनुष्येंद्र सर्वेषु पारणीर्हतां ॥ अन्वेष्टव्याः सुपुरुषाः सहाया राज्यधारणे ॥ नावमानयितव्याश्च राज्ञा
वृद्धिमभीप्सता ॥ योधाः समरशौंडीराः कृतज्ञाः शास्त्रकोविदाः ॥ धर्मशास्त्रसमायुक्ताः पदातिजनसंरताः ॥ अर्थमा
न विवृद्धाश्च रथचर्याविशारदाः ॥ इष्वस्त्रकुशला यस्य तस्येयं नृपते मही ॥ सर्वसंग्रहणे युक्तो नृपो भवति यः सदा ॥
उत्थानशीलो मित्राढ्यः स राजा राजसत्तमः ॥ शक्या ह्यश्वसहस्रेण वीरारोहेण भारत ॥ संगृहीतमनुष्येण कृत्स्ना
जेतुं वसुंधरा ॥ ॥ शांतौ राजधर्मेश्वर्षिसंवादे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ एवं शुना समान् भृत्यान् स्वस्थाने यो मही
पतिः ॥ नियोजयति कृत्येषु स राज्यफलमश्नुते ॥ न श्वा संस्थानमुत्क्रम्य प्रमाणमभिसत्कृतः ॥ आरोप्यः श्वा स्वकात्स्था
दुत्क्रम्यान्यवमाधपति ॥ स्वजातिगुणसंपन्नाः स्वेस्वे कर्मण्यवस्थिताः ॥ प्रकर्तव्या बुधा भृत्या नास्थाने प्रक्रियाक्षमाः
अनुरूपाणि कर्माणि भृत्येभ्यो यः प्रयच्छति ॥ स भृत्यगुणसंपन्नो राजा फलमुपाश्नुते ॥ शरभः शरभस्थाने सिंहः
सिंह इवोर्जितः ॥ व्याघ्रो व्याघ्र इव स्थाप्यो द्वीपी द्वीपी यथा तथा ॥ कर्मस्विहानुरूपेषु न्यस्या भृत्या यथाविधि ॥ प्रति
लोमं न भृत्यास्ते स्थाप्याः कर्मफलैषिणः ॥ यः प्रमाणमतिक्रम्य प्रतिलोमं नराधिपः ॥ भृत्यान्स्थापयते बुद्धिर्न स रं १३४

जयते प्रजाः ॥ न बालिशा न च क्षुद्रा नाप्राज्ञा नाजितेंद्रियाः ॥ नाकुलीना नराः पार्श्वे स्थाप्या राज्ञा गुणैषिणा ॥ साधवः
कुशलाः शूरा ज्ञानवंतोनसूयकाः ॥ अक्षुद्राः शुचयो दक्षाः स्युर्नराः पारिपार्श्वकाः ॥ न्यग्भूतास्तत्पराः क्षांताश्चौक्षाः
प्रकृतिजैः शुभैः ॥ स्वस्थानान्युपसृष्टा ये ते स्यू राज्ञो बहिश्चराः ॥ सिंहस्य सततं पार्श्वे सिंह एव जनो भवेत् ॥ असिं
हः सिंहसितः सिंहैः सिंहवल्लभते फलं ॥ यस्तु सिंहः श्वभिः कीर्णः सिंहकर्मफले रतः ॥ न स सिंहफलं भोक्तुं शक्तः श्वभिरु
पासितः ॥ एवमेतैर्मनुष्येंद्र शूरैः प्राज्ञैर्बहुश्रुतैः ॥ कुलीनैः सह शक्येत कृत्स्ना जेतुं वसुंधरा ॥ नावैद्यो नानृजुः पार्श्वे
नाप्राज्ञो ना महाधनः ॥ संग्राह्यो वसुधापालैर्भृत्यो भृत्यवतां वर ॥ बाणवद्विसृता यांति स्वामिकार्यपरा नराः ॥ ये भृत्याः
पार्थिवपरास्तेषां सांत्वं प्रयोजयेत् ॥ कोशश्च सततं रक्ष्यो यत्नमास्थाय राजभिः ॥ कोशमूला हि राजानः कोशवृद्धिकरो
भवेत् ॥ कोष्ठागारं च ते नित्यं स्फीतं धान्यैः सुसंवृतं ॥ सदास्तु सत्सु संन्यस्तं धनधान्यपरो भव ॥ नित्ययुक्ताश्च ते भृत्या
भवंतु रणकोविदाः ॥ वाजिनां च प्रयोगेषु वैशारद्यमिहेष्यते ॥ ज्ञातिबंधुजनावेक्षी मित्रसंबंधिसंवृतः ॥ पौरकार्यहि
तान्वेषी भव कौरवनंदन ॥ एषा ते नैष्ठिकी बुद्धिः प्रज्ञा च विहिता मया ॥ शुनो निदर्शनं तात किं भूयः श्रोतुमिच्छसि ॥ ॥
शांतौ राजधर्मेश्वर्षिसंवादः संवादः समाप्तः ॥ ॥ युधिष्ठिर उवाच ॥ ॥ राजवृत्तान्यनेकानि त्वया प्रोक्तानि भारत ॥ पू
र्वैः पूर्वनियुक्तानि राजधर्मार्थवेदिभिः ॥ तदेव विस्तरेणोक्तं पूर्वैर्दृष्टं सतां मतं ॥ प्रणयं राजधर्माणां प्रतिब्रूहि भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्षभ॥ ॥भीष्म उवाच॥ ॥रक्षणं सर्वभूतानामिति क्षात्रं परं मतं॥ तद्यथा रक्षणं कुर्यात्तथा शृणु महीपते॥ यथा बर्हा
णि चित्राणि बिभर्ति भुजगाशनः तथा बहुविधं राजा रूपं कुर्वीत धर्मवित्॥ तैक्ष्ण्यं जिह्मत्वमादान्त्यं सत्यमार्जवमेव
च॥ मध्यस्थः सत्वमातिष्ठंस्तथा वै सुखमृच्छति॥ यस्मिन्नर्थे हितं यत्स्यात्तद्वर्णं रूपमादिशेत्॥ बहुरूपस्य राज्ञो हि सू
क्ष्मोप्यर्थो न सीदति॥ नित्यं रक्षितमंत्रः स्याद्यथा मूकः शरच्छिखी॥ श्लक्ष्णाक्षरतनुः श्रीमान्भवेच्छास्त्रविशारदः
॥आपद्द्वारेषु युक्तः स्याज्जलप्रस्रवणेष्विव॥ शैलवर्षोदकानीव द्विजान्सिद्धान्समाश्रयेत्॥ अर्थकामः शिखां राजा
कुर्याद्धर्मध्वजोपमां॥ नित्यमुद्यतदंडः स्यादाचरेदप्रमादतः॥ लोके चायव्ययौ दृष्ट्वा बृहद्वृक्षमिवास्रवन्॥ मृजावान्स्या
त्स्वयूथेषु भौमानि चरणैः क्षिपेत्॥ जातपक्षः परिस्पंदेत्प्रेक्षेद्वैकल्यमात्मनः॥ दोषान्विवृणुयाच्छत्रोः परपक्षान्वि
धूनयेत्॥ काननेष्विव पुष्पाणि बहिरर्थान्समाचरेत्॥ उच्छ्रितानाश्रयेत्स्फीतान्नरेंद्रानचलोपमान्॥ श्रयेच्छायामविज्ञा
तां गुप्तं शरणमाश्रयेत्॥ प्रावृषीवासितग्रीवो मज्जेत निशि निर्जने॥ मायूरेण गुणेनैवं स्त्रीभिश्चालक्षितश्चरेत्॥ न ज
ह्याच्च तनुत्राणं रक्षेदात्मानमात्मना॥ चारभूमिष्वभिगतान्पाशांश्च परिवर्जयेत्॥ प्रणयेद्वापि तां भूमिं प्रणश्येद्ग
हने पुनः॥ हन्यात्क्रुद्धानतिविषान्जिह्मगतयोहिताः॥ नाशयेद्बलबर्हाणि सन्निवासान्निवासयेत्॥ सदा बर्हिनि
भः कामं प्रसक्तकृतमाचरेत्॥ सर्वतश्चाददेत्प्रज्ञां पतंगान्गहनेष्विव॥ एवं मयूरवद्राजा स्वराष्ट्रं परिपालयेत्॥ आ १२५

त्मवृद्धिकरीं नीतिं विदधीत विचक्षणः॥ आत्मसंयमनं बुद्ध्या परबुद्ध्यावधारणं॥ बुद्ध्या चात्मगुणप्राप्तिरेतच्छास्त्रनिदर्शनं॥
परं विश्वासयेत्साम्ना स्वशक्तिं चोपलक्षयेत्॥ आत्मनः परिमर्षेण बुद्धिं बुद्ध्या विचारयेत्॥ सांत्वयोगमतिः प्राज्ञः का
र्याकार्यप्रयोजकः॥ निगूढबुद्धेर्धीरस्य वक्तव्ये वाग्गते तथा॥ संनिकृष्टां कथां प्राज्ञो यदि बुद्ध्या बृहस्पतिः॥ स्वभाव
मेष्यते तप्तं कृष्णायसमिवोदके॥ अनुयुंजीत कृत्यानि सर्वाण्येव महीपतिः॥ आगमैरुपदिष्टानि स्वस्य चैव परस्य
च॥ मृदुं क्रूरं तथा प्राज्ञं शूरं चार्थविधानवित्॥ स्वकर्मणि नियुंजीत ये चान्ये वचनाधिकाः॥ अथ दृष्ट्वा नियुक्तानि
स्वानुरूपेषु कर्मसु॥ सर्वांस्ताननुवर्तेत स्वरांस्तंत्रीरिवायता॥ धर्माणामविरोधेन सर्वेषां प्रियमाचरेत्॥ ममाय
मिति राजा यः स पर्वत इवाचलः॥ व्यवसायं समाधाय सूर्यो रश्मिमिवायतां॥ धर्ममेवाभिरक्षेत कृत्वा तुल्ये प्रि
याप्रिये॥ कुलप्रकृतिदेशानां धर्मज्ञान्मृदुभाषिणः॥ मध्ये वयसि निर्दोषान्हिते युक्तान्जितेंद्रियान्॥ अलुब्धांश्च
शिक्षितान्दांतान्धर्मेषु परिनिष्ठितान्॥ स्थापयेत्सर्वकार्येषु राजा धर्मार्थरक्षिणः॥ एतेन च प्रकारेण कृत्स्नानामाग
तिं गतिं॥ युक्तः समनुतिष्ठेत तुष्टश्चारैरुपस्कृतः॥ अमोघक्रोधहर्षस्य स्वयं कृत्यान्ववेक्षिणः॥ आत्मप्रत्ययकोषस्य
वसुदेव वसुंधरा॥ व्यक्तश्चानुग्रहो यस्य यथार्थश्चापि निग्रहः॥ गुप्तात्मा गुप्तराष्ट्रश्च स राजा राजधर्मवित्॥ नित्यं
राष्ट्रमवेक्षेत गोभिः सूर्य इवोदितः॥ चारान्नुचरान्विद्यात्तथा बुद्ध्या स्वयं चरेत्॥ कालप्राप्तमुपादद्यान्नार्थं राजा
च प्रसूचयेत्॥ अहन्यहनि संदुह्यान्महीं गामिव बुद्धिमान्॥ यथा क्रमेण पुष्पेभ्यश्चिनोति मधु षट्पदः॥ तथा द्रव्यमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म० पारायराजा कुर्वीत संचयं ॥ यद्धि गुप्तावशिष्टं स्याद्वित्तं तद्धर्मकामयोः ॥ संचयान्विसर्गी स्याद्राजा शास्त्रविदात्मवान् ॥
१३६ नार्थमल्पं परिभवेन्नावमन्येत शात्रवान् ॥ बुध्यानुबुध्येदात्मानं न चाबुद्धिषु विश्वसेत् ॥ धृतिर्दाक्ष्यं संयमो बुद्धिरा
त्मा शौर्य्यं धैर्यं देशकालौ प्रमादः ॥ अल्पस्य वा महतो वापि वृद्धौ धनस्यैतान्यष्टसमिंधनानि ॥ अग्निःस्तोकं वर्द्धते ह्या
ज्यसिक्तं बीजं चैकं रोहसहस्रमेति ॥ आयव्ययौ विपुलौ सन्निशाम्य तस्माद्दन्यं नावमन्येत वित्तं ॥ बालोप्यबालः स्थ
विरो रिपुर्यः सदा प्रमत्तं पुरुषं निहन्यात् ॥ कालेनान्यस्तस्य मूलं हरेत कालज्ञाता पार्थिवानां वरिष्ठः ॥ हरेत्कीर्तिं ध
र्ममस्योपरुंध्यादर्थे दीर्घं वीर्यमस्योपहन्यात् ॥ रिपुर्दुष्टो बलवा बली वा तस्माच्छत्रौ नैव हीयेद्यतात्मा ॥ क्षयं शत्रोः सं
चयं पालनं वा बुध्या प्रभौ संहितौ सर्वकामौ ॥ ततश्चान्यन्मतिमान्संदधीत तस्माद्राजा बुद्धिमंतं श्रयेत् ॥ बुद्धिर्दीप्ता ब
लवंतं हि नस्ति बलं बुध्या पाल्यते वर्द्धमानं ॥ शत्रुर्बुध्या वर्द्धते सीदमानो बुद्धेः पश्चात्कर्म यत्तत्प्रशस्तं ॥ सर्वान्कामान्का
मयानो हि धीरः सत्वेनाल्पेनाप्नुते हीनदोषः ॥ यश्चात्मानं प्रार्थयते प्रमाणैः श्रियः पात्रं पूरयते ह्यनल्पं ॥ तस्माद्राजा
प्रगृहीतः प्रजासु मूलं लक्ष्म्याः सर्वशो ह्याददीत ॥ दीर्घकालमपि संपीड्यमानो विद्युत्संपातमपि वानोर्जितः स्या
त् ॥ विघातयेद्वा विपुलं धनं वा येनाल्पव्यवसायेन शक्यं ॥ बुध्या यत्नं विवसति देहवत्सु तस्माद्विद्वान्नावमन्येत देहं ॥
लुब्धं हन्यात्संप्रदानेन नित्यं लुब्धस्तृप्तः परवित्तस्य नैति ॥ सर्वो लुब्धः कर्मगुणोपभोगे योर्थैर्हीनो धर्मकामौ जहाति ॥
धनं भोग्यं पुत्रदानं समृद्धिं धनं लुब्धः प्रार्थयते परेषां ॥ लुब्धे दोषाः संभवंतीह सर्वे तस्माद्राजा न प्रगृह्णीत लुब्धा १३६

न् ॥ संदर्शनेन पुरुषं जघन्यमपि चोदयेत् ॥ आरंभान्द्विषतां प्राज्ञः सर्वार्थांस्तु प्रसूदयेत् ॥ धर्माचितेषु विज्ञाता मंत्री गुप्तश्च
पांडव ॥ आप्तो राजन्कुलीनश्च पर्याप्तो राजसंग्रहे ॥ विधिप्रयुक्तान्नरदेव धर्मान्युक्तान्समासेन निबोध बुध्या ॥ इमान्विदध्या
द्व्यभिरक्षेत्स्य यो वै राजा महीं पालयितुं सशक्तः ॥ अनीतिजं यस्य विधानजं सुखं हठात्प्रणीतं विधिवत्प्रदृश्यते ॥ न विद्यते तस्य गति
र्महीपते न विद्यते राष्ट्रजमुत्तमं सुखं ॥ धनैर्विशिष्टान्मतिशीलपूजितान्गुणोपपन्नान्युधि दृष्टविक्रमान् ॥ गुणैश्च दृष्ट्वान
चिरादिवात्मवान्नयतो निसंधाय निहंति शात्रवान् ॥ पश्येदुपायान्विविधैः क्रियापथैर्न चानुपायेन मतिं निवेशयेत् ॥ श्रियं
विशिष्टां विपुलं यशो धनं न दोषदर्शी पुरुषः समश्नुते ॥ प्रीतिप्रवृत्तौ विनिवर्तितौ यथा सुहृत्सु विज्ञाय निवृत्य चोभयोः ॥ यदे
व मित्रं गुरुभारमावहेत्तदेव सुस्निग्धमुदाहरेद्बुधः ॥ एतान्मयोक्तांश्चर राजधर्मान्नृणां च गुप्तौ मतिमादधत्स्व ॥ अवाप्स्य
से पुण्यफलं सुखेन सर्वो हि लोको नृप धर्ममूलः ॥ ॥ इति शांतौ राजधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अयं पितामहेनोक्तो रा
२ जधर्मः सनातनः ॥ ईश्वरश्च महान्दंडो दंडे सर्वं प्रतिष्ठितं ॥ देवतानामृषीणां च पितॄणां च महात्मनां ॥ यक्षरक्षःपिशाचानां
साध्यानां च विशांपते ॥ सर्वेषां प्राणिनां लोके तिर्यक्षु पि निवासिनां ॥ सर्वव्यापी महातेजा दंडः श्रेयानिति प्रभो ॥ इत्येतदुक्तं भ
वता दंडे वै सचराचरं ॥ पश्यता लोकमासक्तं ससुरासुरमानुषं ॥ एतदिच्छाम्यहं श्रोतुं तत्वेन भरतर्षभ ॥ को दंडः कीदृशो दं
डः किंरूपः किंपरायणः ॥ किमात्मकः कथंभूतः कथंमूर्तिः कथं प्रभो ॥ जागर्ति हि कथं दंडः प्रजाः स्ववहितात्मकः ॥ कश्च पूर्वाप
रमिदं जागर्ति परिपालयन् ॥ कश्च विज्ञायते पूर्वं को वरो दंडसंज्ञितः ॥ किंसंस्थश्च भवेद्दंडः का वास्य गतिरुत्तमा ॥ ॥ भी
ष्म उवाच ॥ ॥ शृणु कौरव्य यो दंडो व्यवहारो यथा च सः ॥ यस्मिन्हि सर्वमायत्तं स दंड इति केवलः ॥ धर्मसंख्या महाराजव्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वहानइहेष्यते॥ तस्यलोपः कथं न स्याल्लोके व्यवहितात्मनः॥ इत्येवं व्यवहारस्य व्यवहारत्वमिष्यते॥ अपि चैतत्पुरा राजन्मनुना प्रो
क्तमादितः॥ सुप्रणीतेन दंडेन प्रियाप्रियसमात्मना॥ प्रजा रक्षति यः सम्यग्धर्म एव स केवलः॥ यथोक्तमेतद्वचनं प्रागेव मनु
ना पुरा॥ यन्मयोक्तं मनुष्येंद्र ब्रह्मणो वचनं महत्॥ प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः॥ व्यवहारस्य चाख्यानाद्व्यवहार
इहोच्यते॥ दंडे त्रिवर्गः सततं सुप्रणीते प्रवर्त्तते॥ दैवं हि परमो दंडो रूपतोग्निरिवोच्छ्रितः॥ नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भु
जः॥ अष्टपान्नैकनयनः शंकुकर्णोर्ध्वरोमवत्॥ जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः॥ एतद्रूपं बिभर्त्युग्रं दंडो नित्यं दुरा
धरः॥ असिर्धनुर्गदा शक्तिस्त्रिशूलं मुद्गरः शरः॥ मुशलं परशुश्चक्रं पाशो दंडर्ष्टितोमराः॥ सर्वप्रहरणीयानि संति यानि
हि कानिचित्॥ एवं दंडः स सर्वात्मा लोके चरति मूर्तिमान्॥ भिंदंश्छिंदन्रुजन्कृंतन्दारयन्पाटयंस्तथा॥ घातयन्नभि
धावंश्च दंड एवं चरत्युत॥ असिर्विशसनो धर्मस्तीक्ष्णाकर्मा दुराधरः॥ श्रीगर्भो विजयः शास्ता व्यवहारः प्रजागरः॥ शास्त्रं
ब्राह्मणा मंत्राश्च शास्ता प्राग्वदतां वरः॥ धर्मपालोक्षरो देवः सत्यगो नित्यगो ग्रहः॥ असंगो रुद्रतनयो मनुर्ज्येष्ठः शिवं
करः॥ नामान्येतानि दंडस्य कीर्तितानि युधिष्ठिर॥ दंडो हि भगवान्विष्णुर्यज्ञो नारायणः प्रभुः॥ शश्वद्रूपं महद्बिभ्रन्महापु
रुष उच्यते॥ तथोक्ता ब्रह्मकन्येति लक्ष्मीर्वृत्तिः सरस्वती॥ दंडनीतिर्जगद्धात्री दंडो हि बहुविग्रहः॥ अर्थानर्थौ सुखं दुःखं
धर्माधर्मौ बलाबलौ॥ दौर्भाग्यं भागधेयं च पुण्यापुण्ये गुणागुणौ॥ कामाकामावृतुर्मासः शर्वरी दिवसः क्षणः॥ अप्रमादः १२८
प्रमादश्च हर्षक्रोधौ शमो दमः॥ दैवं पुरुषकारश्च मोक्षामोक्षौ भयाभये॥ हिंसाहिंसे तपो यज्ञः संयमोथ विषाविषे॥ अं

तश्चादिश्च मध्यं च कृत्यानां च प्रपंचनं॥ मदः प्रमादो दर्पश्च दंभो धैर्यं नयानयौ॥ अशक्तिः शक्तिरित्येवं मानस्तंभो व्ययाव्ययौ॥
विनयश्चापि सर्गश्च लोकालोकश्च भारत॥ अनृतं ज्ञानिता सत्यं श्रद्धाश्रद्धे तथैव च॥ क्लीबता व्यवसायश्च लाभालाभौ जया
जयौ॥ तीक्ष्णता मृदुता मृत्युरागमानागमौ तथा॥ विरोधश्चाविरोधश्च कार्याकार्ये बलाबले॥ असूया चानसूया च धर्मा
धर्मौ तथैव च॥ अपत्रपानपत्रपा ह्रीश्च संपद्विपच्च ह॥ तेजः कर्माणि पांडित्यं वाक्छक्तिस्तत्त्वबुद्धिता॥ एवं दंडस्य कौरव्य लो
केस्मिन्बहुरूपता॥ न स्याद्यदीह वै दंडः प्रमथेयुः परस्परं॥ भयाद्दंडस्य नान्योन्यं घ्नंति चैव युधिष्ठिर॥ दंडेन रक्ष्यमाणा
हि राजन्नहः प्रजाः॥ राजानं वर्द्धयंतीह तस्माद्दंडः परायणं॥ व्यवस्थापयति क्षिप्रमिमं लोकं नरेश्वर॥ सत्ये व्यवस्थितो धर्मो
ब्राह्मणेष्ववतिष्ठते॥ धर्मयुक्ता द्विजश्रेष्ठा वेदयुक्ता भवंति च॥ बभूव यज्ञो वेदेभ्यो यज्ञः प्रीणाति देवताः॥ प्रीताश्च देवता
नित्यमिंद्रे परिवदंत्युत॥ अन्नं ददाति शक्रश्चाप्यनुगृह्णन्निमाः प्रजाः॥ प्राणाश्च सर्वभूतानां नित्यमन्ने प्रतिष्ठिताः॥ तस्मात्प्र
ति जाः प्रतिष्ठंते दंडो जागर्ति तासु च॥ एवं प्रयोजनश्चैव दंडः क्षत्रियतां गतः॥ रक्षन्प्रजाः प्रजागर्ति नित्यं सुविहितोक्षरः॥ ईश्व
रः पुरुषः प्राणः सत्वं वित्तं प्रजापतिः॥ भूतात्मा जीव इत्येव नामभिः प्रोच्यतेष्टभिः॥ अदद्दंडमेवास्मै ध्रुवमैश्वर्यमि
व च॥ बलेनापि च संयुक्तः सदा पंचविधात्मकः॥ कुलं बहुधनामात्याः प्रज्ञा प्रोक्ता बलानि तु॥ आहार्यमष्टकैर्द्रव्यैर्बल
मन्यद्युधिष्ठिर॥ हस्तिनोश्वा रथाः पत्तिर्नावो विष्टिस्तथैव च॥ देशिकाश्चारिकाश्चैव तदष्टांगबलं स्मृतं॥ अथवांग
स्य युक्तस्य रथिनो हस्तिसादिनः॥ अश्वारोहाः पदाताश्च मंत्रिणो रसदाश्च ये॥ भिक्षुकाः प्राड्विवाकाश्च मौहूर्ता दै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वचिंतका ।। कोषो मित्राणि धान्यं च सर्वोपकरणानि च ।। सप्तप्रकृति चाष्टांगं शरीरमिह यद्विदुः ।। राज्य दंडमेवांगं दंडः प्रभ
व एव च ।। ईश्वरेण प्रयत्नेन कारणात्क्षत्रियस्य च ।। दंडो दत्तः समानात्मा दंडो हीदं सनातनं ।। राज्ञां पुण्यतमो नान्यो यथाध
र्मप्रदर्शितिः ।। ब्रह्मणा लोकरक्षार्थं स्वकमस्थापनाय च ।। भर्त्तृप्रत्यय उत्पन्नो व्यवहारस्तथापरः ।। तस्माद्यः सहितो दृष्टो
भर्त्तृप्रत्यय एव च ।। दंडप्रत्ययदृष्टोपि व्यवहारात्मकः स्मृतः ।। व्यवहारः स्मृतो यश्च स वेदविषयात्मकः ।। यश्च वेदप्रसूता
त्मा स धर्मो गुणदर्शनः ।। धर्मप्रत्यय उद्दिष्टो यथाधर्मकृतात्मभिः ।। व्यवहारः प्रजागोप्ता ब्रह्मदृष्टो युधिष्ठिर ।। त्रीन्धा
रयति लोकान्वै सत्यात्मा भूतिवर्द्धनः ।। यश्च दंडः स दृष्टो नो व्यवहारः सनातनः ।। व्यवहारश्च दृष्टो यः स धर्म इति नः श्रुतं ।। य
श्च वेदः स वै धर्मो यश्च धर्मः स सत्पथः ।। ब्रह्मा पितामहः पूर्वं बभूवाथ प्रजापतिः ।। लोकानां स हि सर्वेषां ससुरासुरराक्षसां ।।
समनुष्योरगवतां कर्त्ता चैव स भूतकृत् ।। ततो नो व्यवहारोयं भर्तृप्रत्ययलक्षणः ।। तस्मादिदमथोवाच व्यवहारनिदर्श
नं ।। माता पिता च भ्राता च भार्या चाथ पुरोहितः ।। नादंड्यो विद्यते राज्ञो यः स्वधर्मे न तिष्ठति ।। ।। इति शांतौ राजधर्मे ।। ।।
भीष्म उवाच ।। ।। अत्राप्युदाहरंतीममितिहासं पुरातनं ।। अंगेषु राजा द्युतिमान्वसुहोम इति श्रुतः ।। स राजा धर्मवान्नि
त्यं सह पत्न्या महातपाः ।। मुंजपृष्ठं जगामाथ देवर्षिगणपूजितं ।। तत्र शृंगे हिमवतो मेरौ कनकपर्वते ।। यत्र मुंजा
वटे रामो जटाहरणमादिशत् ।। तदा प्रभृति राजेंद्र ऋषिभिः शंसितव्रतैः ।। मुंजपृष्ठ इति प्रोक्तः स देशो रुद्रसेवितः ।। स
तत्र बहुभिर्युक्तस्तदा श्रुतमयैर्गुणैः ।। ब्राह्मणानामनुमतो देवर्षिसदृशोभवत् ।। तं कदाचिददीनात्मा सखा शक्रस्य मा १३८

नितः ।। अभ्यगच्छन्महीपालो मांधाता शत्रुकर्षणः ।। सोपसृत्य तु मांधाता वसुहोमं नराधिपं ।। सद्भिराचरितं पूर्वं य
थावदनुयायिनं ।। अपृच्छद्वसुहोमस्तं राजन्किं करवाणि ते ।। सोब्रवीत्परमप्रीतो मांधाता राजसत्तमः ।। वसुहोमं महा
प्राज्ञमासीनं कुरुनंदनं ।। ।। मांधातोवाच ।। ।। बृहस्पतेर्मतं राजन्नधीतं सकलं त्वया ।। तथैवौशनसं शास्त्रं विज्ञातं
ते नरोत्तम ।। तदहं ज्ञातुमिच्छामि दंड उत्पद्यते कथं ।। किंवास्य पूर्वं जागर्त्ति किं वा परममुच्यते ।। कथं क्षत्रियसंस्थश्च
दंडः संप्रत्यवस्थितः ।। ब्रूहि मे तं महाप्राज्ञ ददाम्याचार्यवेतनं ।। ।। वसुहोम उवाच ।। ।। शृणु राजन्यथा दंडः संभूतो
लोकसंग्रहः ।। प्रजाविनयरक्षार्थं धर्मस्यात्मा सनातनः ।। ब्रह्मा पियक्षुर्भगवान्सर्वलोकपितामहः ।। ऋत्विजं ना
त्मनात्तुल्यं ददर्शेति नः श्रुतं ।। स गर्भं शिरसा देवो वर्षपूगानधारयत् ।। पूर्णे वर्षसहस्रे तु स गर्भः क्षुवतोपतत् ।।
स क्षुपो नाम संभूतः प्रजापतिररिंदम ।। ऋत्विगासीत्तदा राजन्यज्ञे तस्य महात्मनः ।। तस्मिन्प्रवृत्ते सत्रे तु ब्र
ह्मणः पार्थिवर्षभ ।। हृष्टरूपप्रधानत्वाद्दंडोंतर्हितोभवत् ।। तस्मिन्नंतर्हिते चापि प्रजानां संकरोभवत् ।। नै
व कार्यं न चाकार्यं भोज्याभोज्यं न विद्यते ।। पेयापेये कुतः सिद्धिर्हिंसंति च परस्परं ।। गम्यागम्यं तदा नासीत्प
रस्वं स्वं च वै समं ।। परस्परं विलुंपंति सारमेया इवामिषं ।। अबलान्बलिनो जघ्नुर्निर्मर्यादमवर्तत ।। ततः पि
तामहो विष्णुं भगवंतं सनातनं ।। संपूज्य वरदं देवं महादेवमथाब्रवीत् ।। अत्र सा त्वनुकंपार्थे कर्त्तुमर्हसि केश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व॥ संकरो न भवेदत्र यथा तत्संविधीयतां॥ ततः स भगवान्ध्यात्वा चिरं शूलवरायुधः॥ आत्मनात्मानमात्मना दंडमसृजये
द्देवसत्तमः॥ तस्माच्च धर्मचरणान्नीतिर्देवी सरस्वती॥ ससर्ज दंडनीतिं सा त्रिषु लोकेषु विश्रुतं॥ भूयः स भगवा
न्ध्यात्वा चिरं शूलवरायुधः॥ तस्य तस्य निकायस्य चकारैकैकमीश्वरं॥ देवानामीश्वरं चक्रे॥ देवं दशशतेक्षणं॥ यमं वै
वस्वतं चापि पितृणामकरोत्प्रभुं॥ रत्नसुवर्णेश्वरमथो तेजसां च हुताशनं॥ रुद्राणामपि चेशानं गोप्तारं विदधे प्रभुं॥
महात्मानं महादेवं विशालाक्षं सनातनं॥ वसिष्ठमीशं विप्राणां वसूनां जातवेदसं॥ तेजसां भास्करं चक्रे नक्षत्रा
णां निशाकरं॥ वीरुधामंशुमंतं च भूतानां च प्रभुं वरं॥ कुमारं द्वादशभुजं स्कंदं राजानमादिशत्॥ कालं सर्वेशम
करोत्संहारविनयात्मकं॥ मृत्योश्च तु विभागस्य दुःखस्य च सुखस्य च॥ ईश्वरः सर्वदेवस्तु राजराजो नराधिपः॥ स
र्वेषामेव रुद्राणामिति नः श्रुतिः॥ तमेनं ब्रह्मणः पुत्रमनुजातं क्षुपं ददौ॥ प्रजानामधिपं श्रेष्ठं सर्वधर्मभृतामपि॥
महादेवस्ततस्तस्मिन्वृत्ते यज्ञे यथाविधि॥ दंडं धर्मस्य गोप्तारं विष्णवे सत्कृतं ददौ॥ विष्णुरंगिरसे प्रादादंगिरा मु
निसत्तम॥ प्रादादिंद्रमरीचिभ्यां मरीचिर्भृगवे ददौ॥ भृगुर्ददावृषिभ्यस्तु तं दंडं धर्मसंहितं॥ ऋषयो लोकपा
लेभ्यो लोकपालाः क्षुपाय तु॥ क्षुपस्तु मनवे प्रादादादित्यतनयाय वै॥ पुत्रेभ्यः श्राद्धदेवस्तु सूक्ष्मधर्मार्थ
कारणात्॥ विभज्य दंडः कर्तव्यो धर्मेण न यदृच्छया॥ दुष्टानां निग्रहो दंडो हिरण्यं बाह्यतः क्रिया॥ व्यंग १३९

तं च शारीरस्यं वधो नाल्पस्य कारणात्॥ शरीरपीडास्तास्ताश्च देहत्यागो विवासनं॥ तं ददौ सूर्यपुत्राय मनवे रक्षणात्मकं॥
आनुपूर्व्याच्च दंडोसौ प्रजा जागर्ति पालयन्॥ इंद्रो जागर्ति भगवानिंद्रादग्निर्विभावसुः॥ अग्नेर्जागर्ति वरुणो वरुणाच्च
प्रजापतिः॥ प्रजापतेस्ततो धर्मो जागर्ति विनयात्मकः॥ धर्माच्च ब्रह्मणः पुत्रो व्यवसायः सनातनः॥ व्यवसायास्ततस्तेजो जा
गर्ति परिपालयन्॥ ओषध्यस्तेजसस्तस्मादोषधिभ्यश्च पर्वताः॥ पर्वतेभ्यश्च जागर्ति रसो रसगुणास्तथा॥ जागर्ति नि
र्ऋतिर्देवी ज्योतींषि निर्ऋतेरपि॥ वेदाः प्रतिष्ठा ज्योतिर्भ्यस्ततो हयशिराः प्रभुः॥ ब्रह्मा पितामहस्तस्माज्जागर्ति प्रभुरव्य
यः॥ पितामहान्महादेवो जागर्ति भगवाञ्छिवः॥ विश्वेदेवाः शिवाच्चापि विश्वेभ्यश्च तथर्षयः॥ ऋषिभ्यो भगवान्सोमः सो
माद्देवाः सनातनाः॥ देवेभ्यो ब्राह्मणा लोके जाग्रतीत्युपधारय॥ ब्राह्मणेभ्यश्च राजन्या लोकान्रक्षंति धर्मतः॥ स्था
वरं जंगमं चैव क्षत्रियेभ्यः सनातनं॥ प्रजा जाग्रति लोकेस्मिन्दंडो जागर्ति तासु च॥ सर्वसंक्षिपते दंडः पिताम
हसमप्रभः॥ जागर्ति कालः पूर्वे च मध्ये चांते च भारत॥ ईश्वरः सर्वलोकस्य महादेवः प्रजापतिः॥ देवदेवः शिवः शर्वो
जागर्ति सततं प्रभुः॥ कपर्दी शंकरो रुद्रो भवः स्थाणुरुमापतिः॥ इत्येष दंडो विख्यात आदौ मध्ये तथा परे॥ भूमिपा
लो यथान्यायं वर्तेतानेन धर्मवित्॥ ॥भीष्म उवाच॥ ॥इतीदं वसुहोमस्य शृणुयाद्यो मतं नरः॥ श्रुत्वा च सम्यग्वर्ते
त स कामानाप्नुयान्नृपः॥ इति ते सर्वमाख्यातं यो दंडो मनुजर्षभ॥ नियंता सर्वलोकस्य धर्माक्रांतस्य भारत॥ ॥इ
ति श्रीशांतौ राजधर्मे दंडोत्पत्तिः॥ ॥युधिष्ठिर उवाच॥ ॥तात धर्मार्थकामानां श्रोतुमिच्छामि निश्चयं॥ लोकया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चाहिकार्त्स्न्येन विचक्षते पुनरिति स्थिता॥ धर्मार्थकामाः किंमूलास्त्रयाणां प्रभवश्च कः॥ अन्योन्यं चानुषज्जंते वर्तंते च पृथक्पृथक्॥ ॥भी
ष्म उवाच॥ ॥यदा ते स्युः सुमनसो लोके धर्मार्थनिश्चये॥ कालप्रभवसंस्थासु सज्जंते च त्रयस्तदा॥ धर्ममूलस्तु देहोर्थः का
मोर्थफलमुच्यते॥ संकल्पमूलास्ते सर्वे संकल्पो विषयात्मकः॥ विषयाश्चैव कार्त्स्न्येन सर्वआहारसिद्धये॥ मूलमेतत्त्रि
वर्गस्य निवृत्तिर्मोक्ष उच्यते॥ धर्माच्छरीरसंगुप्तिर्धर्मार्थं चार्थ इष्यते॥ कामो रतिफलश्चात्र सर्वे चैते रजस्वलाः॥ संनिकृ
ष्टांश्चरेदेतान्न चैतान्मनसा त्यजेत्॥ विमुक्तस्तपसा सर्वान्धर्मादीन्कामनैष्ठिकान्॥ श्रेष्ठबुद्धिस्त्रिवर्गस्य यदयं प्राप्नु
यान्नरः॥ बुध्या बुद्धिरिहार्थेषु तदत्तानि कृष्णया॥ अपध्यानमलो धर्मो मलोर्थस्य निगूहनं॥ संप्रमोदमलः कामो
भूयः स्वगुणवर्जितः॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ कामंदस्य च संवादमंगिरिष्टस्य चोभयोः॥ कामंदमृषीमा ए
सीनमभिवाद्य जनाधिपः॥ अंगारिष्ठोथ पप्रच्छ कृत्वा समयपर्ययं॥ यः पापं कुरुते राजा काममोहबलात्कृतः॥ प्रत्यासन्नस्य
तस्यर्षे किं स्यात्तापप्रणाशनं॥ अधर्मं धर्म इति यो ज्ञानादाचरेन्नरः॥ तं चापि प्रथितं लोके कथं राजानुवर्तयेत्॥ ॥का
मंद उवाच॥ ॥यो धर्मार्थौ परित्यज्य काममेवानुवर्तते॥ स धर्मार्थपरित्यागात्प्रज्ञानाशमिहेच्छति॥ प्रज्ञाप्रणाशको
मोहस्तथा धर्मार्थनाशकः॥ तस्मान्नास्तिकता चैव दुराचारश्च जायते॥ दुराचारान्यदा राज्ञः प्रदुष्टान्न नियच्छति॥ तस्मा
दुद्विजते लोकः सर्पाद्वेश्मगतादिव॥ तं प्रजा नानुवर्तंते ब्राह्मणा न च साधवः॥ अतः संक्षयमाप्नोति तथा वध्यत्वमेव च॥
अपध्वस्तस्त्ववमतो दुःखं जीवति जीवितं॥ जीवेच्च यदपध्वस्तस्तच्छुद्धं मरणं भवेत्॥ अत्रैतदाहुराचार्याः पापस्य परि

गर्हणं॥ सेवितव्यास्त्रयी नित्यं सत्कारो ब्राह्मणेषु च॥ महामना भवेद्धर्मे विवहेच्च महाकुले॥ ब्राह्मणांश्चापि सेवेत क्षमायु
क्तान्मनस्विनः॥ जपेदुदकशीलः स्यात्सततं सुखमास्थितः॥ धर्मान्वितान्संविशेद्बहिष्कृत्य हि दुष्कृतीन्॥ प्रसादये
थ न्मधुरया वाचाप्यथ कर्मणा॥ इत्यस्मीति वदेन्नित्यं परेषां कीर्तयन्गुणान्॥ अपापो ह्येवमाचारः क्षिप्रं बहुमतो भवे
त्॥ पापान्यपि हि कृच्छ्राणि शमयेन्नात्र संशयः॥ गुरवो हि परं धर्मं यद्ब्रूयुस्तत्तथा कुरु॥ गुरूणां हि प्रसादाद्धि श्रेयः प
रममवाप्स्यसि॥ ॥इति शांतौ राजधर्मे कामंदांगरिष्ठसंवादः॥ ॥युधिष्ठिरः॥ ॥इमे जना नरश्रेष्ठ प्रशंसंति सदा
भुवि॥ धर्मस्य शीलमेवादौ ततो मे संशयो महान्॥ यदि तच्छक्यमस्माभिर्ज्ञातुं धर्मभृतां वर॥ श्रोतुमिच्छामि तत्सर्वं य भि
थैतदुपलभ्यते॥ कथं नु प्राप्यते शीलं श्रोतुमिच्छामि भारत॥ किंलक्षणं च तत्प्रोक्तं ब्रूहि मे वदतां वर॥ ॥भीष्म उवाच॥
॥पुरा दुर्योधनेनेह धृतराष्ट्राय भारत॥ आख्यातं तप्यमानेन श्रियं दृष्ट्वा तथागतां॥ इंद्रप्रस्थे महाराज तव सभ्रातृकस्य
ह॥ सभायां चावहसनं तत्सर्वं शृणु भारत॥ भवतस्तां सभां दृष्ट्वा समृद्धिं चाप्यनुत्तमां॥ दुर्योधनस्तदासीनः सर्वं पित्रे न्य
वेदयत्॥ श्रुत्वा हि धृतराष्ट्रोपि दुर्योधनवचस्तदा॥ अब्रवीत्कर्णसहितं दुर्योधनमिदं वचः॥ ॥धृतराष्ट्र उवाच॥ ॥
किमर्थं तप्यसे पुत्र श्रोतुमिच्छामि तत्त्वतः॥ श्रुत्वा त्वामनुनेष्यामि यदि सम्यग्भविष्यति॥ यया त्वं महदैश्वर्यं प्राप्तः पर
पुरंजय॥ किंकरा भ्रातरः सर्वे मित्रसंबंधिनस्तथा॥ आच्छादयसि प्रावारानश्नासि पिशितौदनं॥ आजानेया वहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थिराः केनासि हतिनः कृशाः ॥ दुर्योधन उवाच ॥ ॥ दृष्ट्वा तानि सहस्राणि स्नातकानां महात्मनां ॥ भुंजते रुक्मपात्रीषु
युधिष्ठिरनिवेशने ॥ दृष्ट्वा च तां सभां दिव्यां दिव्यपुष्पफलान्वितां ॥ अश्वांस्तित्तिरिकल्माषान् रत्नानि विविधानि च ॥
दृष्ट्वा तां पांडवेयानां ऋद्धिमिंद्रोपमां शुभां ॥ अमित्राणां सुमहतामनुशोचामि मानद ॥ ॥ धृतराष्ट्र उवाच ॥ ॥
यदीच्छसि श्रियं तात याद्दृशी सा युधिष्ठिरे ॥ विशिष्टां वा नरव्याघ्र शीलवान् भव पुत्रक ॥ शीलेन हि त्रयो लोकाः
शक्या जेतुं न संशयः ॥ नहि किंचिदसाध्यं हि लोके शीलवतां भवेत् ॥ एकरात्रेण मांधाता त्र्यहेण जनमेजय ॥ सप्त
रात्रेण नाभागः पृथिवीं प्रतिपेदिरे ॥ एते हि पार्थिवाः सर्वे शीलवंतो दयान्विताः ॥ अतस्तेषां गुणक्रीता वसुधा स्वयमा
गता ॥ ॥ दुर्योधन उवाच ॥ ॥ कथं तत्प्राप्यते शीलं श्रोतुमिच्छामि तत्त्वतः ॥ येन शीलेन संप्राप्ताः क्षिप्रमेते वसुंधरां ॥
॥ ॥ धृतराष्ट्र उवाच ॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ नारदेन पुरा प्रोक्तं शीलमाश्रित्य भारत ॥ प्र
ह्लादेन हृतं राज्यं महेंद्रस्य महात्मनः ॥ शीलमाश्रित्य दैत्येन त्रैलोक्यं च वशीकृतं ॥ ततो बृहस्पतिं शक्रः प्रांजलिः
समुपस्थितः ॥ उवाच च महाप्राज्ञः श्रेय इच्छामि वेदितुं ॥ ततो बृहस्पतिस्तस्मै ज्ञानं नैःश्रेयसं परं ॥ कथयामास
भगवान् देवेंद्राय कुरूद्वह ॥ एतावच्छ्रेय इत्येव बृहस्पतिरभाषत ॥ इंद्रस्तु भूयः पप्रच्छ को विशेषो भवेदिति ॥ ॥
बृहस्पतिरुवाच ॥ ॥ विशेषोऽस्ति महांस्तात भार्गवस्य महात्मनः ॥ अत्रागमय भद्रं ते भूय एव नरर्षभ ॥ आत्म १४१

नस्तु ततः श्रेयो भार्गवात्सुमहातपाः ॥ ज्ञानमागमयत्प्रीत्या पुनः स परमद्युतिः ॥ तेनापि समनुज्ञातो भार्गवेण महात्म
ना ॥ श्रेयोऽस्तीति पुनर्भूयः शुक्रमाह शतक्रतुः ॥ भार्गवस्त्वाह सर्वज्ञः प्रह्लादस्य महात्मनः ॥ ज्ञानमस्ति विशेषेणेत्यु
क्तो हृष्टश्चाभवत् ॥ स ततो ब्राह्मणो भूत्वा प्रह्लादं पाकशासनः ॥ गत्वा प्रोवाच मेधावी श्रेय इच्छामि वेदितुं ॥ प्रह्लादू
स्त्वब्रवीद्विप्रं क्षणो नास्ति द्विजर्षभ ॥ त्रैलोक्यराज्यसक्तस्य ततो नोपदिशामि ते ॥ ब्राह्मणस्त्वब्रवीद्राजन् यस्मिन्काले
क्षणो भवेत् ॥ ततोपदिष्टमिच्छामि यदा वर्यमनंतरं ॥ ततः प्रीतोऽभवद्राजा प्रह्लादो ब्रह्मवादिनः ॥ तथेत्युक्त्वा क्षणे
काले ज्ञानतत्त्वं ददौ तव ॥ ब्राह्मणोऽपि यथान्यायं गुरुवृत्तिमनुत्तमां ॥ चकार सर्वभावेन यथावन्मनसेच्छति ॥ एष
श्रुतेन बहुशः प्राप्तं कथमरिंदम ॥ त्रैलोक्यराज्यं धर्मज्ञ कारणं तद्ब्रवीमि ते ॥ प्रह्लादोऽपि महाराज ब्राह्मणं वाक्य
मब्रवीत् ॥ ॥ प्रह्लाद उवाच ॥ ॥ नासूयामि द्विजान् विप्र राजास्मीति कदाचन ॥ काव्यानि वदतां तेषां संयच्छामि व
हामि च ॥ ते विस्रब्धाः प्रभाषंते संयच्छंति च मे सदा ॥ ते मां काव्यपथे युक्तं शुश्रूषुमनसूयकं ॥ धर्मात्मानं जितक्रोधं
नियतं संयतेंद्रियं ॥ समासिंचंति शास्तारः क्षौद्रं मध्विव मक्षिकाः ॥ सोऽहं वागग्रविद्यानां रसानामवलेहिता ॥ स्व
जात्या नधितिष्ठामि नक्षत्राणीव चंद्रमाः ॥ एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमं ॥ यद्ब्राह्मणमुखे काव्यमेतच्छ्रुत्वा
प्रवर्तते ॥ एतावच्छ्रेय इत्याह प्रह्लादो ब्रह्मवादिनं ॥ शुश्रूषितस्तेन तदा दैत्येंद्रो वाक्यमब्रवीत् ॥ यथावद्गुरुवृत्त्या तु प्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोऽस्मि द्विजसत्तम॥ वरं वृणीष्व भद्रं ते प्रदातास्मि न संशयः॥ कृतमित्येव देवेंद्रमुवाच स वै द्विजः॥ प्रह्लादस्त्वब्रवीत्प्रीतो वरः प्रतिगृह्य
तां वरं इत्युत॥ ॥ब्राह्मण उवाच॥ ॥यदि राजन् प्रसन्नस्त्वं मम चेदिच्छसि हितं॥ भवतः शीलमिच्छामि प्राप्तुमेष वरो मम॥
ततः प्रीतस्तु दैत्येंद्रो भयं चास्याभवन्महत्॥ वरे प्रदिष्टे विप्रेण नाल्पतेजा अयमित्युत॥ एवमस्त्विति तं प्राह प्रह्लादो विस्मित
स्तदा॥ उपाहृत्य तु विप्राय वरं दुःखान्वितोऽभवत्॥ दत्ते वरे गते विप्रे चिंतासीन्महती तदा॥ प्रह्लादस्य महाराज निश्चयं न च
जग्मिवान्॥ तस्य चिंतयतस्तात छायाभूतं महाद्युतिं॥ तेजो विग्रहवत्तात शरीरमजहात्तदा॥ तमपृच्छन्महाकायं प्रह्लादः
को भवानिति॥ प्रत्याह ननु शीलोऽस्मि त्यक्तो गच्छाम्यहं तदा॥ तस्मिन् द्विजोत्तमे राजन् वत्स्याम्यहमनिंदितं॥ योऽसौ शिष्य
त्वमागम्य त्वयि नित्यं समाहितः॥ इत्युक्त्वांतर्हितं तद्वै शक्रं चानुविवेश प्रभो॥ ॥तस्मिंस्तेजसि याते तु तादृग्रूपस्ततोऽपरः॥ श
रीरान्निःसृतस्तस्य को भवानिति चाब्रवीत्॥ धर्मं प्रह्लाद मां विद्धि यत्रासौ द्विजसत्तमः॥ तत्र यास्यामि दैत्येंद्र यतः शी
लं ततो ह्यहं॥ ततोऽपरो महाराज प्रज्वलन्निव तेजसा॥ शरीरान्निःसृतस्तस्य प्रह्लादस्य महात्मनः॥ को भवानिति पृष्टश्च
तमाह स महाद्युतिः॥ सत्यमस्म्यसुरेंद्राग्र्य यास्येऽहं धर्ममन्विह॥ तस्मिन्ननुगते धर्मं पुरुषे पुरुषोऽपरः॥ निश्चक्रा
म ततस्तस्मात्पृष्टश्चाह महात्मना॥ वृत्तं प्रह्लाद मां विद्धि यतः सत्यं ततो ह्यहं॥ तस्मिन् गते महाशब्दः शरीरात्तस्य निर्ययौ॥
पृष्टश्चाह बलं विद्धि यतो वृत्तमहं ततः॥ इत्युक्त्वा च ययौ तत्र यतो वृत्तं नराधिप॥ ततः प्रभामयी देवी शरीरात्तस्य निर्ययौ॥ १४२

तमपृच्छत्स दैत्येंद्रः सा श्रीरित्येनमब्रवीत्॥ उषितास्मि सुखं वीर त्वयि सत्यपराक्रम॥ त्यक्ता त्वया गमिष्यामि बलं यत्र ततो
ह्यहं॥ ततो भयं प्रादुरासीत्प्रह्लादस्य महात्मनः॥ अपृच्छत्स ततो भूयः क्व यासि कमलालये॥ सत्यव्रता त्वं हि देवि लोकस्य
परमेश्वरि॥ कश्चासौ ब्रह्मणश्रेष्ठस्तत्त्वमिच्छामि वेदितुं॥ ॥श्रीरुवाच॥ ॥शक्रोऽब्रह्मचारी यस्त्वत्तश्चैवोपशिक्षितः॥
त्रैलोक्ये ते यदैश्वर्यं तत्तेनापहृतं प्रभो॥ शीलेन हि त्रयो लोकास्त्वया धर्मज्ञ निर्जिताः॥ तद्विज्ञाय महेंद्रेण तव शीलं हृतं
प्रभो॥ धर्मः सत्यं तथा वृत्तं बलं चैव तथा ह्यहं॥ शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशयः॥ ॥भीष्म उवाच॥ ॥एवमुक्त्वा
गता श्रीस्तु ते च सर्वे युधिष्ठिर॥ दुर्योधनस्तु पितरं भूय एवाब्रवीदिदं॥ शीलस्य तत्त्वमिच्छामि वेत्तुं कौरवनंदन॥ प्राप्य
ते च यथा शीलं तमुपायं वदस्व मे॥ ॥धृतराष्ट्र उवाच॥ ॥सोपायं पूर्वमुद्दिष्टं प्रह्लादेन महात्मना॥ संक्षेपेण तु शी
लस्य शृणु प्राप्तिं नराधिप॥ अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा॥ अनुग्रहश्च दानं च शीलमेतत्प्रशस्यते॥ य
दन्येषां हितं न स्यादात्मनः कर्म पौरुषं॥ अपत्रपेत वा येन न तत्कुर्यात्कथंचन॥ तत्तु कर्म तथा कुर्याद्येन श्लाघ्येत संसदि॥
शीलं समासेनैतत्ते कथितं कुरुसत्तम॥ यद्यप्यशीला नृपते प्राप्नुवंति श्रियं क्वचित्॥ न भुंजते चिरं तात समूलाश्च न संति
ते॥ धृतराष्ट्र उवाच॥ ॥एतद्विदित्वा तत्त्वेन शीलवान् भव पुत्रक॥ यदीच्छसि श्रियं तात विशिष्टां युधिष्ठिर॥ ॥भीष्म उवाच॥ सु
॥एतत्कथितवान् पुत्रे धृतराष्ट्रो नराधिपः॥ एतत्कुरुष्व राजेंद्र ततः प्राप्स्यसि तत्फलं॥ ॥इति राजधर्मे शीलवर्णनं नाम॥ ॥युधि
ष्ठिर उवाच॥ ॥शीलं प्रधानं पुरुषे कथितं ते पितामह॥ कथमाशा समुत्पन्ना या च सा तद्वदस्व मे॥ संशयो मे महानेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य समुत्पन्न पितामह ॥ छेत्ता चैतान्योऽस्ति त्वत्तः परपुरंजय ॥ पितामह आशा महती ययासिद्धिः सुयोधने ॥ प्राप्ते युध्येतु यद्युक्तं तत्कर्तव्य
मिति प्रभो ॥ सर्वस्याशा सुमहती पुरुषस्योपजायते ॥ तस्यां विहन्यमानायां दुःखो मृत्युरसंशयः ॥ सोऽहं हताशो दुर्बुद्धिः कृतस्तेन दुरा
त्मना ॥ धार्तराष्ट्रेण राजेंद्र पश्य मंदात्मतां मम ॥ आशां महत्तरीं मन्ये पर्वतादपि साद्रुमात् ॥ आकाशादपि वा राजन्नप्रमेयैव
वा पुनः ॥ एषा चैव कुरुश्रेष्ठ दुर्विचिंत्या सुदुर्लभा ॥ दुर्लभत्वाच्च पश्यामि किमन्यद्दुर्लभं ततः ॥ ॥ भीष्म उवाच ॥ ॥ अत्र ते वर्तयिष्यामि
युधिष्ठिर निबोध मे ॥ इतिहासं सुमित्रस्य निर्वृत्तमृषभस्य च ॥ सुमित्रो नाम राजर्षिर्हैहयो मृगयां गतः ॥ ससार स मृगं वि
द्ध्वा बाणेनानतपर्वणा ॥ स मृगो बाणमादाय ययावमितविक्रमः ॥ स च राजा बली तूर्णं ससार मृगमंतिकात् ॥ ततो निम्नं
स्थलं चैव स मृगोऽद्रवदाशुगः ॥ मुहूर्तमेव राजेंद्र समेन स पथा गतः ॥ ततः स राजा तारुण्यादौरसेन बलेन च ॥ ससा
र बाणासनभृत्सखड्गो सतलत्रवान् ॥ ततो नदीर्नदांश्चैव पल्वलानि वनानि च ॥ अतिक्रम्याभ्यतिक्रम्य ससारैव वने
चरः ॥ स तु काममृगो राजन्नासाद्यासाद्य तं नृपं ॥ पुनरभ्येति जवनो जवेन महता ततः ॥ ततः स बाणैर्बहुभिः समभ्यस्तो व
नेचरः ॥ प्रक्रीडन्निव राजेंद्र पुनरभ्येति चांतिकं ॥ पुनश्च जवमास्थाय जवनो मृगयूथपः ॥ अतीत्यातीत्य राजेंद्र पुनर
भ्येति चांतिकं ॥ तस्य मर्मच्छिदं घोरं सुमित्रोऽमित्रकर्शनः ॥ समाधाय शरश्रेष्ठं कार्मुकात्समवासृजत् ॥ ततो गव्यूतिमा
त्रेण मृगयूथपयूथपः ॥ तस्य बाणपथं मुक्त्वा तस्थिवान्प्रहसन्निव ॥ तस्मिन्निपतिते बाणे क्रमोज्ज्वलिततेजसि ॥ प्रवि
वेश महारण्यं मृगो राजाप्ययाद्द्रुतं ॥ ॥ शांतौ राजधर्मे ऋषभगीतासु ॥ ॥ भीष्म उवाच ॥ ॥ प्रविश्य तु महारण्यं १४३

तापसानामथाश्रमं ॥ आससाद ततो राजा श्रांतश्चोपाविशत्तदा ॥ तं कार्मुकधरं दृष्ट्वा श्रमार्तं क्षुधितं तदा ॥ समेत्य ऋषयस्तस्मि
न्पूजां चक्रुर्यथाविधि ॥ स पूजामृषिभिर्दत्तां प्रतिगृह्य नराधिपः ॥ अपृच्छत्तापसान्सर्वांस्तपसो वृद्धिमुत्तमां ॥ ते तस्य रा
ज्ञो वचनं प्रतिगृह्य तपोधनाः ॥ ऋषयो राजशार्दूलमपृच्छन्प्रयोजनं ॥ केन भद्र सुखार्थेन संप्राप्तोऽसि तपोवनं ॥ पदा
तिर्बद्धनिस्त्रिंशो धन्वी बाणी नरेश्वर ॥ एतदिच्छामहे ज्ञातुं कुतः प्राप्तोऽसि मानद ॥ कस्मिन्कुले च जातस्त्वं किंनामा वासि
ब्रूहि नः ॥ ततः स राजा सर्वेभ्यो द्विजेभ्यः पुरुषर्षभ ॥ आचख्यौ तद्यथान्यायं परिचर्यां च भारत ॥ हैहयानां कुले जातः सु
मित्रो मित्रनंदनः ॥ चरामि मृगयूथानि निघ्नन्बाणैः सहस्रशः ॥ बलेन महता गुप्तः सामात्यः सावरोधनः ॥ मृगस्तु वि
द्धो बाणेन मया सरति शल्यवान् ॥ तं द्रवंतमनु प्राप्तो वनमेतद्यदृच्छया ॥ भवत्सकाशं नष्टश्रीर्हताशः श्रमकर्षितः ॥
किंनु दुःखमतोऽन्यद्वै यदहं श्रमकर्षितः ॥ भवतामाश्रमं प्राप्तो हताशो भ्रष्टलक्षणः ॥ न राजलक्षणत्यागो न पु
रस्य तपोधनाः ॥ दुःखं करोति तत्तीव्रं यथाशा विहता मम ॥ हिमवान्वा महाशैलः समुद्रो वा महोदधिः ॥ मह
त्वान्नान्वपद्येतां नभसो नांतरं यथा ॥ आशायास्तपसि श्रेष्ठास्तथा नांतमहं गतः ॥ भवतां विदितं सर्वं सर्वज्ञा हि त
पोधनाः ॥ भवंतः सुमहाभागास्तस्मात्पृच्छामि संशयं ॥ आशावान्पुरुषो यः स्यादंतरिक्षमथापि वा ॥ किं
नु ज्यायस्तरं लोके महत्त्वात्प्रतिभाति वः ॥ एतदिच्छामि तत्त्वेन श्रोतुं किमिह दुर्लभं ॥ यदि गुह्यं तपोनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यानवाप्य कृतमाचिरं ॥ नहि गृह्यत नं श्रोतुमिच्छामि द्विजपुंगवाः ॥ भवंतयो विद्याता गायदिस्याद्विनमेततः ॥ यदि
वक्ति कथा योगो योयं प्रश्नो ममेरितः ॥ एतत्कारणसामग्र्यं श्रोतुमिच्छामितत्वतः ॥ सर्वतो हि तपोनिया ब्रूयु
रेतत्समविताः ॥ ॥ शांतौ राजधर्मे ऋषभगीतासु ॥ ॥ भीष्म उवाच ॥ ॥ ततस्तेषां समस्तानां मृषीणाम्मृ
षिसत्तमः ॥ ऋषभो नाम विप्रर्षिर्विस्मयन्निदमब्रवीत् ॥ पुराहं राजशार्दूल तीर्थान्यनुचरन्प्रभो ॥
समासादितवान्दिव्यं नरनारायणाश्रमं ॥ यत्र सा बदरी रम्या ह्रदो वैहायसो तथा ॥ यत्र चाश्वशिरा रा
जन्वेदान्पठति शाश्वतान् ॥ तस्मिन्सरसि कृत्वाहं विधिवत्तर्पणं पुरा ॥ पितॄणां देवतानां च ततो श्रममियां
तदा ॥ रेमाते यत्र तौ नित्यं नरनारायणावृषी ॥ अदूराद् आश्रमं कंचिद्वासार्थमगमं ततः ॥ तत्र चीराजिनधरं कृ
शमुच्चमतीव च ॥ अद्राक्षमृषिमायांतं तनुं नाम तपोधनं ॥ अन्यैर्नरैर्महाबाहो वपुषाष्टगुणान्वितं ॥ कृ
शता चापि राजर्षे न दृष्टा तादृशी क्वचित् ॥ ""शरीरमपि राजेंद्र तस्य कानिष्ठिकासमं ॥ ग्रीवा बाहू तथा पा
दौ केशाश्चाद्भुतदर्शनाः ॥ शिरः कायानुरूपं च कर्णौ नेत्रे तथैव च ॥ तस्य वाक् चैव चेष्टा च सामान्ये राजसत्तमः ॥
दृष्ट्वाहं तं कृशं विप्रं भीतः परमदुर्मनाः ॥ पादौ तस्याभिवाद्याहं स्थितः प्रांजलिरग्रतः ॥ निवेद्य नाम गोत्रं च १५५

पितरं च नरर्षभ ॥ प्रदिष्टे चासने तेन शनैरहमुपाविशं ॥ ततः स कथयामास कथां धर्मार्थसंहितां ॥ ऋषि
मध्ये महाराज तनुर्धर्मभृतां वरः ॥ तस्मिंस्तु कथयत्येव राजा राजीवलोचनः ॥ उपायाज्जववेनाश्वैः सबलः सा
वरोधनः ॥ स्मरन्पुत्रमरण्ये वै नष्टं परमदुर्मनाः ॥ भूरिद्युम्नसुतं राजा वीरद्युम्नो महायशाः ॥ इह द्रक्ष्या
मि तं पुत्रं द्रक्ष्यामीहेति पार्थिवः ॥ एवमाशाकृतो राजा चरन्वनमिदं पुरा ॥ दुर्लभः स मया द्रष्टुं नूनं परम
धार्मिकः ॥ एकः पुत्रो महारण्ये नष्ट इत्यसकृत्तदा ॥ दुर्लभः स मया द्रष्टुमाशा च महती मम ॥ तया परीत
गात्रो हं मुमूर्षुर्नात्र संशयः ॥ एतच्छ्रुत्वा तु भगवांस्तनुर्मुनिवरोत्तमः ॥ अवाक्शिरा ध्यानपरो मुहूर्तमिव
तस्थिवान् ॥ तमनुध्यांतमालक्ष्य राजा परमदुर्मनाः ॥ उवाच वाक्यं दीनात्मा मंदं मंदमिवासकृत् ॥ दुर्ल
भं किं नु देवर्षे आशायाश्चैव किं महत् ॥ ब्रवीतु भगवानेतद्यदि गुह्यं न ते मयि ॥ ॥ मुनिरुवाच ॥ ॥ म
हर्षिर्भगवांस्तेन पूर्वमेव विमानितः ॥ बालिशां बुद्धिमास्थाय मंदभाग्यतयात्मनः ॥ अर्थयन्कलशं
राजन्कांचनं वल्कलानि च ॥ निर्विण्णः सर्वशो नापि न संपादितवांस्ततः ॥ निर्विस्मयस्तु राजर्षिर्निराशः
समपद्यत ॥ एवमुक्ताभिवाद्याथ तमृषिं लोकपूजितं ॥ श्रांतो वसीदद्धर्मात्मा यथा त्वं नरसत्तमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्घ्यं ततः समानीय पाद्यं चैव महानृषिः ॥ आरण्येनैव विधिना राज्ञे सर्वं न्यवेदयत् ॥ ततस्ते मुनयः सर्वे प
रिवार्य नरर्षभं ॥ उपाविशन्पुरस्कृत्य सप्तर्षय इवा ध्रुवं ॥ अपृच्छंश्चैव तं तत्र राजानमपराजितं ॥ प्रयोज
नमिदं सर्वं आश्रमस्य निवेशने ॥ ॥ शांतौ राजधर्मे ॥ ॥ राजोवाच ॥ ॥ वीरद्युम्न इति ख्यातो राजाहं भू
म्नं सुतं नष्टमन्वेष्टुं वनमागतः ॥ एकः पुत्रः स विप्राग्र्य बाल एव च मेनघ ॥ न दृश्यते वने चास्मिंस्तमन्वेष्टुं च
राम्यहं ॥ ॥ ऋषभ उवाच ॥ ॥ इत्येवमुक्ते वचने राज्ञा मुनिरधोमुखः ॥ तूष्णीमेवाभवत्तत्र न च प्रत्युक्तवा
न्नृपं ॥ स हि तेन पुरा विप्रो राज्ञा नात्यर्थमानितः ॥ आशाकृतश्च राजेंद्र तपो दीर्घं समास्थितः ॥ प्रतिग्रहम
हं राज्ञां न करिष्ये कदाचन ॥ अन्येषां चैव वर्णानामिति कृत्वा धियं पथा ॥ आशा हि पुरुषं बालं लालापयति
ते स्थिती ॥ तामहं व्यपनेष्यामीति कृत्वा व्यवस्थितः ॥ ॥ राजोवाच ॥ ॥ आशायाः किं कृशत्वं च किं चेह भुवि दुर्ल
भं ॥ ब्रवीतु भगवानेतत्त्वं हि सर्वार्थदर्शिवान् ॥ ॥ ऋषभ उवाच ॥ ॥ ततः संस्मृत्य तत्सर्वं स्मारयिष्य
न्निवाब्रवीत् ॥ राजानं भगवान्विप्रस्ततः कृशतनुस्तथा ॥ ॥ ऋषिरुवाच ॥ ॥ कृशत्वेन समं राजन्ना
शायां विद्यते नृप ॥ तस्यै वै दुर्लभत्वाच्च प्रार्थितः पार्थिवा मया ॥ ॥ राजोवाच ॥ ॥ कृशाकृशे मयाब्र

ह्मन्गृहीते वचनात्तव ॥ दुर्लभत्वं च तस्यैव वेदवाक्यमिव द्विज ॥ संशयस्तु महाप्राज्ञ संजातो हृदये मम ॥
तन्मुने मम तत्त्वेन वक्तुमर्हसि पृच्छतः ॥ त्वत्तः कृशतरं किं तु ब्रवीतु भगवानिदं ॥ यदि गुह्यं न ते किंचिद्विद्य
ते मुनिसत्तम ॥ ॥ कृशोउवाच ॥ ॥ दुर्लभोप्यथवा नास्ति योर्थी धृतिमवाप्नुयात् ॥ सुदुर्लभतरस्तात यो
र्थिनं नावमन्यते ॥ संश्रुत्य नोपक्रियते परं शक्त्या यथार्हतः ॥ सक्ता या सर्वभूतेषु साशा कृशतरी मया ॥
कृतघ्नेषु च या सक्ता नृशंसेष्वलसेषु च ॥ अपकारिषु या सक्ता साशा कृशतरी मया ॥ एकपुत्रः पिता
पुत्रे नष्टे वा प्रोषिते पि वा ॥ प्रवृत्तिं यो न जानाति साशा कृशतरी मया ॥ प्रसवे चैव नारीणां वृद्धानां पुत्रकारि
ता ॥ तथा नरेंद्र धनिनां साशा कृशतरी मया ॥ प्रदानकांक्षिणीनां च कन्यानां वयसि स्थिते ॥ श्रुत्वा क
था तथायुक्ताः साशा कृशतरी मया ॥ एतच्छ्रुत्वा ततो राजन्स राजा सावरोधनः ॥ संस्पृश्य पादौ शिरसा
निपपात द्विजर्षभ ॥ ॥ राजोवाच ॥ ॥ प्रसादये त्वां भगवन्पुत्रेणेच्छामि संगमं ॥ यदेतदुक्तं भव
ता संप्रति द्विजसत्तम ॥ सत्यमेतदसंदेहं मिथ्या पाव्याहृतं मया ॥ ॥ ऋषिरुवाच ॥ ॥ ततः प्रहस्य भ
गवांस्तनुर्धर्मभृतां वरः ॥ पुत्रमस्यानयत्क्षिप्रं तपसा च श्रुतेन च ॥ स समानाय्य पुत्रं तु तमुपाल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्म०

१४६ भ्य पार्थिवा॥ आत्मानं दर्शयामास धर्मो धर्मभृतां वर॥ स दर्शयित्वा चात्मानं दिव्यमद्भुतदर्शनं॥ विपाप्मा
विरातङ्को धर्म्मश्चचार वनमंतिकात्॥ एतद्दृष्टं मया राजंस्तत्र श्रवचनं श्रुतं॥ आशामपनयस्वाद्य ततः क्षत्रात
मिमं॥ ॥भीष्म उवाच॥ ॥सुमित्रोपनयस्वि प्रमाशी कृशातरी ततः॥ स तथोक्तस्तदा राजन् ऋषभेण मा
हात्मना॥ एवं त्वमपि कौंतेय श्रुत्वा वाणीमिमां मम॥ स्थिरो भव यथा चायं हिमवान्पर्वतोत्तमः॥ त्वं हि प्रष्टा
च श्रोता च कृच्छ्रेष्वनुगतेष्वपि॥ श्रुत्वा मम महाराज न संतप्तुमिहार्हसि॥ ॥शांतौ राजधर्मे॥ ॥ऋष
भगीतासमाप्ता॥ ॥युधिष्ठिर उवाच॥ ॥नामृतस्येव पर्याप्तिर्ममास्ति ब्रुवति त्वयि॥ पथ्याहि स्वात्मवृ
त्तिस्थस्तस्मात्तृप्तिं न भारत॥ तस्मात्कथय भूयस्त्वं धर्ममेव पितामह॥ न हि तृप्तिं प्रपायामि पिबन्नमृ
तमीदृशं॥ ॥भीष्म उवाच॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ गौतमस्य च संवादं यमस्य
च महात्मनः॥ पारियात्रगिरिं प्राप्य गौतमस्याश्रमो महान्॥ उवास गौतमो यत्र कालं तमपि मे शृणु॥
षष्टिं वर्षसहस्राणि सोऽतप्यद्गौतमस्तदा॥ तमुग्रतपसा युक्तं भावितं सुमहामुनिं॥ उपयातो नरव्या
घ्र लोकपालो यमस्तदा॥ तमपश्यत्सुतपसमृषिर्वै गौतमं तदा॥ स तं विदित्वा ब्रह्मर्षिर्यममागतमो १४६

जसा॥ प्रांजलिः प्रयतो भूत्वा उपसृष्टस्तपोधनः॥ तं धर्मराजो दृष्ट्वैव नमस्कृत्य च द्विजर्षभं॥ न्यमंत्रयत धर्मेण क्रियतां
किमिति ब्रुवन्॥ ॥गौतम उवाच॥ ॥मातापितृभ्यामानृण्यं किं कृत्वा समवाप्नुयात्॥ कथं च लोकनामेति पुरुषो दु
र्लभाञ्शुचीन्॥ ॥यम उवाच॥ ॥तपःशौचवता नित्यं सत्यधर्मरतेन च॥ मातापित्रोरहरहः पूजनं कार्यमंजसा॥ अ
श्वमेधैश्च यष्टव्यं बहुभिः स्वाप्तदक्षिणैः॥ तेन लोकानवाप्नोति पुरुषोऽद्भुतदर्शनात्॥ ॥शांतौ राजधर्मे॥ ॥युधिष्ठि
र उवाच॥ ॥मित्रैः प्रहीयमाणस्य बहुमित्रस्य का गतिः॥ राज्ञः संक्षीणकोशस्य बलहीनस्य भारत॥ दुष्टामात्यसहा
यस्य श्रुतमंत्रस्य सर्वतः॥ राज्यात्प्रच्यवमानस्य गतिमन्यामपश्यतः॥ परचक्राभियातस्य परराष्ट्राणि मर्दतः॥ वि
ग्रहे वर्तमानस्य दुर्लभस्य बलीयसा॥ असंहितविहीनस्य देशकालावजानतः॥ अप्राप्यं च भवेत्सांत्वं भेदो वाप्यति
पीडनात्॥ जीवितं त्वर्थहेतुर्वा तत्र किं सुकृतं भवेत्॥ ॥भीष्म उवाच॥ ॥गुह्यं धर्मज्ञ मां पृच्छसि रतीव भरतर्षभ॥
अपृष्टो नोत्सहे वक्तुं धर्ममेतं युधिष्ठिर॥ धर्मो ह्यणीयान्वचनाद्बुद्धेश्च भरतर्षभ॥ श्रुत्वोपास्य सदाचारैः साधुर्भव
ति स कश्चित्॥ कर्मणा बुद्धिपूर्वेण भवत्याढ्यो न वा पुनः॥ तादृशोयं मनुः प्रश्नः संव्यवस्यस्त्वया धिया॥ उपाय धर्मं बहुलं या
त्रार्थं शृणु भारत॥ नाहमेतादृशं धर्मं बुभूषे धर्मकारणात्॥ दुःखादान इहह्येष स्यात्तु पश्चात्स्वयोपमः॥ अभिगम्य मतीता
हि सर्वसामेव निश्चयः॥ यथा यथा हि पुरुषो नित्यं शास्त्रमवेक्षते॥ तथा तथा विजानाति विज्ञानमथ रोचते॥ अविज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञानादयोगशास्त्रेभ्यो गोप्यति कनःपनः॥ अत्रो कमानो बचनं मनसूयुरिदं शृणु॥ राज्ञः कोशक्षयादेव जायते बलसंक्ष
यः॥ कोशं संजनयेद्राजा निर्जलेभ्यो यथा जलं॥ कालं प्राप्यानुगृह्णीयादेष धर्मोत्र सांप्रतं॥ उपायधर्मं प्राप्येमं पूर्वैराच
रितं जनैः॥ अन्यो धर्मः समर्थानामापत्स्वन्यश्च भारत॥ प्राक्कोशः प्रोच्यते धर्मो बुद्धिर्धर्माद्गरीयसी॥ धर्मं प्राप्य न्यायवृ
त्तिं न बलीयान्न विंदति॥ यस्माद्भूत्योपपत्तिर्वै कोशेनैव विधीयते॥ तस्मादापद्धर्मोपि श्रूयते धर्मलक्षणः॥ अधर्मो जा
यते तस्मिन्निति वै कवयो विदुः॥ अनंतरं क्षत्रियस्य तत्र किं विचिकित्ससि॥ यथास्य धर्मो न ग्लायेन्नेयाच्छत्रुवशं य
था॥ तत्कर्तव्यमिति प्राहुर्नात्मानमवसादयेत्॥ सर्वात्मनैव धर्मस्य परस्य न चात्मनः॥ सर्वोपायैरुज्जिहीर्षेदात्मानमि
ति निश्चयः॥ तत्र धर्मभृतां तात निश्चयो धर्मनैपुणं॥ उद्यमो नैपुणं क्षात्रे बाहुवीर्यादिति श्रुतिः॥ क्षत्रियो वृत्तिसंरो
धे कस्य नादातुमर्हति॥ अन्यत्र ब्राह्मणस्वाच्च तापसस्वाच्च भारत॥ यथा वै ब्राह्मणः सीदन्नयाज्यमपि याजयेत्॥ अ
भोज्यान्नानि चाश्नीयात्तथेदं नात्र संशयः॥ पीडितस्य किमद्वारमुत्पथो विधृतस्य वा॥ अद्वारतः प्रद्रवति यदा भव
ति पीडितः॥ तस्य कोशबलज्यानात्सर्वलोकपराभवः॥ भैक्ष्यचर्या न विहिता न विट्शूद्रस्य जीविका॥ स्वधर्मा
र्जो नंतरा वृत्तिर्यान्याननुपजीविनः॥ वहतः प्रथमं कल्पमनुकल्पेन जीवनं॥ आपद्गतेन धर्माणामन्यायेनोपजीवनं॥
अपि ह्येतद्ब्राह्मणेषु दृष्टं वृत्तिपरिक्षये॥ क्षत्रिये संशयः कस्मादित्येतन्निश्चितं सदा॥ आदीत विशिष्टेभ्यो नावसी १४७
यः

देत्कथंचन॥ हंतारं रक्षितारं च प्रजानां क्षत्रियं विदुः॥ तस्मात्संरक्षिता कार्यमादानं क्षत्रियबंधुना॥ अन्यत्र राजन्
हिंसाया वृत्तिर्नेहास्ति कस्यचित्॥ अप्यरण्यसमुत्थस्य एकस्य चरतो मुनेः॥ न शंखलिखितां वृत्तिं शक्यमास्थाय जी
वितुं॥ विशेषतः कुरुश्रेष्ठ प्रजापालनमीप्सया॥ परस्परेण संरक्ष्या राज्ञा राष्ट्रेण चापदि॥ नित्यमेव हि कर्तव्य ए
ष धर्मः सनातनः॥ राजा राष्ट्रं यथापत्सु द्रव्यौघैः परिरक्षति॥ राष्ट्रेण राजा व्यसने परिरक्ष्यस्तथा भवेत्॥ कोशं दंडं
बलं मित्रं यदन्यदपि संचितं॥ न कुर्वीतांतरं राष्ट्रे राजा परिगतः क्षुधा॥ बीजं भक्तेन संपाद्यमिति वेदविदो विदुः॥ अ
त्रैतद्वचनं स्वाहुर्मतामायस्य दर्शनं॥ धिक्तस्य जीवितं राज्ञो राष्ट्रं यस्यावसीदति॥ अवृत्याल्पमनुष्यो पि यो वै देशि
क एव च॥ राज्ञः कोशबलं मूलं कोशमूलं पुनर्बलं॥ तन्मूलं सर्वधर्माणां धर्ममूलाः पुनः प्रजाः॥ नान्यान पीडयि
त्वेह कोशः शक्यः कुतो बलं॥ तदर्थं पीडयित्वा च दोषं प्राप्तुं न सोर्हति॥ अकार्यमपि यज्ञार्थं क्रियते यज्ञकर्मसु॥
एतस्मात्कारणाद्राजा न दोषं प्राप्तुमर्हति॥ अर्थार्थमन्यद्भवति विपरीतमथापरं॥ अनर्थार्थमथाप्यन्यत्तत्सर्व
ह्यर्थकारणं॥ एवं बुध्वा संप्रपश्येन्मेधावी कार्यनिश्चयं॥ यज्ञार्थमन्यद्भवति यज्ञे नार्थस्तथापरः॥ यज्ञस्यार्थमि न्या
म नात्मसर्वं प्रत्तस्य साधनं॥ उपमां चात्र वक्ष्यामि धर्मतत्वप्रकाशिनीं॥ यूपं छिंदंति संज्ञार्थं तत्र ये परिपंथिनः॥ द्रु
माः केचन सामंता ध्रुवं छिंदंति तानपि॥ ते चापि निपतंतो न्यान्निघ्नंत्येव वनस्पतीन्॥ एवं कोशस्य महतो ये न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह नःपरिपंथिनः॥तानहं तान पश्यामि सिद्धिमत्र परंतप॥धनेन जयते लोकावुभौ परमिमं तथा॥सत्यं च धर्मवचनं य
थानास्य धनं तथा॥सर्वोपायैराददीत धनं यज्ञप्रयोजनं॥न तुल्यदोषः स्यादेवं कार्याकार्येषु भारत॥नोतौ सं
भवतो राजन्कदाचिदपि भारत॥न धरण्येषु पश्यामि धनवृद्धा नहं कचित॥यदिदं दृश्यते वित्तं पृथिव्या
मिह किंचन॥ममेदं स्यान्ममेदं स्यादित्येवं कांक्षते जनः॥न च राज्यसमो धर्मः कश्चिदस्ति परंतप॥धर्मः संश
ब्दितो राज्ञामापद्धर्ममतोन्यथा॥दानेन कर्मणा चान्ये तपसान्ये तपस्विनः॥बुध्या दाक्ष्येण चैवान्ये विन्वंति
धनसंचयान्॥अधनं दुर्बलं प्राहुर्धनेन बलवान्भवेत्॥सर्वं धनवतः प्राप्यं सर्वं तरति कोशवान्॥कोशाद्धर्म
श्च कामश्च परलोकस्तथा ह्ययं॥तच्च धर्मेण लिप्सेत नाधर्मेण कदाचन॥ ॥इति श्रीमहाभारते शांतिपर्व
णि राजधर्मः समाप्तः॥ ॥अस्याग्रे आपद्धर्म भविष्यति॥ग्रंथसंख्या॥ ५२८७॥ ॥ ॥ ॥ ॥
तस्य हरपुत्र विष्णुपंतैर्ना दत्तं भारतं॥

पर्व १२ व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.07.19 12:50
,TRANSFERRED=2019/07/20 at 14:45:22
,PAGES=150
,TYPE=STD
,NAME=S0001047
,Book Name=M-1994-RAJDHARM SHANTI PURVNEE
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection